CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वे.२८६

वैदिकदर्शनेषु ज्ञानम्

(Knowledge in Vedic Philosophies)

स्वामी आत्मानन्दपरमहंसः
नव्यन्यायाचार्यः, विद्यावारिधिः
एम० एस-सी०, पी-एच० डी० (गणितम्)
गंगातरंगः, नगवा, वाराणसी

Swami Atmananda Paramhans
Navyanyayacharya, Ph. D. (Neology)
M. Sc., Ph. D. (Maths.)
Gangatarang, Nagawa, Varanasi

राजप्रकाशनम्, वाराणसी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैदिकदर्शनेषु ज्ञानम्

(Knowledge in Vedic Philosophies)

लेखकः

स्वामी आत्मानन्दपरमहंसः

नव्यन्यायाचार्यः, विद्यावारिधिः;

एम० एस-सी०, पी-एच० डी० (गणितम्)

BHARATIYA
VIDYA PRAKASHAN
P. BOX 1108 KACHAURI GALI,
VARANASI-221001
CALL : 65965

राजप्रकाशनम्, वाराणसी

B. 1/148-1 क, Assi,

VARANASI-221005.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[Published with the financial assistance from the Ministry of Education and Social Welfare Government of India]

294.5921
ATM

© डॉ० स्वामी आत्मानन्दपरमहंसः
(पूर्णतोंशतो वा प्रकाशनस्यानुवादस्य चाधिकारो लेखकेन स्वायत्तीकृतः)

प्रथम संस्करणम् { संवत् २०३९
ई० १९८२ ख्रि०

मूल्यम् { भारते : ५५/- (पञ्चपञ्चाशद्रूप्यकमात्रम्)
विदेशे : U. S. $ 19.50

ल. 93298
क्र. 218

प्रकाशकः—राजप्रकाशनम्
बी० १/१५० ई० १ अस्सी, वाराणसी—२२१००५
Rajprakashanam
B. 1/150 E 1, Assi, Varanasi—221005
INDIA

B. 1/148-1 क, Assi,
VARANASI-221005.

मुद्रकः—तकनीकी मुद्रणालयः
५०-ए, बलरामपुर हाउस, इलाहाबाद—२११००२
भारतम्
Printed in India at
Takneeki Mudranalaya
50 A, Balrampur House
Allahabad—211 002

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीहनुमतेऽर्पणमस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञानात्मने भगवते नम ईश्वराय ।

(श्रीमद्भागवतम् ।८।३।१८।)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राक्कथनम्

महतो हर्षस्यैष विषयो यत्परमहंसस्य श्रीमत आत्मानन्दस्वामिनो विद्यावारिधित्वाधायकः शोधप्रबन्धोऽधुना केन्द्रीयशिक्षामन्त्रालयस्यार्थानुदानेन मुद्रणं प्राप्य सम्पन्नप्रायप्रकाशनो विद्यते । ग्रंथरूपं प्राप्नुवतः शोधप्रबन्धस्य ग्रन्थोचितं 'वैदिकदर्शनेषु ज्ञानम्' इति नामकरणं नितान्तमौचित्यमञ्चति । नाम्नो नूतनतया निर्धारणं ग्रंथे बहुत्र प्रबन्धेऽनन्तर्भूतानां नवीनविचाराणां समावेशेनापि साङ्गत्यमाश्रयते । निःसंशयमिदं वक्तुं शक्यं यदेतेषां नूतनविचाराणामन्तर्भावेन ग्रन्थस्य गाम्भीर्यमभिवृद्धि गतम् । पाठकानां ध्यानं तत्रानायासमाकृष्येतेति दृशाऽत्र तेषां संक्षिप्ता चर्चा तज्जिज्ञासूनां नूनं चेतश्चमत्काराय प्रभवेदिति मामिका मतिः ।

प्रस्तुतग्रन्थस्य कतिपयानि स्थलानि तत्स्थविषयसम्बद्धान् स्वामिनः स्वोपज्ञप्रायविचारान् वहन्ति, मनो हरन्ति मनीषिणाम् । प्रथमपरिच्छेदे 'ज्ञानमणु नित्यमात्मरूपं, तदीया प्रभा संकोचविकासशालिनी यया ज्ञानाणुरात्मा विषयान् गृह्णाति' इति मतं स्वामिना शास्त्रीयपद्धत्येदमभिदधता निराकृतं यदेतन्मतस्थापकेन यान्युपनिषद्वचनानि मनुवचनानि च स्वमतानुगुणतयोद्धृतानि तेषां ज्ञानप्रभायास्तत्संकोचविकासयोश्च प्रतिपादकता प्रयासेनाप्युपपादयितुमशक्या यत उद्धृतमौपनिषदं वचः परमात्मनो जीवात्मोन्मेषवर्णनपरं, मनोरुद्धृतं वचश्चावश्येन्द्रियाणां ज्ञानतिरोधानपरं, न पुनः ज्ञानप्रभायाः संकोचावेदकम् । द्वितीयपरिच्छेदे इदमेव मतं वैज्ञानिकपद्धत्येदं ब्रुवताऽपाकृतं यत् प्रभायाः संकोचविकासयोः प्रभाकेन्द्रस्य संकोचविकासाधीनतायाः वैज्ञानिकेन विधिना प्रमाणिततया ज्ञानप्रभायाः संकोचविकासशालित्वे आत्मभूतस्याणोर्ज्ञानस्यापि तदापत्त्या तदीयं निरवद्यं नित्यत्वं व्याहन्येत ।

चतुर्थपरिच्छेदप्रथमखण्डे निर्विकल्पकप्रत्यक्षविषयकाक्षेपाणां पाण्डित्यपूर्णं परिहारं कुर्वतेदमुक्तं यन्निर्विकल्पकानभ्युपगमे सविकल्पकस्योदय एव न सम्भाव्यते, तस्य विशिष्टज्ञानात्मकत्वाद् विशिष्टज्ञानस्य च विशेष्यविशेषणयोः सम्बन्धविषयकतया तत्पूर्वं तयोः संसर्गानवगाहिप्रत्यक्षस्यावश्यकत्वात् सम्बन्धप्रत्यक्षे सम्बन्धिद्वयप्रत्यक्षस्य हेतुतायाः सर्वसम्मतत्वाद् । अन्योऽपि तदाक्षेपपरिहारप्रकारो विशदतया तत्र वर्णितो यस्तत्रैव द्रष्टव्यो नात्र विस्तरभियोपन्यस्यते । तस्मिन्नेव परिच्छेदे असाधारणधर्मज्ञानस्य संशयजनकताया अन्यैः प्रदर्शिताया अनुपपत्तेरपि परिहारो युक्तिपूर्णतया विदुषां सन्तोषाधायकः । तत्रैव परिच्छेदे विशिष्टाद्वैतदर्शनस्य यथार्थख्याति तन्न्यायेनोपपाद्य तस्या निराकरणं प्रशंसनीयप्रज्ञापूर्वकं यत् कृतं तदपि किमपि नावीन्यं बिभर्ति । अनध्यवसायात्मकज्ञानस्य विशिष्टाद्वैतदर्शने यदेककोटिकसंशयत्वं स्थापितं तस्योपहसनीयता स्वामिना सहासं प्रकटिता पण्डितप्रसादकरी प्रत्नतामादधाति ।

चतुर्थपरिच्छेदद्वितीयखण्डे आत्मनो युगस्य गौतमकल्पतया मन्यमानैः श्रीराखालदासन्यायरत्नमहोदयैः स्वकीये तत्त्वसारग्रन्थे महता समारम्भेण कृतायाः जीवात्मनो विभुताम् पराभूय अणोर्मनसो जीवत्वप्रतिष्ठापनायाः वैदुष्यविजृम्भितं प्रत्यवस्थानं पण्डितैर्द्रष्टव्यमस्ति । येन कालिदासवचनेन 'भव हृदय साभिलाषम्' इत्यादिरूपेण न्यायरत्नमहोदयैः मनसो जीवात्मरूपतायाः कालिदासानुमतत्वं प्रदर्शितम् तस्यैव तद्विपरीतार्थबोधकता सुस्पष्टमावेदिता या सावधानया साधारण्यापि धिया धर्तुमर्हा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चमपरिच्छेदे अधुनातनविज्ञानसम्मतं चाक्षुषज्ञानविधिमवधूय चक्षुषः प्राप्यकारितायाः न्यायसिद्धान्तस्य समर्थनानन्तरं शब्दसञ्चारस्य न्यायसम्मतः प्रकारो वैज्ञानिकरीत्योपपादितः । तस्मिन्नेव परिच्छेदे विभिन्नदर्शनग्रन्थेषु प्राप्यमाणानां लक्षणाविचाराणां सङ्कलनं विधाय दर्शनान्तरीयाणां तेषां चारुतरमालोचनं कुर्वता तद्विषये मणिकारगदाधराद्यनुमतं न्यायमतं सम्यक्तयोपन्यस्तम् ।

लौकिकोदाहरणमुखेनाञ्जस्येनाववोधनार्हतासम्पादनाय षष्ठपरिच्छेदे ज्ञानगतप्रामाण्यस्योत्पत्तौ ज्ञप्तौ च स्वतस्त्वपरतस्त्वे सम्यङ्निरूपिते ।

ग्रन्थस्योपसंहारं कुर्वता श्रीस्वामिना समेषां वैदिकदर्शनानां लक्ष्यभूतः सर्वविवेकिजनानां स्वभावतः स्पृहणीयो मोक्षः स्वरूपसाधनानुष्ठानप्रकारैरुपवर्णितः । उपसंहारे वर्णनमिदमतीवोपयोग्यावश्यकञ्च । तत्र बाधकं जनानां सहजमात्मदर्शनमहमाकारकम् । यथोक्तम्—

सुखी भवेयं दुःखी वा मा भूवमिति तृष्यतः ।
यैवाहमिति धीः सैव सहजं तत्त्वदर्शनम् ॥

दर्शनमिदमनादिकालतो निसर्गतः प्रवर्तमानम् मानवं निबध्य सुखाल्पतया दुःखबहुलतया च क्लेशयद्वर्तत इति सर्वविदितम् । सुखं दुःखनिवृत्तिश्च कामयमानेन सहजमात्मदर्शनं परिहाय वास्तवायात्मदर्शनाय चेष्टितव्यम् । वैदिकदर्शनेषु सर्वेष्वेवात्मनो वास्तवस्वरूपप्रतिपादनप्रयासः संलक्ष्यते । तदीये स्वरूपे कतिपयैरंशैः वैमत्यं दधानैरपि वैदिकदार्शनिकैः आत्मनो नित्यत्वं तदीयतत्त्वदर्शनस्य मोक्षाधायकत्वं चैकमत्येनोररीकृतम् । न्यायदर्शने, वैशेषिकदर्शने, सांख्यदर्शने च मोक्षदशायामात्मनो निर्दुःखतामात्रं स्वीकृतम्, सुखं नाभ्युपगतम् । स्वामिनो मतमिदं समीचीनं न प्रत्यभादतस्तेन ग्रन्थस्योपसंहारे वेदान्तसम्मतो मोक्ष एव समर्थितो यत्र न केवला दुःखानामात्यन्तिकी निवृत्तिरेवापि तु सर्वतो महती सुखसमृद्धिरपि सच्चिदानन्दात्मस्वरूपाऽवद्योतते । उचितैव विषयेऽत्र स्वामिनो दृष्टिः, यतो मनुष्यस्य द्वे तृष्णे सहजे—एका सुखविषयिणी, द्वितीया च दुःखनिवृत्तिविषयिणी । यथोक्तमुक्ते वचसि 'सुखी भवेयं दुःखी वा मा भूवम्' । अत इदमुचितं यन्मोक्षंगतस्य तृष्णाद्वयं निवर्तेत । तृष्णानिवृत्तिश्च विषयसिद्ध्यधीनेति निर्विवादम् । अतो यदि मोक्षे दुःखनिवृत्तिरेव भवतीति मन्यते तदा दुःखनिवृत्तितृष्णा तु मोक्षाय चेष्टमानस्य निवर्त्तते, परं सुखतृष्णा न निवर्त्तत इति तन्निवृत्त्युपपत्तयेऽभ्युपगमोऽयमावश्यको यन्मोक्ष आनन्दमयोऽपि भवति, मुक्तो जनो निर्दुःखः अनन्तसुखसम्पन्नश्च सम्पद्यतेऽतः स्वामिनो ग्रन्थोपसंहारो नूनं मनीषिजनमनोमोदकरो भवेदिति मे मतिः ।

गुरुपूर्णिमा, सं० २०३९
जुलाई १९८२

बदरीनाथशुक्लः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रस्तावना

इदं नमः ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः ।

(ऋग्वेदे । १०।१४।२५ ।)

आस्तिकदर्शनापरपर्यायेषु वैदिकदर्शनेषु मोक्ष—तत्साधन—ईश्वर-जीव—ज्ञानप्रभृतिविषयानवलम्ब्य निरूपणं वरीवर्त्ति विशदम् तत्र मोक्षमधिकृत्य मुक्तिवादाद्यनेकस्वतन्त्रग्रन्थानां, तथैव च जीवेश्वरावधिकृत्येश्वरसिद्धयादिस्वतन्त्रप्रवन्धानां प्रणीतत्वदर्शनाज्ज्ञानविषयकविचाराणाञ्च विशकलितरूपेणैव यत्र तत्रोपलम्भाद्विद्यागुरुवर्यैस्तत्कालीनन्यायवैशेषिकविभागाध्यक्षैः पण्डितप्रवरश्रीवदरीनाथशुक्लमहोदयैरादिष्टोऽयं जनः ई० १९६६ खिस्ताब्दे ज्ञानविषयकविचाराणां पर्यालोचनेऽस्मिन् प्रवृत्तः । न चास्तिकदर्शनानां परस्परविरुद्धतयाऽप्रामाणिकत्वेन तद्गतज्ञानविषयकविचाराणां न प्रेक्षावन्मीमांसाविषयत्वमिति शंकितुमुचितम्; **वक्ष्यमाणरीत्या सर्वेषामपि वैदिकदर्शनानामेकवाक्यत्वसिद्धावप्रामाण्यशंकाया** ईषन्मात्रेणाप्यनुत्थानात् । तथाहि—

वेदः पूर्वमविभक्त एवासीदिति ह्यैतिहासिका विद्वांसो वदन्ति । सोऽतिदुरूहतया, सर्वैस्सारल्येनावगन्तुमशक्यतया च क्रमश उत्सीदन्नासीत् । अतः परमकारुणिकेन भगवता व्यासेन तस्य चतुर्धा विभागः कृतः । यथोक्तम्—

यो व्यस्य वेदांश्चतुरस्तपसा भगवानृषिः ।
लोके व्यासत्वमापेदे कार्ष्ण्यात् कृष्णत्वमेव च[1] ।। इति ।
तपसा ब्रह्मचर्येण व्यस्य वेदं सनातनम्[2] । इति च ।

तेन कियतः सारल्यस्य सम्पन्नतया जनेषु तदध्ययनाध्यापने प्रावर्तेताम् सम्पूर्णा मानवजातिश्च साक्षात्परम्परया वा तेन चिरमुपकृता बभूव । परं कालक्रमेण

जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्मणोः ।
ह्रासदर्शनतो ह्रासः सम्प्रदायस्य मीयताम्[3] ।।

---

१. श्रीमहाभारत आदिपर्वणि । ६६।१४।
२. तत्रैवादि पर्वणि । १।५२।
३. न्यायकुसुमाञ्जलिस्थद्वितीयस्तबके, श्लो० ३ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्युदयनाचार्यवचनानुसारेण वेदानामनुशीलनमुत्तरकालेषु शिथिलं मलिनं चाभूत् । अत एव तत्प्रतिपादितार्थ-सारस्य सारल्येनावबोधनार्हतासम्पादनाय महर्षिभिर्दर्शनानि प्रणीतानि ।

दर्शनेषु च तेषु यद्यप्यधिकारिभेदप्रयुक्तं दृष्टिभेदप्रयुक्तञ्च वैषम्यं नूनमस्ति, तथापि दुःखनिवृत्तिस्सर्वेषामप्यभीष्टं प्रयोजनमित्यत्र समेषां दर्शनानामैकमत्यं निर्विवादम् । ये खलु सुखं चरमप्रयोजनतयाऽऽकलयन्ति, तन्मतेऽपि दुःखाभावस्य प्रयोजनत्वमपरिहार्यम्, सुखस्यापि दुःखसहितस्य केनाप्यनभीप्सितत्वात् । दुःखस्य कारणं तु मिथ्याज्ञानमित्यत्रापि सर्वेषां दर्शनानामविवादः । तच्च मिथ्याज्ञानं स्वात्मगोचरं स्वात्मतत्त्वज्ञाननिवर्त्यञ्चेत्यत्रापि सर्वदर्शनानामविप्रतिपत्तिरेव । जगतो निदानं मिथ्याज्ञानं यद्यपि सर्वमतेऽप्यात्मगोचरम् तथाप्यात्मनोऽस्तित्वस्वरूपयोर्विषये मतनानात्वेन तन्नानाविधत्वमालम्बते । यथाहि— केचित् पुत्रादिष्वात्मबुद्धिं कुर्वन्तस्तद्विकलतायामहमेव विकलः, तत्सम्पन्नतायाञ्चाहमेव सम्पन्न इति प्रतियन्तश्च स्वीयां धारणाम् 'आत्मा वै जायते पुत्रः' इत्यादिवाक्यैः प्रमाणयन्ति । तादृशजनान् कश्चिद् देहात्मवादी शिक्षयति—न पुत्रादय आत्मा, भूतचतुष्टयसङ्घातविशेषात्मकं चेतनं शरीरमेवात्मेति—

आत्मास्ति देहव्यतिरिक्तमूर्तिः भोक्ता स लोकान्तरितः फलानाम् ।
आशेयमाकाशतरोः प्रसूनात् प्रथीयसी स्वादुफलप्रसूतौ[1] ॥

इति वृद्धोक्तेः, 'एष पुरुषोऽन्नरसमयः[2]' इति श्रुतेश्च । एतद्देहात्मदर्शनं चार्वाकदर्शननाम्ना जगति सुप्रसिद्धम् । तच्च न केवलं तत्रैव परिसमाप्तम्, किन्तु इन्द्रियात्म-मन आत्म-प्राणात्मदर्शनाद्यात्मना बहुधा विततम् । मतमिदमुत्तरोत्तरं विचारसौक्ष्म्यक्रमेण स्कन्धपञ्चकात्म-क्षणिकविज्ञानात्म-शून्यात्म-इत्यादिवहुविधवौद्धदर्शनात्मना द्रव्यपर्यायोभयात्मकात्मेत्यनेकान्तवादिजैनदर्शनाद्यात्मना च जगति प्रसारं प्रापत् ।

किन्तु वैदिकदर्शनप्रणेतारो महर्षयस्तत्र सर्वत्र—'शरीरदाहे पातकाभावात्[3]', 'पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेः[4]', 'प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात्[5]', 'वीतरागजन्मादर्शनात्[6]', इत्यादिसूत्रोक्तरीत्या दोषान् प्रपश्यन्तोऽतिरिक्तनित्यात्मवादव्युत्पादकानि विभिन्नानि दर्शनानि निर्ममिरे ।

वैदिकदर्शनप्रणेतारो महर्षयोऽपि तत्तत्समये जनमनस्सु निरूढपदानां नानाविधमिथ्याज्ञानानां निराकरणाय विभिन्नविधानि तत्त्वज्ञानान्युपदिदिशुः । एवञ्च यादृशविषयविशेषनिरूपणे तत्तच्छास्त्राणां तात्पर्यम्, तत्तदर्थे तेषां प्रामाण्यमप्रतिबद्धम् । अत एव साङ्ख्यप्रवचनभाष्यकारैरीश्वरनिराकरणे साङ्ख्यस्य न परमं तात्पर्यमिति द्योतयद्भिरुक्तम्—

'साङ्ख्यशास्त्रस्य तु पुरुषार्थतत्साधनप्रकृतिपुरुषविवेकावेव मुख्यो विषयः[7]' इति ।

एवमेव प्रमाणादिहेत्वाभासान्तपदार्थनिरूपणद्वारेतरभिन्नत्वेन नित्यात्मानुमाने चक्षुरादीन्द्रियाणां तैजसत्वादिभौतिकत्वव्यवस्थापने न्यायशास्त्रस्य परमं तात्पर्यम् । इमे हि पदार्था न्यायशास्त्रमुपदिश-

१. प्रबोधचन्द्रोदये ६८ पृष्ठ उदाहृतः ।२।१६ । २. तैत्तिरीयोपनिषत् ।२।१ । ३. न्यायसूत्रम् ।३।१।४ ।
४. न्यायसूत्रम् ।३।१।१८ । ५. न्यायसूत्रम् ।३।१।२२ । ६. न्यायसूत्रम् ।३।१।२५ ।
७. सांख्यप्रवचनभाष्यम् ।१।१।१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिरुक्ताः[१], अन्यैश्च परिगृहीताः । अत एव च ब्रह्मसूत्रभाष्ये[२] दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानां कार्यकारणभावः[३] पूज्यपादैः श्रीशङ्कराचार्यैः परिगृहीतः, ऋषिप्रवरस्य श्रीगौतमस्याचार्यत्वञ्च समादरेण स्वीकृतम्[४] । 'एतेन योगः प्रत्युक्तः[५]' इति वेदान्तसूत्रशाङ्करभाष्यादौ च योगस्यापि यमनियमादिविभूत्यादिनिरूपणे परमं तात्पर्यं, तदंशे प्रामाण्यमपि, न तु प्रासङ्गिकमहत्तत्त्वादिनिरूपण इत्युक्तम्; व्याकृतञ्च भामत्यां श्रीवाचस्पतिमिश्रैः—

"न चैतानि योगशास्त्राणि प्रधानादिसद्भावप्रतिपादनपराणि, किन्तु योगस्वरूपतत्साधनतदवान्तरफलविभूतितत्परमफलकैवल्यव्युत्पादनपराणि । तच्च यत्किञ्चिन्निमित्तीकृत्य व्युत्पाद्यमिति प्रधानं सविकारं च निमित्तीकृतम्, न तु तद्विवक्षितम्[६]" इति ।

स्वीकृतञ्चासनस्य महत्त्वम् 'आसीनः सम्भवात्' इत्यारभ्य 'यत्रैकाग्रता तत्राविशेषात्[७]' पर्यन्तेषु सूत्रतद्भाष्यादिषु । 'शमदमाद्युपेतः स्यात्तथापितु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वादि[८]' ति सूत्रतद्भाष्यमप्यत्रावलोकनीयम् । उपदिष्टञ्च प्राणायामद्वारा नाडीशुद्धेर्नान्तरीयकत्वम् ब्रह्मसाक्षात्कारे—

"प्राणायामेन क्षपितमनोमलस्य चित्तं ब्रह्मणि स्थितं भवतीति प्राणायामो निर्दिश्यते । प्रथमं नाडीशोधनं कर्त्तव्यम्[९] ।" इति ।

तदेवोपदिष्टमपरोक्षानुभूतौ—

किञ्चित्पक्वकषायाणां हठयोगेन संयुतः ।
परिपक्वं मनो येषां केवलोऽयं च सिद्धिदः[१०] । इति ।

एवञ्च 'अज्ञानां घ्राणपीडन[११]' मित्यत्रापि सोपानभेदेनोपदेशः ।

एवमेव न्यायशास्त्रेऽपि 'तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः[१२]' इति सूत्रे भाष्यम् 'योगशास्त्राच्चाध्यात्मविधिः प्रतिपत्तव्यः । स पुनस्तपः प्राणायामः प्रत्याहारो ध्यानं धारणेति' इति ।

वैशेषिकदर्शनेऽपि 'आत्ममनसोः संयोगविशेषादात्मप्रत्यक्षम्' 'तथा द्रव्यान्तरेषु प्रत्यक्षम्' 'असमाहितान्तःकरणा उपसंहृतसमाधयस्तेषाञ्च[१३]' इति ।

---

१. न्यायसूत्रे प्रोक्ताः १।१।१ । २. ब्रह्मसूत्रशाङ्करभाष्ये । १।१।४ ।
३. न्यायसूत्रे ।१।१।२।
४. 'तथा चाचार्यप्रणीतं न्यायोपबृङ्हितं सूत्रम्' इत्यादिना ।१।१।४। ब्रह्मसूत्रभाष्ये ।
५. ब्रह्मसूत्रम् । २।१।३ । ६. तत्रैव भाष्ये भामतीटीका ।
७. ब्रह्मसूत्राणि । ४।१।७ । -।४।१।११ । ८. ब्रह्मसूत्रम् । ३।४।२७ ।
९. श्वेताश्वतरोपनिषदः । २।८-९ । मंत्रयोः शांङ्करभाष्यम् ।
१०. अपरोक्षानुभूतौ श्लोकः । १४३ । ११. तत्रैव श्लोकः । १२० ।
१२. न्यायसूत्रम् । ४।२।४६ । १३. वैशेषिकसूत्राणि । ९।१।११, १२, १३ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथैवात्मविषयकविचारे प्रवृत्ते श्रीमदुदयनाचार्यैर्वेदान्तदर्शनस्यैव तन्निरूपणे प्रामाण्यं स्वीकुर्वद्भिः स्वस्य च प्रमाणादीनां निरूपण एव प्रामाण्यं प्रकटयद्भिः—

'तदास्तां तावत्, किमार्द्रकवणिजो बहित्र ! चिन्तयेति[1]' इत्युक्तम् ।

व्याख्यातञ्च नारायणीटीकायाम्—

'वेदान्तसिद्धान्तचिन्तायां नास्तिकानामनधिकारात् कृतं तच्चिन्तया[2]' इति ।

अभिहितञ्चास्मिन्नेव ग्रन्थे—'आयातोऽसि मार्गेण[3]' इति । व्याख्यातञ्च तैस्तत्रैव—

'वैदिकेन मायावादिमार्गेणेत्यर्थः[4]' इति ।

उपरिष्टाच्चाचार्येण वेदान्तनये महती श्रद्धा प्रदर्शिता—

न ग्राह्यभेदमवधूय धियोऽस्ति वृत्ति-
स्तद्बाधने वलिनि वेदनये जयश्रीः[5] ।

इत्यादिकं वदता । तत्र नारायणी—"वेदनये वेदानुसारिणि अनिर्वचनीयसिद्धान्तन्याये जयश्रीर्भवति[6]" इति ।

आचार्यैरेव किरणवल्याख्यवैशेषिकग्रन्थे—'वेदान्तिनामपि अविद्यायां निवृत्तायां केवलमात्मैवापवर्गे वर्तत इति मते न नो विवादः[7]' इति घोषयद्भिरेतद्विषये न केवलं स्वस्य, अपि तु वैशेषिकतन्त्र-स्याप्यद्वैते न विवाद इति स्फुटीकृतम् ।

कन्दलीकारा अपि—

ध्यानैकतानमनसो विगतप्रचाराः
पश्यन्ति यं कमपि निर्मलमद्वितीयम् ।
ज्ञानात्मने विघटिताखिलबन्धनाय
तस्मै नमो भगवते पुरुषोत्तमाय[8] ॥

इति मङ्गलश्लोके परमात्मनोऽद्वितीयत्वं केवलज्ञानरूपत्वञ्च वदन्तोऽद्वैतपक्षमेव समाश्रयन्ति ।

'ॐ नमः सर्वभूतानि विष्टभ्य परितिष्ठते[9]' इत्याद्यनुमितिग्रन्थस्थदीधितिकारमङ्गलश्लोक-मद्वैतवादं विहाय व्याकर्तुमशक्यत्वेन श्रीगदाधरभट्टाचार्यैरपि "अथवा भट्टमतस्यैवात्र परिष्कृत-त्वात्[10]" इत्याद्युक्तम् । भट्टमतेनात्राद्वैतमेव विवक्षितमिति ।

---

१. आत्मतत्त्वविवेके पृ० २२३ । २. अत्रैव नारायणीटीका । ३. आत्मतत्त्वविवेके, पृ० २२१ ।
४. तत्रैव नारायणीटीका । ५. आत्मतत्त्वविवेके, पृ० २३० ।
६. तत्रैव नारायणीटीका । ७. किरणावली, पृ० ४८-४९ ।
८. प्रशस्तपादभाष्यन्यायकन्दली, पृ० १ ।
९. अनुमितिचिन्तामणेर्दीधितिटीकायां प्रथमो मङ्गलश्लोकः । १०. तत्रैव गादाधरीटीका ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मीमांसकप्रवरैश्च—

इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या ।
दृढत्वमेतद्विषयस्तु बोधः प्रयाति वेदान्तनिषेवणेन[1] ॥

इत्यादिकं वदद्भिरात्मनित्यत्वमात्रस्थापनद्वारा केवलं नास्तिक्यनिराकरण एव स्वीयपरमतात्पर्यमुद्घोषयद्भिरात्मनः सम्यङ्निरूपणे वेदान्तदर्शनस्यैव परमतात्पर्यं प्रामाणिकत्वञ्चेति स्वीकृतम् ।

तथा च वैदिकदर्शनानां सर्वेषामपि सोपानभेदेनाधिकारिभेदेन वोपयोगः प्रामाण्यञ्चेत्यत्र नास्ति स्तोकतरोऽपि सन्देहः । अत एव—

द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव ।
योगस्तद्वृत्तिरोधश्च ज्ञानं सम्यगवेक्षणम् ॥
असाध्यः कस्यचिद्योगः कस्यचित्तत्त्वनिश्चयः[2] ।

इत्यादिना योगवासिष्ठे योगज्ञानयोरधिकारिभेदेनावश्यकत्वमुपदिष्टम् ।

न्यायशास्त्रस्यापि प्रामाण्यं वेदान्तशास्त्रे श्रीगौडब्रह्मानन्दस्वामिप्रभृतिभिः कण्ठरवेण स्वीकृतम् । उक्तञ्च—

"ननु देहाद्यधिष्ठानतयाऽऽत्मज्ञानं कथं शुद्धात्मसाक्षात्कारं प्रति हेतुः ? तस्याप्रमाणत्वादिति चेत्, उच्यते—तादृशविवेकज्ञानोत्तरं देहादीनां हेयतया केवलात्मन एव जिज्ञास्यत्वात् । तेनैव प्रतिबन्धादहङ्काराद्यभाने साक्षिमात्रविषयकसौषुप्तवृत्तिरिवाविद्यावृत्तिविशेषरूपस्तादृशविवेकज्ञानोत्तरं त्वम्पदार्थशोधकस्मृत्या मनोवृत्तिरूपो वा शुद्धात्मसाक्षात्कारः[3]" इति ।

अत एव च नानात्मैकात्मत्वयोर्विरोधं निराकुर्वद्भिः साङ्ख्यप्रवचनभाष्यकारैः सर्वषां वैदिकदर्शनानां प्रामाण्यं कण्ठरवेणोक्तम्—

'एतेन श्रुतिस्मृतिप्रसिद्धयोर्नानात्मैकात्मत्वयोर्व्यावहारिकपारमार्थिकभेदेनाविरोधः[4]' इति, 'तस्मादास्तिकशास्त्रस्य न कस्याप्यप्रामाण्यं विरोधो वा स्वस्वविषयेषु सर्वेषामबाधादविरोधाच्चेति[5]' इति च ।

इममेवार्थं द्योतयन्ति वार्त्तिककारपादाः श्रीसुरेश्वराचार्याः—

यदर्थं सर्वशास्त्राणां प्रवृत्तिरतिविस्तरा ।
आत्मज्ञानावतारार्थः सर्वशास्त्रसमुद्यमः ॥
संसारोच्छेदमेवामी फलं शास्त्रकृतोऽब्रुवन् ।
स्वत एव मनुष्याणां प्रकृतिर्भोगसिद्धये ॥

---

१. मीमांसाश्लोकवार्त्तिकस्य पञ्चमसूत्रस्थात्मवादेऽन्तिमोऽयं श्लोकः, पृ० ७२७-२८ ।
२. योगवासिष्ठगतनिर्वाणप्रकरणे । १०।८ ।
३. सिद्धान्तबिन्दुन्यायरत्नावल्यां प्रथमश्लोकावतरणे ।
४. साङ्ख्यप्रवचनभाष्यम् । १।१।१ । पृ० ६ ।
५. तत्रैव ।

95298

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तन्त्रानुवादि शास्त्रं स्यान्निवृत्तावेव तन्मितिः ।
विरोधः सर्वशास्त्रेषु पदार्थानां व्यवस्थितौ ॥
युक्तस्तात्पर्यहीनत्वात् श्रुतौ सृष्टिविगानवत् ।
अपि वात्स्यायनादीनां शास्त्राणां द्वारभेदतः ॥
प्रामाण्यमविरुद्धं स्यादैकात्म्यज्ञानजन्मने[1] ।

इत्यादिकं वदन्तः ।

तथैव तत्तन्मतासाधारणविभिन्नविषयमादाय सर्वेषामेव मतानां प्रामाण्यमविरोधञ्च ज्ञापयन्ति भगवत्पादाः—"न च प्रमाणं प्रमाणान्तरेण विरुध्यते, प्रमाणान्तराविषयमेव हि प्रमाणान्तरं ज्ञापयति[2]" इत्यादिकं प्रतिपादयन्तः ।

एवञ्च वैदिकदर्शनानि परस्परविरुद्धतयाऽप्रामाणिकानीत्यवैदिकानामाक्षेपश्चेत्, निरस्तः; अधिकारिभेदेन सोपानभेदेन वा सर्वेषामपि प्रामाण्यस्याप्रत्यूहत्वात् ।

तेषु च सर्वेषु वेदप्रमाण्याभ्युपगन्तृत्वं वैदिकत्वमिति प्राचीनवचनाद् वेदस्य परमं प्रामाण्यमभ्युपगम्यते । तेषां मध्ये साङ्ख्ययोगन्यायवैशेषिका लौकिकानुभवमधिकृत्य पदार्थव्युत्पादने प्रवृत्तास्तर्कप्रधानाः, मीमांसावेदान्तौ तु श्रुतिवाक्यमधिकृत्य प्रवृत्तौ श्रौताविति ।

अत्र च प्रथमप्रकरणे ज्ञानस्य पदार्थेषु कुत्रान्तर्भावस्तत्तद्दर्शनानुसारेणेति विवेचितम्, प्रसङ्गात् संक्षेपेण पदार्थविभागोऽप्युपस्थापितः । यत्र चापाततो निरूपणेनान्तर्भावो न प्रदर्शयितुं शक्यते तापेक्षितविस्तरोऽप्यादृतः । विवेचनसौकर्य्यादतिदेशसौकर्याच्च वैशेषिकशास्त्रन्यायशास्त्रयोरनुसारेण विभागोऽन्तर्भावश्च प्रथमं निरुपितः ।

द्वितीये च न्यायवैशेषिकयोरसम्मतेऽपि ज्ञानस्वयंप्रकाशत्वेऽन्यैर्महतोपक्रमेण तन्निरूपणदर्शनात् ज्ञानस्य स्वयंप्रकाशत्वं निरूपितम् । तत्र प्राभाकराभिमतत्रिपुटीप्रत्यक्षवादस्य प्रथमपरिच्छेद एव प्रसङ्गात् पर्यालोचितत्वान्न पुनरत्र तत्पर्यालोचनमुपस्थापितम् । अन्यदर्शनेषु यथासम्भवं कृतमेव ।

तृतीये च ज्ञानस्याश्रयः क इति विषयस्य निरूपणावसरे पर्यालोचनसौकर्यात् सत्यामावश्यकतायामतिदेशसौकर्य्याच्च न्यायशास्त्रानुसारेणाश्रयविचारः प्रथममुपस्थापितः । यथासम्भवमन्यदर्शनानुसारेणापि आश्रयनिरूपणं तात्पर्यालोचनादिकं च कृतमिति ।

चतुर्थस्य च ज्ञानभेदनिरूपणात्मकस्य परिच्छेदस्य विवेचनसौकर्य्याद्भागद्वयमित्यावेदयिष्यते । तत्र ख्यातिविवेचनप्रस्तावे आत्मख्यातेर्वैदिकैरनभ्युपगतत्वेऽपि प्रसङ्गप्राप्तत्वेनावश्यकत्वात्तन्निरूपणं पर्यालोचनञ्च विहितम् । चतुर्थद्वितीयभागे च अप्रमाविवेचनं, सामान्यतो दृष्टानुमानस्य लक्षणं च वैशेषिकशास्त्रे प्रथमखण्डे कृतमिति मत्वा न पृथग्रूपेणोपस्थापितम् ।

---

१. बृहदारण्यकोपनिषदः । १।४।७ । मन्त्रे शाङ्करभाष्यवार्त्तिकम्, पृ० ५१३ ।
२. बृहदारण्यकोपनिषच्छाङ्करभाष्यम् । २।१।२० । पृ० १२० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चमे तु ज्ञानार्थमपेक्षिता सामग्री निरूपिता । तत्र लौकिकप्रत्यक्षस्थले प्रतिबन्धकविचारो विस्तरभयान्नोपस्थापितः । व्यप्तिपक्षधर्मतयोरपि स्वरूपविषये विचारस्तु यद्यपि न्यायशास्त्रे विस्तरेण कृतो वर्त्तते तथापि स विषयो विस्तरभयान्नात्र समावेशितः। चाक्षुषप्रत्यक्षे प्रकाशसञ्चारविधावाधुनिकवैज्ञानिकमतं समालोच्य शास्त्रीयः प्रकारः प्रतिष्ठापितः। श्रावणप्रत्यक्षे च शब्दसञ्चारविधौ न्यायसिद्धान्तस्याधुनिकविज्ञानसम्मतत्वं प्रदर्शितम् । शाब्दज्ञानसामग्रीनिरूपणावसरे लाघवं समालोच्य सहकारिकारणानि प्रथमं निरूप्य वृत्तिविमर्शोऽन्तेऽतिसंक्षेपेणोपस्थापितः। उपमितिनिरूपणावसर एव चतुर्थपरिच्छेदे तत्सामग्र्यपि प्रसङ्गात्समालोचितेति मत्वा पृथग्रूपेण सा पञ्चमे नोपन्यस्ता ।

षष्ठे चोत्सर्गापवादन्यायमुदाहरणेन स्पष्टीकृत्य स्वतः प्रामाण्यवादस्तदनन्तरञ्च परतः प्रामाण्यवाद उत्पत्तितो ज्ञप्तितश्चोपस्थापितः । अन्ते चोभयोः स्वतोग्राह्यत्ववादिसांख्यमतमुपन्यस्तं पर्यालोचितञ्च ।

सप्तमे ज्ञानस्य मोक्षकारणत्वविमर्शात्मके परिच्छेदे ज्ञानकर्मसमुच्चयस्य मोक्षकारणत्ववादिनां मतं संक्षेपेणोपन्यस्य पर्यालोचितम्। अन्ते च तत्तन्मते मोक्षसाधनीभूतस्यात्मज्ञानस्य स्वरूपं निरूप्य मोक्षरूपफलपर्यन्तं तदावर्तनविधिः संक्षेपेणावेदितः ।

मुद्रकदोषात्कियत्यस्त्रुटयः प्रबन्धेऽस्मिन् नूनं प्राप्येरन्। किञ्च परिच्छिन्नमतित्वस्य पुरुषधर्मतया परया निष्ठया परमेण श्रमेण च प्रणीतेऽप्यस्मिन् प्रबन्धे कियत्यो न्यूनता अवश्यं परिलक्ष्येरन्निति तदर्थं कृपयाऽमर्षशून्यैर्भवितव्यं मनीषिवर्यैरिति सविनयमयं जनः प्रार्थयति ।

ग्रन्थस्यास्य वर्त्तमानकलेवरप्राप्तौ येषां पण्डितप्रवरश्रीबदरीनाथशुक्लमहाभागानां सततनिर्देशनस्य नान्तरीयकत्वं तान् प्रति स्वकीयां हार्दिकीं कृतज्ञतां बिभर्त्ययं जनः । शास्त्रानुशीलनकाले येषां महती कृपा समुपलब्धा तेभ्यस्स्वर्गतेभ्यः पण्डितवर्यश्रीहरिरामशुक्लमहोदयेभ्योऽपि, येषां सकाशे दुरवगाहस्य न्यायशास्त्रस्याध्ययनमारब्धं तेभ्यश्चापि श्रीसुरेन्द्रनाथद्विवेदिमहोदयेभ्योऽयं जनः सादरं प्रणतीः समर्पयति ।

येषां कृपाकटाक्षमात्रेण जिज्ञासोर्बुद्ध्यगम्येऽपि परमतत्त्व आञ्जस्येन गतिर्भवति तेभ्यः साक्षात्कृतधर्मभ्यः परिव्राजकाचार्येभ्योऽयं जनः कोटिशः प्रणतीः वितरति ।

सम्पादनकार्ये येषां साहाय्येनानवरतपरिश्रमेण च प्रबन्धोऽयं मुद्रणार्हतामगात्तेऽपि श्रीबालकृष्णद्विवेदिमहोदया धन्यवादार्हाः ।

आर्थिकसहयोगदातारः केन्द्रीयशिक्षामन्त्रालयाधिकारिणः सहयोगप्रदाः सर्वे सुहृदश्चास्य जनस्य कृतज्ञतासमादरपूर्णं हार्दमभिनन्दनं धन्यवादञ्च समर्हन्तीति सप्रश्रयमावेदयति ।

श्रीरामनवमी, सं० २०३९ आत्मानन्दः
अप्रैल, १९८२ खि०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Preface

Salvation, God, Individual soul with ego and Knowledge etc. are the main points of discussion in vedic philosophies (six systems of Indian philosophy). Particular attention has been paid and lot of work has been done on Salvation, God and Ego in the treatises like Muktivāda and Īśwarasiddhi etc. The ideas on the concept of Knowledge were found scattered in different treatises and hence an absolute need was felt to accumulate in a work of this type. There were several ideas pertaining to knowledge whose merits or demerits were not pointed out till date. The salient feature of this text is a critical study of these ideas. This is attained through providing a vivid description of Knowledge in the vein of Nyāya philosophy with a particular reference to the points dealt otherwise in other vedic philosophies. Scientific view has been given on some points.

First chapter deals with problem of inclusion of Knowledge in the classification of elements. A direct solution to this problem was not possible due to vividness in the modes of classification of elements in various vedic philosophies and hence it was felt necessary to give a brief account of the classification of elements in these philosophies. A crucial point of the chapter is refutation of the principle of contraction of knowledge due to Viśiṣṭādvaitins. It is again refuted in the second chapter where self-luminosity of knowledge has been considered by applying a minor concept of optics.

Third chapter deals with abode of knowledge which is described according to the Nyāya aphorisms, although in the terminology of Neology. Here one can see the skill of old Naiyāyikās who, by applying logical analysis, have succeeded in proving that born knowledge is an attribute of neither the physical body, nor the senses,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

nor the substances; but of Ego (Ātman in Nyāya-terminology). This remarkable result which is a sort of biophysical one, could hardly draw the attention of biophysicists.

Fourth chapter, the biggest one, deals with kinds of Knowledge. As in Chapter I, due to vividness in the modes of division, a unique division is not possible. Consequently, this chapter has been divided in two parts. First deals with the mode adopted by Vaiśeṣikās while second with that adopted by Naiyāyikās. This could however, cover the modes adopted by other vedic philosophies. Among other things, invalidity of rejections of the following principles established by Naiyāyikās has been proved :

(i) Indeterminate perception (Nirvikalpaka Partyakṣa).

(ii) Causeship of the Asādhāraṇa Dharma for doubt.

(iii) Mental perception (Mānas Pratyakṣa).

Moreover, the derivation of false perception by Yathārtha Khyāti has been proved to be invalid.

Sources of Knowledge have been discussed in Chapter V where, among other things, propagation of light and sound in visual and auditory perceptions has been discussed and it has been advocated and conjectured that the path of light, as described by Naiyāyikās in visual perception, is more appropriate than that described by the modern physicists. Unanimity of the views on the point of propagation of sound-waves in auditory perception has also been illustrated.

Intrinsic and extrinsic validity of Knowledge has been discussed in the Sixth Chapter where Utsargāpavādanyāya has been brought home to the heart of readers.

Seventh, the last one, discusses causeship of Knowledge for Salvation wherein the causeship of Jñānakarmasamuccaya has been refuted. Particular knowledge and its process of repetition for salvation according to different vedic philosophies has also been discussed and been concluded thereto.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Jñānaparicayasaraṇī at the beginning gives a gist of the whole text at a glance.

A word of attention : Wherever there is refutation of some vedic philosophy by another-one on some particular issue, it does not mean that the concept of the refuted philosophy should absolutely be discarded but that the decision of the refuted philosophy on that particular issue is not final. As a matter of fact, there is a unanimity in all the vedic philosophies and this has been projected in the introduction in Samskṛt.

This work is an updated form of author's doctoral dissertation on which the degree of Vidyāvāridhi (Ph. D.) was awarded by the Varaṇaseya Samskṛt University (now Sampūrṇanand Samskṛt Univ.) Varanasi in 1969. The author records here with great pleasure his reminiscences of fruitful academic associations with the profound Naiyāyikās in the University as also thanks to the authorities of the University who took special care in making his stay sharply rememberable.

He is also thankful to the authorities of the Mehta Research Institute, Allahabad for their generous attitude in providing facilities during the period in which this work was edited and published.

Also, the author conciously expresses his sense of gratitude to the Ministry of Education and Social Welfare, Government of India, for providing most of the financial support required to complete this work.

Rāmanavamī, V. S. 2039
April, 1982

—Author
S. A. Paramhans

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषय-सूची

प्रथमपरिच्छेदः—**पदार्थेषु ज्ञानस्यान्तर्भावः** १-१३

(Knowledge as an Inclusive of the Elements)

अवतरणिका; वैशेषिकमतम्; न्यायमतम्; मीमांसकमतम; पूर्वोक्तमतपर्यालोचनम्; सांख्यमतम्; योगमतम्; तन्मतद्वयपर्यालोचनम्; विशिष्टाद्वैतिमतम्; तन्मतपर्यालोचनम्; औपनिषदमतम् ।

द्वितीयपरिच्छेदः—**ज्ञानस्य स्वयंप्रकाशत्वम्** १४-२१

(Self-Luminosity of Knowledge)

स्वयं प्रकाशत्वस्वरूपम्; औपनिषदमतम्; प्राभाकरमतम्; विशिष्टाद्वैतिमतम्; औपनिषदविशिष्टाद्वैतिमतयोः स्वयंप्रकाशत्वसमीक्षा ।

तृतीयपरिच्छेदः—**ज्ञानाश्रयनिरूपणम्** २२-३४

(Abode of Knowledge)

न्यायमतेनात्मनो ज्ञानाश्रयत्वनिरूपणम्; ज्ञानस्यात्मगुणत्वे सम्भावितदोषपरिहारः; तत्रैव प्रसङ्गात्स्मृतिकारणानां निरूपणम्; ज्ञानस्यात्मगुणत्वेऽन्यशिष्टाक्षेपास्तत्समाधानानि च; ज्ञानस्य शरीरगुणत्वशंका-तत्समाधानञ्च; सांख्ययोगनये ज्ञानाश्रयविचारः; वेदान्तिनये ज्ञानाश्रयविचारः ।

चतुर्थपरिच्छेदः—**ज्ञानस्य भेदाः** ३५-११४

(Kinds of Knowledge)

प्रथमखण्डः— **वैशेषिकपद्धत्या ज्ञानभेदविमर्शः** ३५-७०

वैशेषिकमतेन विद्यायाश्चातुर्विध्यम्; प्रत्यक्षविषयनिरूपणादिकम्; प्रत्यक्षस्य सविकल्पक-निर्विकल्पकभेदेन द्वैविध्यम्; निर्विकल्पके विशिष्टाद्वैतिभिराक्षेपः; तत्परिहारः; प्रकारान्तरेण प्रत्यक्षविभागः; लैङ्गिकी; अनुमितेर्विभागः; अनुमानभेदे विशिष्टाद्वैतिमतं तत्पर्यालोचनञ्च; प्रकारान्तरेणानुमानविभागः; स्मृतिः; आर्षी; सिद्धदर्शनस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्यान्तरत्वाक्षेपस्तत्परिहारश्च; शाब्दप्रमितेरनुमानेऽन्तर्भावप्रकारः; उपमितेरन्तर्भावप्रकारः; अविद्याचातुर्विध्यम्, संशयः; संशये विशिष्टाद्वैतिमतम्; संशयभेदाः; विशिष्टाद्वैतिमतेनासाधारणधर्मस्य संशयहेतुत्वप्रतिक्षेपस्तत्परिहारश्च; विपर्ययनिरूपणम्; अख्यातिवादः; तत्पर्यालोचनम्; यथार्थख्यातिवादिविशिष्टाद्वैतिमतम्; तन्मतपर्यालोचनम्; आत्मख्यातिवादः; तत्पर्यालोचनम्; असत्ख्यातिवादः; पर्यालोचनम्; अन्यथाख्यातिवादस्वरूपम्; औपनिषदानामन्यथाख्यात्यालोचनप्रकारः; अनिर्वचनीयख्यातिनिरूपणम्; अनिर्वचनीयख्यातौ तादात्म्यद्वयोत्पत्तिप्रकारः; अनध्यवसायः; तत्र विशिष्टाद्वैतिमतम्; तत्पर्यालोचनम्; स्वाप्नम्; अविद्यान्तराणामपि सत्त्वाक्षेपपरिहारः।

द्वितीयखण्डः—**नैयायिकपद्धत्या सांख्ययोगपद्धत्या च ज्ञानभेदविमर्शः** ७१-११४

न्यायशास्त्रानुसारेण ज्ञानस्य विभागः; प्रत्यक्षषाड्विध्यम्; मानसप्रत्यक्षानङ्गीकर्तृविशिष्टाद्वैतिमतम्; तन्मते सुखादीनां ज्ञानरूपत्वम्; तन्मतपर्यालोचनम्; मनोव्यतिरिक्तजीवात्मानभ्युपगन्तृश्रीराखालदासन्यायरत्नमतम्; तत्पर्यालोचनम्; मीमांसकसम्मतप्रत्यक्षलक्षणपर्यालोचनम्; सांख्याभिमतप्रत्यक्षलक्षणपर्यालोचनम्; विशिष्टाद्वैत्यभिमतप्रत्यक्षलक्षणपर्यालोचनम्; योगजप्रत्यक्षनिरूपणम्; औपनिषदमतेन प्रत्यक्षनिरूपणम्; तत्त्वमसीत्यादौ वाक्यादप्यपरोक्षानुभवप्रकारः; न्यायमतेनानुमानविभागनिरूपणम्; केवलान्वय्यादिभेदेनानुमानभेदः; शाब्दप्रमितेः पृथक्त्वनिरूपणम्; अर्द्धशब्दप्रामाण्यवादिप्राभाकरमतम्; तत्पर्यालोचनम्; उपमितिः; मीमांसकाभिमतोपमानस्वरूपम्; तत्पर्यालोचनम्; उपमितेः पृथक्प्रमात्वनिरूपणम्; अर्थापत्तिस्तद्भेदाः; श्रुतार्थापत्तौ भट्टप्राभाकरयोर्मतभेदनिरूपणम्; औपनिषदमतेनार्थापत्तिनिरूपणम्; अर्थापत्तेः प्रमित्यन्तरत्वं, तत्र दीधितिकारसम्मतिः; अनुपलब्धिस्तत्पृथक्त्वञ्च; अनुपलब्धेरन्तर्भावप्रकारः; सम्भवैतिह्ययोरन्तर्भावनिरूपणम्; सांख्ययोगनये ज्ञानस्य विभागः।

पञ्चमपरिच्छेदः—**ज्ञानार्थमपेक्षितसामग्रीविमर्शः** ११५-१५५
(Source of Knowledge)

जन्यज्ञानं प्रति त्वङ्मनःसंयोगस्य कारणत्वविवेचनम्; प्रत्यक्षज्ञानार्थमावश्यकसन्निकर्षविवेचनम्, तत्र प्राभाकरमतंविशिष्टाद्वैतिमतञ्च; बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षस्य सामग्रीवर्णनम्; इन्द्रियाणां प्राप्यकारित्वविमर्शः, तत्र प्रकाशगमनप्रसङ्गे शब्दसञ्चारप्रसङ्गे चाधुनिकवैज्ञानिकमतविमर्शः; इन्द्रियाणां भौतिकत्वसमर्थनसन्दर्भेऽन्यथावादिनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दार्शनिकानां मतपरीक्षणम्; चाक्षुषप्रत्यक्षसामग्र्या निर्वचनम्; संक्षेपेण स्पार्शनाद्यन्यविधप्रत्यक्षसामग्रीनिर्वचनम्; समवायाभावयोः प्रत्यक्षविषयकसामग्रीविमर्शः; अलौकिकसन्निकर्षविमर्शः, तत्र सामान्यलक्षणासन्निकर्षः; ज्ञानलक्षणसन्निकर्षनिरूपणम्; सामान्यलक्षणज्ञानलक्षणयोर्भेदस्य स्पष्टीकरणम्; अलौकिकसन्निकर्षानभ्युपगमवादिमतम्; ज्ञानलक्षणाप्रतिक्षेपप्रकारः; अलौकिकसन्निकर्षव्यवस्थापनम्; अनुमितिसामग्रीविमर्शः, तत्र मीमांसकमतविवेचनम्; परार्थानुमानसामग्री (न्यायस्तदवयवाश्च); अवयवसंख्याविषये मतभेदाः; शाब्दज्ञाने सहकारिकारणनिरूपणम्; वृत्तिविमर्शः ।

षष्ठपरिच्छेदः—ज्ञानप्रामाण्यस्वतस्त्वपरतस्त्वविवेचनम् १५६-१६२

(Validity of Knowledge viewed subjectively or objectively)

प्रामाण्यस्योत्पत्तौ स्वतस्त्वपरतस्त्वे; प्रामाण्यज्ञप्तौ स्वतस्त्वनिरूपणम्; प्रामाण्यज्ञप्तौ परतस्त्ववादिमतम्; उभयोः स्वतोग्राह्यत्ववादिसांख्यमतं तत्पर्यालोचनञ्च; निष्कर्षः ।

सप्तमपरिच्छेदः—ज्ञानस्य मोक्षकारणत्वविमर्शः

(Knowledge as means of salvation)

ज्ञानकर्मसमुच्चयवादिमतम्, तत्पर्यालोचनम्; मोक्षसाधनीभूतस्यात्मज्ञानस्य स्वरूपम् तदावर्तनविधिश्च—मीमांसकमतेन, न्यायशास्त्रानुसारेण, वैशेषिकशास्त्रानुसारेण, सांख्यशास्त्रानुसारेण, योगशास्त्रानुसारेण, विशिष्टाद्वैतिमतानुसारेण च; औपनिषददर्शनानुसारेणान्यरीत्या ज्ञानानुष्ठानप्रकाराणां पर्यालोचनम्; तदनुसारेण ज्ञानानुष्ठानविमर्शः ।

संदर्भग्रन्थसूची १८५-१८७

शुद्धिपत्रम्

— ० —

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२. सिद्धान्ततत्त्वावन्दा प्रथमरत्नाभिधानम् ८० ११ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Fundin

ज्ञानपरिचयसरणी

दर्शनानि→	पूर्वमीमांसायाम्		उत्तरमीमांसायाम्		सांख्ये	योगे	न्याये	वैशेषिके
विषयाः ↓	भाट्टे	प्राभाकरे	अद्वैते	श्रीरामानुजविशिष्टाद्वैते				
ज्ञानस्य पदार्थेषु-स्थानम्	आत्मपरिणामरूप-गुणात्मकप्रमेये	भट्टवत्	ब्रह्मात्मकज्ञानस्य दृशि वृत्त्यात्मकज्ञानस्य दृश्ये	धर्मभूतज्ञानं परागजडरूपम्, धर्मिभूतज्ञानं प्रत्यगजडरूपम्	वृत्तिज्ञानस्य बुद्धिगुणेऽन्तर्भावः	सांख्यवत्	आत्मविशेषगुणे	नैयायिकवत्
स्वयंप्रकाशत्वादि	स्वयंप्र०	स्वयंप्र०	स्वयं०प्र०	स्वयंप्र०	स्वयंप्र०	स्वयंप्र०	परप्र०	परप्र०
आश्रयः	आत्मा	आत्मा	वृत्तिरूपज्ञानस्यान्तःकरणम्। स्वरूपज्ञानस्य नास्त्याश्रयः	धर्मभूतज्ञानस्य आत्मा धर्मिभूतज्ञास्य नास्त्याश्रयः	वृत्तिरूपज्ञानस्य बुद्धितत्त्वम्,	सांख्यवत्	आत्मा	आत्मा
प्रमितयः	प्र०, अनु०, उप० शा०, अर्था०, अनुपलब्धिः—६	प्र०, अनु०, उप० शा०, अर्थापत्तिः—५	भट्टवत्—६	प्र०, अनु०, शा०, स्मृतिः—४	प्र०, अनु० शा०—३	सांख्यवत्	प्र०, अनु० उप०, शा०—४	प्र०, अनु० —२
भ्रमस्थले ख्यातिः	अन्यथाख्यातिः	अख्यातिः	अनिर्वचनीयख्यातिः	यथार्थख्या०। माध्वानामसत्ख्यातिः	अख्यातिः	सांख्यवत्	अन्यथाख्या०	अन्यथाख्या०
प्रामाण्ये स्वतस्त्वपरतस्त्वे	प्रामाण्यं स्वतः अप्रामाण्यं परत;	भट्टवत्	भट्टवत्	मीमांसकवत्	प्रामाण्यं स्वतः अप्रामाण्यं स्वतः	सांख्यवत्	प्रामाण्यं परतः अप्रामाण्यं परतः	न्यायवत्
मोक्षसाधनीभूतज्ञानम्	आत्मानमुपासीतेति श्रुत्युक्तमुपासनम्		ब्रह्मात्मैक्यज्ञानम्	वासुदेवस्य सर्वात्मत्वसर्वनियन्तृत्वादिज्ञानम्	प्रकृतिपुरुषविवेकः	निर्विकल्पसमाधिपूर्वकविवेकः	इतरभिन्नात्मज्ञानम्	न्यायवत्
प्रकटकर्त्ता आचार्यः	जैमिनिः		व्यासः		कपिलः	पतञ्जलिः	गोतमः	कणादः
प्रधानकाण्डः	कर्मकाण्डः		ज्ञानकाण्डः	उपासनाकाण्डः	ज्ञानकाण्डः	योगसाधनापूर्वकज्ञानकाण्डः	ज्ञानकाण्डः	ज्ञानकाण्डः

२. सिद्धान्ततत्त्वबिन्दौ

Nepal Sanskrit University, Balmeeki Campus, Kathman

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रथमपरिच्छेदः

पदार्थेषु ज्ञानस्यान्तर्भावः

(Knowledge as an Inclusive of the Elements)

छायापहारिणं नत्वा रामकार्यप्रसाधकम् ।
वैदिकेषु हि तन्त्रेषु ज्ञानमत्र विचार्यते ॥

अथेदं दृश्यते हि लोके—यो यद्विषयकज्ञानसम्पन्नो भवति, स तद्विषये स्वतन्त्रः, न तत्र पारवश्यं भजते । तद्व्यतिरेकेण च यो यद्विषयकाज्ञानवान् भवति, स तद्विषये परतन्त्रः, यथा—मन्त्रविषयेऽनभिज्ञो महांस्तार्किकोऽपि तद्विषयकज्ञानवन्तमनुसरति मन्त्रादिकार्यप्रसङ्गे; रोगौषधीनामनभिज्ञो महान्मान्त्रिकोऽपि सत्यामौषधाद्यावश्यकतायां तद्विषयकज्ञानवन्तमनुसरति, तत्र परतन्त्रतां चानुभवति । पारतन्त्र्यमेव दुःखम् यथा—

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
एतद्विद्यात् समासेन लक्षणं सुखदुःखयोः[1] ॥ इति ।

अत एव ज्ञानमेव स्वातन्त्र्यस्य, सुखस्य च प्रयोजकमित्यत्र नास्ति कस्यापि विमतिः । यादृशाधिकज्ञानसम्पन्ना व्यक्तिर्भवति, तादृशाधिकं स्वातन्त्र्यं समनुभवति, प्रायशस्तादृशाधिकोन्नताऽपि भवति । एवमेव यथा—यथाऽधिकज्ञानसम्पन्नो देशः प्रदेशो वा भवति, तथा तथाऽधिकं स्वातन्त्र्यमनुभवति । इदमेव ह्यस्माकं देशस्य गौरवं यदेतद्देशीया महान्तो भा = प्रकाशः (ज्ञानम्) + (तत्र) रतत्वेन विश्वगुरव आसन्—

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः[2] ॥

इति मनुवचनात् सकलमानवकर्तृककर्त्तव्यानुष्ठानविषयकज्ञानवत्त्वात् । ज्ञानवत्त्वेनैव हि नरः पशुभ्यः श्रेष्ठः स्वतन्त्रश्च भवति । अतश्चास्तिकदार्शनिकप्रवराणां वेदान्तिनां ज्ञानमेवात्मेति घण्टाघोषः । तथा चोक्तम्—

"तेनात्मा नाभावप्रतियोगी, अभावप्रतियोगिनश्च देहेन्द्रियादयस्तेनामी नात्मानः, किन्तु स्वप्रकाशे बोधरूप आत्मन्यद्वैतेऽप्यनाद्यनिर्वचनीयाविद्याकल्पिता अनिर्वचनीया एवेति सिद्धान्तरहस्यम्[3] ।" इति ।

---

१. मनुस्मृतिः ॥ ४।१६० ॥
२. मनुस्मृतिः ॥ २।२० ॥
३. सिद्धान्ततत्त्वबिन्दौ प्रथमश्लोकव्याख्याने पृ० २१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योगाचारप्रभृतिनास्तिका अपि—

"विज्ञप्तिमात्रमेवैतदसदर्थावभासनात् ।
यथा तैमिरिकस्यासत्केशचन्द्रादिदर्शनम्[1] ॥" इति

"चित्तमात्रं भो जिनपुत्रा यदुत त्रैधातुकमिति[2]" इति चामनन्ति ।

ज्ञानप्रयोज्यमेव चात्मनो वास्तविकं निरतिशयं सुखमात्यन्तिकं दुःखराहित्यञ्चेत्यत्र तु नास्ति प्रायशः कस्यापि विप्रतिपत्तिः, कर्मज्ञानानन्तरं तस्यानुष्ठानद्वारा कर्ममीमांसकैरात्मज्ञानेन चान्यैर्मोक्षस्वीकारात् । भक्तैरपि भगवत्स्वरूपज्ञानानन्तरमेव स्मृतिरूपज्ञानसन्ततयात्मकस्य ध्यानस्य मोक्षप्रयोजकताङ्गीकाराच्च ।

एवम्भूतस्यात्यन्तमुपादेयस्य स्वातन्त्र्यप्रयोजकस्य सकलार्थप्रकाशकस्य ज्ञानस्य विषये विभिन्नदार्शनिकैर्महान् विचारो विभिन्नरूपेण कृतो वर्तते । अत एव तस्य पर्यालोचनमावश्यकमिति विभाव्य चार्वाकसौगतादिनास्तिकदर्शनोक्ततद्विचारपर्यालोचनेऽतिविस्तरभयात् केवलवैदिकर्शनेषु सन्दृब्धानां तद्विषयकविचाराणां यथासम्भवं पर्यालोचनेऽत्र प्रबन्धे प्रयत्नो वितनिष्यते । वैदिकदर्शनेष्वपि वेदान्तदर्शने वैष्णवसम्प्रदायानुसारिणः शैवविशिष्टाद्वैतिनश्च प्रायशः सर्वेऽपि सिद्धान्ततो विशिष्टाद्वैतमतानुसारिण एवेति पृथग्रूपेण तेषां पर्यालोचनं न विधास्यते लाघवादरात् ।

तत्र प्रथमं तावज्ज्ञानं कः पदार्थ इत्येव समुन्मिषति जिज्ञासा प्रेक्षावताम्, स्वरूपादिपरिचयस्य प्रथममेवावश्यकत्वात् । अतस्तद्विषय एव विचारः प्रथममुपन्यस्यते ।

तत्तद्दर्शनाभ्युपगतपदार्थविभाजकतावच्छेदकधर्माणामत्यन्तविलक्षणत्वाद् दर्शनविशेषे ज्ञानमीदृशपदार्थ इति सहसा वक्तुमशक्यत्वेनातिसंक्षेपेण तत्तद्दर्शने पदार्थविभागोपन्यासपूर्वकं प्रकृतविषय उपस्थापयिष्यत इति ।

वैशेषिकमतम्

तत्र पदार्थविद्याप्रधाने वैशेषिकदर्शने भावपदार्थः षड्विधः—द्रव्यगुणकर्मसामान्यविशेषसमवायभेदादिति प्रसिद्धचरम्[3] ।

भावपदार्थेषु मध्ये ज्ञानापरपर्याया बुद्धिस्तु "रूपरस ······ परापरत्वे बुद्धयः सुखदुःखेच्छाद्वेषप्रयत्नाश्च गुणाः[4]" इति सूत्रानुसारेण गुणान्तःपातित्वेन परिगणिता ।

यथा च शब्दस्य "एकद्रव्यत्वान्न द्रव्यम्[5]", "नापि कर्माचाक्षुषत्वात्[6]" इति सूत्राभ्यां द्रव्यत्वकर्मत्वयोर्निषेधादन्यस्य चाप्रसक्तेः पारिशेष्याद् गुणत्वं तथैव ज्ञानस्याप्येकद्रव्यत्वाचाक्षुषत्वयोरसम्प्रतिपन्नत्वेन गुणत्वं निष्प्रत्यूहम् । साधितञ्च तस्यात्मगुणत्वम् "सोऽनपदेशः[7]" इत्यादिभिस्सूत्रैर्विस्तरेण ।

---

१. विज्ञप्तिमात्रतासिद्धौ प्रथमश्लोकः पृ० १६ ।
२. दाशमिकसूत्रम् पृ० ४८ ।
३. वैशेषिकदर्शनस्य ॥ १।१।४ ॥ सूत्रानुसारेण ।
४. वैशेषिकसूत्रम् ॥ १।१।६ ॥
५. वैशेषिकसूत्रम् ॥ २।२।२३ ॥
६. वैशेषिकसूत्रम् ॥ २।२।२४ ॥
७. वैशेषिकसूत्रम् ॥ ३।१।३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यायमतम्

न्यायशास्त्रे यद्यपि पदार्थाः षोडशसंख्याकत्वेन परिगणिताः[1], तथापि ते सर्वेऽपि प्रमाणेषु प्रमेयेषु वाऽन्तर्भवन्ति "संशयादयो यथासम्भवं प्रमाणेषु प्रमेयेषु चान्तर्भवन्तो न व्यतिरिच्यन्ते[2]" इति भाष्यवचनात् । गोवलीवर्दन्यायेन संशयादीनां पृथक् परिगणनं तु ज्ञेयपदार्थानां प्रमेयात्मकानां येषां तत्त्वज्ञानादपवर्गो मिथ्याज्ञानाच्च संसारस्तेषां तत्त्वज्ञानोत्पत्तौ संशयत्वादिरूपेण ज्ञानस्यावश्यकत्वाय । उक्तञ्च—"एवं चतसृभिर्विधाभिः प्रमेयं विभक्तमासेवमानस्याभ्यस्यतो भावयतः सम्यग् दर्शनम्, यथाभूतावबोधस्तत्त्वज्ञानमुत्पद्यते[3]" इति । कीदृशप्रमेयविषयकमिथ्याज्ञाननिवृत्तौ दोषप्रवृत्त्यादीनामपनयनद्वाराऽपवर्ग इति विचारावसरे भाष्यकारैः—

"तत्रात्माद्यपवर्गपर्यन्तं मिथ्याज्ञानमनेकप्रकारकं वर्त्तते[4]" इत्युक्तम् ।

इदमवधेयम्

अवयवातिरिक्तानां सर्वेषां पदार्थानां प्रमेयेऽन्तर्भावो भाष्यकारैः प्रथमसूत्रभाष्ये प्रायशः स्वयमुपदर्शितः । केवलमवयवमुद्दिश्य—

"तेषु प्रमाणसमवायः । आगमः प्रतिज्ञा[5]" इत्याद्युक्तम ।

प्रमाणानां च पर्यालोचनेन प्रतीयते यत्तान्यपि प्रमेयान्तर्भूतान्येव 'प्रमाकरणं प्रमाणम्' इति व्युत्पत्त्येन्द्रियाणामेव प्रत्यक्षप्रमाणत्वेन व्याप्तिज्ञानस्यैव चानुमानप्रमाणत्वेन पदज्ञानस्यैव चागमप्रमाणत्वेन सादृश्यज्ञानस्यैव चोपमानप्रमाणत्वेन तेषां यथायथं प्रमेयस्वभावत्वात् । एवञ्च प्रमाणानां प्रमेयेऽन्तर्भूतत्वात् सुतरामेवावयवानां प्रमेयेऽन्तर्भावः । किञ्च प्रतिज्ञादीनां साध्यनिर्देशादिरूपत्वेन[6] शब्दस्वभावत्वानपायात् शब्दस्य च "दोषनिमित्तं रूपादयो विषयाः संकल्पकृताः[7]" इति सूत्र "स्थदि" पदेन संगृहीतत्वेनार्थान्तः पातित्वात् प्रमेयरूपत्वमेव । एवञ्चावयवा अपि प्रमेयान्तर्भूता एव । तथा च सर्वेऽपि पदार्थाः प्रमेयेऽन्तर्भवन्तीति वक्तुं शक्यत इति । न्यायभाष्यस्थाद् "अस्त्यन्यदपि द्रव्यगुणकर्मसामान्यविशेषसमवायाः प्रमेयम्, तद्भेदेन चापरिसंख्येयम् । अस्य तु तत्त्वज्ञानादपवर्गो मिथ्याज्ञानात्संसार इत्यत एतदुपदिष्टं विशेषेण[8]" ति वाक्याद् द्वादशविधानि—आत्मशरीरेन्द्रियार्थबुद्धिमन—आदिप्रमेयाणि द्रव्याद्यन्तर्भूतान्येवेति प्रतीयते[9] । एवञ्च न्यायशास्त्रेऽपि वैशेषिकसम्मतद्रव्यादय एव पदार्थाः । अनुमतञ्चैतत् परमर्षीणामपि पदार्थविभागमुद्दिश्य द्रव्यगुणेत्यादिरीत्या सूत्रेष्वपरिगणनेऽपि "तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात्[10]", "कर्माकाशसाधर्म्यात् संशयः[11]" इत्यादि-

---

१. न्यायदर्शनस्य ॥ १।१।१ ॥ सूत्रानुसारेण ।
२. न्यायभाष्यम् ॥ १।१।१ ॥ सूत्रे ।
३. न्यायभाष्यम् ॥ ४।२।१ ॥ सूत्रे ।
४. न्यायभाष्यम् ॥ १।१।२ ॥ सूत्रे ।
५. न्यायभाष्यम् ॥ १।१।१ ॥ सूत्रे ।
६. न्यायदर्शनस्य ॥ १।१।३३ ॥ सूत्रानुसारेण ।
७. न्यायसूत्रम् ॥ ४।२।२ ॥
८. न्यायसूत्रम् ॥ १।१।९ ॥
९. ॥ १।१।९ ॥ सूत्रोक्तानि ।
१०. न्यायसूत्रम् ॥ ३।१।७५ ॥
११. न्यायसूत्रम् ॥ ३।२।१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूत्रैस्तादृशविभागप्रणाल्याः स्पष्टरूपेण परिगृहीतत्वसूचनात् । अन्यथा "तदात्मगुणसद्भावादप्रतिषेधः[१]" इत्यतः पूर्वं कुत्रापि गुणपरिभाषामकृत्वैव कथं द्रव्याश्रितत्वघटितां तादृशपरिभाषां सिद्धवत्कृत्वा सूत्रमिदं पठेयुः ।

तत्र सूत्रे प्रमेयत्वेन पठिताऽर्थप्रकाशरूपा बुद्धिर्ज्ञानापरपर्याया नित्यस्य विभोश्चात्मनो गुणभूता, "इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्[२]" इति सूत्रेण तस्या आत्मानुमापकत्वमात्रप्रतिपादनेऽपि "तदात्मगुणत्वसद्भावादप्रतिषेधः[३]" "नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानात्[४]" "परिशेषाद्यथोक्तहेतूपपत्तेश्च[५]" इत्यादिसूत्रैः "ज्ञानमात्मलिंगं तद्गुणत्वात्" इत्यादिभाष्येण च साक्षादेवात्मगुणत्वप्रतिपादनात्, नेन्द्रियार्थयोरित्यादिसूत्रावतरणे च भाष्यकारैः—'प्रसिद्धोऽपि खल्वयमर्थः परीक्षाशेषं प्रवर्तयामीति प्रक्रियते" इत्यादिना बुद्धेरात्मगुणत्वस्य प्रसिद्धचरत्वप्रतिपादनाच्चेति ।

मीमांसकमतम्

भाट्टमतम्—एतन्मते मानमेयभेदात् पदार्थो द्विविधः । तदुक्तम्—

"मानमेयविभागेन वस्तुनां द्विविधा स्थितिः[६] ।" इति ।

अत्रापि प्रमाणानि प्रमेयेष्वन्तर्भवन्ति । उक्तञ्च—

"प्रमाणादयो यद्यप्यत्रैवान्तर्भवन्ति, तथापि प्रयोजनवशाद् भेदेन कीर्तनम्[७] ।" इति ।

प्रमेयं द्रव्यजातिगुणक्रियाऽभावभेदेन पञ्चविधम्[८] ।' तत्र

कर्मणो व्यतिरिक्तत्वे सत्यवान्तरजातिमान् ।
उपादानत्वनिर्मुक्तो गुणो गुणविदां मतः[९] ॥ इति

लक्षणलक्षितो गुणः "रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नसंस्कारध्वनिप्राकट्यशक्तिभेदाच्चतुर्विंशतिविधः[१०]" इत्यादिना विभक्तः ।

अत एतन्मतेऽपि बुद्धिर्गुणरूपं प्रमेयमिति । पुनश्च—"बुद्धिसुखदुःखेच्छाद्वेषप्रयत्ना आत्मविशेषगुणाः[११]" इति ग्रन्थादात्मविशेषगुणत्वं बुद्धेरवसीयते ।

---

१. न्यायसूत्रम् ॥३।१।१४ ॥
२. न्यायसूत्रम् ॥१।१।१० ॥
३. न्यायसूत्रम् ॥३।१।१४ ॥
४. न्यायसूत्रम् ॥३।२।१८ ॥
५. न्यायसूत्रम् ॥३।२।१९ ॥
६. मानमेयोदये प्रमाणप्रकरणे पृ० १ ।
७. मानमेयोदये प्रमेयप्रकरणे पृ० २९३ ।
८. मानमेयोदये प्रमेयप्रकरणे पृ० १४८ ।
९. मानमेयोदये प्रमेयप्रकरणे पृ० २४० ।
१०. तत्रैव ।
११. मानमेयोदये प्रमेयप्रकरणे पृ० २४८ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राभाकरमतम्—

मानमेयरीत्या पदार्थविभागसत्त्वेऽप्यत्र स्वरूपमेव भेदो भावान्तरमेवाभाव इति स्वीकारेणाभावाख्यपञ्चमप्रमेयास्वीकारात् तदवगत्यर्थमनुपलब्ध्यात्मकषष्ठप्रमाणस्याप्यस्वीकाराच्च प्रमेयचातुर्विध्यं प्रमाणपञ्चविधत्वञ्चाभ्युपेयते ।

प्राकट्यपृथक्त्वसंख्यासु विवादे सत्यप्यन्यत्र गुणविचारे प्रायशो मतैक्यम् । एवञ्चैतेषां मतेऽपि बुध्देर्गुणत्वमिति ।

एतावांस्त्वत्र विशेषः

नैयायिकभट्टमतसिद्धात्मगुणत्वसमानाकारकमात्मगुणत्वमेतैर्नाङ्गीक्रियते, किन्त्वात्मपरिणामरूपत्वम् । तथाहि—आत्मा चिदचिद्रूपः, प्रतिशरीरं भिन्नो विभुश्च । तत्र चिदंशेन द्रष्टृत्वं सोऽहमिति प्रत्यभिज्ञाविषयत्वञ्च । अचिदंशेन च ज्ञानसुखादिरूपेण परिणामित्वमिति । आत्मनि परिणामित्वस्वीकारेऽपि नानित्यत्वप्रसङ्गः, अनात्मन्येव परिणामित्वानित्यत्वयोर्व्याप्यव्यापकभावस्वीकारात्, "विक्रिया ज्ञानरूपाऽस्य न नित्यत्वे विरोत्स्यति[1]" इति प्राचीनवचनात् । व्यवसायरूपस्वप्रकाश-ज्ञानस्यैवोत्पत्तौ स्वाश्रये समवायेन, स्वस्मिंश्च तादात्म्येन घटादौ च विषयतासम्बन्धेन विषयीकरणाद् घटमहं जानामीत्याकारकत्रिपुटीप्रत्यक्षस्योत्पत्तिः । आत्मनि ज्ञानसुखादीनां समवायेनोत्पत्तिरिति ।

पूर्वोक्तमतपर्यालोचनम्

अत्रात्मनोऽचिदंशस्य परिणामित्वं ज्ञानस्येति यदुक्तं तन्न शोभनम् श्रुत्या बाधितत्वात् ।

"निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् ।
अस्थूलमनणवह्रस्वमग्राह्यमरूपमस्पर्शमगन्धम्[2]" ॥

इत्यादिश्रुतौ कूटस्थत्वनियतनिरंशत्वाम्नानात्, परिणामरूपधर्मस्योत्पत्तिविनाशस्वीकारे धर्मिण्युत्पत्तिविनाशदोषप्रसक्तेः, 'उपयन्नपयन् धर्मो विकरोति हि धर्मिणम्' इति न्यायस्यानिवार्यत्वेनात्मानित्यत्वप्रसङ्गात् । अत एव 'विक्रियाज्ञानरूपाऽस्य न नित्यत्वे विरोत्स्यति' इति हि वचनमात्रमेव । तेन परिणामित्वे स्वीक्रियमाणे कथमपि न नित्यत्वरक्षेति । 'एकैनैव स्वप्रकाशज्ञानेन त्रिपुटीप्रत्यक्षमित्यपि कथं युक्तमिति नाववुद्धयते, चाक्षुषज्ञान उद्भूतरूपवद्द्रव्यस्यैव योग्यत्वेन व्यवसायरूपज्ञानस्यात्मनश्च तद्विषयत्वासम्भवात् ।

सांख्यमतम्

सांख्यशास्त्रे पदार्थाः प्रधानतया चतूरूपेण विभक्ताः—केवलप्रकृतिः, प्रकृतिविकृतिः, केवलविकृतिः, अनुभयरूपश्चेति । तत्र प्रकृतिरतु प्रधानमेव । तच्च साम्यावस्थोपलक्षितमकार्यावस्थोप-

---

१. मीमांसादर्शने पञ्चमसूत्रे श्लोकवार्तिकमात्मवादस्थम् ।
२. श्वेताश्वतरोपनिषत् ॥६।१९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लक्षितं वा सत्त्वादिद्रव्यत्रयम् । तस्माद् बुद्धचाख्यं महत्तत्त्वं जायते—प्रकृतेर्महांस्ततोऽहंकारस्तस्माद् गणश्च षोडशकः[1]" इति वचनात् । इदमेव महत्तत्त्वमंशतो रजस्तमःसम्भेदेन परिणतं सद्व्यष्टिजीवाना-मुपाधिधर्मादियुक्तं क्षुद्रमपि भवति "महदुपरागाद् विपरीतम्[2]" इति वचनात् । महदहंकारमनस्त्रितयात्मक-स्यान्तःकरणस्य महत्तत्त्वं बीजावस्था । महत्तत्त्वस्य च प्राधान्येनासाधारण्येनाध्यवसायो वृत्तिः । धर्मधर्मिणोरभेदः स्वीक्रियते । तथा चोक्तम्—

"अध्यवसायो बुद्धिः क्रियाक्रियावतोरभेदविवक्षया[3]" । इति ।

ज्ञानप्रणाली चात्रेत्थम्—यथा स्वभावतश्चलनशीलमपि जलाशयस्थं सलिलं निर्गममार्गाभावरूप-प्रतिबन्धवशात् स्वयं क्षेत्रमनुपसर्पदपि, सति छिद्रे तद्द्वारा निर्गत्य कुल्यात्मना क्षेत्रमुपसृप्य केदाराकारेण परिणमते, तथा प्रकाशस्वभावत्वेन स्वभावतः सर्वार्थग्रहणसमर्थमपि बुद्धितत्त्वं तमसाऽऽवृतं सत् स्वयं विषयमनुपसर्पदपि रजसोद्घाटनानन्तरमिन्द्रियार्थसन्निकर्षादिना तमोनिरासे सत्त्वोद्रेक इन्द्रियप्रणालिकया विषयमुपसृप्य तदाकारेण परिणमते । बुद्धितत्त्वस्यायं परिणामोऽध्यवसायो वृत्तिर्ज्ञानं वेत्युच्यते । तथा चोक्तं—

"अध्यवसायश्च बुद्धिव्यापारो ज्ञानम् । उपात्तविषयाणां वृत्तौ सत्यां बुद्धेस्तमोऽभिभवे सति यः सत्त्वसमुद्रेकः सोऽध्यवसाय इति वृत्तिरिति ज्ञानमिति चाख्यायते[4]" । इति ।

वस्तुतस्तु तमोऽभिभवसमसमयो यो बुद्धेस्सत्त्वसमुद्रेकः स एव वृत्तिपदार्थत्वेनात्र विवक्षितोऽन्यथाऽनुमानागमवृत्तिषु वृत्तिलक्षणाव्याप्तिः स्यात् । तथा च सत्त्वोद्रेक एव वृत्तिपदार्थः । तत्र च तमोऽभिभवनं कारणम् । तमोऽभिभवे चेन्द्रियसन्निकर्षव्याप्तिज्ञानादिकं निमित्तमिति फलितम् ।

बुद्धचादेः सांख्यकृतान्ते सावयवत्वेन मध्यमपरिमाणत्वमेवेति न विषयाकारपरिणामानुपपत्तिः । तथा च विषयाकारपरिणामधारिणा बुद्धितत्त्वेन स्वोपगृहीतानां विषयाणां स्वप्रतिबिम्बिते चेतने समर्पणमेव ज्ञानरूपं फलमित्यभिधीयते ।

अस्मिन् शास्त्र इन्द्रियार्थसन्निकर्षादिना जायमानोऽयं घट इत्यादिबौद्धो बोधः प्रथमं स्वीक्रियते तदनूपजायमानो घटमहंजानामीत्यादिपौरुषेयो बोधः स्वीक्रियते । एवञ्चेन्द्रियप्रणालिकयाऽर्थसन्निकर्षेण लिङ्गज्ञानादिना वादौ बुद्धेर्जायमानाऽर्थाकारा वृत्तिरर्थोपरक्ता प्रतिबिम्बरूपेण पुरुषारूढा सती भासते पुरुषस्यापरिणामित्वेन स्वतोऽर्थाकारत्वासम्भवादर्थाकारत्वस्यैव ह्यर्थग्रहणत्वात् । तथा चोक्तम्—

"जपास्फटिकयोरिव नोपरागः किन्त्वभिमानः[5]" । इति ।

एतन्मते ज्ञानस्य द्रव्यत्वं स्वीक्रियते । तथाहि—सत्त्वरजस्तमसां द्रव्यत्वं सुखप्रसादादिगुणवत्त्व-संयोगविभागादिमत्त्वानाश्रितत्वोपादानत्वादिना[6] सिद्धचति । आकार्यावस्थोपलक्षितं सत्त्वादिद्रव्यत्रयमेव

---

१. सांख्यकारिका २२ ।
२. सांख्यप्रवचनसूत्रम् २।१४ ।
३. सांख्यतत्त्वकौमुदी, २३ कारिकायाम् ।
४. सांख्यतत्त्वकौमुदी, ५ कारिकायाम् ।
५. सांख्यप्रवचनसूत्रम् ॥६।२८॥
६. सांख्यप्रवचने ॥१।६१॥ सूत्र—तद्भाष्यानुसारेण ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकृतिः । सैव महत्तत्त्वरूपेण परिणमते । अतो महत्तत्त्वमपि द्रव्यमेव । तस्यैव नामान्तरं बुद्धिरित्युपर्युक्तम् । अध्यवसायबुद्ध्योश्चाभेदस्वीकाराद् बुध्देश्च द्रव्यत्वाभ्युपगमाददध्यवसायस्यापि द्रव्यत्वं स्थितम् । तथा च यथा सत्त्वरजस्तमसां द्रव्यत्वं तथैवाध्यवसायस्यापि द्रव्यत्वम् ।

अत्रेदमवधेयम्

द्रव्यगुणकर्मेत्यादिपरिभाषा हि वैशेषिकाणां नैयायिकानाञ्च । अतस्तन्मते ज्ञानस्य गुणत्वं भवतु नाम । एतैस्तु सा परिभाषा नाभ्युपेयते । अत एवैतन्मते प्रकृतौ वर्त्तमानद्रव्यत्वसमानजातीयद्रव्यत्वमध्यवसायेऽप्यध्यवसीयते पूर्वोक्तसंयोगविभागादिमत्त्वादिहेतूनामत्रापि सत्त्वात् । तथा चोक्तं—

"एतेन बुद्धिवृत्तिरपि प्रदीपशिखावद् द्रव्यरूप एव परिणामः स्वच्छतयाऽर्थाकारतोद्ग्राही निर्मलवस्त्रवदिति सिद्धम्[१]" । इति ।

इयांस्तु विशेषः

घटादिद्रव्याणि स्वाधिकरणीभूतदेशव्याप्यानि, वृत्तिस्तु न घटादिवत् स्वाधिकरणीभूतदेशव्याप्यद्रव्यरूपा, अपि तु प्रसर्पणक्रियायोगिनीति ।

योगमतम्

योगशास्त्रेऽपि द्वावेव मूलभूतौ पदार्थौ दृष्टृदृश्यभेदेन पुरुषप्रकृतिभेदेन वा । क्लेशकर्मविपाकाशयापरामृष्टपुरुषविशेषत्वेन स्वेच्छया निर्माणकायमधिष्ठाय लौकिकवैदिकसम्प्रदायप्रवर्त्तकत्वेन संसाराङ्गारे तप्यमानानां प्राणभृतामनुग्राहकत्वेन चेश्वराख्यः पुरुषविशेषोऽपि पुरुषपदार्थेऽन्तर्भूत एव । तस्य पृथक् परिगणनं तु सर्वज्ञत्वादिलक्षणपुरुषान्तरस्फुटवैलक्षण्यप्रयुक्तम् । इदमेव हि सांख्यशास्त्रापेक्षयाऽस्य वैलक्षण्यम् । शेषविभागस्तु पूर्ववदेव । तथा चोक्तं सर्वदर्शनसंग्रहकृद्भिः—

'भाव्यं च द्विविधम्-ईश्वरस्तत्त्वानि च । तान्यपि द्विविधानि जडाजडभेदात् । जडानि प्रकृतिमहदहङ्कारादीनि चतुर्विंशतिः । अजडः पुरुषः[२]" । इति ।

पुरुषस्तु बुद्धेः प्रतिसंवेदी द्रष्टेत्युच्यते । शब्दाद्याकारेण परिणतायां बुद्धौ दृश्यत्वं स्वीक्रियते । तदेवोक्तं—

"अत एव च शब्दाद्याकारपरिणतबुद्धिसत्त्वोपनीतान् सुखादीन् भुञ्जानः स्वामी भवति द्रष्टा, तादृशं चास्य बुद्धिसत्त्वं स्वं भवति । तदेतद् बुद्धिसत्त्वं शब्दाद्याकारवद् दृश्यमयस्कान्तमणिकल्पं पुरुषस्य स्वं भवति दृशिरूपस्य स्वामिनः[३]" । इति ।

---

१. । ५।१०७। सूत्रे सांख्यप्रवचनभाष्यम् ।

२. पातञ्जलदर्शनप्रकरणे पृ० ६८६ ।

३. व्यासभाष्ये तत्त्ववैशारदी सू० ।२।१७।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवञ्चास्मिन्नपि शास्त्रे "सत्त्वपुरुषयोरत्यन्तासङ्कीर्णयोः प्रत्ययाविशेषो भोगः परार्थत्वात् स्वार्थसंयमात् पुरुषज्ञानम्[१]" इति सूत्रानुसारेण येभ्यः प्रधानापरपर्यायसत्त्वादिकारणकार्यात्मकपदार्थेभ्यो विवेचनीयः पुरुषस्ते चतुर्विंशतिसंख्याकाः।

ज्ञानस्य प्रणाल्यपि साकल्येन सांख्यशास्त्रवदेव।

एवञ्चात्रापि ज्ञानस्य द्रव्यरूपत्वमेवेति प्रतीयते, सत्त्वादीनाम् "एते गुणाः परस्परोपरक्तविभागाः परिणामिनः संयोगविभागधर्माण इतरेतरोपाश्रयेणोपार्जितमूर्तयः।[२]" इति भाष्यानुसारेण, "एते सत्त्वादयो गुणाः पुरुषस्य बन्धनरज्जव इत्यर्थः। सत्त्वादीनि द्रव्याणि, न तानि द्रव्याश्रया गुणाः तेभ्यो व्यतिरिक्तस्य गुणिनोऽभावादिति वेदितव्यम्।[३]" इति तदीयभास्वतीटीकानुसारेण च सांख्यशास्त्रवत् संयोगविभागवत्त्वहेतुना द्रव्यत्वस्वीकारात्। तावतैव प्रधानस्य तद्वदेव च महत्तत्त्वस्य द्रव्यत्वावधारणात्। परिणामपरिणामिनोश्च पूर्ववदत्राप्यभेदाज्ज्ञानस्य बुद्धितत्त्वपरिणामाभ्युपगमात्।

तन्मतद्वयपर्यालोचनम्

साचेयं सांख्यानां व्यवस्था नितान्तमनुभवविरुद्धा वृत्तिवृत्तिमतोरैक्यस्य लोकेऽदृष्टचरत्वात्। तदिदं पर्यालोच्योक्तं कन्दलीकारैः —

"विषयहानोपादानानुगुणमुत्पादव्ययधर्मकमेकम्, तदधिकरणं चापरम्, यस्य तदुत्पादात् प्रवृत्ति-निवृत्ती स्याताम्, इत्युभयं प्रत्यात्ममनुभूयते, न प्रकारान्तरम्। किञ्चास्या बुद्धेर्या वृत्तिः सा किं बुद्धेरन्याऽनन्या वा। न तावदन्या, वृत्तिवृत्तिमतोरैकान्तिकतादात्म्याभ्युपगमात्। अथानन्या, तदा बुद्धेरेकत्वे विषयाकारवतीनां द्वृत्तीनामप्येकत्वात्, त्रिचतुरादिप्रत्ययो दुर्लभः, परस्परविलक्षणाकार-संवेदनाभावाद्[४]"। इति। वृत्तीनां वा नानात्वे बुद्धेरपि नानात्वादेकत्वव्याघात इति[५] च।

विशिष्टाद्वैतिमतम्

निखिल चिदचित्प्रकारेण ब्रह्मैव तत्त्वम्। तदन्तर्गतञ्च सर्वं द्रव्याद्रव्यात्मना विभक्तम्। एवं द्रव्यस्यापि जडाजडभेदेन द्वैविध्यमित्यादिरीत्या विभागः। तदुक्तम्—

"सर्वं पदार्थजातं प्रमाणप्रमेयभेदेन द्विधा भिन्नम्। प्रमाणानि त्रीण्येव। प्रमेयं द्विविधं—द्रव्या-द्रव्यभेदात्। द्रव्यं द्विविधम्—जडाजडभेदात्। जडं च द्विधा—प्रकृतिः कालश्चेति। प्रकृति-श्चतुर्विंशतितत्त्वात्मिका। कालस्तूपाधिभेदात् त्रिविधः। अजडं तु द्विविधम्—प्रत्यक्परागिति। अजडं परागपि तथा नित्यविभूतिधर्मभूतज्ञानञ्चेति। प्रत्यगपि द्विविधः जीवेश्वरभेदात्।[६]" इति।

---

१. योगसूत्रम् ॥ ।३५॥
२. योगसूत्रे भाष्यम् ॥२।१८॥
३. तत्रैव भास्वती टीका।
४. प्रशस्तपादभाष्यन्यायकन्दलीटीकायाम् बुद्धिप्रकरणे, पृष्ठ ४१२।
५. तत्रैव।
६. यतीन्द्रमतदीपिकाप्रथमावतारे पृ० २-३।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवञ्चैतन्मते धर्मभूतज्ञानम् परागजडरूपम् । जीवस्य च ज्ञानधर्मत्वे सति ज्ञानरूपत्वस्वीकारेण, धर्मिभूतज्ञानं (जीवस्वरूपं) प्रत्यगजडरूपमिति ।

अत्र ह्यवस्थान्तरयोगित्वापरपर्यायं विकारित्वमेव द्रव्यलक्षणम् । तच्च बुद्धावपि स्वीक्रियते संकोचविकासरूपविकारस्य तत्राभ्युपगमात् । गुणत्वं त्वेतन्मतेऽपृथक्सिद्धत्वरूपमभ्युपेयते । अत एवैतद्राद्धान्ते द्रव्यस्यापि गुणत्वं न विरुद्धमपृथक्सिद्धेस्तत्रापि सम्भवात्, नैयायिकाभिमतावयविरूपे द्रव्ये द्रव्याश्रितस्वभावत्वलक्षणस्यापृथक्सिद्धत्ववत् । एतत्सर्वमभिप्रेत्योक्तम्—

'बुद्धिर्द्रव्यं विकारान्वयत इतरवद् बोद्धृवच्चाडत्वात्,
सङ्कोचादिप्रयोगा वहव इव तथा न ह्यमुख्या भवेयुः ।
एवं नास्या गुणत्वं गलति न खलु तत्तन्त्रसङ्केतसिद्धम्,
लोके धर्मस्वभावो गुण इति विदितं सापि सिद्धा प्रभावत[१] ।'

अन्यत्रापि—

'किञ्च, न तावदस्माकमद्रव्यमेव गुण इति वैशेषिकादिवन्निर्बन्धो विशेषणादिवत् । यो यदाश्रितस्वभावः स तस्य गुण इति हि गुणलक्षणम्, न तु पारिभाषिकम्, सर्वव्यवहारविरोधात् । एवञ्च गुणेषु कश्चिद्विशेषो द्रव्यात्मकगुणाः केवलगुणाश्चेति । पूर्वे ज्ञानादयः, उत्तरे सत्त्वरजस्तमःप्रभृयो वक्ष्यन्ते । तत्र गुणैकरूपत्वमात्रादेव सत्त्वादिषु गुणशब्दस्य मुख्यत्वम्, ज्ञानादिषु गौणत्वम्[२] ।' इति ।

अपरत्रापि—

'आत्मगुणभूतज्ञानस्य द्रव्यत्वं कथमिति न शङ्कनीयम्, प्रभावदेकस्यैव द्रव्यत्वगुणत्वयोर्विरोधाभावादि[३]' ति ।

'प्रयोगश्च—गुणभूता बुद्धिर्द्रव्यं प्रसरणादिमत्त्वात् प्रभावत्' इति ।

ज्ञानस्य प्रसरणे प्रमाणं तु 'प्रज्ञा च तस्मात् प्रसृता पुराणी' ति श्रुतिः[४] ।

'इन्द्रियाणां हि चरतां यद्येकं क्षरतीन्द्रियम् ।
तेनास्य क्षरति प्रज्ञा दृतेः पात्रादिवोदकम्[५] ।' इति स्मृतिश्च ।

अत एवात्मधर्मभूतस्यापि ज्ञानस्य स्वाश्रयादन्यत्र गमनं सुतरां सम्भवति, स्वाश्रयस्यात्मनोऽत्यागादितश्चेतश्चेन्द्रियद्वारा निस्सरणसम्भवात् । न च तावतापि सघनविरलतापत्तिर्विभक्तभागवत्स्वेव तत्सम्भवात् ज्ञानस्य च निर्भागत्वात् ।

एतन्मते ज्ञानस्यैवावस्थाविशेषाः सुखदुःखादयः । तथा चोक्तम्—

"बुद्धिरेवोपाधिभेदात् सुखदुःखेच्छाद्वेषप्रयत्नरूपा, सुखादिजनकतयाऽभ्युपगतज्ञानातिरेके प्रमाणाभावात् । इच्छामि द्वेष्मीत्यादिव्यवहारस्य ज्ञानविशेषेणैवोपपत्तेः[६]" । इति ।

---

१. तत्त्वमुक्ताकलापबुद्धिसरे कारिका ७, पृ० ४०० ।
२. न्यायसिद्धाञ्जने बुद्धिपरिच्छेदे ।
३. यतीन्द्रमतदीपिकासप्तमावतारे पृ० ५८ ।
४. श्वेताश्वतरोपनिषत् ॥४।१८॥
५. मनुस्मृतिः ॥२।९९॥
६. न्यायसिद्धाञ्जने बुद्धिपरिच्छेदे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तन्मतपर्यालोचनम्

अस्मिन् मते ज्ञाने नित्यधर्मत्वस्य नित्यत्वस्य चाभ्युपगमेऽपि सङ्कोचविकासौ कथमभ्युपेयेत इति नावबुद्ध्यते, तयोस्सावयवद्रव्यमात्रनिष्ठत्वेन ज्ञाने चासम्भवेन सङ्कोचविकासशालित्वहेतुकानुमाने स्वरूपासिद्धेः । धर्मे सावयवद्रव्यत्वस्वीकारे चानित्यत्वापत्तेर्धर्मस्यानित्यत्वे धर्मिण आत्मनोऽप्यनित्यत्वापत्तेर्दुर्वारत्वात् ''उपयन्नपयन् धर्मो विकरोति हि धर्मिणमि'' ति न्यायात् । वर्तिसङ्कोचविकासौ विना प्रभासङ्कोचविकासयोः कुत्राप्यदर्शनात् । न च 'प्रज्ञा च तस्मात् प्रसृता पुराणी[१]' इति श्रुतिबलाद् धर्मभूतज्ञानप्रसरणं सिद्ध्यति प्रकरणविरोधात् श्रुत्यर्थस्योपक्रमोपसंहारादिषड्विधलिङ्गैर्निर्णेतव्यत्वेनोदाहृतश्रुतिवचनस्य च परमात्मनो जीवात्मन उन्मेषनिमित्तत्वबोधकत्वात्—

''यदा तमस्तन्न दिवा न रात्रिर्न सन्नासच्छिव एव केवलः ।
तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात् प्रसृता पुराणी ।।''

इति सम्पूर्णमन्त्रे धर्मभूतज्ञानप्रसरणवार्ताया अभावात् । नाप्युक्तमनुवचनम्[२] तत्र प्रमाणत्वेनोदाहर्तुं शक्यते, तस्याजितेन्द्रियाणां ज्ञाननाशपरत्वेनेन्द्रियाधीनबुद्धिप्रसरणपरत्वाभावात्,

'इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि[३] ।।'

इति समानार्थकगीतावाक्यस्य सर्वमतेन ज्ञाननाशपरकत्वात् । एवञ्च न पूर्वोक्तश्रुतिस्मृत्यवष्टम्भेषु कुत्रापि सङ्कोचविकासकथा । अपि च सङ्कोचविकारशालित्वाभ्युपगमे कथञ्चिदपि नैतत्सम्मतं ज्ञाननित्यत्वं स्थातुमर्हति, दिगम्बरमतनिरासप्रसङ्गे ''न च पर्यायादप्यविरोधो विकारादिभ्यः[४]'' इति सूत्रे श्रीमद्रामानुजाचार्यैरेव—

''न च संकोचविकासरूपावस्थान्तरापत्त्यापि विरोधः परिहर्तुं शक्यते विकारतत्प्रयुक्तानित्यत्वादिदोषप्रसक्तेर्घटादितुल्यत्वप्रसङ्गाद्[५]'' इत्युक्तत्वात् ।

यत्त्वत्र व्याख्यायाम् ''ननु त्वन्मते धर्मभूतज्ञानस्य संकोचविकासाभ्युपगमे कथं नित्यत्वादि[६]'' इत्याशङ्क्य ''स्वरूपेण नित्यस्य वस्तुनो निरुपाधिकधर्मत्वादिति ब्रूमः'' इति समाहितं तदप्यप्रयोजकमनित्यम् विकारित्वादिति व्याप्तावनैकान्तिकत्वाद्यप्रदर्शकत्वात् । न चानित्यवृत्तित्वे सति सङ्कोचविकासशालित्वस्यैवानित्यत्वप्रयोजकत्वमिति व्याप्तिकथने व्याख्यातात्पर्यम्, तथा च विशिष्टाद्वैतमतेऽदोष इति वाच्यम्, लाघवेन सङ्कोचविकासशालित्वस्यैवानित्यत्वप्रयोजकत्वस्य वक्तुं शक्यत्वेनोक्तसूत्रस्थश्रीभाष्यकृततन्मतखण्डनप्रकारस्यायोग्यतापातात् । नित्यधर्मस्य सङ्कोचविकासादिविकाराणामन्यत्र कुत्राप्यदर्शनेनैतन्मते दृष्टान्ताभावाच्च ।

---

१. श्वेताश्वतरोपनिषत् ४।१८ ।
२. मनुस्मृतिः ।।२।१९९ ।।
३. श्रीमद्भगवद्गीता २।६७ ।
४. ब्रह्मसूत्रम् २।२।३४ ।
५. तत्रैव श्रीभाष्यम् ।
६. तत्रैव श्रुतप्रकाशिका ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालभेदेनापि धर्मभूतज्ञानस्य परिणामभेदो न व्यवस्थापयितुं शक्यः 'अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः[१]' इति सूत्रेण दिगम्बरं प्रत्युद्भावितदोषस्य विशिष्टाद्वैतवादेऽपि प्रसक्तिप्रसंगादिति ।

औपनिषदमतम्

ब्रह्मरूपात्माभिन्नं संविदेवैकं तत्त्वमनावृतावस्थायाम् (पारमार्थिक्यामवस्थायाम्) । आवृतावस्थायाम् (व्यवहारकाले) दृग्दृश्यभेदेन पदार्थो द्विविध इति प्रतीयते । उक्तञ्च—

"युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोः[२]" इति ।

तत्रास्मत्प्रत्ययगोचरो दृक्पदार्थो भगवत्पादाभिप्रेतो युष्मत्प्रत्ययगोचरश्चाखिलो दृश्यपदार्थः । तथैव श्रीमधुसूदनसरस्वतीभिरप्युक्तम्—

"नन्विदंकारास्पदेभ्योऽनात्मभ्यो विवेकेनाहङ्कारास्पदमात्मानं सर्वो लोकोऽहमस्मीति प्रत्येति[३]" इति ।

श्रीसदानन्दयतिभिस्तु शब्दत एवैतत्स्पष्टीकृतम्—

"इत्थञ्च वक्ष्यमाणं यावदविद्याकार्यं परिदृश्यमानो नामरूपक्रियात्मको दृश्यपदार्थ एवायम् । दृक्पदार्थश्च आत्मा, इति पदार्थद्वयं सिद्धयति व्यवहारे । परमार्थतस्तु अविद्या तु तत्कार्यनाशादात्मैव एकः[४]" इति ।

एवञ्च ब्रह्माभिन्नात्मरूपज्ञानं दृग्रूपम् । तथा चोक्तं संवित्पदार्थमुपक्रम्य 'इयमात्मा परानन्दः परप्रेमास्पदं यतः[५]' इति ।

घटपटाद्याकारखचितं तु ज्ञानमपञ्चीकृतपञ्चमहाभूतकार्यस्यान्तःकरणस्य परिणामरूपम् । उक्तञ्च परिभाषायाम्—

"वृत्तिरूपज्ञानस्य मनोधर्मत्वे च "कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव[६]" इति श्रुतिर्मानम्, धीशब्देन वृत्तिरूपज्ञानाभिधानात्[७]" इति ।

अत एवेदं ज्ञानं न आत्मधर्मः, किन्तु मनोधर्म एव मृद्घट इत्यादिवत् श्रुतौ 'सर्वं मन एवे' ति मनःसामानाधिकरण्यश्रवणेन मनोरूपान्तःकरणधर्मत्वावगमात् । इत्थञ्च व्यवहारकालीनघटपटादिज्ञानानां दृश्यकोटावन्तर्भाव इति वक्तुं शक्यत इति ।

---

१. ब्रह्मसूत्रम् २।२।३५ ।
२. ब्रह्मसूत्रशाङ्करभाष्यम् १।१।१ ।
३. सिद्धान्तबिन्दौ प्रथमश्लोकव्याख्याने ।
४. अद्वैतब्रह्मसिद्धौ प्रथममुद्गरप्रहारे पृ० १६ ।
५. पञ्चदशी १।८ ।
६. बृहदारण्यकोपनिषत् १।५।३ ।
७. वेदान्तपरिभाषायां प्रत्यक्षपरिच्छेदे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न चाहं जानामीत्याद्यनुभवस्य ज्ञानमात्मधर्मत्वेनावगाहमानस्य विरोधाज्ज्ञानस्यान्तःकरणधर्मत्वं नोपपद्यते, 'सर्वं मन एवे' त्यादिश्रुतेः 'आयुर्वै घृतम्' इत्यादिवद् हेतावौपचारिकत्वसम्भवादिति वाच्यम्, जानामीत्याद्यनुभवस्य विषयाकारपरिणाम्यन्तःकरणैक्याध्यासादुपपद्यमानत्वेन श्रुतेरमुख्यार्थत्व-कल्पनाया अन्याय्यत्वात्, लोकेऽप्ययःपिण्डादेर्दग्धृत्वाभावेऽपि दग्धृत्वाश्रयवह्नितादात्म्याध्यासेनायो दहतीति व्यवहारदर्शनात् ।

अत्र मनोरूपान्तःकरणस्यापञ्चीकृतपञ्चभूतोत्थत्वेन, 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च'[1] "अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति, यो मध्यमस्तन्मांसम्, योऽणिष्ठस्तन्मनः[2]", 'तन्मनोऽसृजत्' इत्यादिश्रुतिबलाच्च सादिद्रव्यत्वेन सावयवत्वमभ्युपगम्यते । अत एवाकाशवन्निरवयवत्वात्परिणामित्वानुपपत्तिशङ्का नोन्मिषतीति । उक्तञ्च परिभाषायाम्—"न तावदन्तःकरणं निरवयवं सादिद्रव्यत्वेन सावयवत्वात्[3]" इति ।

वस्तुतस्त्वत्र 'सत्यं ज्ञानमनन्तं ब्रह्म[4]' इत्यादिश्रुत्या चैतन्यमेव मुख्यो ज्ञानपदार्थः । चैतन्यरूपज्ञानावच्छेदकत्वाच्च विषयाकारवृत्तौ ज्ञानपदस्य गौणप्रयोगः । तदुक्तं बिन्दुसन्दीपने—

'वृत्त्यवच्छिन्ने ज्ञानपदप्रयोगात्, न तु केवलवृत्तौ[5]' इति ।

एवञ्च ज्ञानमेकं नित्यञ्च, विषयज्ञानयोः सम्बन्धमविषयीकृत्य 'ज्ञानमुत्पन्नं नष्टम्' इति प्रत्ययस्यानुदयेन ज्ञानोत्पत्त्यादिविषये ज्ञानविषयसम्बन्धविषयकत्वस्यावश्यं वाच्यतया तेनैवोत्पत्तिविनाश-प्रत्यययोरुपपत्तेः । घटज्ञानमुत्पन्नं नष्टमिति धीस्तु 'अयमिदानीं शिखी जातः, अयं शिखी नष्टः' इति धीवद्विशेषणसम्बन्धोत्पत्तिविनाशविषयिण्येव । एतदभिप्रेत्यैवोक्तं बिन्दौ—

"घटज्ञानं पटज्ञानमित्युपाधिभेदपुरस्कारेणैव ज्ञानभेदप्रतीतेः, स्वतस्तु ज्ञानं ज्ञानमित्येकरूपावगमात् तदुत्पत्तिविनाशप्रतीत्योश्चावश्यकल्प्यविषयसम्बन्धविषयतयाप्युपपत्तेरि[6]" ति ।

स्पष्टीकृतञ्च बिन्दुसन्दीपने—

' "ककारो नष्टः" इति प्रत्ययस्य यथा वायुसंयोगनाशविषयकत्वं यथा वा "स्वर्गी नष्टः" इति प्रत्ययस्य स्वर्गसम्बन्धविषयकत्वम्, यथा दण्डपुरुषोभयसत्वे "दण्डी नष्ट" इति प्रत्ययस्य एतदुभयसंयोग-ध्वंसविषयकत्वम्, यथा नाहं विद्वाञ्जातः, घटाकाश उत्पन्नः, कूपाकाश उत्पन्नः, घटाकाशो नष्टः, कूपाकाशो नष्ट इतिप्रत्ययस्य नात्माकाशविषयत्वम्, अपि तु विद्याघटादिविषयत्वम् तथा घटज्ञानं नष्टमिति प्रत्ययस्य न ज्ञानविषयत्वम्, किन्तु तदुभयोः सम्बन्धविषयकत्वमित्यर्थ[7]' इति ।

---

१. मुण्डकोपनिषत् २।१।३ । कैवल्योपनिषत् १।१५ ।
२. छान्दोग्योपनिषत् ६।५।१ ।
३. वेदान्तपरिभाषायां प्रत्यक्षपरिच्छेदे पृ० ३६ ।
४. तैत्तिरीयोपनिषत् २।१।१ ।
५. सिद्धान्तबिन्दुप्रथमश्लोकसन्दीपनव्याख्याने पृष्ठ ३९ ।
६. सिद्धान्तबिन्दुप्रथमश्लोकव्याख्याने पृ० ३५ ।
७. प्रथमश्लोके बिन्दुसन्दीपनव्याख्याने पृ० ३८ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतेनैवैकत्वमपि साधितं भवति, प्रतीयमानज्ञानभेदस्योपाधिभेदेनैव सूपपत्तेः । उक्तञ्च—

"विवादाध्यासिता संवित् स्वाभाविकभेदशून्या, उपाधिपरामर्शमन्तरेणाविभाव्यमानभेदत्वात्, गगनवत्[१]" इति ।

मधुसूदनसरस्वतीभिरपि घटादावप्येकत्वमेवास्तु भेदधीस्त्वौपाधिकभेदेनोपपादनीयेतीमां, शङ्का मनसि निधाय, "उपाधिपरामर्शमन्तरेण स्वत एव घटाद् घटान्तरस्य भेदप्रतीतेः, तत्प्रतिबन्दिग्रहासम्भवात्[२]" इति समाहितम् ।

न चैवमपि पुरुषभेदेनावश्यं ज्ञानं भिन्नं वक्तव्यम्, अन्यथा देवदत्तीयं ज्ञानं यज्ञदत्ते नास्तीत्यादिप्रत्ययानामनुपपत्तिरिति वाच्यम्, उपाधिभेदेनैव तत्राप्युपपत्तिसम्भवादन्यथा 'घटाकाशं पटे नास्ति, तद्घटकाल एतद्घटकालो न, प्राची न प्रतीची' इत्यादिप्रत्ययैराकाशकालादीनामपि भेदप्रसङ्गात् । उक्तञ्चैतद्विन्दौ—'आकाशकालदिशामपि नानात्वापत्तेश्च[३]' इति ।

१. पञ्चदशीग्रन्थस्य श्रीरामकृष्णकृतव्याख्यायां प्रथमप्रकरणस्य तृतीयश्लोके ।
२. सिद्धान्तबिन्दुप्रथमश्लोके पृ० ३५ ।
३. तत्रैव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीयपरिच्छेदः

ज्ञानस्य स्वयंप्रकाशत्वम्

(Self-Luminosity of Knowledge)

अधुना ज्ञानस्य स्वयंप्रकाशत्वविषये विचार उपन्यस्यते । न्यायवैशेषिकेतरसर्ववादिमते प्रायो ज्ञानस्य स्वयंप्रकाशत्वमभ्युपगम्यते । तत्स्वरूपं तु तत्तन्मतेषु भिन्नं भिन्नमित्यन्यदेतत् ।

स्वयंप्रकाशत्वस्वरूपम्

यस्यापरोक्षतया व्यवहारार्थं तद्विषयकं ज्ञानं नापेक्ष्यते तत्स्वप्रकाशम् । अयमाशयः—यथा घटदर्शनार्थमालोकापेक्षा विद्यते, किन्त्वालोकदर्शनार्थं नालोकान्तरापेक्षा, तथैव घटाद्यस्वप्रकाशवस्तुविषयकव्यवहारार्थं घटादिज्ञानापेक्षा, किन्तु ज्ञानादिस्वप्रकाशवस्तुनो व्यवहारार्थं न पुनस्तज्ज्ञानस्यापेक्षा भवतीति । तथा चान्यप्रकाशानधीनप्रकाशत्वं स्वप्रकाशत्वमिति पर्यवस्यति ।

अत्रौपनिषदानामयमाशयः — ज्ञानं नित्यम् । तच्च स्वस्य प्रकाशं प्रत्यपरं ज्ञानं नापेक्षत आत्मरूपत्वात्[1] । एवञ्च तत्र ज्ञानकर्म, स्ववेदकस्य ज्ञानान्तरस्य ज्ञानान्तरेण, तस्यापि च ज्ञानान्तरेण वेद्यत्वेऽनवस्थापातात् । प्रदीपः प्रकाशत इत्यत्रेव स्वयमेव स्वस्य प्रकाशं प्रति कर्तृता । अन्यकर्तृकत्वे तस्यापि प्रकाशार्थं कर्त्रन्तरापेक्षेत्यनवस्थापत्तेरिति कर्त्रन्तरज्ञानान्तरानपेक्षं स्वस्वरूपं प्रति स्वप्रकाशत्वमित्यात्मसंविद्रूपत्ववादिनां सिद्धान्तः ।

तदुक्तं ब्रह्मसिद्धौ—"संविदोऽसंवेदने सन्नप्यसत्कल्प इति व्यर्थं तत्सङ्कीर्तनम् । पुरुषार्थत्वाय हि तत्सङ्कीर्तनम् । अवेद्यश्च कथं पुरुषार्थः ? उच्यते-फलवत् कर्तृवच्चेदं द्रष्टव्यम् । तथाहि–प्रमाणस्य फलमर्थान्तरमनर्थान्तरं वा सर्वपरीक्षकैः प्रतिज्ञायते प्रज्ञायते च । न च तदसंवेद्यम्, तदसंवेद्यत्वे सर्वविद्यत्वप्रसङ्गात्, तत्कृतत्वात्संवेद्यभावस्य भावानाम् । न च संवेद्यं फलान्तरानुपलब्धेः, अनवस्थाप्रसङ्गाच्च । तस्मात् संवेद्यम् आत्मप्रकाशत्वाद्, असंवेद्यं च विषयवत्कर्मभावाभावात्[2]" इति ।

इष्टसिद्धावपि—'अनुभूतेरनुभाव्यत्वे घटादिवदननुभूतित्वप्रसङ्गात्[3]' इति ।

---

१. द्र०—प्रथमपरिच्छेदऔपनिषदमतम् ।

२. ब्रह्मसिद्धिः पृ० ४ ।

३. इष्टसिद्धौ प्रथमे दृग्दृश्ययोर्भेदनिरासाख्ये परिच्छेदे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्त्वप्रदीपिकायामपि—'अनुभूतिः स्वयंप्रकाशा अनुभूतित्वाद् यन्नैवं तन्नैवम्, यथा घटः[1]' इति। लक्षणमपि तत्रोक्तम्—'अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वस्य तल्लक्षणत्वात्[2]' इत्यादिग्रन्थेन।

विज्ञानमप्रतिभासमानमेवान्यत्रार्थे व्यवहारं जनयतीत्यभ्युपगमे घटोऽयं मया ज्ञातो न वेत्यनन्तरक्षणे सन्देहापत्तेः। न हि कश्चिद् 'अपश्यदमुं नो वा भवानि' ति पृष्टोऽनन्तरं सन्दिग्धे किमहमपश्यम्, नो वेति, किन्तु निश्चिनोत्येवाहमपश्यमिति। न च सुखादिवदन्याधीनप्रकाशत्वेऽपि संशयाद्यविषयत्वमुपपद्यतामिति वाच्यम्, तथा सति यदधीनप्रकाशत्वमभिप्रेतं तस्यापि वेद्यत्वेऽनवस्था-प्रसङ्गः पूर्ववदेव तदवस्थः स्यात्, स्वप्रकाशत्ववादिमते तत्साक्षिणः स्वप्रकाशत्वेनानवस्थानवतारात्। तस्मात् प्रयोगः— घटज्ञानं घटव्यवहारसमये व्यवह्रियमाणं ज्ञातो घट इति व्यवहारविषयत्वाद् घटवदिति। कथञ्चिदप्यनन्तरं सन्देहानवतारो विपक्षे बाधकस्तर्कः।

अथानुभूतिरनुभाव्यैवेति न नियमो येनानवस्थाऽऽपद्येत। अज्ञातं सदेव स्वरूपसत्तामात्रेण व्यवहारप्रयोजकत्वोपगमादिति चेन्न, परप्रकाशत्ववादिमते तज्ज्ञानमन्तरेण तत्सत्ताया अप्यनिश्चयात् सत्ताविषयकप्रमाणाभावे दुरवधारणसत्ताकत्त्वादन्यथा तुल्यतयाऽसत्त्वाध्यवसायापत्तेः। तस्मात् सत्त्वमपि तस्य प्रमाणादेवावगन्तव्यम्।

ननु सत्तायां प्रमाणमेव नास्तीति नोच्यते, किन्तु जिज्ञासोदये सत्येव तद्विषये प्रमाणोपन्यासः क्रियते न पुनः स्वोदयसमकालमेव। अत एव नानवस्था न वा व्यवहारानुपपत्तिरिति चेन्न-एतादृशवित्ति-परम्पराया अनुपलब्धिपराहतत्वात्। तथाहि—न केनापि प्रेक्षावत्पुरुषेण व्यवसायानुव्यवसायातिरिक्ता तत्तद्वित्तिपरम्पराग्राहिका काचिदपि वित्तिरनुभूयते। तद्विषयकप्रमाणं विनैव तत्सत्ताभ्युपगमे प्रमेयसत्ताया अपि तथैव स्वीकारे प्रमाणान्तरगवेषणस्य वैयर्थ्यापत्तेः। अथ स्वज्ञापकप्रमाणमन्तरेणैव स्वरूपविशेषाद् द्वितीयज्ञानं स्वविषये व्यवहारं प्रवर्तयति, न ह्येकस्य यादृशः स्वभावस्तादृश एव सर्वस्येति वक्तुं युज्यत इति चेन्न-अन्तिमज्ञाने प्रयुज्यमानस्य न्यायस्य प्रथमज्ञान एव प्रयोगे बाधकाभावात्।

किञ्च, ज्ञानग्राहकविज्ञानस्य सामग्र्यनिरूपणादपि ज्ञानस्य वेद्यत्वं न सम्भवति। तथाहि— विज्ञानविषयकं विज्ञानान्तरं परप्रकाशत्ववादिभिर्मानसमिष्यते। तत्र येन मनःसंयोगेन विषयविज्ञानमुत्पन्नम्, तेनैव विज्ञानविषयकमपि विज्ञानमुत संयोगान्तरेण? आद्येऽपि एकेन मनःसंयोगेनैकदैव ज्ञानद्वयं जन्यत उत वा क्रमेण? न तावत् प्रथमकल्पे प्रथमः, ज्ञानस्य यौगपद्यास्वीकारात्, जन्यजनकयोः समकालमेव जन्मा-भावाच्च। नापि प्रथमे द्वितीयः, असमवायिकारणभेदस्यैव ज्ञानभेदहेतुत्वात् प्रथमज्ञानजनकमनःसंयोगेन द्वितीयज्ञानजन्मासम्भवात्। अन्यथा मनःसंयोगभेदस्यानङ्गीकारे विषयस्य चैकत्वादेव सम्पन्नत्वेन संस्कार-त्वेनसंस्कारस्येन्द्रियसंयोगस्य च विद्यमानत्वेनापेक्षणीयान्तरासम्भवेन च यत्र संस्कारसहितमिन्द्रियं प्रत्यभिज्ञां जनयति, तत्र घटविषयके अनुभवस्मरणे तद्घटविषयकानुभवान्तरञ्चेति ज्ञानत्रयस्य युगपदुत्पत्तिप्रसङ्गात्।

---

१. चित्सुखी पृ० २१।
२. चित्सुखी पृ० १६।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा च कार्यभेददर्शनात् तदुपपादकोऽसमवायिकारणभेदोऽवश्यमङ्गीकरणीयः । एवञ्चैकेनैव कारणेन कार्यद्वयमित्युक्तम् । तस्मात् क्रमवत्कारणमन्तरेण कार्यक्रमस्यानुपपद्यमानत्वादसमवायिकारणक्रमोऽवश्यं कल्पनीयः । अथासमवायिकारणक्रमानभ्युपगमेऽपि विषयेन्द्रियसंयोगादिवाह्यसामग्रीभेदादेव कार्यक्रमोपपत्तिरिति चेत्तदप्ययुक्तम्, तथा सति यत्र युगपदेव विषयेन्द्रियसम्प्रयोगास्तत्र युगपदेवानेकज्ञानोत्पत्तिप्रसङ्गस्यानिष्टस्यापत्तेः । तस्मात् तत्रापि कार्यक्रमप्रयोजको वाह्यसामग्र्यतिरिक्तस्य कारणस्य क्रमो वक्तव्यः, तत्र च मनस आत्मव्यतिरिक्तदेशस्थत्वाभावेनात्ममनसोः क्रमायोगात् परिशेषात् तयोः संयोगरूपासमवायिकारणक्रम एव प्रयोजकः । तथा च प्रथमज्ञानजनकसंयोगाद् द्वितीयज्ञानजन्मेति पक्षो न विचारसहः । नापि द्वितीयः, घटज्ञानोत्पत्तिसमकालं मनसि क्रिया, ततो विभागः, ततः पूर्वसंयोगविनाशः, तत उत्तरसंयोगोत्पत्तिः, ततो ज्ञानान्तरमिति वहुतरकालविलम्बितेन ज्ञानेन प्राचीनज्ञानस्य तावत्पर्यन्तमविद्यमानस्य विषयीकरणासम्भवात् ।

ननु स्वप्रकाशं ज्ञानमिति वदता एकस्यैव प्रकाश्यप्रकाशकभावोऽभ्युपगतः । स न सङ्गच्छते, स्वात्मनि वृत्तिविरोधात् । तथा च न स्वसंवेदनं ज्ञानमिति चेन्न, वृत्त्यनभ्युपगमादालोकवत् । तथाहि—यथाऽऽलोकस्तमःपटलनाशेन चक्षुराप्यायकत्वेन वा घटादिभिः स्वप्रकाशनायापेक्ष्यते । न चालोकेन स्वप्रकाशनायालोकान्तरम् । नैव चास्य वृत्तिविरोधः स्वात्मनि । न खल्वस्य स्वभावभेदादालोकान्तराधीनप्रकाशादन्या वृत्तिर्या स्वात्मनि विरुद्धयेत, तथैव ज्ञानेऽपीति न दोषः ।

अथ घटज्ञानवानहमस्मि, ज्ञातो घट इत्याद्यनुभवेन ज्ञानविषयकवेदनस्य सिद्धिरिति चेत्, न; ज्ञानस्य वेद्यत्वं विनैव स्वतःस्फुरणरूपत्वेन स्वरूपस्फुरणेन, घटस्य तु तेनैव ज्ञानेन स्फुरणेन तादृशव्यवहारोपपत्तिरिति स्वीकारे ज्ञानविषयकवेदनासिद्धेः ।

अपि च ज्ञानस्य विदितत्वं तदा सिद्धयेद् यदि 'विदितः' इति पदं ज्ञानेन समन्वियात् । किन्त्वेतन्नास्त्येव घटेनैव तस्यान्वयदर्शनात् । किञ्चैतज्ज्ञाननिष्ठवेद्यत्वं किमनेनैव ज्ञानेन गृह्यतेऽन्येन वा ? न तावत् प्रथमः, अपसिद्धान्तापातात्, नापि द्वितीयः, तदानीं प्रथमस्यातीततया तन्निष्ठवेद्यताया अप्रत्यक्षत्वात् ।

ननु ज्ञानं वेद्यं वस्तुत्वादित्यनुमानवलेन ज्ञाने वेद्यत्वसिद्धिरिति चेन्न, व्याप्तिग्रहणासम्भवात् । तथाहि—यद्यद् वस्तु तत्तद्वेद्यमिति हि तत्र व्याप्तिस्वरूपं पर्यवस्यति । अस्या व्याप्तेर्ग्राहकं ज्ञानं व्याप्तिग्रहणसमये स्फुरति न वा ? आद्ये स्वेनैव स्वस्य ग्रहणे स्वस्यैव क्रियाकर्मभावस्वीकाररूपवौद्धाभिमतस्वप्रकाशताभ्युपगमे पर्यवसानं स्यात् । अन्येन ग्रहणे त्वनवस्थादोषग्रस्तता उक्तैव । तत्स्फुरणस्य स्वहेतुताया अप्यनङ्गीकारे तु वेदान्त्यभिप्रेतस्वयंप्रकाशताऽभ्युपगमे पर्यवसानं स्यात् । द्वितीये ज्ञानरूपवस्तुविशेषस्यास्फुरणादेव सर्वव्यक्तिनिष्ठा व्याप्तिर्नैव सिद्धयेदिति नैवैतादृशानुमानस्य प्रसरः ।

नैयायिकास्तु स्वप्रकाशं न किञ्चिद् वस्त्वित्यभ्युपगच्छन्ति । अत एव सर्वं वस्तु वेद्यमेव तन्मते, किन्तु वेद्यत्वं किञ्चिन्निष्ठात्यन्ताभावप्रतियोगि । धर्मत्वाद् नीलत्ववदित्याद्यनुमानेन वेद्यत्वस्याभावो यत्र कुत्रापि सेत्स्यत्येव । अतो वस्तुत्वहेतोः केवलान्वयित्वेन तादृशाभावाधिकरणेऽपि विद्यमानतया सम्भावितविपक्षता । तथा च वाधकतर्कमन्तरेणानुमानेऽप्रयोजकत्वदोषोऽपि विद्यते । अथ वेद्यत्वानुपगमे तु वस्तुसिद्धिरेव न स्यादित्येव बाधकस्तर्क इति चेत्, न, वस्त्वसिद्धेः सर्वतः स्फुरणाभाव एवापत्तेः । स्फुरणस्य तु स्वत एव सिद्धावपि तादृशापत्तेरभावात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अयमत्र निष्कर्षः—ज्ञानस्य स्वप्रकाशत्वं च ज्ञानविषयत्वं विनैव संशयादिविषयत्वायोग्यविद्यमानस्वरूपकत्वम् । स्वीकुर्वन्ति सर्वेऽपि प्रेक्षावन्तः 'न हि जानन्नेव जानामि न वेत्याद्यनुभवति' इति । एतावांस्त्वत्र विशेषो यत् तार्किकादिमते ज्ञानस्य स्वाभाववत्वज्ञाने प्रतिबन्धकत्वात् संशयाद्यविषयत्वम्, औपनिषदमते त्वनावृतत्वादिति । अत एव तन्मते तादृशप्रतिबन्धकत्वकल्पनागौरवम् ।

न च संशयादिकं प्रति औपनिषदमतेऽप्यावरणस्य हेतुत्वस्वीकारे गौरवमिति वाच्यम्, तार्किकमते विशेषादर्शनस्यापि हेतुतायाः स्वीकरणीयत्वेन तत्स्थान एवावरणहेतुतायाः स्वीकार एतद्गौरवस्य तुल्यत्वेन पूर्वोक्तप्रतिबन्धकतागौरवस्य तन्मत एवाधिकत्वात् । किञ्च विशेषादर्शनं व्याप्यतया ज्ञातस्य निश्चयाभावः । तत्त्वं चाज्ञानत्वजातिरूपादावरणत्वाद् गुरुतरम् । गृहीताप्रामाण्यकस्याहार्यस्याव्याप्यवृत्तिविषयकत्वेन गृहीतस्य च निश्चयस्याप्रतिबन्धकत्वात् तदन्यत्वेन निश्चयस्य विशेषणीयत्वेन पुनर्गौरवान्तरग्रस्ततेति ।

प्राभाकरमतम्

प्राभाकरास्तु यथा न्यायमते सत्तासम्बन्धात् सत्तातिरिक्तेषु सद्व्यवहारव्यवस्था । सत्ता तु स्वयमेव सद्रूपा, तस्यां सत्तान्तराभावेऽपि सद्व्यवहारस्याक्षतत्वात् । एवञ्च सद्व्यवहारविषयत्वेऽपि यथा न सत्ताश्रयता सत्तायास्तथैव ज्ञानविषयत्व एव घटादीनां सिद्ध्यभ्युपगमेऽपि ज्ञानस्य च ज्ञानान्तराविषयत्वेऽपि तस्य स्वत एव सिद्धस्वरूपत्वमित्यभ्युपगमे न किञ्चिद् बाधकम् ।

ननु सत्ता न सद्व्यवहारहेतुः, किन्तु सत्तासमवाय एव तथा । स च यथा घटादौ तथा सत्तायामप्यस्त्येव सम्बन्धरूपत्वेन द्विष्ठत्वात् सामान्यविशेषेषु सत्तैकार्थसमवायस्य सत्त्वात् । न चैवमेकार्थसमवायस्य विशेषेषु सद्व्यवहारोपपादकत्वमन्यत्र द्रव्यगुणादौ शुद्धसमवायस्येत्यननुगतत्वमिति वाच्यम्, तदेकार्थसमवायस्यापि तत्समवायरूपत्वादिति चेत्, न; सत्तासमवाये सत्तासमवायान्तरानभ्युपगमेऽपि तस्य सद्व्यवहारविषयत्वाभ्युपगमात् ।

तथा च यथा सत्तायां तत्समवाये वा सत्तान्तरस्य तत्समवायस्य वाऽनभ्युपगमेऽपि तस्य स्वरूपतः सद्रूपत्वमभ्युपगम्यते, तथैव घटादीनां सिद्धिर्ज्ञानाद् भवति, ज्ञानसिद्धिस्तु स्वत एव भवतीति स्वीकार्यमिति ।

विशिष्टाद्वैतिमतम्

विशिष्टाद्वैतिनस्तु विषयसम्बन्धदशायां स्वसत्तयैव स्वाश्रयं प्रति प्रकाशमानत्वम्, स्वाश्रयं प्रति विषयप्रकाशत्वं वा, स्वसत्तायामनन्याधीनप्रकाशत्वं वा स्वप्रकाशत्वमिति स्वीकुर्वन्ति । आहुश्च—'सा च विषयप्रकाशवेलायां स्वाश्रयस्यैवात्मनः स्वयंप्रभा[1]' इति ।

उपर्युक्तेषु मध्ये प्रथमद्वितीयस्वरूपे धर्मभूतज्ञानाभिप्राये, अन्तिमं तु धर्मिभूतज्ञानाभिप्रायम् । तत्र धर्मिज्ञानस्य बाह्यविषयप्रकाशार्थमेव धर्मभूतज्ञानापेक्षा, न तु स्वरूपावगमार्थमपि । आश्रयभूतात्मस्वरूपं नित्यं ज्ञानं स्वात्ममात्रावसितावभासम् । आश्रितञ्च नित्यं ज्ञानं न स्वरूपेण स्वस्मा अवभासते, फलवद् वा, विषयविकासपरिणामेन स्वस्वविषयप्रकाशत्वोपगमादिति स्वीकुर्वन्ति ।

---

१. न्यायसिद्धाञ्जने बुद्धिपरिच्छेदे ४६५ पृष्ठे, वा० सं० वि० वि० वाराणसीप्रकाशनम्, शकाब्दः १८८८ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तन्मते वेद्यत्वं स्वरूपज्ञानस्य स्वत एव नान्यतः। किन्तु विषयावगमार्थं धर्मज्ञानापेक्षा। एवञ्च धर्मभूतज्ञानवेद्यत्वं स्वरूपतो धर्मिज्ञानस्येत्यायातम्।

स्वयंप्रकाशत्वमभ्युपगच्छन्तोऽप्येतेऽनुभूतावद्वैतिभिरभ्युपगतस्यावेद्यत्वस्य स्वीकारे खपुष्पादिवद-सत्कल्पत्वमसंवित्त्वमस्वप्रकाशत्वमज्ञानाविरोधित्वं प्रश्नप्रतिवचनाद्यनुपपत्तिश्चेत्यादिदूषणान्युद्भावयन्ति[1]। स्वीकुर्वन्ति च धर्मभूतज्ञाने सङ्कोचविकासशालित्वम्[2]।

अत्रेदं चिन्त्यते—धर्मिज्ञानस्य स्वप्रकाशमानत्वेनैव सत्त्वसिद्धेर्नासत्कल्पत्वशंकाऽवेद्यत्वेऽपि प्रसरति स्वयंप्रकाशस्याप्यवेद्यत्वमात्रेणासत्त्वापादने धर्मज्ञानस्यापि स्वयंप्रकाशस्यासत्त्वापत्तिः स्यात्। पूर्वोक्तौपनिषदमते 'आत्मा संविद्रूपः संवित्कर्मतामन्तरेणापरोक्षत्वात् संवेदनवत्[3]' इत्यनेनात्मनः संविद्रूपत्वं लभ्यते। तथा च संवेदनवदिति दृष्टान्तेन विषयधर्मिज्ञानोभयोपरागार्थमपेक्षितं धर्मभूतज्ञानमेव मतद्वयेऽपि विवक्षितम्। एकत्र नित्यं धर्मभूतज्ञानमपरत्र वृत्तिरूपज्ञानं तदिति विशेषः।

एवञ्च ज्ञानान्तरावेद्यत्वेऽपि नासत्त्वम्, न वाऽसंवित्त्वम्, नाप्यस्वप्रकाशत्वं स्वयंसिद्धसत्ताकस्य ज्ञानस्य स्वप्रकाशस्य समापतति; स्ववेद्यत्वेनैवासत्कल्पत्वशंकायाः, स्वप्रकाशत्वेनासत्त्वास्वयंप्रकाशत्वयोश्च ब्रह्मसिद्धयुक्तरीत्या[4] सुतरां निरासात्। अज्ञानाविरोधित्वं तु धर्मिरूपज्ञानस्येष्टमेवेतीष्ट-सिद्धावुक्तम्[5]।

इदमत्रावधेयम्—स्ववेद्यमनुभवान्तरवेद्यं च किमपि न प्रसिद्धम्। धर्मभूतज्ञानं स्ववेद्यं नानुभवान्तरवेद्यम्, घटादिकमनुभवान्तरवेद्यम्, न स्ववेद्यम्। अतो धर्मिज्ञाने तयोरेकस्वभावत्वमेव स्वीकर्त्तव्यम्। तत्र यदि स्ववेद्यत्वं स्वीक्रियते, तर्हि ज्ञानान्तरवेद्यत्वं हातव्यमेव। यदि संविदन्तर-वेद्यत्वमङ्गीक्रियते धर्मिज्ञाने, तर्हि स्ववेद्यत्वं त्यक्तव्यम्। तथा च यदि स्ववेद्यत्वं विहाय धर्मिभूतज्ञानस्य संविदन्तरमात्रवेद्यत्वं स्वीक्रियते, तर्हि दुरपह्नवमेव घटादिवदननुभूतित्वम्। गगनकुसुमादिकं तु न स्ववेद्यम्, न वा पर—(अनुभवान्तर) वेद्यम्। ज्ञानमात्रं तु स्ववेद्यम्, अनुभवान्तरावेद्यं च गगनकुसुमादिविलक्षणम्। अनुभूतित्वप्रयुक्तं ह्यनुभवान्तरावेद्यत्वं धर्मभूतज्ञाने दृष्टम्। तत्तु धर्मिभूतज्ञानेऽपि स्वीकर्त्तुमुचितम्।

इदं पुनरिहावधेयम्—संवेद्यत्वं पञ्चविधम्—

१. स्ववेद्यत्वम्।
२. स्वाकारवृत्तिप्रतिफलितचैतन्यवेद्यत्वम्।
३. साक्षिवेद्यत्वम्।
४. प्रमाणजनितवृत्तिविषयत्वम्।
५. विकल्पाख्यवृत्तिविषयत्वञ्चेति[6]।

---

१. तत्त्वमुक्ताकलापे बुद्धिसरे द्वितीयकारिकाया व्याख्यानावसरे सर्वार्थसिद्धौ।

२. न्यायसिद्धाञ्जने बुद्धिपरिच्छेदे पृ० ५१३, वा० स० वि० वि० प्रकाशनम्, १९६६ ख्रि०।

३. प्रत्यक्तत्त्वप्रदीपिकायाम्, पृ० ३९, षड्दर्शनप्रकाशनप्रतिष्ठानतः १९७४ ख्रि० प्रकाशिता।

४. द्र०—अस्मिन्नेव ग्रन्थे पृ० १४।

५. प्रथमाध्याये षष्ठे च।

६. 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' इति। १।९। योगसूत्रे प्रोक्ता विकल्पाख्या वृत्तिस्त-द्विषयत्वमिति यावत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र प्रथमं संविन्मात्रस्य, द्वितीयं घटादेः, तृतीयमज्ञानप्रातिभासिकादीनां सुखादेश्च, चतुर्थं संविन्मात्रस्य तत्त्वम्पदशोधकवाक्यजन्यज्ञानविषयस्य तत्त्वमस्यादिमहावाक्यजन्यज्ञानविषयस्य च पञ्चमं शशविषाणादेरसतः ।

औपनिषदसिद्धान्ते संविदः स्वप्रकाशत्वं स्वत एव प्रत्यक्षत्वेन स्वीक्रियत इति न तत्र घटादिस्थल इव स्वव्यतिरिक्तस्वाकारवृत्तिप्रतिफलितस्वावच्छिन्नचैतन्यविषयत्वं प्रमातृचैतन्याध्यस्तत्वपर्यवसितम्, प्रमातृचैतन्याभिन्नस्वावच्छिन्नचैतन्यविषयत्वं वा स्वीक्रियते, येन घटादेरिवाननुभूतित्वस्य, असंवित्त्वस्य वा प्रसङ्गः स्यात् ।

विशिष्टाद्वैतिनः पुनरनुभवान्तरानुभाव्येऽपि परानुभवादी स्वसत्तयैव स्वविषयभासकत्वरूपस्य, स्वसत्तयैव स्वाश्रयं प्रति प्रकाशमानत्वरूपस्य वाऽनुभूतिलक्षणस्य स्वभावसिद्धस्य नानुपपत्तिः, तथा च स्वयंप्रकाशत्वरक्षणार्थमवेद्यत्वाभ्युपगमोऽसंगत इत्यादिनाप्यौपनिषदमतं प्रतिक्षिपन्ति ।

उक्तञ्च श्रीवेंकटनाथेन—'अत्र स्वप्रकाशेति सम्मतांशानुवादो वेद्यत्वविरोधाभावज्ञापनार्थः[१]' इति । 'न तावच्छिष्याचार्यौ परस्परबुद्धयनभिज्ञौ, प्रश्नप्रतिवचनाद्यसम्भवात् । एवं वादिप्रतिवादिप्रभृतयोऽपि मिथो बुद्धिमबुद्ध्यमाना न विवादादिकं कुर्युः । तथा पामराणामपि संलापो न स्यादिति भावः' इति च ।

तत्रेदं विचार्यते—ज्ञानान्तरवेद्यं स्वप्रकाशं चेति व्याहतमेव । अननुभूतित्वप्रयोजकमनुभाव्यत्वं हि प्रत्यक्षविषयत्वम्, प्रमातृचैतन्याभिन्नस्वावच्छिन्नचैतन्याध्यस्तत्वमेव, न तु ज्ञानविषयत्वमात्रम् । परानुभवानां परेण ज्ञानं तु परोक्षानुभव एव । अतः परदृष्ट्या परानुभवस्य स्वप्रकाशत्वेऽपि, स्वदृष्ट्या तस्यास्वप्रकाशत्वात् परानुभवस्य स्वप्रकाशत्वं स्वदृष्ट्याऽवेद्यत्वेनेति स्वीकर्त्तव्यम् । एवञ्च स्वप्रकाशत्वं प्रत्यक्षज्ञानान्तरविषयत्वं च परानुभवस्थलेऽपि व्याहतमेव । तथा चानुभूतेर्धर्मिसंविद्रूपाया धर्मभूताया वा ज्ञानान्तरागेद्यत्वेन स्ववेद्यत्वमात्रेण च स्वप्रकाशत्वं व्यवस्थापनीयम् ।

एवञ्च ज्ञानान्तरसंवेद्यत्वे घटादिवदननुभूतित्वापत्तिर्दुष्परिहरा । तस्मात् परानुभववद् अनुभाव्यत्वेऽपि स्वप्रकाशत्वमविरुद्धमित्युपर्युक्तोपन्यासो विषमः । अनुभूतिर्यदि अननुभाव्या स्यात् तर्ह्यसती स्यादित्याकारकस्तु तर्को विशिष्टाद्वैत्यभिमतो विवेचितप्रायः । तथाहि—अत्र अनुभूतिरसती, अननुभाव्यत्वाद्, गगनकुसुमवदित्यनुमाने तात्पर्यं पर्यवस्यति । एवञ्च विशिष्टाद्वैत्यभिमतधर्मभूतज्ञाने भवत्यनैकान्तिकता, तस्य संविदन्तराननुभाव्यत्वोपगमादसत्त्वेनास्वीकाराच्च ।

अथैवमपि यथौपनिषदमते अनुभूतिः स्वयंप्रकाशा अनुभतित्वादित्यादावनुभूतित्वमनुभूतिस्वप्रकाशत्वस्य प्रयोजकम्, तथैव घटत्वादिकमपि घटादेः स्वप्रकाशत्वप्रयोजकं स्यादिति चेन्न एतद्दूषणस्य यत्रानुभाव्यस्यापि स्वप्रकाशत्वमभ्युपेयते तादृशे विशिष्टाद्वैतमत एव प्रसरात् । तथा च प्रयोगः—घटः स्वप्रकाशः अनुभाव्यत्वात् स्वरूपज्ञानवदिति । पूर्वोक्तौपनिषदमते तु नेदृगापादनं प्रसज्यते,

१. तत्त्वमुक्ताकलापस्थबुद्धिसरे द्वितीयकारिकायां सर्वार्थसिद्धिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रमातृचैतन्याभिन्नविषयत्वस्य तदध्यस्तत्वपर्यवसितस्य प्रमातृसत्ताधीनसत्ताकस्य प्रमातृचैतन्याभेदाभावेऽप्रकाशमानस्य स्वप्रकाशत्वाप्रसरात् ।

अत्रेदमवधेयम्—औपनिषदसिद्धान्ते ह्यनुभूतिस्वप्रकाशत्वमन्यानधीनापरोक्षस्वभावरूपम्—'यत्साक्षादपरोक्षाद् ब्रह्म[1]' इत्यादिवचनसिद्धमज्ञानाश्रयत्वविषयत्वाविरोधीति । तत्र प्रमाणजन्यमपरोक्षसाक्षात्कारं विना नाज्ञाननिवृत्तिरित्यभ्युपगम्यते । प्रमाणजन्यापरोक्षासाक्षात्कारपर्यन्तं तु ज्ञानं न शब्देन, अनुमानादिना, प्रमाणान्तरेण वा, किन्तु तेभ्योऽसत्त्वापादकाज्ञानमात्रनिवृत्तिप्रयोजकं वृत्तिज्ञानमेवोदेति । ब्रह्मणो वृत्तिविषयत्वमात्रं न घटादिवदनुभाव्यत्वरूपम् । ज्ञानान्तरविषयत्वं ब्रह्मणो नास्तीत्यौपनिषदानां वचनं घटादिवत्प्रमाणजन्यवृत्तिप्रतिफलितचैतन्यभास्यत्वं तस्य नास्तीत्यभिप्रायेणैव, न तु वृत्तिव्याप्यत्वमपि तस्य नास्तीत्यभिप्रायेण[2] ।

अनुभूतिपदेन, स्वप्रकाशपदेन, अनुमानादिनाऽन्यैः प्रकारैश्च स्वयंप्रकाशायाः संविदः परोक्षवृत्तिविषयत्वं प्रत्यक्षवृत्तिविषयत्वं वा भवतु नाम, किन्तु न नित्यसंविदन्तरविषयत्वम् । तावन्मात्राङ्गीकारेऽपि फलव्याप्यत्वाभावाद् घटादेरिव नाननुभूतित्वापत्तिरनुभूतेः । संवित् स्ववेद्या स्वाश्रितावरणनिवृत्त्यर्थं प्रमाणजन्यवृत्तिमात्रवेद्या च, साक्षिचैतन्यं तत्तदाकारवृत्तिमात्रविषयः, घटादिकं तु तत्तदाकारवृत्तिप्रतिफलिततदवच्छिन्नानुभूतिवेद्यम, असत्तु विकल्पाख्यवृत्तिविषय इति व्यवस्थामादायैवानुभूतिस्वप्रकाशवाद औपनिषदानामनुमतः । अतो न ज्ञानतः, स्वरूपतः, विषयतो वा संवित् साक्षिघटादिजडविषयशशविषाणादितुच्छानां परस्परं साङ्कर्यम्, न वाऽन्यस्यान्यभावापत्तिरिति ।

ये तु—'अनुभूतिपदार्थविगमो वर्तते न वा[3]' इत्यादिना वहुविकल्पनिरासाडम्बरा तत्त्वमुक्ताकलापादौ वेदान्तदेशिकेन प्रदर्शितास्ते सर्वेऽपि वृत्तिव्याप्यत्वफलव्यापत्वकृतविषयविवेकमसिद्धवत्कृत्यैवेत्युक्तविवेकेनौपनिषदास्तान् सर्वान् सुष्ठु प्रतिक्षिपन्तीति ।

इदं पुनरिहावधेयम्—औपनिषदमते स्वप्रकाशस्याप्यज्ञानेनावरणादन्तःकरणधर्मभूतवृत्तिज्ञानस्य तदावरणनिवृत्त्यर्थमस्त्युपयोगः । विशिष्टाद्वैतिमते तु स्वयमनावृतस्य स्वप्रकाशस्य च धर्मिज्ञानस्य परमात्मरूपस्य स्वप्रकाशार्थम् इतरप्रकाशार्थं वा न कोऽप्युपकारो धर्मभूतज्ञानेन । जीवस्य त्वणुपरिमाणस्य विषयप्रकाशार्थमस्तु नाम धर्मभूतज्ञानापेक्षा । परमात्मस्वरूपावगमार्थं तु न धर्मभूतज्ञानापेक्षा स्वगतकर्मादिरूपाविद्यानिवृत्तिस्तु ईश्वरसङ्कल्पविशेषेणैव भविष्यति । अत्र कर्मादिरूपाविद्यानिवृत्तेस्त्वीश्वरसङ्कल्पविशेषेण स्वीकारेऽप्येतन्मतेऽनुपपत्तिरेव, तादृशसङ्कल्पस्य नित्यत्वे बन्धानुपपत्तेः, जन्यत्वपक्षे तस्य परमात्मनि जन्मलाभाद् मुमोचयिषितपर्यन्तं गमनानुपपत्तिप्रसङ्गाद्, व्यापकरूपेण विकसनशीलत्वस्वीकारे पुरुषान्तरेऽपि तत्प्रसक्तेः, पुरुषविशेषमेव गच्छतीति स्वीकार ईश्वरस्य सर्वभूतहितेरतत्वव्याघातात् ।

किञ्च, स्वाश्रयतया प्रकाशमानत्वं स्वप्रकाशत्वमिति धर्मभूतज्ञानस्वप्रकाशवादो य उपर्युक्तस्तदनुसारेणाद्वैतमते साक्ष्याश्रिततया प्रकाशमानशुक्तिरूप्यसुखान्तःकरणाज्ञानादेरिव धर्मभूतज्ञानस्य जडत्वापत्तिः ।

---

१. बृहदारण्यकोपनिषत् ।३।४।१ ।

२. पञ्चदशी—७।६०,६२ ।

३. तत्त्वमुक्ताकलापस्थवुद्धिसरे द्वितीयकारिकाव्याख्याने ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धर्मभूतज्ञाननित्यत्वमपि पराहतं स्यात् । सङ्कोचविकासशालित्व आर्हतमत आत्मन इवानित्यत्वापत्तिः समानन्यायात् (सांशत्वस्यानित्यत्वनियतत्वमिति । न्यायात्) सङ्कोचविकासशालित्वानुपपत्तिरन्यत्र व्यवस्थापितैव[1] ।

अथ प्रदीपप्रभायाः सङ्कोचविकासशालिन्याऽपि यावत्प्रदीपमवस्थानाद् यावदात्मभाविनो धर्मभूतज्ञानस्यापि नित्यत्वं निष्प्रत्यूहमिति चेत्, तदप्ययुक्तम् । तथा हि—प्रदीपप्रभायाः सङ्कोचविकासयोर्निमित्तं किं प्रदीपसङ्कोचविकासौ, उत वाऽन्यत् किञ्चित् ? आद्य आत्मनोऽपि सङ्कोचविकासशालित्वापत्त्या धर्मभूतज्ञानवैयर्थ्यापत्तिः । द्वितीये तु धर्मभूतज्ञानसङ्कोचविकासयोरन्यत्कर्मैव निमित्तं नात्मसङ्कोचविकासाविति वक्तव्यं स्यात् । तथा च सर्वलोकानुभवविरोधः, प्रदीपसङ्कोचविकासौ विना प्रभासङ्कोचविकासयोरदर्शनात् । प्रदीपसामर्थ्यावगमार्थं प्रभाप्रकृष्टत्वगणनस्य भौतिकविज्ञाने दर्शनात् प्रदीपसङ्कोचविकासयोः प्रभासङ्कोचविकासकारणत्वावगतेः । अन्यथा तत्सम्बन्धसम्पादकानां बहूनां नियमानां सूत्राणाञ्च वैयर्थ्यप्रसङ्गात् (यथा द्वयोर्दीपयोः सामर्थ्यतुलनायां प्रयुज्यमानस्य प्रकाशसघनतासूत्रस्य)

अर्थात् $$\frac{\text{प्रथमस्य प्रकाशनसामर्थ्यम्}}{(\text{उदासीनपटतः दूरत्वम्})^{२}} = \frac{\text{द्वितीयस्य प्रकाशनसामर्थ्यम्}}{(\text{उदासीनपटतः दूरत्वम्})^{२}}$$

इत्येवमादिसूत्राणां[2] वैयर्थ्यापत्तिः स्यात् ।

एवञ्च धर्मभूतज्ञानसङ्कोचविकासवाद आत्मसङ्कोचविकासौ विनाऽनुपपन्न एवेत्यार्हतमतप्रवेशो वज्रलेपायते ।

इत्थञ्चौपनिषदराद्धान्तो विचारकाणां बुद्ध्यारूढो भवितुमर्हति । प्राभाकरमतस्यापि यथाकथञ्चिद्विचारसहत्वम् । विशिष्टाद्वैतिमतं तु वेदान्तदेशिकपरिष्कृतमपि न प्रेक्षावतां विचारपदवीमारोहतीति केवलं श्रद्दधानानेव प्रत्याययितुमलमिति विद्वांसो विभावयन्तु ।

———

१. अस्मिन्नेव ग्रन्थे प्रथमपरिच्छेदे पृ० १० ।

२. $\frac{P_1}{d_1^2} = \frac{P_1}{d_2^2}$. इतीदं सूत्रम् 'माध्यमिकभौतिकी' ग्रन्थस्य प्रथमभागे पृ० ५७१ राजहंसप्रकाशनमन्दिरमेरठतः १९७० तमे ख्रिस्ताब्दे प्रकाशिते सप्तमसंस्करणे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृतीयपरिच्छेदः

ज्ञानाश्रयनिरूपणम्

(Abode of Knowledge)

अधुना ज्ञानाश्रयविषये वैदिकदर्शनानां कीदृग्विचारा इति विषयमवलम्ब्य किञ्चित्पर्यालोच्यते।

तत्र प्रथमं प्रमाणविवेचनप्रधानस्य न्यायशास्त्रस्य कीदृशी सम्मतिरिति सूत्रभाष्यवार्तिकादिरीत्यावलोच्य वैशेषिकमते तदतिदेशप्रदर्शनपुरस्सरं वाक्यशास्त्रात्मकमीमांसाशास्त्रस्य प्रमेयप्रधानशास्त्राणां सांख्ययोगवेदान्तानां च सम्मतय उपस्थापयिष्यन्ते।

न्यायमतेनात्मनो ज्ञानाश्रयत्वनिरूपणम्

आत्ममनसोः संयोगं विना ज्ञानस्योत्पत्तेः स्थितेर्वा कल्पनाया अप्यनुदयादात्ममनसोरन्वयव्यतिरेकानुविधायित्वं ज्ञानेन सह सिद्धमेव। प्रत्यक्षानुभवात्मकज्ञाने तु इन्द्रियार्थयोरप्यन्वयव्यतिरेकानुविधायित्वं दृश्यते। किन्तु संयोगविभागद्वित्वादिसंख्याद्विपृथक्त्वादिभिन्नगुणत्वेनानेकाश्रयत्वं त्वसम्भवीत्यत आत्ममन इन्द्रियशरीरार्थानां मध्य एकस्यैव कस्यचिदाश्रयत्वमन्येषां तदुत्पत्तौ स्थितौ वा सहकारित्वमित्येवाङ्गीकार्यम्।

तत्रेन्द्रियार्थयोस्तदाश्रयत्वं त्वसम्भव्येव, तयोर्नाशेऽपि स्मृत्यात्मकस्य ज्ञानस्योदयात्। यदि ज्ञानमिन्द्रियाणामर्थानां वा गुणः स्यात्तदा गुणिन आश्रयस्य नाशे निराश्रयो गुणोदयः कथं स्यात्। मनो गुणत्वमपि तस्य नाङ्गीकारार्हम् उपजीव्यविरोधात्। तथाहि—आत्मनो विभुत्वादिन्द्रियैर्युगपत्संयोगस्य, इन्द्रियाणामर्थैश्च युगपत्सम्पर्कस्य सम्भवेऽपि युगपत्सर्वेन्द्रियजोपलब्धिर्न भवतीति तदुपपत्त्यर्थमणुरूपं मनः कल्प्यते। तच्च कल्पयित्वा तस्येन्द्रियैः सह संयोगस्यापि प्रत्यक्षकारणत्वं निर्धार्यते। ततश्चाणुभूतस्य मनसः सर्वेन्द्रियैर्युगपत्संयोगासम्भवस्यैव युगपत्सर्वेन्द्रियजज्ञानानुत्पत्तिनियामकत्वं व्यवस्थाप्यते। अत एव युगपज्ज्ञेयानुपलब्धिव्यवस्थार्थमभ्युपगतस्य मनसो बलेन कथमात्मनोऽपलापः तस्य (मनसः) आत्मकर्तृत्वोपपत्त्यर्थं ज्ञानकरणत्वेनैव कल्पितत्वेन ज्ञातृत्वेन कल्पितत्वाभावात्। तथा चाहुः श्रीवाचस्पतिमिश्राः —

'यत्करणत्वेनानुमितं तत्करणत्वमपोह्य न कर्तृ भवितुमर्हतीत्यर्थः'[1], इति।

यदि च युगपज्ज्ञेयानुपलब्ध्युपपत्त्यर्थं सूक्ष्मं किमपि साधनान्तरं कल्प्यते तदा तु घट्टकुट्टीप्रभातन्यायावतारः स्याद् अर्थमभ्युपगम्यापि संज्ञामात्रे विवादस्य पर्यवसानात्।

---

१. न्यायवार्तिकतात्पर्यटीका सू० ।३।२।१६।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किञ्च 'तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानम्[१]' इति योगसूत्रसन्दर्भानुसारेण 'अक्रममित्येकक्षणोपारूढं सर्वं सर्वथा गृह्णातीत्यर्थ[२]' इति तद्भाष्यानुसारेण च योगिनिर्मितेष्वनेकशरीरेषु युगपज्ज्ञेयोपलब्धिर्ज्ञातुर्विभुत्व एवोपपद्यते । यदि चाणुभूतं मन एव ज्ञानगुणकं स्यात् तदा तस्याणुत्वात् सर्वशरीरेषु युगपत्सम्बन्धाभावाद् युगपज्ज्ञेयोपलब्धिर्न स्यात्तस्मादपि ज्ञानं न मनोगुणः । यदि च मनो विभु ज्ञानगुणकं च स्वीक्रियते चेत्तदा तदेवात्मेति सिद्धमात्मगुणत्वं ज्ञानस्येति पूर्वोक्तन्यायेन न काऽप्यनुपपत्तिः ।

ननु नैवमुच्यते किन्त्वात्मातिरिक्तस्यान्तःकरणभूतस्त मनसो ज्ञानगुणकत्व विभुत्वञ्चोच्यते, तथा च न योगिनो युगपज्ज्ञेयोपलब्ध्यनुपपत्तिर्न वा ज्ञानस्यात्मगुणत्वप्रतिषेधानुपपत्तिश्चेति चेन्न । तथा सति विभुभूतस्य मनसः सर्वैरिन्द्रियैर्युगपत्संयोगसम्भवादयोगिनोऽपि युगपत्सर्वज्ञेयोपलब्धेस्तादवस्थ्यात् ।

ज्ञानस्यात्मगुणत्वे सम्भावितदोषास्तत्परिहारश्च

ननु ज्ञानस्यात्मगुणत्वाभ्युपगमेऽपि आत्मनो विभुत्वेन सर्वैरपीन्द्रियैर्युगपत्संयोगसम्भवेन युगपज्ज्ञेयोपलब्धिप्रसङ्गस्तदवस्थ एवेति चेन्न । आत्मन इन्द्रियैः संयोगस्य केवलस्य ज्ञानजनकत्वास्वीकारात् । इन्द्रियैर्मनःसन्निकर्षस्यापि ज्ञानकारणत्वाभ्युपगमात् । मनसोऽणुत्वेन इन्द्रियैर्युगपत्सन्निकर्षासम्भवेन तद्दोषानवकाशस्य पूर्वमेवोक्तत्वात् ।

ननु ज्ञानस्यात्मगुणत्व आत्मनश्च नित्यत्वेन तद्गुणभूतस्य ज्ञानस्य विनाशकारणासम्भवादवस्थाने प्राप्ते तन्नित्यत्वप्रसङ्गो नैयायिकानभिमतः प्रसज्ज्येत । न च गुणानां क्वचिदाश्रयनाशेन नाशो यथा घटनाशेन घटगुणानां गुरुत्वादीनां, क्वचित्तु विरोधिगुणोत्पत्त्या यथा घटे रक्तरूपोत्पत्त्या नीलरूपस्य । तत्र प्रथमस्य तु प्रकृतेऽसम्भवेऽपि द्वितीयरीत्या विनाशः स्वीक्रियत इति वाच्यम्; सर्वेषामप्यात्मगुणानां ज्ञानविरुद्धत्वासम्भवादिति चेन्न । योग्यविभुविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वाभ्युपगमेनोत्तरशब्देन पूर्वशब्दस्य विनाशवदुत्तरज्ञानेनेच्छादिना वा पूर्वज्ञानस्य नाशोपपत्तेर्नित्यत्वापत्तेरनवकाशात् ।

ननु ज्ञानस्यात्मगुणत्वे गन्धादिज्ञानं प्रति इन्द्रियमनःसन्निकर्षस्य कारणत्वमभ्युपगम्य गन्धादिज्ञानानां यौगपद्यापत्तिवारणेऽपि स्मृतीनां यौगपद्यापत्तिस्तु स्यादेव, स्मृतिं प्रति आत्ममनःसन्निकर्षसंस्कारयोरेव कारणत्वाज् ज्ञानजन्यानां स्मृतिहेतुभूतानामसंख्येयात्मसमवेतसंस्काराणां विद्यमानत्वादात्मनश्च विभुत्वेनात्ममनःसंयोगस्याप्यनपायादिति चेन्न । संस्कारसमवायी य आत्मप्रदेशस्तेन मनसः सन्निकर्षात्स्मृतेरुत्पद्यमानत्वेन मनसश्चाणुत्वेन स्मृतीनामपि यौगपद्यापत्तेरयोगात् । तथाहि—यद्यप्यात्ममनःसन्निकर्षः संस्कारश्च सर्वस्मृतिहेतुभूतौ सर्वदा स्तः तथापि संस्काराणामात्मनो भिन्न-भिन्नप्रदेशेषु समवायोस्ति न त्वेकस्मिन्नेव प्रदेशे । मनसश्चाणुत्वादात्मनोऽनेकैः प्रदेशैर्युगपत्सन्निकर्षो न सम्भवतीति न युगपत्सर्वस्मृतीनामुत्पत्त्यापत्तिः किन्तु तादृशसन्निकर्षस्य क्रमेण जायमानत्वात् स्मृतीनामपि क्रमेण जायमानत्वेनाऽयौगपद्यं सूपपन्नमेवेति ।

---

१. योगसूत्रम् ।३।५४ ।

२. तत्रैव भाष्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ शरीराद्बहिरात्मप्रदेशेन मनःसंयोगस्य ऋत आत्मप्रेरणाया असम्भवात् तदर्थमात्मनो 'अस्यार्थस्य स्मृतिहेतुभूतः संस्कारोऽमुष्मिन् मदीयप्रदेशे समवेतस्तेन मदीयप्रदेशेन मनःसंयोगो भवतु' इति संकल्पेनैव मनः प्रेरणस्य करणीयत्वेन तस्य च संकल्पस्य तादृशस्मर्तव्यस्मरणं विनाऽसम्भवात्, संकल्पकाल एव स्मर्तव्यस्मरणे च जाते सति तत्स्मरणार्थं मनसः प्रेरणाया व्यर्थत्वेन केनाप्यस्वीकारात्, कार्यमात्रस्य सकारणकत्वेन तादृशस्मरणस्य निष्कारणकत्वलक्षणयादृच्छिकत्वस्याप्यसंम्भवात्, मनसि ज्ञानसमवायस्य च प्रतिषेधात् शरीराद्बहिरात्मप्रदेशेन मनः सन्निकर्षस्यासम्भवात् ज्ञानस्यात्मगुणत्वमभ्युपगम्य मनःसन्निकर्षस्य क्रमेण जायमानत्वरूपहेतुना स्मृतीनां यौगपद्यवारणमनुचितमिति चेन्न। कुतूहलादिकं पश्यतः कण्टकवेधानन्तरं तादृशकण्टकवेधव्यथाया अनुभवो येन हेतुना जातेनात्ममनःसंयोगेन जायते तस्यावश्यकत्वात् तादृशव्यथानुभवस्य च सर्वप्रसिद्धत्वात् तेनैव हेतुना तुल्यन्यायात् शरीराद्बहिरात्मप्रदेशैर्मनसः संयोगस्य सम्भवे बाधकाभावात्। तथाहि—पूर्वोपदर्शितव्यथानुभवकाले मनःसंयोग आत्मप्रेरणेन तु न सम्भवति मनसोऽन्यत्र कुतूहलादौ व्यासक्तत्वात्, मनसो ज्ञत्वादपि न सम्भवति तस्याननुमतत्वात्, यदृच्छयापि न सम्भवति यदृच्छाया आकस्मिकत्वरूपत्वेन निष्कारणकत्वे पर्यवसानाज्जायमानस्य च तथात्वासम्भवात्। एवञ्च यथा व्यथास्थले तादृग्व्यवस्थाया अनुपपत्तिस्तथैव स्मृतावपि स्वीकर्त्तव्या। य एव परिहारो व्यथास्थले स एव स्मृतिस्थलेऽपीति—

"यत्रोभयोः समो दोषः परिहारस्तयोः समः।
नैकस्तत्र पर्यनुयोक्तव्यस्तादृगर्थविचारणे॥" इति

न्यायावतारः। न चैतादृशपादव्यथाया सर्वानुभवसिद्धत्वेन तदनुभवकारणीभूतस्य मनःसंयोगस्यावश्यकत्वात्, कण्टकादिना पादसंयोगस्य बहिष्ट्वेन, तदर्थं मनःसंयोगोऽपि बहिस्स्वीक्रियत इति वाच्यम् तथा सति स्मृतेरप्यपलापासम्भवेन तत्कारणीभूतस्यापि मनःसंयोगस्य शरीराद्बहिरेव स्वीकारे बाधकाभावात्। न च जीवकृतकर्मजन्यमदृष्टमात्मसमवेतम् भोगसम्पादकमस्तीति तादृशादृष्टेन मनसि जायमानक्रिययोदाहृतकण्टकव्यथास्थले मनःसंयोगोपपत्तिरस्तीति वाच्यम्; तथा सति तुल्यन्यायात् स्मृतिकारणीभूतस्यापि मनःसंयोगस्यादृष्टादेव सम्भवेनानुपपत्त्यभावात्।

नन्वेवमपि शरीराद्बहिरात्मनः संस्कारविशिष्टैः प्रदेशैर्मनसः संयोगो नोपपद्यते तस्य शरीराभ्यन्तर एव वर्तमानत्वात्। तथाहि—भुज्यमानकर्माशयसहितः सदेहस्यात्मनो मनसा संयोग एव जीवनम्। एवञ्च आत्मनः शरीराभ्यन्तर एव सदेहत्वमुपपद्यतेऽन्यथा बहिरपि घटाद्यवच्छेदेन सदेहत्वं स्यात्। तथा च शरीरान्तर्गतैरात्मप्रदेशैर्मनःसन्निकर्षस्य सत्त्वात् शरीरान्तर्गतात्मप्रदेशानाञ्च विविधसंस्कारयुक्तत्वाज्ज्ञानस्यात्मगुणत्व उक्तरीत्या स्मृतीनां यौगपद्यं स्यादेवेति चेन्न। भुज्यमानकर्मणां वासनाया एव जीवनत्वात्। तथाहि—न खलु तादृशवासनासहितस्य सदेहस्यात्मनो मनसा संयोगस्य जीवनत्वं येनैतादृशजीवनेन मनसः शरीरान्तर्वृत्तित्वं सिद्ध्येत। तथा च मनसः शरीराद्बहिर्वृत्तित्वमपि सम्भवतीति तस्य शरीरान्तर्वृत्तित्वमेवेति न सिद्धम्। एवञ्चासिद्धत्वादेव शरीरद्बहिरात्मप्रदेशैर्मनःसन्निकर्षाभावस्य साधकं न सम्भवतीति ज्ञानस्यात्मगुणत्वेऽपि स्मृतीनामुक्तरीत्या यौगपद्यनिवृत्तिर्निष्प्रत्यूहैवाणुभूतस्य मनसः संस्कारविशिष्टैरात्मप्रदेशैः स्मृतिकारणीभूतसंयोगस्य क्रमेणैव सम्भवात्।

ननु शरीरधारणकाले किञ्चिदपि स्मरणं भवत्येवेति स्मृतिविशिष्टस्यैव शरीरधारणं दृश्यते। तथा स्मरणं शरीरधारणञ्चैककालिकमिति सिद्धम्। शरीरधारकप्रयत्नश्चात्ममनःसन्निकर्षजन्य एव स्वीकार्यः आत्मसंयोगमात्रस्य शरीरधारणप्रयोजकत्व आत्मनो विभुत्वेन नित्यत्वेन च सर्वदैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शरीरसंयोगसम्भवात् कदाचिदपि शरीरपतनं न स्यात् । आत्ममनःसन्निकर्षोऽपि शरीराभ्यन्तरे वर्तमान एव शरीरधारकप्रयत्नजनकः सम्भवति न तु शरीराद्बहिर्वृत्तिरपि, शरीराद्बहिर्वृत्तेरात्ममनःसन्निकर्षस्य मृत्योरनन्तरमपि सम्भवेन मृत्युनापि शरीरपतनं न स्यात्तथा च मरणपर्यन्तं शरीराभ्यन्तरेऽपेक्षमाण आत्ममनःसन्निकर्षो मनसः शरीराभ्यन्तर्वृत्तित्वं विना न सम्भवतीति मनसः शरीराभ्यन्तरवृत्तित्वं सिद्धम् । एवञ्च शरीराद्वहिरात्मप्रदेशैर्मनःसन्निकर्षो नोपपद्यत इति मनसः शरीराभ्यन्तर्वृत्तित्वस्य प्रतिषेधासम्भवात् शरीरान्तश्चात्ममनःसन्निकर्षस्य सर्वस्मृतिकारणस्य सत्त्वाद् युगपत्सर्वस्मृत्युत्पत्तिप्रसङ्गस्तदवस्थ एवेति चेन्न । मनसः शीघ्रगामित्वेन शरीराभ्यन्तरे शरीराद्बहिश्च शीघ्रं शीघ्रमात्मना तत्सन्निकर्षस्य सम्भवेन संस्कारविशिष्टैरात्मप्रदेशैस्तस्य क्रमेण संयोगसम्भवात् स्मृतीनामपि क्रमेणैवोत्पत्तिसम्भवेन यौगपद्यानवकाशात् ।

अथैवमपि शीघ्रमेव सर्वं स्मर्यत इति नियमाभावाद् यदा किञ्चिद्वस्तु चिरेणापि स्मर्यते तदा चिरेण स्मरणसिद्ध्यर्थं चिरपर्यन्तं शरीराद्बहिरात्मप्रदेशविशेषेण मनःसन्निकर्षाय चिरपर्यन्तं शरीराद्बहिर्मनसः स्थितौ शरीरधारकप्रयत्नस्यासम्भवात् जीवत एव शरीरस्य पतनं स्यादिति न मनसः शरीराद्बहिर्गमनं स्वीकर्तुं शक्यते तथा च स्मृतीनामयौगपद्यप्रयोजकस्य मनसो बहिर्गमनस्यासम्भवात् स्मृतीनां यौगपद्यापत्तिस्तदवस्थैवेति तद्वारणार्थं ज्ञानस्य मनोगुणत्वमेव स्वीकर्तुमुचितं न त्वात्मगुणत्वमिति चेत् । सत्यम् । यद्यपि शरीराद्बहिर्मनसो गमनस्यास्वीकारेण आत्ममनःसंयोगसंस्कारयोर्द्वयोरेव सर्वस्मृतिकारणत्वाभ्युपगमे तु स्यात् स्मृतियौगपद्यापत्तिस्तथापि प्रणिधानाद्यन्यतमस्य तृतीयस्यापि स्मृतिकारणत्वाभ्युपगमेन तन्न स्यात् प्रणिधानादीनां युगपत्समवधानासम्भवात् । तथाहि—'ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः[1]' इति सूत्रोक्तरीत्या स्मृतीनामयौगपद्योपपादनार्थं शरीराद्बहिरात्मप्रदेशैर्मनसा संयोगो न स्वीकर्तुमुचितस्तस्य शरीराभ्यन्तर्वृत्तित्वात् तथापि यथा संस्कारात्ममनःसंयोगयोः स्मृतिकारणत्वाङ्गीकारस्तथैव प्रणिधानाद्यन्यतमस्यापि कारणत्वमङ्गीकरणीयम् तथा च सर्वस्मृतिकारणीभूतसंस्कारविशिष्टात्मना सर्वस्मृतिकारणीभूतस्य मनःसंयोगस्य युगपत् सत्त्वेऽपि प्रणिधानादीनां स्मरणकारणानामयुगपद्भावाद् यौगपद्यं न सम्भवति किन्तु प्रणिधानादिक्रमेणैव क्रमशः स्मरणम् भवतीति ज्ञानस्य विभ्वात्मगुणत्वेऽपि न स्मृतीनां यौगपद्यापत्तिरिति ।

स्मृतिकारणानि

तानि च स्मृतिकारणानि प्रणिधानादीनि सप्तविंशतिसंख्याकानि न्यायसूत्रे परिगणितानि येषामयुगपद्भावादयुगपत्स्मरणम् । तथा च सूत्रम्—

"प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसम्बन्धानन्तर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः[2]" इति ।

---

१. न्यायसूत्रम् । ३।२।२५ ।

२. न्यायसूत्रम् । ३।२।४१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रणिधानम्—तत्र प्रणिधानं नाम स्मरणेच्छा-मनस एकाग्रीकरणम् । अत्र 'सुस्मूर्षितलिङ्ग-चिन्तनम् चार्थस्मृतिकारणमि[1]ति' भाष्यम् । तत्र लिङ्गशब्दो न ज्ञापकपरोऽग्रिमसौत्रलिङ्गपदेन पौनरुक्त्यापत्तेः किन्तु 'एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति नियममनुरुद्ध्य स्मर्तव्यनिकटतम-सम्बन्धिपरम् । भवति ह्येवम्—बहुप्रदेशयात्रानन्तरं प्रदेशविशेषस्थप्राणिविषयकस्मरणेऽपेक्षिते तत्प्रदेशस्थदृष्टमन्दिरादिस्मरणद्वारेण दृश्यानां चिन्तने कृते सति तत्रत्यप्राणिनामपि स्मरणम् ।

निबन्धः—सम्बद्धपदार्थानामेकग्रन्थे प्रतिपादनं निबन्धः । निबन्धघटकपदार्थाः खलु प्रतिपादनक्रमेण अक्रमेण वाऽन्योन्यस्मृतिहेतवो भवन्ति । यथाऽनुमितिग्रन्थे चिन्तामण्युक्तानुमितिलक्षणस्योपाध्यायसम्मतार्थ-स्मरणे मिश्रसम्मतार्थस्मरणम्, व्युत्क्रमेण वा । तथा चोक्तं श्रीवाचस्पतिमिश्रैः—'यथाऽत्रैव प्रमाणादयोऽर्था एकग्रन्थोपात्ता अन्योन्यस्मृतिहेतव, आनुपूर्व्या वा यथा प्रमाणपदार्थं स्मृत्वा प्रमेयं स्मरति[2]' इति ।

अथवा निबन्धो नाम योगशास्त्राभ्यासजन्यसंस्कारकृतः समारोपः । यथा सूर्यादौ मधुत्वाद्यारोपः। यथा वा षट्चक्रभेदनप्रक्रियायां तत्तच्चक्रेषु मूलाधारस्वाधिष्ठानादिषु चक्रेष्वक्षराणि देवताश्च स्मर्यन्ते चक्राणां स्मरणात् । उक्तञ्च मिश्रैः 'धारणाशास्त्रकृतो वा प्रज्ञातेषु वस्तुषु स्मर्तव्यानामुपनिक्षेपो निबन्ध[3]' इति भाष्यमुपादाय—'धारणाशास्त्रं जैगीषव्यादिप्रोक्तं तत्कृतो ज्ञातेष्वेव वस्तुषु नाडीवक्त्रहृत्पुण्डरीककण्ठकूपनासाग्रतालुललाटब्रह्मरन्ध्रादिषु स्मर्तव्यानां बीजरूपसंस्थानास्त्राभरणभूतानां च देवतानामुपनिक्षेपः समारोपः । यथा च तत्र देवताः समारोपितास्तत्तदवयवग्रहणात् स्मर्यन्त इत्यर्थं[4]' इति ।

अभ्यासः—एकपदार्थस्य पुनः पुनश्चिन्तनमेवाभ्यासः । अस्य स्मृतिहेतुत्वं तु प्रसिद्धमेव । तेनैव वैयाकरणा अस्य पृथक्प्रमाणत्वमुद्घोषयन्ति । अत्र चाभ्यासशब्देनैतादृशाभ्यासजन्यः संस्कारो ग्राह्यः । आहुश्च मिश्राः—

'अभ्यासजनितः संस्कार आत्मगुणोऽभ्यासशब्देनोच्यते । तेन आदरप्रत्ययावपि संगृहीतौ भवतः। तयोरप्यभ्यासवत्संस्काराधानद्वारेणैव स्मृतिहेतुत्वात्[5] ।' इति ।

लिङ्गम्—इदन्तु चतुर्विधं भाष्यकारैः स्मृतिहेतुत्वेनोक्तम्—

संयोगि, समवायि, एकार्थसमवायि विरोधि च ।

तत्र प्रथमं यथा वह्निधूमयोः संयोगसम्बन्धाद्वह्नेर्धूमः संयोगिलिङ्गम्, धूमेन वह्निस्मृतिश्च जायते । अवयवावयविनोः समवायस्वीकाराद्विषाणरूपोऽवयवो गोरवयविनः समवायिलिङ्गम् । अवयव-दर्शनेनावयविनस्तु स्मृतिर्भवत्येव । पाणिपादावेकस्यैव शरीरस्य समवायवन्तौ । तेनैतादृशैकार्थसमवायेन

---

१. न्यायसूत्रभाष्यम् । ३।२।४१ ।
२. तत्रैव न्यायवार्त्तिकतात्पर्यटीका ।
३. न्यायसूत्रभाष्यम् । ३।२।४१ ।
४. तत्रैव न्यायवार्त्तिकतात्पर्यटीका । ३।२।४१ ।
५. तत्रैव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पादस्य पार्णिलिङ्गम् । पाणिदर्शनेन पादस्य स्मृतिर्भवति । यथा वा घटस्य रूपस्पर्शौ तत्रैव घटे समवायवन्तौ । तेनैकार्थसमवायेन स्पर्शस्य रूपं लिङ्गम् । तत्र रूपदर्शनेन रूपसमानाधिकरणस्य स्पर्शादेः स्मृतिर्भवत्येव । अत्र 'पाणिः पादस्य रूपं स्पर्शस्य[1]' इतिभाष्यं व्याचक्षाणैस्तात्पर्यटीकाकारैः —'एकस्य खल्वत्रावयविनः समवायः पादे च पाणौ च तौ पाणिपादावेकार्थसमवायवन्तौ । तत्रैकेनैकार्थसमवायवता प्रत्यक्षेणाप्रत्यक्ष एकः स्मर्यते । यदा त्वेकस्मिन्नर्थे समवाय इत्यर्थस्तदा रूपं स्पर्शस्येत्युदाहरणम्, स्वाभाविकाविनाभावयुक्तं लिङ्गं साङ्केतिकं तु चिह्नमिति विशेष[2]' इत्युक्तम् । विरोधि यथा भूताभूतयोः परस्परं विरुद्धत्वाद् भूतस्याभूतं विरोधि लिङ्गम् । भवत्येव हि भविष्यता दुःखादिना पूर्वजातस्य दुःखादेः स्मृतिः । विरोधिनः स्मारकत्वं तु सामान्यनिरुक्तौ 'व्याप्तिपक्षधर्मताविशिष्टहेतोर्निरूपणे कृते व्याप्तिपक्षधर्मताविरोधितद्विरहवतो दुष्टहेतोः स्मरणा[3]' दित्यादिना स्फुटमेवोक्तम् ।

लक्षणम्—यथा पशुकण्ठस्थं गर्गाणां चिह्नं दृष्ट्वा तद्गोत्रस्य स्मृतिर्भवति ।

सादृश्यम्—यथा कस्यचित्पुरुषविशेषस्य चित्रेण तत्पुरुषस्य स्मृतिर्जायते ।

परिग्रहः—यथा केनचित् पदार्थेन तत्स्वामिनः, स्वामिना वा पदार्थस्य स्मृतिर्जायते ।

आश्रयः—यथा ग्रामनायकं दृष्ट्वा तदधीनस्य स्मृतिर्जायते । ग्रामनायकः स्वाधीनस्याश्रयः ।

आश्रितः—ग्रामनायकाधीनस्य दर्शनेन ग्रामनायकस्य स्मृतिर्जायते । अधीनं त्वधीश्वराश्रितमिति ।

सम्बन्धः—यथा छात्रदर्शनेन तद्गुरोः ऋत्विग्दर्शनेन च यजमानस्य स्मृतिर्जायते ।

आनन्तर्यम्—कार्येषु मध्ये प्रथमानन्तरं या द्वितीयस्य स्मृतिः सा आनन्तर्यादेव । यथा प्रबोधानन्तरमुत्थानस्य, ततः शौचस्य, ततो मुखप्रक्षालनदन्तधावनादेः स्मृतिः । यथा वा वह्निप्रज्वालनानन्तरं स्थाल्यधिश्रयणस्य स्मृतिः ।

वियोगः—तद्वियोगदुःखानुभवी तं प्रियं वियुक्तं दुःखात् स्मरति ।

एककार्यम्—यथा एकस्य गणितज्ञस्य दर्शनाद् द्वितीयस्य गणितज्ञस्य स्मृतिः समानकार्यकर्तृत्वाद् भवति ।

विरोधः—यथा विजयाभिलाषिणोरेकस्य दर्शनादन्यस्य स्मृतिर्जायते ।

अतिशयः—येन यस्मिन्नर्थविशेषेऽतिशय उत्पादितस्तत्प्रकरणे या तत्स्मृतिः साऽतिशयाज्जायते यथा शौर्यप्रकरण आञ्जनेयस्य ।

प्राप्तिः—यदभिलषितवस्तु प्राप्तं प्राप्तव्यं वा भवति तस्य स्मृतिः पुनः पुनर्जायते ।

---

१. न्यायसूत्रभाष्यम् । ३।२।४१ ।
२. तत्रैव न्यायवार्तिकतात्पर्यटीका ।
३. सामान्यनिरुक्तिगादाधर्याम् पृ० ३—४ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यवधानम्—यथा कोशस्यासिव्यवधायकत्वात् कोशदर्शनेऽसेः स्मरणं जायते ।

सुखःदुखे—सुखदुःखाभ्यां तद्धेतोः स्मृतिः प्रसिद्धैव ।

इच्छाद्वेषौ—इच्छाद्वेषाभ्यां तद्विषययोः स्मृतिर्जायते ।

भयम्—भये सति तदुत्पादकस्य स्मृतिर्भृशं भवतीत्यपि प्रसिद्धमेव ।

अर्थित्वम्—यस्य भोजनस्य वस्त्रस्य वाऽर्थी यो भवति स तत्स्मरतीत्यपि लोकप्रसिद्धमेव ।

क्रिया—कार्येण कर्तृस्मृतिर्भवति । यथा रथेन रथकारस्य ।

रागः—यस्मिन् पुत्रादौ रक्तो भवति तस्य भृशं स्मृतिर्जायते । स्मर्यते हि रामवनगमनानन्तरं दशरथविलापः—

'हृदयान्नापयातोऽसि दिक्षु सर्वासु लक्ष्यसे ।
वत्स राम ! गतोऽसीति सन्तापेनानुमीयते ॥' इति ।

धर्मः—क्वचिद् धर्मविशेषादपि स्मृतिर्भवति यथा केषांचित्पूर्वजन्मस्मरणम् । योगसूत्रे हि तदर्थमुपायोऽपि प्रोक्तः—

'अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः[1] ।' इति

अधर्मः—प्रागनुभूतदुःखादिस्मरणस्याधर्म एव कारणम् ।

एवमुन्मादादिनापि क्वचित्स्मृतिर्भवति । उक्तञ्च भाष्यकारैः-'निदर्शनं चेदं स्मृतिहेतूनां न परिसङ्ख्यानम्[2]' इति ।

यद्यपि सर्वेषामप्यन्तर्भावः सम्बन्धे कर्तुं शक्यते तथापि तद्विशेषरूपज्ञापनार्थं पृथक्परिगणनम् कृतम् । तदिदमुक्तं तात्पर्यटीकाकारैः—

'यद्यपि सर्वत्र प्रणिधानादौ सम्बन्धः सम्प्लवते तथापि प्रणिधानादिपरिहाण्या सम्बन्धान्तरे गोबलीवर्दन्यायेन सम्बन्धशब्दो वर्तते । उक्तमत्र भाष्यकृताऽन्यत्र वाक्यलाघवं नाद्रियते सूत्रकार इति शिष्यधीप्रसादश्चैवं भवति[3]' । इति ।

ज्ञानस्यात्मगुणत्वेऽवशिष्टाक्षेपास्तत्समाधानानि च

ननु प्रणिधानादीनां कारणत्वमभ्युपगम्य स्मृतीनां यौगपद्ये निराकृतेऽपि 'आर्षं सिद्धदर्शनं च धर्मेभ्यः[4]' इति सूत्रप्रतिपादिते 'श्वस्ते भ्राताऽऽगन्ता' इत्याद्याकारके सिद्धपुरुषज्ञाने प्रातिभाख्ये स्मृतिसमानाकार एव प्रणिधानादिसापेक्षत्वाभावात् पुनः स्मृतिविशेषे यौगपद्यप्रसङ्गस्तदवस्थ एवेति चेन्न । स्मार्तत्वस्य प्रणिधानाद्यपेक्षत्वव्याप्यत्वात्, प्रणिधानादीनां तादात्विकज्ञानाभावादेव तदनपेक्षत्व-प्रतीतेः । तथाहि—अनेकार्यविषयके प्रणिधानसन्ताने सञ्जाते कश्चिदेव चिन्तितः पदार्थः कस्यचित्स्मृति-हेतुर्भवति । तत्र स्मृतिहेतूनां सत्त्वेऽपि उत्पलशतपत्रवेधन्यायेन 'अनेन कारणेन मे स्मृतिरुत्पन्ना' इति ज्ञानं न जायते । तदभावादेव प्रातिभसदृशं स्मार्तं ज्ञानं प्रणिधानाद्यनपेक्षमित्यभिमन्यते ।

---

१. योगसूत्रम् । २।३९ ।
२. न्यायभाष्यम् । ३।२।४१ ।
३. न्यायवार्तिकतात्पर्यटीका । ३।२।४१ ।
४. वैशेषिकसूत्रम् । ९।२।१३ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वस्तुतस्तु स्मार्तं किमपि ज्ञानं प्रणिधानाद्यनपेक्षं नास्तीत्यज्ञायमानानामपि प्रणिधानादीनामयौगपद्येनोक्तरीत्या स्मृतीनामयौगपद्यं निराबाधमेवेति ।

न चैवमपि प्रातिभज्ञानानां प्रणिधानाद्यनपेक्षाणां यौगपद्यापत्तिरिति वाच्यम्, बहूनामदृष्टानां सत्त्वेऽपि कर्मक्रमेण सुखदुःखादिभोगोपपत्तिवत्तस्यापि क्रमेणैवोपपत्तेः । तथाहि—प्रातिभज्ञानकारणीभूतो जीवकर्मविशेषः । स तु क्रमेणैव फलजनको भवति । तथा च यथा जीवस्य सुखदुःखादिभोगः कर्मक्रमेणैव भवति न तु युगपत्, तथा प्रातिभज्ञानहेतुभूतानां जीवकर्मणां क्रमेण फलजनकत्वात् तत्कार्यभूतानि प्रातिभज्ञानानि प्रणिधानाद्यनपेक्षाण्यपि क्रमेणैव जायन्ते न युगपद्, यतो हि ज्ञानकारणानां क्रमेणैव ज्ञानजननसामर्थ्यमस्तीति फलबलात्कल्पनीयम्, ज्ञानकारणकलापसत्त्वेऽपि एकज्ञेयविषयकयुगपदनेकज्ञानोदयानुपलम्भादनेकज्ञेयविषयकाणामप्यनेकज्ञानानामुदयानुपलम्भाच्च ।

किञ्च—योगिनोऽनेकशरीरनिर्माणानन्तरमन्येषु शरीरेषु युगपत् कथमनुभव इत्याशङ्क्य योगसूत्रे चित्तानां निर्माणमुपदिष्टं 'निर्माणचित्तान्यस्मितामात्रादिति[1]' सूत्रेण । यदि एकेनैव चित्तेन विभिन्नशरीरेषु युगपदनेकज्ञानोत्पत्तिस्सम्भवेच्चेत्तदा चित्तनिर्माणव्यवस्थावैयर्थ्यापत्तिस्स्यादेकेनैव कार्यसम्भवात् । तदिदमुक्तं मिश्रैः—'तस्मात्करणमेकं न क्वचिदपि युगपत्कार्यायालमिति । कर्त्ता पुनरेकोऽपि करणभेदे युगपद् बहूनि कार्याणि करोतीत्याह—"न ज्ञातुर्विकरणधर्मणो देहनानात्वे प्रत्यययौगपद्यादिति[2]" ।' इति ।

ननु शरीरस्य व्यवस्थितत्वाभावकाले विभोरात्मनस्तत्तत्प्रदेशैर्नानाभूतैर्मनसो नवनवसन्निकर्षसम्भवादेकस्मिन्नात्मप्रदेशे ज्ञानसंस्काराणां समवायासम्भवेन स्मरणयौगपद्यापत्तिवारणसम्भवेऽपि व्यवस्थितत्वदशायां पुनः स्मरणयौगपद्यापत्तिप्रसङ्गो, देशविशेषावस्थितशरीरावच्छिन्ने एकस्मिन्नेवात्मप्रदेशेऽनेक—ज्ञानसंस्काराणां समवायस्य सम्भवेन तत्र तादृशेनानेकसंस्कारविशिष्टेनात्मप्रदेशेन मनःसंयोगात् सर्वेषामात्मप्रदेशानामेकद्रव्यत्वेन तत्र संस्काराणां समवेतत्वेन मनःसंयोगसम्भवे बाधकाभावाच्चेति चेन्न । शब्दसन्तानमध्यवर्तिनां शब्दानां सर्वेषामाकाशाभिन्नश्रोत्रवृत्तित्वेऽपि श्रोत्ररूपाधिष्ठानप्रत्यासत्त्या जायमानश्रवणस्य तत्प्रत्यासत्तिक्रमेणैव जायमानत्वेनायौगपद्यवत् संस्काराणां मनःसंयोगस्य चात्मवृत्तित्वेऽपि स्मरणस्य संस्कारप्रत्यासत्त्या जायमानत्वेन संस्कारप्रत्यासत्तेश्चोद्बोधकक्रमेणैव घटमानत्वादेवमपि स्मरणयौगपद्यापत्तेरनवकाशात् ।

किञ्च प्रवृत्तिरिच्छया भवति निवृत्तिश्च द्वेषेणेति प्रवृत्तिनिवृत्तिभ्यामिच्छाद्वेषावनुमेयौ । तौ च ज्ञानं विना न सम्भवत इति ज्ञानेच्छाद्वेषप्रयत्नानां सामानाधिकरण्यं सिद्धमेव । इच्छाद्वेषप्रयत्नानां तत्फलभूतसुखादीनां चात्मगुणत्वं लोकप्रसिद्धमाकरेषु साधितञ्च । तस्माज्ज्ञानस्याप्यात्मगुणत्वं सिद्धमेव ।

ज्ञानस्य शरीरगुणत्वशंका-तत्समाधानञ्च—

ननु प्रवृत्तिनिवृत्तिभ्यामिच्छाद्वेषयोरनुमेयत्वे, प्रवृत्तिनिवृत्त्योश्च पार्थिवादिशरीरेषु प्रत्यक्षसिद्धत्वादिच्छाद्वेषयोरपि शरीरसमवेतत्वप्राप्तौ ज्ञानस्यापि शरीरसमवेतत्वं युक्तमिति चेन्न । परशुकुठारादौ

१. योगसूत्रम् । ४।४ ।
२. न्यायवार्तिकतात्पर्यटीका ।३।२।३४ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रवृत्तिनिवृत्त्योः सत्त्वेऽपि चैतन्यस्याभावेन व्यभिचारात्। न च भूतेषु यः प्रवृत्तिनिवृत्त्यन्यतररूप आरम्भः, स तु परश्वादिसाधारणो न गृह्यते येन परश्वादीनां चैतन्यापत्तिः स्यात् किन्तु तदसाधारणोऽवयवसंयोगविशेषरूपलिङ्गानुमेयः; स च शरीर एव सम्भवति न परश्वादिष्वत एव शरीर एवेच्छाद्वेषौ ताभ्यां चैतन्यं चानुमेयं, परश्वादिषु त्ववयवसंयोगविशेषरूपलिङ्गाभावेनारम्भाभावान्न व्यभिचार इति वाच्यम्; घटादिषु पार्थिवादिभूतावयवानां परिणामलक्षणस्यारम्भस्य दृश्यमानत्वेन सिकतादिषु च तदभावस्यापि दर्शनेनोक्तावयवसंयोगविशेषरूपलिङ्गस्यापि शरीरचैतन्यासाधकत्वात्।

प्रवृत्तिनिवृत्तिजनकेच्छाद्वेषयोर्ज्ञानस्य च भूतगुणत्वस्वीकारे भूतेषु च नियमेन गुरुत्वादिगुण-निमित्तपतनादिलक्षणप्रवृत्त्युपलम्भवत् तेषु इच्छाद्वेषजन्ययोः प्रवृत्तिनिवृत्त्योरपि नियमेनोपलम्भप्रसङ्गः स्यात्। आत्मगुणत्वाभ्युपगमे आत्मनश्च शरीरादीनां प्रयोजकत्व (प्रेरकत्व)—स्वीकारादारम्भनिवृत्त्योः प्रयोज्याश्रयत्वमुपगम्य 'ज्ञानेच्छादीनां च प्रयोजकाश्रयत्वव्यवस्थया भूतेषु यदा प्रयुज्यमानत्वं तदा प्रवृत्तिनिवृत्ती इति व्यवस्थापनेन तादृशापत्त्यभावात्। तदुक्तं मिश्रैः—'एवं भूतमात्रे ज्ञानेच्छाद्वेषनिमित्ते प्रवृत्तिनिवृत्ती स्वाश्रये स्याताम्। एतदुक्तं भवति—ये ये पृथिव्यादिधर्मास्ते यावत्पृथिव्यादिभाविनो दृष्टा यथा गुरुत्वादयः[1]।'—इत्यादि।

'सोऽयं प्रयोगः—त्रसस्थावरशरीरेषु प्रवृत्तिः स्वाश्रयव्यतिरिक्ताश्रयगुणनिमित्ता प्रवृत्तिविशेषत्वात् परश्वादिगतप्रवृत्तिविशेषवदिति, न केवलं शरीरस्य प्रवृत्तिविशेषोऽन्यगुणनिमित्तः भूतानामपि तदारम्भ-काणां प्रवृत्तिविशेषोऽन्यगुणनिबन्धन एवेति[2]।' इति च।

न च यथा मदिरायामेव मदशक्तिनियमो न सर्वत्र साधारणपदार्थेषु तथा शरीर एव भूतानां संयोगविशेषेण चैतन्यं जायत इति न भूतमात्रे चैतन्यापत्तिरिति वाच्यम्; तथा सति यथा मदिरा-भागादपि मदोत्पत्त्या सर्वेष्वेव मदिरावयवेषु पृथक् पृथगेव मदशक्तिर्भवतीति स्वीक्रियते तथैव शरीरचैतन्यपक्षे शरीरावयवेष्वपि पृथक्पृथक्चैतन्यस्वीकारापत्त्यैकस्मिन्नपि शरीरे ज्ञातृबहुत्वस्यानुभव-विरुद्धस्यापत्तिः स्यात्, चैतन्यविशिष्टानां बहूनां शरीरावयवानां ज्ञातृत्वात्। तथा च प्रयोजकबहुत्वेन कस्मिंश्चित्समये ते बहुप्रयोजकाः मिथः कलहेन शरीरं वा उन्मथ्नीयुरक्रिया वा भवेयुः, प्रत्ययव्यवस्थानु-पपत्तिश्च स्यात्। तथाहि—यथा प्रतिशरीरं ज्ञातृभेदस्वीकाराज्ज्ञानभेदः देवदत्तयज्ञदत्तादेर्ज्ञानादीनां परस्परं भिन्नत्वात्, चैत्रसुखादीनां मैत्रादेर्ज्ञानाभावात् एकेन दृष्टस्यान्यस्मरणाविषयत्वात् तथैवै-कस्मिञ्शरीरेऽपि ज्ञातृबहुत्वस्वीकारे सर्वेषां तादृशज्ञातॄणां ज्ञानादिभेद आपद्येत। तथा च शरीरस्य कस्मिंश्चिदवयवे वृक्णे तद्गृहीतविषयस्य स्मरणं न स्यात्—एकेन ज्ञातस्यान्येन स्मरणासम्भवात्। न चैवमस्तीति ज्ञातृबहुत्वस्वीकारोऽनिष्ट एव।

तस्मात् कथमपि ज्ञानस्य शरीरगुणत्वं न विचारसहमिति।

एवमेव वैशेषिकशास्त्रेऽप्यात्माश्रितत्वं ज्ञानस्य स्वीक्रियत इति प्रथमपरिच्छेदनिर्दिष्टैः 'सोऽनपदेशः' इत्यादिभिस्सूत्रैः स्पष्टं प्रतिपाद्यत इति।

---

१. न्यायवार्तिकतात्पर्यटीका। ३।२।३७।
२. तत्रैव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सांख्ययोगनये ज्ञानाश्रयविचारः

सांख्ययोगनये तु पुरुषोऽपरिणामी न प्रमातृत्वाद्याश्रयः। ज्ञानात्मिका वृत्तिस्तु बुद्धेरेव। यथा ह्यन्तरेणापि चन्द्रमसः क्रियामुपसंक्रान्तचन्द्रप्रतिबिम्बं स्वच्छं जलं स्वयं चलं सदचलमपि चन्द्रप्रतिबिम्बं चलमिवावभासयत्येवं विनापि चितिव्यापारमुपसंक्रान्तचितिप्रतिबिम्बा बुद्धिरसङ्गतामपि चितिशक्तिं स्वगतया ज्ञानादिक्रिययाऽवभासयन्ती सतो प्रमातृभावमापादयति। परमार्थतस्तु न पुरुषस्य प्रमातृत्वं न वा तन्निष्ठो बोधः फलमिति।

यत्तु—'असन्दिग्धाविपरीतानधिगतविषया चित्तवृत्तिः बोधश्च पौरुषेयः फलं प्रमा[1]' इति सांख्यतत्त्वकौमुद्यामुक्तं तेनापाततः पुरुषनिष्ठत्वं बोधस्य यद्यपि प्रतीयते तथापि तद्वाक्येन न बोधस्य पुरुषनिष्ठत्वमाख्यायते येन प्रमातृत्वादिधर्मेण पुरुषस्य परिणामित्वं स्यादपि तु बुद्धौ प्रतिबिम्बितत्वेन तत्तादात्म्यापत्त्या पुरुषस्य ज्ञानादिमत्त्वोपचाराद् बोधः पौरुषेय इत्यभिधीयते। एवञ्च चितिचित्तयोरभेदग्रहात् पुरुष उपचर्यमाणोऽपि वस्तुतो बुद्धिवृत्त्यात्मक एव बोधो न पुरुषधर्म इति।

एवञ्च चित्तवृत्त्या पौरुषेयो बोधो न जन्यतेऽपितु चैतन्यमेव तत्तदर्थोपरक्तबुद्धिदर्पणप्रतिबिम्बितं सद् बुद्धिवृत्त्याऽर्थाकारया तदाकारतामापद्यमानं फलमित्यमित्यभिधीयते। तच्च चित्तप्रतिबिम्बितं फलभूतं चैतन्यं चितिचित्तयोरभेदग्रहाच्चित्तात्मकं, प्रमाणभूता चित्तवृत्तिरपि चित्तात्मिकेति सामानाधिकरण्यसद्भावात् पौरुषेयबोधस्य चित्तवृत्तेः फलभावः। तथा चाहुर्योगभाष्यकाराः—'फलमविशिष्टः पौरुषेयश्चित्तवृत्तिबोधः[2]' इति। अर्थात् इन्द्रियप्रणालिकयाऽर्थसन्निकर्षानन्तरं जायमाना या 'अयं घट' इत्याकारा चित्तवृत्तिस्तद्विषयको यो'ऽहं घटं जानामी'त्याकारकोऽनुभवः सः प्रमाणभूतायाश्चित्तवृत्तेः फलम्। स चायमनुभवः चितिचित्तयोरभेदग्रहात् पुरुष उपचर्यमाणत्वेन पुरुषवर्तीति कथ्यते। तथोक्तं तत्त्ववैशारद्याम्—'अविशिष्टः चित्तवृत्त्या सहाविशिष्टः बुद्धिवृत्त्यात्मक इत्यर्थः[3]' इति। अत्रैव भाष्यकारा हेतुं विवेचयन्ति—'बुद्धेः प्रतिसंवेदी पुरुष[4]' इति। अर्थात् संवेदिन्या बुद्धेः प्रतिरूपः तत्तादात्म्यापन्नत्वेन समानाकारः पुरुष इति।

बोधस्य बुद्धिवृत्त्यात्मकत्वेऽपि यथा पौरुषेयत्वं तथा बुद्धिवृत्तितादात्म्यापत्त्या बुद्धिवृत्त्यनुकारीत्यर्थकप्रत्ययानुपश्यशब्दघटिते 'द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः[5]' इति सूत्रे, 'अपरिणामिन्या अपि चितेः स्वीयबुद्धिवृत्तिविषयकं ज्ञानं बुद्धिवृत्त्याकारतापत्त्यैव भवति न स्वत' इत्यर्थके, 'चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम्[6]' इत्यादिसूत्रतद्भाष्यादौ चोक्तमेव। तत्र भाष्यम्—'अपरिणामिनी हि भोक्तृशक्तिरप्रतिसंक्रमा च, परिणामिन्यर्थे प्रतिसंक्रान्तेव तद्वृत्तिमनुपतति, तस्याश्च प्राप्तचैतन्योपग्रहस्वरूपाया बुद्धिवृत्त्यनुकारमात्रतया बुद्धिवृत्त्यविशिष्टा हि ज्ञानवृत्तिरित्याख्यायते[7]।' इति अस्यायमर्थः—भोक्तृशक्तिः पुरुषाख्या चितिर्हि स्वभावतः परिणामरहितत्वेन

---

१. सांख्यतत्त्वकौमुद्यां चतुर्थकारिकाव्याख्याने।
२. समाधिपादीयसप्तमसूत्रभाष्ये।
३. १।७ सूत्रभाष्यस्थतत्त्ववैशारद्याम्।
४. १।७। योगसूत्रे भाष्यम्।
५. योगसूत्रम्। २।२०।
६. योगसूत्रम्। ४।२२।
७. तत्रैव भाष्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संचाररहिता अर्थात् विषयदेशे गमनाभाववती तथापि परिणामिनि बुद्धिरूपेऽर्थे प्रतिविम्बिता सती विषयाकारां बुद्धिवृत्तिमनुगच्छति । प्राप्तश्चैतन्योपग्रहो नाम प्राप्तश्चैतन्यप्रतिविम्बाख्योपरागो यया बुद्धिवृत्त्या एवंभूताया बुद्धिवृत्तेरनुकारमात्रतया बुद्धिवृत्त्यविशिष्टा अर्थात् बुद्धितादात्म्यापन्ना सती ज्ञानवृत्तिर्नाम ज्ञानरूपवृत्तिमती बुद्धिः प्रमात्रीत्युच्यते ।

एवञ्च पुरुषः शुद्धोऽपरिणामी प्रमातृत्वाद्यनाश्रय एवेति ।

यत्तु—सांख्यप्रवचनभाष्ये 'द्वयोरेकतरस्य वाऽप्यसन्निकृष्टार्थपरिच्छित्तिःप्रमा तत्साधकं यत्तत्त्रिविधं प्रमाणम्[१]' इति सूत्रव्याख्यानावसरे योगवार्तिके च 'पुरुषनिष्ठो बोधः फलम्[२]' इति 'प्रमाता चेतनः शुद्धः[३]' इति च प्रपञ्चितम्; तदयुक्तम्; बुद्धिप्रतिबिम्बितस्य पुंसः कथञ्चित् प्रमातृत्वेऽपि शुद्धस्य प्रमातृत्वायोगात् । न च 'ध्यायतीव लेलायतीव[४]' इत्यादिश्रुतिबलात् शुद्धस्य प्रमातृत्वं स्वीकर्तुमुचितमिति वाच्यम्, 'असङ्गो ह्ययं पुरुष[५]' इत्यादिबहुतरश्रुतिष्वसङ्गत्वस्यैव सिद्धान्तितत्वेन पूर्वोदाहृतश्रुतावौपाधिकस्यैव प्रमातृत्वकथनमिति निश्चयात् । 'पुरुषस्तु प्रमासाक्ष्येव न प्रमाता[६]' इति तत्रत्यसांख्यप्रवचनभाष्यग्रन्थविरोधाच्च ।

यत्तु योगवार्तिके—'बुद्धेरेव प्रमातृत्वे पुरुषो न सिद्ध्येत्[७]' इति विज्ञानभिक्षुणोक्तम्, तदप्ययुक्तम्, न हि केवलस्य बुद्धितत्त्वस्य प्रमातृत्वमुच्यते सांख्यशास्त्रे, किन्तु 'उपरागात् कर्तृत्वं चित्सान्निध्याच्चित्सान्निध्यात्[८]' इति सूत्रानुसारेणोपसंक्रान्तचितिप्रतिबिम्बस्यैव प्रमातृत्वमभ्युपगम्यते । एवञ्च प्रतिबिम्बत्वान्यथानुपपत्त्या साक्षितया च पुरुषसिद्धिर्निष्प्रत्यूहैवेत्यलमनुक्तोपालम्भेनेति ।

यत्तु तत्रैव, योगचतुर्थसूत्रे च—'न बुद्धौ प्रमाख्यं फलं जायते तथा सति पौरुषेयशब्दस्य यथाश्रुतार्थत्यागापत्तेः, प्रतिविम्बस्य तुच्छतयाऽर्थभानानुपपत्तेश्च, प्रतिविम्बस्य प्रकाशाद्यर्थक्रियायाः क्वाप्यदर्शनात्, अपितिवन्द्रियसन्निकर्षादिना पूर्वं बुद्धेरर्थाकारा वृत्तिर्जायते ततश्चार्थोपरक्ता बुद्धिवृत्तिः प्रतिबिम्बरूपेण पुरुषारूढा सती भासते—

"तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः ।
इमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः[९] ॥" इत्यादि—

स्मृतिषु परस्परं प्रतिबिम्बस्य सिद्धत्वादित्यादिग्रन्थेन यथा बुद्धौ चित्प्रतिबिम्ब एवं चितावपि बुद्धिप्रतिबिम्बः स्वीकार्य इत्याशय ऊरीकृतः; सोऽप्ययुक्तः, 'चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम्[१०]' इति सूत्रतद्भाष्यादिभ्यो बुद्धौ चैतन्यप्रतिबिम्बस्य प्रामाणिकत्वेऽपि पुरुषे बुद्धिप्रतिबिम्बस्याप्रामाणिकत्वात् ।

'तस्मिंश्चिद्दर्पणे स्फारे' इत्यादिस्मृतीनान्तूपर्युक्तसूत्राद्यविरोधेन 'बुद्धिदर्पणप्रतिबिम्बितत्वेन तत्तादात्म्यापन्ने दर्पणवत्स्वच्छे चेतने इमा वस्तुदृष्टयः बुद्धेर्धर्मभूतानि ज्ञानान्यविवेकात् प्रतिभासन्त'

---

१. सांख्यप्रवचनसूत्रम् । १।८७ ।
२. तत्रैव भाष्यम् ।
३. समाधिपादीयसप्तमसूत्रवार्तिके ।
४. वृहदारण्यकोपनिषत् । ४।३।७ ।
५. वृहदारण्यकोपनिषत् । ४।३।१५ ।
६. सांख्यसूत्रे भाष्यम् । १।८७ ।
७. समाधिपादस्थसप्तमसूत्रीययोगवार्तिके ।
८. सांख्यसूत्रम् । १।१६४ ।
९. योगवाशिष्ठोपशमप्र० । ६१।११३ ।
१०. योगसूत्रम् । ४।२२ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्येवार्थः स्वीकरणीयः ।

नापि यथाश्रुतार्थत्यागापत्तिः, यथाश्रुतपौरुषेयशब्दार्थे पारमार्थिकत्वस्याप्रवेशात् । 'तस्येदमि'[1]ति व्युत्पत्त्या पुरुषस्वत्वरूपं वा 'तत्र भव'[2] इतिव्युत्पत्त्या पुरुषनिष्ठत्वरूपं वा पारमार्थिकोपचारिकसाधारणमेव प्रकृते तदिति ।

किञ्च पुरुषस्य मुख्यप्रमाश्रयत्वेन प्रमातृत्वाभिधानम् 'पुरुषस्तु प्रमासाक्ष्येव न प्रमाता[3] इति स्वोक्त्या सह विरोधादश्रद्धेयमिति ।

'प्रतिविम्बस्यार्थक्रियाकारित्वं नास्तीत्यपि[4]' रिक्तं वचः, जडप्रतिविम्बस्यार्थक्रियाकारित्वाभावेऽपि चेतनप्रतिविम्बस्यार्थक्रियाकारित्वे बाधकाभावात् ।

एवञ्च बुद्धावेव प्रमाख्यं फलं जायते न पुरुषे, तस्यासङ्गत्वेन प्रमाधारत्वाभावात् चितिचित्तयोरभेदग्रहाच्च 'पौरुषेयो बोध' इत्युपचर्यत इति ।

वेदान्तिनये ज्ञानाश्रयविचारः

औपनिषदमते तु घटपटाद्याकारोल्लेखिज्ञानं वृत्तिरूपज्ञानम् । तदनुल्लेखिज्ञानन्तु स्वरूपभूतज्ञानम् ।

विशिष्टाद्वैतिमतेऽपि घटपटादिभासकं धर्मभूतज्ञानम् । तदधिकरणन्तु धर्मिभूतज्ञानम् । एतत्प्रतिपादकन्तु 'ज्ञोऽत एवेति' ब्रह्मसूत्रम्[5] । तत्राद्वैतिमते स्वरूपज्ञानमात्मरूपमेवेति । तथाहि—

ज्ञानस्वप्रकाशत्ववादिवेदान्तिमते घटदर्शनानन्तरं किमहं घटमपश्यम् न वेति संशयस्य, नैव दृष्टवानिति विपर्ययस्य चादर्शनेन ज्ञानं स्वप्रकाशमिति द्वितीयप्रकरणे प्रतिपादितम् । आत्मन्यप्यहमनहं वेत्याकारकस्य सन्देहस्य नैवाहमित्याकारकस्य विपर्ययस्य चादर्शनात् स्वप्रकाशज्ञानरूपत्वमात्मनोऽङ्गीकार्यम् । न च संशयाद्यविषयत्वं न प्रकाशज्ञानरूपत्वव्याप्तं, दुःखादौ तदभावेऽपि संशयाद्यविषयत्वदर्शनादिति वाच्यम्; वैषम्यात्, दुःखादीनां स्वसत्तायां ज्ञानाव्यतिरेकस्वाभाव्यात्, साक्षिसम्बन्धाद्वा सन्देहविपर्ययाद्यविषयत्वं न तु संवित्कर्मतामन्तरेण प्रकाशबलादिति न तेषामप्यात्मरूपतापादनसम्भवः । अत एव प्रयोग :—

आत्मा संविद्रूपः संवित्कर्मतामन्तरेणापरोक्षत्वात् संवेदनवदिति । अत्र साध्यकोटौ संवित्पदेन स्वरूपसंविद्विवक्ष्यते ।

आत्मनश्चात्र पक्षत्वम् ज्ञातृत्वोपलक्षितसंविन्मात्ररूपत्वेन, न तु ज्ञानाश्रयत्वेन, 'योऽयं विज्ञानमयः प्राणेषु[6]' इत्यादित्वंपदार्थशोधकवाक्येषु 'सत्यं ज्ञानमनन्तं ब्रह्म[7]' 'तत्त्वमसि[8]' इत्यादिवाक्यैकवाक्यतोपपत्त्यर्थं तस्य विज्ञानस्वरूपतायाः प्रतिपादनात् । अत एव हि 'तत्त्वमसि' 'अहं ब्रह्मास्मि[9]' इत्यादि-

---

१. पाणिनिसू० । ४।३।१२ ।
२. पाणिनिसू० । ४।३।३५ ।
३. सांख्यप्रवचनभाष्यम् । १।८७
४. योगवार्तिकम् । १।७ ।
५. ब्रह्मसूत्रम् ।२।३।१८ ।
६. बृहदारण्यकोपनिषद् । ४।३।७, ४।४।२२ ।
७. तैत्तिरीयोपनिषद् । २।१।१ ।
८. छान्दोग्योपनिषद् । ६।८।७ ।
९. बृहदारण्यकोपनिषद् । १।४।१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महावाक्यसमानार्थकम् 'प्रज्ञानं ब्रह्म'[1]ति महावाक्यं पठितम् । तथैवोपबृंहयितुमुपर्युक्ते 'ज्ञोऽत एवे'ति सूत्रेऽपि ज्ञपदस्य ज्ञानस्वरूपमात्रपरत्वम् । संवेदनवदित्यनेन विवक्षितं संवेदनं त्वन्तःकरणपरिणाम-वृत्तिरूपं प्रमाणजन्यं ज्ञानम् ।

आत्मनोऽसंविद्रूपत्वे संवित्कर्मतयैवापरोक्ष्यस्वीकारापत्त्या अस्वप्रकाशघटादितुल्यतापत्तिः स्यादिति विपक्षे बाधकस्तर्कः । विवेचितञ्चैतद् द्वितीयप्रकरणे ।

विशिष्टाद्वैतिदृष्ट्याप्येतत् प्रयोगः क्रियेच्चेत्तदा धर्मभूतज्ञानं संवेदनपदार्थ इति ।

उपर्युक्तब्रह्मसूत्रे विशिष्टाद्वैतिनो 'ज्ञ' इति पदं ज्ञानवाची ज्ञानाश्रयवाची चेति तन्त्रेण आवृत्त्या वेत्यभ्युपगच्छन्ति ।

अस्मिन्नेवानुमानेऽजडत्वमपि हेतुर्भवितुमर्हतीति यत्र तत्र प्रतिपाद्यते । तत्राजडत्वं स्वस्मै प्रकाशमानत्वमितरानपेक्षाव्यभिचरितप्रकाशसत्ताकत्वपर्यवसितम् । अतो दुःखादौ साक्षिसम्बन्धाधीना-व्यभिचरितप्रकाशसत्ताके नानैकान्तिकत्वम् । आत्मा तु 'यत्साक्षादपरोक्षाद् ब्रह्मे'[2]ति श्रुतेर्न स्वप्रकाशार्थमितरमपेक्षते । न च अखण्डाकारवृत्तिमेवापेक्षत इति वाच्यम्, अखण्डाकारवृत्तेः 'अविद्यानिवृत्तिपरत्वाच्छास्त्रस्य[3]' इति भगवत्पादभाष्यानुसारेण ब्रह्मावरणनिवृत्तिमात्रेणोपक्षीणत्वात्, आत्मस्वरूपस्य तु स्वयमेव प्रकाशमानत्वात् स्वप्रकाशार्थमितरानपेक्षणात् । तथा च फलाव्याप्यप्रकाश-त्वमेवाजडत्वमिति न जडेषु कथमप्यनैकान्तिकत्वप्रसक्तिः ।

युक्तमिदमौपनिषदानां विवेचनं ये हि फलव्याप्यत्ववृत्तिव्याप्यत्वादिकृतभेदमभिप्रयन्ति ।

तदित्थमौपनिषदमते स्वरूपभूतज्ञानं त्वात्मैवेति न तदाश्रयवार्त्तापि । वृत्तिरूपज्ञानन्त्वन्तः-करणपरिणामरूपमेवातोऽन्तःकरणाश्रितमिति प्रतिभाति ।

विशिष्टाद्वैतिमतं कथमुपयुक्तमिति न बुद्ध्यते, सूत्रे ज्ञपदस्यावृत्तिं विनापि मतान्तरानुसारेणो-पपत्तावावृत्तौ गौरवात्, ज्ञानाश्रयत्वेनात्मपदार्थमभ्युपगच्छतां विशिष्टाद्वैतिनां मते नैयायिकादिमत इव ज्ञानस्याप्यचेतनत्वशङ्काप्रसङ्गस्य प्राभाकरादिमत इव आत्मजडत्वप्रसङ्गस्य च तदनभिमतस्य समुत्थि-तत्वात् । अपि च नित्यज्ञानस्य नित्यज्ञानाश्रयत्वस्यान्यत्रादर्शनात् युक्त्यनुभवविरोधाच्च धर्मभूतज्ञाना-श्रयत्वेनात्मनो ज्ञातृत्वकल्पनाऽयुक्ता । अत एव प्राभाकरा जडात्मवादिनोऽप्यात्मधर्मस्य ज्ञानस्यानित्यत्वमेव स्वीकुर्वन्ति । भाट्टाश्च ज्ञानाश्रयत्ववादिनोऽप्यात्मधर्मस्य ज्ञानस्यात्मपरिणामत्वेन जन्यत्वमभिप्रयन्ति । अत एतैर्नैयायिकादीनां पक्षो वा स्वीकरणीयः, अन्तःकरणतादात्म्याध्यासात्तत्परिणामजन्यज्ञानाश्रयत्वे-नैवौपाधिकेनात्मनो ज्ञानाश्रयत्वं वा स्वीकरणीयमिति ।

धर्मभूतज्ञानसंकोचविकासाभ्यां न केवलं धर्मभूतज्ञानस्य, किन्तु धर्मिण आत्मनोऽपि विनाशित्वं स्यादेव 'उपयन्नपयन्धर्मो विकरोति हि धर्मिणमि'ति न्यायादित्यप्यविस्मरणीयमेवेति ।

---

१. ऐतरेयोपनिद् । ५।३ ।
२. बृहदारण्यकोपनिषद् । ४।३।१ ।
३. ब्रह्मसूत्रशांकरभाष्यम् । १।१।४ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्थपरिच्छेदः

ज्ञानस्य भेदाः

(Kinds of Knowledge)

[प्रथमखण्डः]

वैशेषिकपद्धत्या ज्ञानभेदविमर्शः

अर्थप्रकाशरूपा बुद्धिर्यद्यप्यनेकरीत्या दार्शनिकैर्विभक्ता तथापि अनुभूतेः संख्यायां विवादे सत्यपि ऋते वैशेषिकपातञ्जलाभ्यां सर्वेषां विभागः प्रमाणकुशलानां नैयायिकानां मतम् पुरस्कृत्य विवादपदेषु स्थलविशेषेषु तुलनात्मकरीत्या तत्सामान्यविशेषमालोच्यावगन्तुं शक्यः वैशेषिकसम्मतानध्यवसाय-स्वाप्नयोरार्षस्य चान्तर्भावप्रदर्शनानन्तरं स्मृतेश्च विद्यात्वाभ्युपगमानन्तरमेव यथाकथञ्चित्तस्यान्यैः साम्यप्रदर्शनसम्भवात् पातञ्जलदर्शनस्यापि 'प्रमाणविपर्ययविकल्पनिद्रास्मृतयः'[1] इतिवृत्तिविभाजक-सूत्रोक्तविकल्पनिद्रयोरार्षस्य चान्तर्भावस्थापनानन्तरमेवान्यैस्तत्प्रदर्शनसम्भवाच्च ।

अत एव वैशेषिकमतं पृथग्विमृश्य न्यायमतालोचनप्रसङ्गेऽन्यमतानामालोचनं तत्र तत्र प्रदर्शयिष्यते । अनयोरालोचनप्रसङ्गेऽपि प्रसङ्गागतानामन्यराद्धान्तानामालोचनमन्तरान्तराऽवधास्यते ।

तत्र वैशेषिकमते बुद्धिर्द्विविधा—विद्या चाविद्या चेति । विद्या तु संशयभिन्नाबाधितनिश्चयरूपा । सा चतुर्विधा—प्रत्यक्षा, लैङ्गिकी, स्मृतिः, आर्षी च ।

प्रत्यक्षा

अक्षमक्षं प्रतीत्य या बुद्धिरुत्पद्यते सा प्रत्यक्षा । प्रतिगतं विषयं प्रति गतमर्थाद् विषयसन्निकृष्टम् अक्षमिन्द्रियं यस्यै विद्यायै सा प्रत्यक्षा, विषयसन्निकृष्टेन्द्रियसाध्या विद्या प्रत्यक्षेति यावत् । तत्तत्प्रत्यक्षकारणीभूतानां सामग्रीणां विवेचनन्तु पृथक् प्रकरणे करणीयमस्तीति तत्तद्भेदप्रभेदानां तल्लक्षणानामेव चात्र समालोचनं क्रियते ।

वैशेषिकमतानुसारेण द्रव्यगुणकर्मसामान्यानामेव प्रत्यक्षविषयत्वं न तु समवायविशेषयोः, सम्बन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वस्वीकारात् समवायाश्रयगगनादेर प्रत्यक्षतया यावदाश्रयप्रत्यक्षस्य दुर्घटत्वेन समवायप्रत्यक्षो दुर्घट इति । अतीन्द्रियपरमाणुनिष्ठत्वाद् विशेषास्त्वतीन्द्रिया इति प्रत्यक्षयोग्यत्वाभावात्तेषां न प्रत्यक्षविषयत्वम् ।

आत्मा मनसा युज्यते मन इन्द्रियेणेन्द्रियमर्थेनेति प्रत्यक्षक्रमः ।

---

१. योगसूत्रम् । १।६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्यक्षविषयाणां क्रोडीकरणम्

अनेकद्रव्यसमवायात् स्वगतविशेषात् स्वाश्रयसन्निकर्षात्तत्तन्नियतेन्द्रियेण रूपरसगन्धस्पर्शानां प्रत्यक्षं जायते। आकाशसमवेतस्य शब्दस्य श्रोत्रेन्द्रियरूपाकाशेनैव प्रत्यक्षं भवति । तत्र आत्मा मनसा युज्यते, मनस्तु कर्णशष्कुल्यवच्छिन्ननभसा । तावतैव शब्दप्रत्यक्षं जायते । प्रत्यक्षद्रव्यसमवायाच्चक्षुःस्पर्शनाभ्यां संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेहद्रवत्ववेगानां प्रत्यक्षं जायते । बुद्धिसुखदुःखेच्छाद्वेष-प्रयत्नानान्तु आत्ममनसोः संयोगात्प्रत्यक्षम् ।

कर्मणस्तु प्रत्यक्षद्रव्यसमवायाच्चक्षुःस्पर्शनाभ्यां प्रत्यक्षम् ।

उपलभ्यमानाधारसमवेतानां सत्ताद्रव्यत्वगुणत्वकर्मत्वादीनामाश्रयग्राहकैरिन्द्रियैः प्रत्यक्षं जायते ।

प्रत्यक्षप्रणाली—

द्रव्यगुणकर्मसामान्यानां प्रत्यक्षं भवतीति पूर्वमुक्तम् । तत्र द्रव्ये महत्त्वानेकद्रव्यवत्त्वोद्भूतरूप-प्रकाशादिसामग्री-आत्ममनःसन्निकर्षादिसन्निकर्षचतुष्टय-धर्मादिसाधारणकारणानां सत्त्वे निर्विकल्पकं प्रत्यक्षं प्रथमं जायते ।

उक्तकारणानां सत्त्वे सामान्यधर्मविशेषधर्मद्रव्यगुणकर्मविशेषणापेक्षणात् आत्ममनःसन्निकर्षादेव सविकल्पकप्रत्यक्षं भवति ।

प्रत्यक्षस्य भेदाः

उपर्युक्तरीत्या प्रत्यक्षात्मकं ज्ञानं द्विविधं—निर्विकल्पकं सविकल्पकञ्च । तत्र घटादिना सहेन्द्रिय-सन्निकर्षाद्यनन्तरं प्रथममेव घटत्वादिविशिष्टघटादिप्रत्यक्षं न भवितुमर्हति पूर्वं विशेषणीभूतघटत्वादि-ज्ञानाभावाद् घटत्वविशिष्टघटज्ञानस्य विशिष्टज्ञानत्वेन विशेषणीभूतघटत्वज्ञानसापेक्षत्वात् अन्यथा दण्डादिज्ञानं विनापि दण्ड्यादिप्रत्यक्षापत्तेः । एवञ्च प्रथमं घटघटत्वयोर्निर्विकल्पकात्मकं ज्ञानं भवति । तत्तु तयोर्मिथः संसर्गं नावगाहते ।

तथा च वस्तुस्वरूपस्य ग्रहणमात्रात्मकं विकल्परहितं प्रत्यक्षं निर्विकल्पकं प्रत्यक्षमिति । निष्प्रकारकं प्रत्यक्षं निर्विकल्पकमिति यावत् ।

निर्विकल्पकप्रत्यक्षस्यावश्यकत्वम्—दण्डेन सह चक्षुःसंयोगात् कदाचित् स्वरूपतो दण्डत्वप्रकारकं दण्ड इत्याकारकं ज्ञानं भवति कदाचित्तु जातित्वेन दण्डत्वप्रकारकं जातिमानित्याकारकं ज्ञानं भवतीति सर्वानुभवसिद्धम् । तत्र स्वरूपतो दण्डत्वप्रकारकप्रत्यक्षनिर्वाहाय स्वरूपतो दण्डत्वज्ञानस्य कारणत्वमव-श्यमभ्युपगन्तव्यम् । तादृशं कारणीभूतज्ञानं निर्विकल्पकमेव । तदनभ्युपगमे तादृशद्विविधप्रत्यक्षयो निर्वाहो न स्यात् ।

निर्विकल्पकोपगमे च स्वरूपतो दण्डत्वादिप्रकारकप्रत्यक्षे निर्विकल्पकात्मकस्य स्वरूपतो दण्डत्वादिज्ञानस्य, जातित्वादिना दण्डत्वादिप्रत्यक्षे जातित्वादिना दण्डत्वादिविषयकज्ञानस्य च कारणत्वो-पगमादुभयोरपि प्रत्यक्षयोर्निर्वाहः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उक्तञ्च तान्त्रिकैः—'अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम् ।

बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्[1] ॥' इति ॥

निर्विकल्पके विशिष्टाद्वैतिभिराक्षेपः

विशिष्टाद्वैतिनस्तु अन्यप्रकारेण विभागमुरीकुर्वन्ति, प्रतिक्षिपन्ति चैतद्रीत्या विहितं विभागम । तेषामयमाशयः—तत्तोल्लेखपूर्वकं प्रत्यक्षं सविकल्पकम् । तदनुल्लेखपूर्वकं निर्विकल्पकम् । किन्तूभयविधमप्येतद् विशिष्टविषयकमेव अविशिष्टवस्तुग्राहिणो ज्ञानस्यानुपलम्भादनुपपत्तेश्च । तथाहि—निर्विकल्पकस्य विशिष्टविषयकत्वास्वीकारे तदनन्तरं हेयोपादेयविभागपूर्वकप्रवृत्तिनिवृत्त्योरनुपपत्तिः । बालमूकतिर्यगादिविज्ञानमपि हि संज्ञादिविकल्परहितमपि विशिष्टवस्तुविषयमेव । तथा चोक्तं वेदान्तदेशिकैः—

'यत्तु पठ्यते "अस्ति ह्यालोचनं……………शुद्धवस्तुजम् ।।" तदपि डिम्भविप्रलम्भनम् । निदर्शनञ्च विशिष्टविषयकमेव बालमूकपश्वादीनां जातिगुणादिविशिष्टवस्तुग्रहणाभावे तन्नियतप्रवृत्त्यादिभङ्गप्रसङ्गात्[2] ।' इति ।

अर्थात् बालमूकतिर्यगाविज्ञानानामन्नकण्टकवह्निव्याघ्रादिशब्दवाच्यत्वानवगाहित्वेऽपि इष्टद्वेष्यतावच्छेदकान्नत्वकण्टकत्वादिप्रकारावगाहित्वमस्त्येव । तदस्वीकारे तेषामन्नाद्यर्थं प्रवृत्तिः सर्पकण्टकादिभ्यो निवृत्तिश्च न सिद्ध्येदिति ।

तत्परिहारः

तन्न युक्तं प्रतिभाति—वस्तुस्वरूपमात्रस्य निर्विकल्पकेन ग्रहणं पूर्वं भवतीत्यस्वीकारे तद्वाचकशब्दस्य स्मृत्यभावात् सविकल्पकस्यापि सिद्ध्यभावप्रसङ्गः । अतः सविकल्पकसिद्ध्यर्थमेवैतत्स्वीकरणीयम् ।

किञ्च :सजातीयव्यक्त्यन्तरानुवृत्तेः विजातीयेभ्यो व्यावृत्तेश्च ग्रहणानन्तरमेव सामान्यविषयकं ज्ञानं भवति ।तदनन्तरमेव च विशिष्टविषयकं ज्ञानं भवतीति स्वीकर्त्तव्यम् । एवञ्च पूर्वं पिण्डान्तरानुसन्धानाभावेनानुवृत्तिव्यावृत्त्योश्च ग्रहणासम्भवात् सामान्यविशिष्टविषयकं ज्ञानं नैव भवितुमर्हति । वस्तुस्वरूपग्रहणं तु भवत्येव तस्य पिण्डान्तरानुसन्धानानपेक्षित्वात् ।

अत एव निर्विकल्पकेन न घटघटत्वयोर्विशेष्यविशेषणभावानुगमस्तस्य भेदावगतिसापेक्षत्वान्निर्विकल्पकेन च पिण्डान्तराननुसन्धानात्मकेन सामान्यादीनां परस्परभेदानध्यवसायात् । तथा च निर्विकल्पकादूर्ध्वं पिण्डान्तरस्यानुसन्धानानन्तरमेतद्वयक्तादिन्द्रियद्वाराऽनुवृत्तिव्यावृत्ती धर्मौ प्रतिपद्यमानस्य सामान्यविशेषमनुसन्दधतः सविकल्पकं ज्ञानं जायते ।

---

१. श्लोकवार्तिके प्रत्यक्षसूत्रे श्लोकः । ११२ ।

२. तत्त्वमुक्ताकलापस्थबुद्धिसरे ३२ कारिकायां सर्वार्थसिद्धौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्तु निर्विकल्पकस्य विशिष्टविषयकत्वास्वीकारे तदनन्तरं हेयोपादेयतया विभागपूर्वकं प्रवृत्ति-निवृत्त्यनुपपत्तिरूपं बाधकमुक्तं, तदपि न विचारसहं प्रथमाक्षसन्निपाताव्यवहितोत्तरमेव प्रवृत्तिर्भवतीति निर्विकल्पकमभ्युपगच्छताऽस्वीकारात् । न च क्षणविलम्बस्य शपथनिर्णेतव्यत्वात्प्रथमज्ञानानन्तरमेव प्रवृत्तिर्भवतीति किं न स्यादिति वाच्यम्, विपक्षेऽपि तथैव वक्तुं शक्यत्वादनुभवविरोधाच्च । तथाहि—अपूर्वव्यक्तावक्षसन्निपातानन्तरं यत्किञ्चित्त्ववैशिष्ट्यावगाहनपर्यन्तं हेयोपादेयत्वबुद्धिरेव न भवति प्रवृत्तेस्तु कथा दूरपराहतैव । इष्टद्वेष्यतावच्छेदकान्तत्वकण्टकत्वादिप्रकारावगाहित्वमस्त्येवेति यदुक्तं, तदप्यनुभव-विरुद्धं तथा सति तद्विषये बालानुद्दिश्य वृद्धानामुपदेशप्रवृत्त्यभावप्रसङ्गात् ।

किञ्च सर्वं ज्ञानं विशिष्टविषयकमेवेति वदद्भिरपि घटज्ञाने घटत्वस्य प्रत्यक्षं स्वीक्रियते न वा । स्वीक्रियते चेत्तत्रापि घटत्वत्वस्य प्रत्यक्षं स्वीक्रियते न वा । अत्र तत्प्रतीतिस्वीकारेऽनवस्था । अस्वीकारे घटत्वस्य निर्विकल्पकाभ्युपगम इति ।

कन्दलीकारास्तु—विशेष्यविशेषणयोर्नियमत एकज्ञानालम्बनत्वमभ्युपगच्छतां समक्षं सुरभिचन्द-नमित्यादिप्रसङ्गं पुरस्कृत्य निर्विकल्पकसिद्धिमुपस्थापयन्ति । तेषामयमाशयः—चक्षुषो गन्धविषयेऽसामर्थ्याद् घ्राणस्य च द्रव्यग्रहणेऽसामर्थ्यात् ताभ्यां न तदुभयोः सम्बन्धग्रहणं शक्यं तस्योभयसम्बन्धिग्रहणाधीनत्वात् । यदि यथा संस्कारसहितेन्द्रियजन्यं प्रत्यभिज्ञात्मकं प्रत्यक्षमुभयसामर्थ्यात् पूर्वापरकालीनविषयम् तथैव चक्षुर्घ्राणाभ्यां सम्भूयजन्यमानमिदं कारणद्वयसामर्थ्यादुभयविषयं स्यादेवेति चेदुच्यते, तदपि न युक्तं वैषम्यात् । तथाहि-प्रत्यभिज्ञास्थले अतीतत्वात्तत्ताया इन्द्रियागोचरत्वं, न तु इन्द्रियायोग्यत्वात् । सुरभि-चन्दनमित्यादौ तु गन्धस्य चक्षुर्गोचरतैव नास्ति, न वा द्रव्यस्य घ्राणगोचरत्वम् । एवञ्चेदमखण्डमुभाभ्यां जनितं 'सुरभिचन्दन' मित्यादि ज्ञानं यदि उभयकारणसामर्थ्यादित्यादिरीत्या गन्धं द्रव्यं च गृह्णाति तदा गन्धोऽपि चाक्षुषो द्रव्यमपि घ्राणगम्यमित्यापत्तिः स्यात्तदिन्द्रियग्राह्यत्वस्य तज्जन्यज्ञानविषयत्वरूपत्वात् । मनसस्त्वणुत्वादेव युगपदुभयेन्द्रियाधिष्ठानासम्भवः । तथा च घ्राणेन गन्धग्रहणानन्तरं तद्ग्रहणसहकारिचक्षुषा केवलविशेष्यालम्बनमेवेदं विशेष्यज्ञानं जन्यत इत्येव स्वीकार्यम् ।

तदुक्तं कन्दल्यां—'तथा च सत्यन्येषामपि विशेष्यज्ञानानामयं न्याय उपतिष्ठते-विवादाध्यासितं विशेष्यज्ञानं केवलविशेष्यालम्बनं प्रत्यक्षत्वे सति विशेष्यज्ञानत्वात् सुरभिचन्दनमिति ज्ञानवत्[1] ।' इति ।

यत्तूक्तं वेदान्तदेशिकेन तत्त्वमुक्ताकलापसर्वार्थसिद्धौ—'यत्र विशिष्टप्रत्ययस्य पृथग्विशेषणविशेष्य-ग्रहणपूर्वकत्वं तत्र भिन्नसामग्रीवेद्यत्वनिबन्धनस्तथाभावः सुरभिचन्दनत्वयोरन्योन्यनिरपेक्षभिन्नेन्द्रियग्राह्यत्वात् तदपेक्षस्तु पश्चात् कुतश्चित् सुरभिचन्दनमिति विशिष्टप्रत्ययः ।' इति ।

'नन्वेकेन्द्रियवेद्येष्वपि............भिन्नसामग्रीवेद्यत्वोपाधेरनिस्तारात्[2] ।' इति च ।

---

१. न्यायकन्दली पृ० २७८ ।

२. तत्त्वमुक्ताकलापबुद्धिसरे ३२ कारिकायाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रायमाशयः प्रतिभाति—सुरभिचन्दनमितिप्रत्ययोपपत्त्यर्थं विशिष्टज्ञानं प्रति विशेषणज्ञानस्य कारणत्वं व्यवस्थाप्यते। तद्बलेन च निर्विकल्पकज्ञानस्य सिद्धिः क्रियते। तदयुक्तम्। सामान्यतो विशिष्ट बुद्धिं प्रति विशेषणज्ञानं कारणमिति न कार्यकारणभावः किन्तु भिन्नेन्द्रियग्राह्यविशिष्टबुद्धिं प्रति विशेषण-ज्ञानं कारणम्। तथा च घटत्वादिविशिष्टघटादिबुद्धौ न तादृशकार्यकारणभावस्य प्रसरो येन प्रथमं घटत्वरूपविशेषणस्य ज्ञानं निर्विकल्पकरूपमपेक्षणीयं स्यादिति।

तदेतन्न युज्यते—सामान्यकार्यकारणभावे व्यभिचारासत्त्वेऽपि केवलं निर्विकल्पकापलापार्थं कार्यतावच्छेदककोटौ भिन्नेन्द्रियत्वं निवेश्य गुरुतरकार्यकारणभावकल्पने मानाभावात्।

पुनः प्रकारान्तरेण प्रत्यक्षं द्विविधम्

अयोगिप्रत्यक्षं, योगिप्रत्यक्षं च। तत्रायोगिप्रत्यक्षं तु चतुर्विधसन्निकर्षापेक्षं योगिभिन्नजीवानामेव।

योगिप्रत्यक्षं पुनर्द्विविधं—युक्तप्रत्यक्षवियुक्तप्रत्यक्षभेदेन। तत्र युक्तप्रत्यक्षं तु समाध्यवस्थितानां योगजधर्मानुगृहीतेन मनसा स्वात्मनि आत्मान्तरेषु च आकाशे, दिशि, काले, वायौ, परमाणुषु, मनस्सु तत्समवेतेषु गुणादिषु, समवाये चाविपर्यस्तमसन्दिग्धं स्वरूपदर्शनात्मकम्।

ये तु अत्यन्तयोगाभ्यासोपचितधर्मातिशया अतीन्द्रियद्रष्टारः किन्त्वसमाध्यवस्थितास्ते वियुक्ता इत्युच्यन्ते। तेषामभिमुखीभूतनिखिलविषयग्रामाणामप्रतिहतकारणगणानां चतुष्टयसन्निकर्षादात्ममन-इन्द्रियार्थसन्निकर्षाद्योगजधर्मानुग्रहसहकारितात् तत्सामर्थ्यात् मनःपरमाणुप्रभृतिषु सूक्ष्मेषु नागभुवनादि-प्रभृतिव्यवहितेषु ब्रह्मभुवनादिविप्रकृष्टेषु च यज्ज्ञानमुत्पद्यते तद्वियुक्तयोगजप्रत्यक्षम्।

पुनरपि प्रत्यक्षं द्विविधम्-नित्यानित्यभेदेन। तत्र नित्यप्रत्यक्षं तु ऐश्वरप्रत्यक्षम्। अनित्यं तु जीवानाम्। तच्च षड्विधं चाक्षुष-स्पार्शन-घ्राणज-रासन-श्रावण-मानसभेदेन।

लैङ्गिकी

लिङ्गात्सञ्जायमानं ज्ञानं लैङ्गिकम्। तृतीयलिङ्गपरामर्शजन्यं ज्ञानं वाऽनुमितिः। व्याप्ति-विशिष्टस्य पक्षवृत्तित्वज्ञानं परामर्शः। तच्च वह्निव्याप्यो धूमः पर्वत इत्याकारकं, वह्निव्याप्यधूमवान् पर्वत इत्याकारकं वा। अस्य तृतीयलिङ्गपरामर्शत्वमित्थमुपपद्यते—

प्रथमं तावन्महानसादौ धूमवह्न्योः सहचारज्ञाने व्यभिचारज्ञानविरहदशायां धूमत्ववह्नित्वसामा-न्यलक्षणप्रत्यासत्त्या सकलधूमवह्न्युपस्थितौ यत्र-यत्र धूमस्तत्र-तत्र वह्निरिति नियतसामानाधिकरण्यरूप-व्याप्तिज्ञानमुपजायते। ततः कालान्तरे पर्वतसमीपं गतस्य पुंसः पर्वतवर्त्तिनीमविच्छिन्नमूलां धूमरेखामव-गाहमानं धूमवान् पर्वत इत्याकारकं ज्ञानं जायते। तत्प्रथमं लिङ्गज्ञानम्, तदुद्बुद्धस्य प्राङ्महानसादौ गृहीतां व्याप्तिं विषयीकुर्वतः संस्कारस्य वशाद् धूमो वह्निव्याप्य इत्याकारकं स्मरणं जायते, तदेव द्वितीयं लिङ्गज्ञानम्। तदनन्तरं च वह्निव्याप्यधूमवान्पर्वत इति ज्ञानं जायते। तत्तृतीयं लिङ्गज्ञानम्। ततः पर्वतो वह्निमानिति ज्ञानमुत्पद्यते। तदेवानुमित्यात्मकं ज्ञानमित्युच्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुमितेर्विभागः

लैङ्गिकं ज्ञानं द्विविधं—स्वार्थं परार्थं च ।

स्वार्थानुमितिः—यत्र स्वयमेव हेतुसाध्ययोर्व्याप्तिं गृहीत्वा पक्षे हेतुपरामर्शात् पुरुषः साध्यमनुमिनोति तत्र जायमाना स्वार्थानुमितिः, स्वस्य स्वयमेव हेतौ साध्यव्याप्तिं हेतोः पक्षधर्मतां च जानतः पुंसः अर्थः संशयनिवृत्त्यादिलक्षणो ययेति व्युत्पत्तेः ।

परार्थानुमितिः—यत्र स्वयं साध्यमनुमाय परं प्रति पञ्चावयवमनुमानवाक्यं प्रयुज्यते तत्र तादृशानुमानवाक्याज्जायमानाऽनुमितिः परार्थानुमितिः, परस्य वादिप्रतिवादिभ्यां भिन्नस्य मध्यस्थस्य अर्थः प्रयोजनं यया सेति व्युत्पत्तेः । पञ्चावयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि । एतेषां स्वरूपमावश्यकत्वं, भिन्न-भिन्नमतेषु न्यूनाधिकभावश्च पञ्चमपरिच्छेदे (सामग्रीप्रकरणे) निरूपणीयमस्तीति नैतत्सर्वमिह प्रतन्यते ।

अनुमानभेदे विशिष्टाद्वैतिमतम्

विशिष्टाद्वैतिनस्तु ईदृग्विभागस्यानुमानमात्रे स्वीकारेऽर्द्धजरतीयन्यायोद्भावनपुरस्सरं यावत् प्रमाणेषु द्विधा विभागस्यापत्तिं प्रदर्शयन्तोऽनुमानेऽनया रीत्या विभागं नेच्छन्ति ।

ते तु वाक्यप्रतिपादितत्वमात्रेणानुमानस्य परार्थत्वव्यवस्थापने प्रत्यक्षागमयोरपि स्वार्थपरार्थभेदेन विभागप्रसङ्गमुपस्थापयन्तः सर्वेषामनुमानानां स्वार्थत्वमेवेत्यभिप्रयन्ति । तथा चोक्तं—

'तदेतदनुमानं स्वार्थं परार्थं चेति द्विधा विभज्य केचिदाहुः सर्वेषामनुमानानां स्वप्रतिसन्धानादिबलेन प्रवृत्ततया स्वव्यवहारमात्रहेतुत्वमिति स्वार्थानुमानमेवेत्यपरे[1] ।'

अत्र तेषामयमाशयः—परार्थमित्यत्र परस्यार्थः प्रयोजनं यस्येति बहुव्रीहिर्वा परस्यार्थ इति तत्पुरुषो वा स्यात् । उभयथापि परव्याप्त्यादिज्ञानजन्यत्वं परव्यवहारे हेतुत्वं वोक्तं स्यात् । तत्र नाद्यः पक्षो युक्तः स्वव्याप्तिस्मृतिपक्षधर्मताज्ञानबलेन सर्वेषामनुमानानां प्रवर्तमानत्वात् । नापि द्वितीयः, सर्वेषामनुमानानां स्वव्यवहारमात्रे हेतुत्वात् । अत उभयथापि स्वार्थत्वमेव न परार्थत्वमिति ।

उपर्युक्तमतपर्यालोचनम्—तदेतन्न शोभनम् प्रतिभाति, कुत्रचिदनुमाने परव्याप्त्यादिज्ञानप्रयोज्यत्वं कुत्रचिन्नेति प्रतीतेस्सर्वजनानुभवसिद्धत्वात् । परार्थानुमानत्वन्तु न परव्याप्त्यादिज्ञानजन्यत्वमिति नैयायिकवैशेषिकादीनामनुमतमपितु परव्याप्त्यादिज्ञानप्रयोज्यत्वमेव । तथाहि—परं प्रति बुबोधयिषया अन्येन व्याप्त्यादिज्ञानवत्पुरुषेण पञ्चावयववाक्यं प्रयुज्यते । वाक्यादन्यस्य (बुबोधयिषितस्य) व्याप्त्यादिज्ञानं सञ्जायते । अत एव वाक्यप्रयोक्तृपुरुषव्याप्त्यादिज्ञानप्रयोज्यपञ्चावयववाक्यप्रयोज्यापरपुरुषव्याप्त्यादिज्ञानप्रयोज्यत्वमनुमानस्येति परव्याप्त्यादिज्ञानप्रयोज्यत्वमेव परार्थानुमाने ।

---

१. यतीन्द्रमतदीपिकायां द्वितीयावतारे पृ० २० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपर्युक्तविवेचनेन स्वार्थानुमितिपरार्थानुमित्योर्भेदस्तु स्फुट एव, स्वार्थानुमानस्य पञ्चावयववाक्याप्रयोज्यत्वेन परव्याप्त्यादिज्ञानस्य तत्रानुपयोगात् । एवञ्च न्यायावयववाक्यप्रयोज्यत्व-तदप्रयोज्यत्वहेतुदर्शनानन्तरमनेकक्षणविलम्बेन जन्यत्व-तदनन्तरं सद्योभावित्वपुरुषान्तरापेक्षित्व-तदनपेक्षित्वादिनोभयोरनुमानयोर्महद्वैलक्षण्योपलम्भात्तदपलपनं तु प्रतिज्ञामात्रमेव ।

यत्तु परव्यवहारे हेतुत्वं परार्थत्वमुक्तम्, तदप्यनुक्तोपालम्भान्नातिरिच्यते तादृशपरार्थत्वस्य क्वचिदप्याकरग्रन्थेष्वनुपलम्भात् ।

अस्तु वा कण्ठतोऽनुक्तावप्यार्थिकलाभो यथाकथंचित्तदर्थस्य, तथापि 'सर्वेषामनुमानानां स्वव्यवहारमात्रहेतुत्वादि'ति खण्डनमनुक्तोपालम्भनमयुक्तं च तत्रापि परव्यवहारे प्रयोजकत्वाङ्गीकारात् परार्थानुमानस्य च मध्यस्थसंशयनिवृत्तिद्वारा व्यवहारप्रयोजकत्वानपायात् । तदेवोक्तं श्रीगदाधरभट्टाचार्यैः 'अनुमानं परार्थं—विचारदशायां मध्यस्थस्य विवादविषयसाध्यनिश्चयरूपप्रयोजनसाधनमि[1]'ति ।

'अथवा अनुमानम्—अनुमितिः, परार्थं मध्यस्थस्य साध्यसंशयनिवृत्तिरूपप्रयोजनसाधनम्, परस्य प्रतिवादिनोऽर्थो निवृत्तिर्यस्मादिति तादृशानुमितिर्वेति[2]' च । एवञ्च परार्थानुमानस्यापलापः क्रियेत चेत्कथामात्रोच्छेदापत्तिः स्यात् । तस्मात् स्वार्थपरार्थभेदेनानुमितिद्वैविध्यं निष्प्रत्यूहमिति ।

प्रकारान्तरेणानुमानविभागः

पुनश्च प्रकारान्तरेणानुमानं द्विविधम्-दृष्टं, सामान्यतो दृष्टं च । अयञ्च विभागः साध्यानुसारेण । तथाहि—यत्र दृष्टान्तप्रसिद्धसाध्यासाधारणधर्मवत्साध्यस्यैवानुमेयत्वं तद् दृष्टानुमानमित्याख्यायते । तद्यथा—पर्वतो वह्निमान् धूमाद् यो यो धूमवान् स स वह्निमान् यथा महानसमित्यादौ दृष्टान्तप्रसिद्धो वह्निर्वह्नित्वजातीयः । अनुमेयो वह्निरपि वह्नित्वजातीय एव । अत एवेदं दृष्टमनुमानम् । उक्तञ्च प्रशस्तपादाचार्यैः —

"तत्र दृष्टं प्रसिद्धसाध्ययोरत्यन्तजात्यभेदेऽनुमानम् । यथा गव्येव सास्नामात्रमुपलभ्य देशान्तरेऽपि सास्नामात्रदर्शनाद् गवि प्रतिपत्तिः[3] ।"

सामान्यतो दृष्टम्—यत्रैकहेतुनानुमापितौ अनुमेयरूपसाध्यदृष्टान्तगतसाध्यावत्यन्तभिन्नधर्मकौ स्तः, हेतुसामान्येन साध्यसामान्यस्य चानुमितिर्भवति तत्र सामान्यतो दृष्टमनुमानम् । यथा यत्राविगीतशिष्टाचारविषयत्वं तत्र सफलत्वमिति सामान्यव्याप्त्या दृष्टप्रयोजनमनुद्दिश्य प्रवर्तमानाः वर्णाश्रमिणः यत्किञ्चित्प्रयोजनवन्तः अविगीतशिष्टप्रवृत्तिमत्त्वात् प्रयोजनवत्कृषकादिवत् । अत्र कृषकादौ प्रवृत्त्या सह फलानुविधानं दृष्ट्वा वर्णाश्रमिष्वपि यागादिप्रवृत्तिदर्शनेन तत्फलस्यानुमितिर्भवति । कृषकस्य प्रवृत्तेः फलं शस्यादिकं शस्यत्वादिजातीयम्, वणिजश्च प्रवृत्तेः फलं काञ्चनमणिमुक्तादिकं काञ्चनत्वादिजातीयम्, वर्णाश्रमिणां च प्रवृत्तेः फलं स्वर्गादिकं स्वर्गत्वादिजातीयमित्यस्त्यनुमेयरूपसाध्य-

---

१. अनुमानखण्डेऽवयवप्रकरणे पृ० १४६१ ।
२. अनुमानखण्डेऽवयवप्रकरणे पृ० १४६१ ।
३. प्रशस्तपादभाष्यम् पृ० ५०७-५०८ ।

६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृष्टान्तगतसाध्ययोरत्यन्तजातिभेदः । अनुमितिस्तु प्रवृत्तित्वसामान्ये फलवत्त्वसामान्यस्य व्याप्तिसत्त्वाद् भवति । अत एव सामान्येन नियमदर्शनादुत्पन्नत्वादिदं सामान्यतो दृष्टमित्युच्यते ।

दृष्टादिभेदेनानुमानभेदस्य विशेषपर्यालोचनन्तु न्यायशास्त्रानुसारेण ज्ञानविभागे भविष्यतीति नात्र मतान्तराणि विशेषेणालोच्यन्ते तत्रैवालोचयिष्यमाणत्वात् ।

स्मृतिः

लिङ्गदर्शनेच्छानुस्मरणप्रणिधाननिबन्धाभ्यासादिसहकारिसापेक्षात्ममनःसंयोगविशेषाद् दृढाश्यासादरप्रत्ययजनिताच्च संस्कारात् प्रत्यक्षदृष्टेष्वनुमितेषु चार्थेषु स्मृतिरुत्पद्यते ।

अस्याः कारणानां सम्यग्विवेचनन्तु तृतीयप्रकरणे कृतमस्तीति नेह ते पर्यालोच्यन्त इति ।

तदित्येव स्मृतेराकारः, तत्र चार्थस्यातीतत्वपूर्वानुभूतत्वे प्रतीयेत इत्यतीतविषया स्मृतिः । अत एवास्याः करणस्य न प्रमाणत्वम्; तस्याः पूर्वानुभवविषयत्वोपदर्शनेनार्थं निश्चिन्वत्या अर्थपरिच्छेदे पूर्वानुभवपारतन्त्र्यात् । यद्यप्यनुमितिरपि स्वोत्पत्तौ परामर्शाद्यन्यज्ञानान्यपेक्षते तथापि साध्यरूपस्वासाधारणविषयज्ञापनार्थं न किञ्चिदपेक्षत इति तत्करणन्तु पृथक् प्रमाणं भवतीति । तथा चाहुर्मीमांसकाः –

नन्वप्रमाणभूतापि सम्बन्धस्मृतिरिष्यते ।
यथा लिङ्गिगतौ हेतुस्तथा लिङ्गगतिर्भवेत् ॥
तत्र यत्पूर्वविज्ञानं तस्य प्रामाण्यमिष्यते ।
तदुपस्थानमात्रेण स्मृतेस्स्याच्चरितार्थता[1] ॥

अथानर्थजत्वादेव स्मृतेरप्रामाण्यसम्भवे पूर्वज्ञानापेक्षणात्तस्या अप्रामाण्योद्भावनमसङ्गतमिति चेन्न; तथा सति अतीतानागतविषयस्यानुमानस्याप्यप्रामाणिकत्वं प्रसज्ज्येतेति ।

आर्षी

वेदकर्तॄणामृषीणामतीतानागतवर्तमानेष्वतीन्द्रियार्थेषु धर्मदिक्कालप्रभृतिषु आगमादिषु पूर्वं प्रतिपादितेष्वप्रतिपादितेषु चार्थेषु विद्यातपःसमाधिजन्यप्रकृष्टधर्मसहकारेणात्ममनःसंयोगादुत्पद्यमानमिन्द्रियलिङ्गादिसहकारानपेक्षं यत्संशयविपर्ययरहितं ज्ञानं तत्प्रातिभमित्युच्यते । इन्द्रियलिङ्गाद्यनपेक्षोत्पत्तिकं यदर्थप्रतिभानं सा प्रतिभा । प्रतिभैव प्रातिभमिति हि व्युत्पत्तिः । तत्तु प्रायो देवर्षीणामेव भवति । कदाचित्तु भवति लौकिकेष्वपि । यथा — कन्यका ब्रवीति — श्वो मे भ्राताऽऽगन्तेति हृदयं मे कथयतीत्यादौ ।

सिद्धदर्शनस्य विद्यान्तरत्वाक्षेपस्तत्परिहारश्च

केचित्तु दर्शनयोग्यानां स्वरूपवतां पदार्थानां ये द्रष्टारस्ते 'सिद्धा' इत्युच्यन्ते । ते तु सूक्ष्मव्यवहितविप्रकृष्टार्थानामपि द्रष्टारः । तथा चोक्तं योगसूत्रे 'प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टज्ञानम्[2] ।'

१. श्लोकवार्त्तिकेऽनुमानपरिच्छेदे श्लोकौ १५७-१५८ ।
२. योगसूत्रम् । ३।२६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति तेषां ज्ञानमप्यस्ति विद्यान्तरमिति विद्यापञ्चकत्वमाहुः ।

तदसमीचीनम् । तथाहि--दृश्यद्रष्टृणामञ्जनादिसिद्धानां सूक्ष्मव्यवहितविप्रकृष्टार्थानां य इन्द्रियाधीनानुभवस्तत्प्रत्यक्षमेव । तेषामिन्द्रियाणां बलवत्तरत्वमित्यन्यदेतत् । लोकेऽपीन्द्रियेषु शक्तितारतम्यं ज्ञातुं शक्यते । कश्चित्तु पार्श्ववर्तिनमेव पुरुषम् विलम्बेनावगन्तुं शक्नोति, कश्चित्तु दूरस्थमपि झटित्यवगच्छति । यत्तु दिव्यान्तरिक्षभौमप्राणिनां ग्रहसञ्चारादिनिमित्तं धर्माधर्मविपाकदर्शनं सिद्धज्ञानमिष्टं तदपि लैङ्गिकान्नातिरिच्यते ग्रहसञ्चारादीनामेव लिङ्गत्वात् । लिङ्गानपेक्षं धर्मादिषु यद्दर्शनमिष्टं तद्यदीन्द्रियजं तदा प्रत्यक्षम्, यदीन्द्रियानपेक्षं तदा आर्षमेवेति न कथञ्चिदपि विद्यायाः पञ्चमः प्रकारः सम्भवति ।

शाब्दप्रमितेरनुमानेऽन्तर्भावप्रकारः

केचित्त्वस्त्यन्यापि शाब्दी प्रमितिः । तत्करणमप्यतिरिक्तं शब्दाख्यमिति स्वीकुर्वन्ति ।

तदयुक्तम्—यथा व्याप्तिग्रहणबलेनानुमानं प्रवर्त्ततेऽनुमित्याख्यं ज्ञानञ्च जायते तथैव शब्देभ्योऽपीति । भवति ह्यत्र प्रयोगः —शब्दोऽनुमानं व्याप्तिबलेनार्थप्रतिपादकत्वाद्धूमवत्—इति । तथाहि—यथा वह्निधूमयोर्गृहीतव्याप्तिकस्य पुरुषस्य धूमदर्शनानन्तरं यत्र-यत्र धूमस्तत्र-तत्र वह्निरिति व्याप्तिस्मरणानन्तरञ्चानुमित्याख्यं ज्ञानं जायते तथैव शब्दप्रत्यक्षानन्तरं वाच्यवाचकभावस्मरणानन्तरमप्यनुमित्याख्यमेव ज्ञानं जायते ।

ननु व्याप्तिग्रहापूर्वकतया शब्दजबोधस्यानुमित्यात्मताऽभ्युपगमोऽयौक्तिक इति चेन्न शब्दजबोधे व्याप्तिग्रहापूर्वकत्वस्यैवासिद्धेः । यतो हीयं वस्तुस्थितिर्यत्तावद्धि—शब्दो नार्थं प्रतिपादयति यावदर्थाव्यभिचारित्वमस्मिन्नावगम्यते । ज्ञाते त्वव्यभिचारेऽर्थं प्रतिपादयन् धूम इव लिङ्गमेव स्यात् । नन्वनुमाने साध्यधर्मविशिष्टो धर्मी प्रतीयते । नैवं शब्दादर्थप्रतीतौ । अर्थस्तु धर्मी भवितुं नैवार्हति धर्मिणः पर्वतादेः पूर्वमवश्यप्रतीयमानत्वदर्शनादर्थस्यातथात्वात् । नापि शब्दस्य सम्भवति धर्मिता, तदीयधर्मस्यानिरूपणात् । न चार्थवत्त्वमेव धर्मोऽस्तीति वाच्यम्; पर्वतादीनां वह्न्यादिना सह संयोगादिलक्षणसम्बन्धस्येव शब्दस्यार्थेन सह सम्बन्धस्य निरूपयितुमशक्यत्वेन येन सम्बन्धेन शब्दोऽर्थविशिष्टो भवति तस्यैवानुपपत्तेः । न च प्रतिपाद्यप्रतिपादकभावस्यैव द्वयोस्तादृशसम्बन्धं शक्यवचनमितिवाच्यं तस्यार्थप्रतीत्युत्तरकालीनत्वेनार्थप्रतिपादनात्पूर्वं कथमप्यसम्भवात् । किञ्च वह्निधूमयोरिव शब्दार्थयोरविनाभावनियमोऽपि नास्ति, असत्यपि हरिश्चन्द्रे कलौ हरिश्चन्द्रशब्दप्रयोगात्कालिकव्यभिचारसद्भावादसत्यामपि लङ्कायां जम्बूद्वीपे लङ्काशब्दश्रवणाद्दैशिकव्यभिचारस्य जागरूकत्वाच्च । तस्मादनुमानसामग्रीवैलक्षण्याच्छब्दो नानुमानम्, धूमादेर्व्याप्यस्य क्वचिदपि वह्निव्यभिचारादर्शनात् शब्दस्य च स्वार्थव्यभिचारोपलम्भात् । तथाहि—चैत्रकृष्णपक्ष इति शब्दस्य चैत्रशुक्लपक्षाव्यवहितोत्तरत्वावच्छिन्नपक्षरूपकालवाचकत्वं दाक्षिणात्यानाम्, आर्यावर्त्तनिवासिनां तु तस्यैव चैत्रशुक्लपक्षाव्यवहितपूर्वत्वावच्छिन्नपक्षरूपकालवाचकत्वम् । चौर इति च ओदनाभिधानम् दाक्षिणात्यानाम्, आर्यावर्त्तनिवासिनां तु तस्कराभिधानम् । अपि च शाब्दप्रमितेरनुमितित्वे पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वरूपत्रैरूप्यप्रतीत्यनन्तरमेव तादृशप्रमितौ प्रामाण्यनिश्चयः स्यात्, न त्वाप्तोक्तत्वमात्रप्रतीत्यनन्तरम् । तस्माच्छाब्दप्रमितिः व्यतिरिच्यतामनुमितिप्रमितेरिति चेत् । तत्राभिधीयते—न ह्यस्ति सर्वत्रानुमानेऽयं नियमो यत्साधने साध्यस्य देशकालाव्यभिचार आवश्यकः । तथाहि—यदेत्थं पूर्वं संकेतितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवति यदूर्ध्वीकृतायां तर्जन्यां नवसंख्या अवगतव्या। तदनन्तरं तस्यामूर्ध्वीकृतायां तादृशसंकेतमवगच्छतः पुरुषस्य या नवसंख्यानुमितिस्तत्र न संख्याया धर्मित्वं स्वीकर्त्तुमुचितमप्रतीयमानत्वात्। नापि तर्जनीविन्यासस्य तथात्वं तस्य प्रतिपाद्यमाननवसंख्यारूपसाध्येन सह सम्बन्धाभावेन तद्विशिष्टप्रतिपादनासम्भवात्। अनयोरेकदेशकालत्वाभावेऽप्यनुमितिर्भवत्येव। तत्र तर्जनीविन्यासकर्त्तुर्नवसंख्याप्रतिपादनाभिप्रायावगतिमुखेन तस्य नवसंख्याप्रतीतिहेतुत्वमिति चेत्; शब्दादर्थानुमानेऽप्यस्यैव विधेरभ्युपगन्तव्यत्वात्। तथाहि—आदावुच्चारिताद्गोशब्दाद्वक्तुः सास्नादिमदर्थविवक्षावगम्यते स्वव्यवहारे गोशब्दोच्चारणस्य पदार्थविवक्षापूर्वकत्वोपलम्भात्। तदनन्तरं तादृशार्थविवक्षया चार्थानुमानम्। तदित्थम्—पुरुषो धर्मी सास्नादिमदर्थविवक्षावान् गोशब्दोच्चारणकर्तृत्वादहमिवेति। न चार्थासत्त्वेऽप्यनाप्तानां विवक्षोपलब्धेर्न विवक्षातोऽर्थसिद्धिरिति वाच्यम्; तद्दशायां तु शब्दस्य पृथक्प्रामाण्याभ्युपगमेऽपि निस्ताराभावात्, भ्रान्त्या विप्रलम्भधिया वाऽर्थशून्यस्यापि शब्दस्य प्रयोगोपलम्भात्। अथाप्तोक्ताच्छब्दादर्थप्रतीतिरिति चेत्; आप्ताभिप्रायादेवार्थस्यानुमितेस्सम्भवेन तुल्यत्वात्।

यत्तु न वह्निधूमयोरिव शब्दार्थयोरविनाभावनियमः इति दैशिककालिकस्वार्थव्यभिचार उक्तस्तत्रैवं चिन्त्यते—धूमः स्वाभाविकेन संयोगरूपसम्बन्धेन वह्नेर्ज्ञापकः। शब्दस्तु चेष्टावत्पुरुषेच्छाकृतेन संकेतेन प्रवर्तमानो यस्मिन्नर्थे पुरुषेण संकेत्यते तस्यैवार्थस्य विवक्षावगतिद्वारेण ज्ञापकः। अतो यथाऽविच्छिन्नमूलायामूर्ध्वाभिप्रवृत्तायां धूमरेखायामेव वह्नेरव्यभिचारसम्भवस्तथैवाप्तोच्चारितशब्द एवार्थाव्यभिचारसम्भवः। एतेन चैत्रकृष्णपक्षचौरादिशब्देषु दत्तव्यभिचारोऽपि परास्तः, आप्तपुरुषसंकेतविषयताविशिष्टस्यैव शब्दस्यार्थज्ञापकत्वोपगमात्, समानभाषाप्रयोक्तृसमानदेशाचारवत्पुरुषनिष्ठाप्तत्वस्यैवार्थप्रत्यायन उपयोगात्।

अथैवं वक्तृद्वारेण शब्दस्यार्थावबोधकत्वोपगमे वेदवाक्यार्थतात्पर्यानुपपत्तिस्तस्यापौरुषेयत्वेन वक्तुरभावादिति चेत्। न। तस्यापि वक्तुः प्रामाण्यमपेक्ष्यैव प्रत्यायकत्वात्। न च वेदस्य नित्यत्वस्वीकारे वक्तुरभावाद् दोषाणामनवकाशात् सम्भवत्यसन्दिग्धं प्रामाण्यम्, पौरुषेयत्वोपगमे तु तादृशप्रामाण्यमसम्भवि, कदाचित्पुरुषाणां रागद्वेषादिभिरयथार्थस्यापि वाक्यस्य प्रयोगसम्भवादिति वाच्यम्; 'संज्ञा कर्म त्वस्मद्विशिष्टानां लिंगम्'[1]इति सूत्रेणास्मद्विशिष्टस्य वक्तुः परामर्शात्।

अयमत्र विशेषः—प्रामाण्यं तु दोषाभावप्रयुक्तं, न तु नित्यत्वप्रयुक्तं, नित्यत्वे सत्यपि श्रोत्रमनसोरागन्तुकदोषैः क्वचिदप्रामाण्योपलम्भात्। अनित्यत्वेऽपि प्रमुष्टदोषाणां चक्षुरादीनां प्रामाण्यात्। दोषाश्च पुरुषविशेषे नैव सन्तीत्यस्यापि वक्तुं शक्यत्वात्। न हि यथार्थद्रष्टा प्रक्षीणरागद्वेषः कृपामात्रेणोपदेशे प्रवृत्तोऽयथार्थमुपदिशतीति।

उपमितेरन्तर्भावप्रकारः

उपमितिरपि न पृथक्प्रमितिस्तत्करणस्यापृथक्त्वात्। तथाहि—विदितगवयेनाटविकेनाज्ञातगवयं नागरिकं कीदृशो गवय इति पृच्छन्तं प्रति प्रयुक्तं 'यथा गौर्गवयस्तथे'ति गोसारूप्येण गवयप्रतिपादनपरं वाक्यमाप्तवचनमेव, वक्तृप्रामाण्यादेवार्थप्रतीतेः। आप्तवचनस्य त्वनुमानेऽन्तर्भावः पूर्वमेव प्रदर्शितः। तस्मादुपमानमनुमानान्नातिरिच्यते। अत एवोपमित्याख्या प्रमाऽप्यनुमित्यन्तर्भूतैव।

---

१. वैशेषिकसूत्रम् ।२।१।१८।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

केचित्तु मीमांसकैकदेशिनोऽनुभूतगोपिण्डस्य पुंसो वने गवयदर्शनात् स्मृत्यारूढायां गवि 'मदीया गौरनेन सदृशी' इति सारूप्यज्ञानमेवोपमानमिति वदन्ति । तदपि स्मरणमेव । तथाहि—सादृश्यं सामान्यवत् प्रत्येकव्यक्तिसमाप्तं, न संयोगवदुभयत्र व्यासज्य वर्तते—

'सामान्यवच्च सादृश्यमेकैकत्र समाप्यते ।
प्रतियोगिन्यदृष्टेऽपि यस्मात्तदुपलभ्यते ॥',

इत्यभियुक्तवचनात् । तस्माद् गोपिण्डस्यादर्शनेऽपि वने गवयव्यक्तौ गोसदृशोऽयमिति प्रतीत्युत्पादः सूपपन्नः । एवञ्च गवयग्रहणे सत्यसन्निहितगोपिण्डावलम्बिनी सादृश्यप्रतीतिः सदृशदर्शनाभिव्यक्त संस्कारजन्या स्मृतिरेव । तस्मात्सूपपन्नं विद्याचातुर्विध्यमिति ।

अविद्या

अविद्यापि संशयविपर्ययानध्यवसायस्वप्नभेदाच्चतुर्विधा ।

संशयः—अनवस्थितोभयरूपेणोभयविशेषसंस्पर्शी विरुद्धावमर्शः (ज्ञानविशेषः) संशयः ।

यदा कश्चित्पुरुषः प्रतिपन्नोभयसाधारणधर्मः क्वचिदेकत्र धर्मिणि तादृग्धर्ममुपलभते, अधर्मान्निमित्तविशेषात्तस्य धर्मिणो विशेषं नोपलभते, पूर्वप्रतीतयोर्विरुद्धविशेषयोः स्मरणं च करोति । न चोभयोरेकत्र सम्भावयति सद्भावम्, विरुद्धत्वात् । नाप्यभावं, तदविनाभूतस्य साधारणधर्मस्य दर्शनात् । तदाऽस्य साधारणधर्मविषयत्वेनावधारिते धर्मिणि विशेषाविषयत्वेनानवधारणात्मकः प्रत्ययो भवति । स एव संशयः ।

यथा कश्चिज्जनः पुरोऽवस्थिते धर्मिणि ऊर्ध्वत्वं प्रतीत्याधर्मादिनिमित्तविशेषात् धर्मिणो विशेषं स्थाणुत्वपुरुषत्वान्यतररूपं नोपलभते, विरुद्धयोः स्थाणुत्वपुरुषत्वयोः स्मरणञ्च करोति । स्थाणुत्वपुरुषत्वयोरेकत्रोपपत्तेरसम्भवं च प्रतीत्य, ऊर्ध्वत्वधर्मस्य दर्शनादुभयोरभावमप्यसम्भाव्यानवधारणात्मकं स्थाणुर्वा पुरुषो वेति प्रत्ययं धत्ते, सोऽयं प्रत्ययः संशयः ।

अथावधारणात्मकत्वप्रत्ययत्व एकत्र विरुद्धे, प्रत्ययस्य विषयावधारकत्वस्वभावत्वादिति चेन्न; प्रत्ययत्वस्यावधारकत्वानवधारकत्वयोरौदासीन्यात् । अयं हि सामान्यविशिष्टधर्म्युपलम्भेन धर्मविशेषानुपलम्भविरुद्धोभयविशेषस्मरणसहकारिणा जन्यमान इत्यूर्ध्वत्वादिसामान्यविशिष्टं धर्मिणमवधारयन् स्थाणुर्वा पुरुषो वेति विशेषमनवधारयन्ननवधारणात्मकः प्रत्ययश्च स्यात् । विलक्षणसामग्रीसमवधाने विलक्षणकार्योत्पादस्य भूयो दृष्टचरत्वाद् यथा विलक्षणसामग्रीसमवधानात् प्रत्यभिज्ञानमनुभवस्मरणोभयात्मकमिवोत्पद्यते ।

विशिष्टाद्वैतिनस्तु—विरोधो नाम परस्पराभावरूपत्वम् । तच्चैकस्मिन्नेकदा प्रतीयमानयोः कोटयोः कथं ग्राह्यं देशकालस्वरूपभेदसत्त्वे, प्रतियोगितदभावावगाहनस्य प्रतीतिस्वरूपविरुद्धत्वादित्याक्षिप्य भावाभावकोटिद्वयविषयकस्य क्रमिकस्य ज्ञानद्वयस्याङ्गीकारात् स्वरूपभेदेन न कश्चिद्विरोधः । यथा एकमेव डोलाप्रेरणं परस्परोपमर्दकसन्तन्यमानदिग्द्वयसंयोगहेतुत्वे भानं जनयति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथैक एवेन्द्रियसंयोगः परस्परोपमर्दकसन्तन्यमानभावाभावगोचरज्ञानपरम्परां जनयतीति स्वीचक्रुः।

तन्मते चैतन्यस्य बहुविषयैर्युगपददृढसंयोगस्संशयः।

संशयभेदाः

स संशयो द्विविधोऽन्तर्बहिश्च।

अन्तः संशयः—यदा केनचिज्ज्योतिषिणा किञ्चिद् ग्रहसंचारादिनिमित्तमुपलभ्य आदिष्टं किञ्चिदिष्टमनिष्टं वात्राभूद्वर्त्तते भविष्यति चेति। तदनुसारेणैव च तत्तदा संवृत्तम्। अन्यदादिष्टन्तु वितथं सञ्जातम्। पुनस्तदनन्तरं तथाभूतमेव निमित्तं दृष्ट्वा आदिशतोऽन्तःसंशयो भवति स्वज्ञाने यदेतन्मम नैमित्तिकं ज्ञानमभूत्तत्किं सत्यमसत्यं वेति।

बहिः संशयो द्विविधः—प्रत्यक्षविषये चाप्रत्यक्षविषये च।

अप्रत्यक्षविषये—यथाऽरण्ये वाटान्तरितस्य पिण्डस्याप्रत्यक्षस्य सामान्येन विषाणमात्रं प्रथमं दृश्यते। तदनन्तरं गोत्वगवयत्वरूपविशेषयोः स्मरणादधर्माच्च संशयो भवति—वाटान्तरितः प्राणी गौर्वा गवयो वेति। अत्र विषाणमात्रदर्शनानुमितस्य संशयविषयत्वादप्रत्यक्षविषयत्वं संशयस्य।

प्रत्यक्षविषये—स्थाणुपुरुषसम्बन्धिनी योर्ध्वता तन्मात्रस्य प्रत्यक्षविषये पुरोवर्त्तिनि धर्मिणि दर्शने सति, वक्रकोटरादेः स्थाणुधर्मस्य शिरःपाण्यादेश्च पुरुषधर्मस्यानुपलब्धिदशायां स्थाणुत्वपुरुषत्वयोरनभिव्यक्तौ सत्यामुभयोः स्थाणुपुरुषयोः प्रत्येकमुपलब्धानां विशेषाणामनुस्मरणादुभयत्र स्थाणौ पुरुषे च आकृष्यमाणः प्रतिपत्ता यदा स्थाणुरयमिति निश्चेतुमिच्छति तदा पुरुषे समाकृष्यते। यदा च पुरुषं निश्चेतुमिच्छति तदा स्थाणौ समाकृष्यते। एवञ्चोभयत्राकृष्यमाणस्यास्य प्रत्ययो दोलायते—किन्नु खल्वयं स्थाणुः स्यात् पुरुषो वेति। स च नैकत्र नियमेनावतिष्ठते। अत्र प्रत्यक्षविषयीभूतस्य संशयविषयत्वात्प्रत्यक्षविषयोऽयं संशय इति। प्रकारान्तरेणापि संशयः कोटीनां धर्मिणां च भेदाद् बहुविधः।

द्विकोटिको यथा—अयं स्थाणुर्वा पुरुषो वेति संशय इदंविशेष्यकः पुरुषत्वस्थाणुत्वकोटिकः।।

त्रिकोटिको यथा—अहमर्थोऽणुपरिमाणो, मध्यमपरिमाणो, विभुपरिमाणो वा।

चतुष्कोटिको यथा—इमे पदार्थाः सत्याः, असत्याः, सत्यासत्याः, अनिर्वचनीया वेत्यादि।

नन्वेकधर्मिकनानाकोटिकज्ञानत्वरूपस्य संशयलक्षणस्य द्वयोरन्यतरस्य चोरत्वे प्रमाणान्तरप्रतिपन्नेऽयमयं वा चोर इति संशयेऽव्याप्तिस्तस्य नानाधर्मिकचोरत्वरूपैककोटिविषयकत्वादिति चेन्न, तत्र तत्तत्पुरुषधर्मिकसंशयद्वयसमाहारस्यैवाभ्युपगन्तव्यत्वेनाव्याप्तेरभावात्, प्रत्येकसंशयस्य चोरत्वतदभावरूपकोटिद्वयावगाहित्वात्। एकत्वेनैव संशयोऽनुभूयत इति चेत्तदा चोरविषयको देवदत्तत्वयज्ञदत्तत्वकोटिकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संशयोऽभ्युपगन्तव्यः । अथ देवदत्तयज्ञदत्तव्यतिरिक्तस्याचोरत्वेन निर्णीतत्वान्न धर्मित्वं, देवदत्तयज्ञदत्तयोस्तु चोरत्वं न निर्णीतमित्युभयथापि चोरत्वस्य धर्मितावच्छेदकत्वमनुपपन्नमिति चेत् । चोरत्वधर्मिकदेवदत्तनिष्ठत्वयज्ञदत्तनिष्ठत्वरूपकोटिद्वयावगाहिसंशयोपगमेनानुपपत्त्यभावात् । यद्यप्युभयव्यतिरिक्तपुरुषचोरत्वाभावे तयोरन्यतरस्याचोरत्वे तात्पर्यान्निर्णयगर्भत्वम्, तथाप्युभयोरन्यतरविशेषनिर्णयाभावात् तस्मिन्नंशे संशय एव । न च कस्यापि ज्ञानस्य संशयनिश्चयात्मत्वविरोध इति वाच्यम्, संशयमात्रे धर्म्यंशे निश्चयत्वस्य दुस्त्यजत्वात् ।

पुनरपि संशयो द्विविधः —अन्यतरकोटिपरिशेषयोग्य-तदयोग्यभेदात् ।

(१) **अन्यतरकोटिपरिशेषयोग्यसंशयः** —यथा स्थाणुर्वा पुरुषो वेत्यादिसंशयः, तत्रान्यतरकोटिव्याप्यग्राहकप्रमाणेन तत्कोटेः प्रमातुं शक्यत्वात् ।

(२) **तदयोग्यसंशयोः**—यथा पलालकूटे द्विरदो गिरिशिखरं वेत्यादिसंशयः ।

तत्र निरूपकाणां प्रायशः पूर्व एव भवति । तेनैव च प्रवृत्तस्य पाक्षिकोऽर्थलाभः सम्पद्यते । अनिरूपकाणान्त्वपरो यत्रार्थलाभ एव नास्ति । न च पलालकूटे गजत्वगिरिशृङ्गत्वसंशयेन प्रवृत्तस्य कदाचिद् गजलाभोऽपि दृश्यत इति कथमर्थलाभाभावरूपो द्वितीयप्रकारः सम्भवतीति वाच्यम्; यथा शुक्तौ रजतज्ञानेन प्रवृत्तस्य दैवात्तदातनार्थलाभो न विपर्ययमूलकप्रवृत्तिकृतो, यथा च गजार्थमप्रवृत्तस्य गजलाभो दैवकृतः तथैवात्र (पलालकूटस्थले) गजसंशयेन प्रवृत्तस्यापि गजलाभो दैवकृतो न संशयमूलकप्रवृत्तिकृत इत्यभ्युपगमात् ।

पुनरपि संशयविपर्ययौ सामान्यधर्मिणो विशेषाणां चानुभूयमानत्वस्मर्यमाणत्वादिभेदेन वहुविधौ ।

न्यायसूत्रे तु 'समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः[1]' इत्युक्तम् ।

तथा च समानधर्मादिजन्यत्वेनापि संशयस्य विभागः कर्तुं शक्य इति ।

(१) तत्र समानधर्मः साधारणो धर्मस्तज्जनितो यथा ऊर्ध्वत्वाविशेषात् स्थाणुर्वा पुरुषो वेति ।

(२) अनेकधर्म :—असाधारणो धर्मस्तज्जनितो यथा नित्यात्मादिव्यावृत्तानित्यघटादिव्यावृत्तशब्दत्ववान् शब्दो नित्यो न वेति ।

(३) अगृह्यमाणवलतारतम्यविरुद्धानेकज्ञापकोपस्थापनं विप्रतिपत्तिः । सा च सजातीयविजातीयाभासरूपद्वित्रिचतुरादिज्ञापकभेदाद् वहुप्रकारा । एवञ्च द्वयोस्त्रयाणां चतुर्णां पञ्चानामधिकानां वा ज्ञापकानामुपस्थापने तावत्कोटिकाः संशया भवन्तीति—

(क) प्रत्यक्षतदाभासविप्रतिपत्तेस्संशयो यथा किंचिद् वस्तु चक्षुषा सम्मुखं प्रतिभाति दर्पणतले स्पर्शेनान्यथा, तत्र किमिदं सम्मुखं विमुखं वेति ।

(ख) अनुमानतदाभासविप्रतिपत्तेर्यथा—धूमवत्त्वात्पर्वतो वह्निमान्, निरालोकत्वाद्वह्न्यभाववानित्यत्र स वह्निमान्न वेति ।

---

१. न्यायसूत्रम् ॥ १।१।२३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ग) श्रुतिविप्रतिपत्तेर्यथा—'पृथगात्मानं प्रेरयितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति[1]', 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति[2]' इत्यादिभेदप्रतिपादकाभेदप्रतिपादकश्रुतिभ्यां जीवो ब्रह्मभिन्नो न वेत्यादि।

(घ) क्वचित्तु वादिविप्रतिपत्तेर्यथा—इन्द्रियाणां भौतिकत्ववादिवैशेषिकाहंकारिकत्ववादिविशिष्टाद्वैतिसांख्यादिवाक्यश्राविणो मध्यस्थबुद्धेः किमिन्द्रियाणि भौतिकान्याहंकारिकाणि वेति।

(ङ) क्वचित्तु पामरादिवाक्यविप्रतिपत्तेरपि यथा—'नद्यास्तीरे पञ्च फलानि सन्तीति' केनचित्पामरेणोक्ते 'नद्यास्तीरे पञ्फलानि न सन्ती'ति तादृशेनैव केनचिन्निषेधे कृते संशयो भवति नद्यास्तीरे पञ्चफलानि सन्ति न वेत्यादि।

(च) क्वचित्प्रत्यक्षानुमानविप्रतिपत्तेर्यथा—रसनया गुडे तिक्तत्वभ्रमे गुडत्वाच्च मधुरत्वानुमाने किमयं गुडः तिक्तो मधुरो वेति संशयो जायते।

(छ) क्वचित्तु प्रत्यक्षागमविप्रतिपत्तेर्यथा 'अहं कर्त्ता' इति प्रत्यक्षस्य 'अकर्त्ते'त्याद्याम्नायस्य च विप्रतिपत्तेः संशयो भवति किमहमर्थः कर्त्ता न वेति।

(ज) क्वचिदनुमानागमविप्रतिपत्तेर्यथा—कि परमाणूपादनकं जगदुत ब्रह्मोपादानकमिति।

एवं तत्तद्वादिवाक्यविप्रतिपत्तेरधिककोटिसंस्पर्शी अपि भवति। यथा—जीवो ब्रह्मणो भिन्नोऽभिन्नो वा, जगत्परमाणूपादानमुत संविद्विवर्तः, संवित्परिणामो वेत्यादि।

(झ) क्वचित्तु प्रत्यक्षानुमानागमविपत्तिपत्तेर्यथा—प्रत्यक्षतयाऽहमर्थस्य मध्यमपरिमाणत्वेन गृह्यमाणे, जन्मान्तरे पिपीलिकागजादिशरीरप्रवेशानुमानबलेनाणुत्वानुमाने 'दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरम्। अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्त ओम्[3]।' इत्याद्युपनिषदि विभुत्वश्रवणे संशयो भवति किमहमर्थो मध्यमपरिमाणो वाऽणुपरिमाणो वा, विभुपरिमाणो वेति। यत्तु 'केचित् सामानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय, इतिसूत्रे विप्रतिपत्तेरित्यस्य वादिविप्रतिपत्तेरित्यर्थं स्वीकुर्वन्ति, तन्मात्रस्यैव च संशयहेतुत्वमभ्युपगच्छन्ति। तन्न युक्तम्, विरुद्धार्थप्रतिपत्तिजनकत्वस्य विप्रतिपत्तिशब्दार्थस्य प्रत्यक्षादिष्वपि सत्त्वात् तेषामपि सांशयिकत्वानुभवाच्च।

विशिष्टाद्वैतिनस्तु असाधारणधर्मस्य संशयहेतुत्वं नाभ्युपगच्छन्ति[4]

तेषामयमाशयः—'गन्धवत्त्वात् पृथिवी नित्याऽनित्या वेत्यादिं स्थले गन्धवत्त्वं नित्यात्मादिव्यावृत्तमितिकृतकत्वादिवदनित्यत्वं स्मारयति, अनित्यजलादिव्यावृत्तत्वात् निरवयवत्ववन्नित्यत्वं स्मारयति इति विरुद्धविशेषद्वयान्वितसमानधर्मस्येव तदुभयव्यावृत्तासाधारणधर्मस्यापि संशयहेतुत्वमुपपन्नमिति यत्कैश्चिदुच्यते तदयुक्तम्; न हि तत्र गन्धवत्त्वादिना संशयोत्पत्तिरपि तु व्यतिरेकिनिरूपणविलम्बात्

---

१. श्वेताश्वतरोपनिषद् ।१।६।

२. कठोपनिषद् ४।१०, बृहदारण्यकोपनिषद् ।४।४।१६।

३. मुक्तिकोपनिषदि द्वितीयेऽध्याये मंत्रः ७३।

४. न्यायपरिशुद्धौ प्रत्यक्षाध्याये द्वितीयाह्निके पृ० ६२।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रागेव गन्धादिविशिष्टद्रव्यस्य नित्यानित्यसाधारणतया भासमानैर्द्रव्यत्वादिभिरेव तत्रान्यतरकोटिनिर्णिनीषया विशेषकधर्मचिन्तायां तु गन्धवत्त्वमुभयानन्वितत्वादुभयोरप्यनिष्कर्षकमित्येतावदेव चिन्त्यते । गन्धवत्त्वात् पृथिवी नित्या न वेति व्यवहारस्त्वनभिज्ञकृत एव । तत्रापि वस्तुगत्या गन्धवत्त्वं नित्यानित्यत्वयोरन्यतरस्य प्रयोजकं न वेत्येव संदेहाकारः । सोऽपि धर्मत्वादिलक्षणसमानधर्मत्वादेव । न च गन्धवत्त्वस्य नित्यव्यावृत्तत्वेनानित्यस्मारकत्वम् अनित्यव्यावृत्तत्वेन च नित्यस्मारकत्वमितिसाधारणधर्मवदसाधारणधर्मस्यापि कोटिस्मारकत्वेन संशायकत्वमस्तीति वाच्यम्; तत्रानित्यव्यावृत्तधर्मवत्त्वनित्यव्यावृत्तधर्मवत्त्वरुपधर्मद्वयस्यैव नित्यत्वानित्यत्वरूपकोटिद्वयस्मारकतया संशायकत्वात्, गन्धवत्त्वस्य तु तदुभयसम्पादकतया मध्यस्थस्यैव कोटिद्वयस्मारकधर्मोपस्थितिसम्पादकत्वेन संशये प्रयोजकत्वमेव न हेतुत्वम् ।

अथैवं यथा गन्धवत्त्वस्य नित्यानित्यत्वरूपकोट्युपस्थापकानित्यव्यावृत्तत्वनित्यव्यावृत्तत्वरूपधर्मद्वयसम्पादकत्वं तथैव विप्रतिपत्तेरपि वादिपरिगृहीतत्वरूपसाधारणधर्मसम्पादकत्वमेवेति न संशयद्वैविध्यमपीति चेन्न; साधारणधर्मस्येव विप्रतिपत्तेरपि साक्षात्कोट्युपस्थापकत्वेन तस्याः साधारणधर्मोपस्थापकत्वकल्पनायां गौरवात् प्रमाणाभावाच्च । अतस्तत्र विप्रतिपत्तेरेव संशयहेतुत्वम् । गन्धवत्त्वस्य तु न साक्षात्कोटिद्वयोपस्थापकत्वमपितु नित्यानित्यव्यावृत्तत्वरूपकोट्युपस्थापकसम्पादकतया प्रयोजकत्वमेवेति ।

तवेदन्न शोभनम्—एवं सति वह्निमत्त्वादयोगोलकं धूमवन्नवेत्यादौ वह्न्यादिसाधारणधर्मस्यापि संशयं प्रति हेतुत्वं न सिध्येत् तस्यापि धूमसहचरितत्वधूमाभावसहचरितत्वरूपधर्मद्वयद्वारा धूमधूमाभावरूपकोटिद्वयोपस्थापकमात्रत्वेन पूर्वोक्तसंशयं प्रति प्रयोजकमात्रत्वात् । अत एव यथा कोटिद्वयोपस्थापनस्य द्वारत्वं न साधारणधर्मस्य संशयजनकत्वे व्याघातकम् तथैव तत्रासाधारणधर्मस्यापि संशयजनकत्वं व्याहन्ति, 'न हि यदुपजीव्य यत्सिध्यति तत्तद्व्याघातक'[1]मित्यनुमितिग्रन्थे श्रीगदाधरभट्टाचार्यैरुक्तत्वात् । अत एव संस्कारद्वारा स्मृतिहेतुत्वेऽपि नानुभवस्य स्मृतिकारणत्वक्षतिरिति हि तान्त्रिकाणामभ्युपगमः ।

कैश्चिद्विशिष्टाद्वैताचार्यैरसाधारणधर्मस्य संशयहेतुत्वं स्वीकृतम् । उक्तञ्च प्रज्ञापरित्राणे—

'साधारणाकृतेर्दृष्ट्या नैकाकारग्रहस्तथा ।
विपश्चितां विवादाच्च त्रिधा संशय इष्यते[2] ॥' इति ।

विपर्ययः

अतस्मिंस्तदिति प्रत्ययो विपर्ययः । सोऽपि वैशेषिकमते प्रत्यक्षानुमानविषय एव भवति प्रत्यक्षानुमानव्यतिरिक्तस्य प्रमाणस्यानभ्युपगमात् ।

---

१. अनुमितिप्रकरणे स्मृतिसंस्कारकार्यकारणभावे गादाधरी टीका।
२ न्यायपरिशुद्धिद्वितीयाह्निके ६२ पृष्ठ उद्धृतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र प्रत्यक्षविषये पूर्वप्रतीतानेकविशेषयोर्मध्ये पित्तकफानिलादिदोषोपहतेन्द्रियस्याप्रकृष्टप्रकाशस्थितस्यायथार्थालोचनाद् असन्निहितविषयकज्ञानजन्यसंस्कारापेक्षादात्ममनसोस्संयोगादधर्माच्चातस्मिंस्तदिति प्रत्ययो जायते । यथा शुक्तौ रजतमिति । तत्रेयं प्रणाली-शुक्तिशकलसंयुक्तमिन्द्रियं शुक्तित्वमागृहणदपि तं शकलं रजतसादृश्यविशिष्टं गृहणाति, तेन च सादृश्यग्रहणेन रजतविषयकस्संस्कारः प्रबोध्यते । स च प्रवुद्धो रजतस्मृतिजनने प्राप्ते मनोदोषादिन्द्रियसंयुक्तायां शुक्तौ रजतसादृश्यानुरोधादनुभवाकारां रजतप्रतीतिं जनयति । अतो न सर्वस्य सर्वत्रावभासः सादृश्यसंस्कारयोः प्रतिनियमहेतुत्वात् अतएव चेयं गुरुभिरिन्द्रियजा भ्रान्तिरित्युच्यते ।

अत्रायमाशयः—यदीयं भ्रान्तिः संस्कारैकसामर्थ्यादसन्निहितमनधिकरणं रजतमात्रमेव गृह्णीयान्निरुद्धेन्द्रियव्यापारस्य वा भवेत् तदेयमिन्द्रियजा न स्यात् । व्याप्रियमाणे चक्षुषि तत्संयुक्तमेव तु शुक्तिशकलं रजतात्मना गृह्णतीयमनुभूतिरिन्द्रयजैव ।

विपर्ययस्तु विपरीतख्यातिरेव । अतएवान्यस्यान्यारोपेण प्रतिभासनाद् योऽपि निरधिष्ठाने विपर्ययस्तत्राप्यवर्त्तमानोऽर्थः स्वरूपविपरीतेन वर्त्तमानाकारेण प्रतीयत इति तत्रापि विपरीतख्यातिरेव न त्वसत्ख्यातिः, स्वरूपतोऽर्थस्य सम्भवादसतोऽवभासनायोगाच्चेति । यत्र सदृशमर्थमधिष्ठाय विपर्ययः प्रवर्त्तते तत्र सादृश्यं कारणम्, निरधिष्ठाने तु विभ्रमे मनोदोषमात्रानुबन्धिन्यस्यासम्भवात् ।

संस्कारोऽपि सविकल्पकभ्रम एव कारणम् । निर्विकल्पके त्विन्द्रियदोषस्यैव कारणत्वमन्वयव्यतिरेकाभ्यामुपलभ्यते । यथा—शङ्खे पीतत्वप्रकारकज्ञानस्योत्पत्तौ गुडे वा तिक्तत्वप्रकारकज्ञानस्योत्पत्तौ ।

क्वचित्तु प्रत्यक्षत्वाभावेऽपि प्रत्यक्षाभिमानो भवति । तथाहि—गगनावलोकनकुतूहलादूर्ध्वमनुप्रेषिता नयनरश्मयो दूरगमनान्मन्दवेगाः प्रतिमुखैः सूर्यरश्मिभिरतिप्रवलवेगैराहताः प्रतिनिवर्त्तमानाः स्वगोलकस्य गुणं देशान्तरे निरालम्बं नीलिमानमाभासयन्तो मेघरहितनिस्तरङ्गमहोदधिकल्पमम्बरमिति प्रत्यक्षमिव रूपज्ञानमप्रत्यक्षे नभसि जनयन्ति । स्वगोलकगुणं व्योमाधिकरणत्वेनेन्द्रियमाभासयतीत्यत्र तद्गुणानुविधानेन प्रतीतिनियमः प्रमाणम् । कामलदोषदूषितेन्द्रियाधिष्ठानो नरो विद्रुतकलधौतरसविलुप्तमाकाशं पश्यति । कफाधिकतया धवलगोलको रजतसच्छायं पश्यति । यथा वा रात्रौ तमोऽञ्जनपुञ्ज इव श्याममिति ज्ञानं भवति । तत्र तेजोऽभावे सति सर्वत्रारोपितरूपमात्रविषयमप्रत्यक्षमपि प्रत्यक्षमिव भ्रमेणानुभवति ।

अनुमानविषयेऽपि व्याप्तिपक्षतान्यतरस्योभयोर्वा हेतावसत्त्वे, वाधसत्त्वे वा यज्ज्ञानं साध्यस्य, तद्भ्रमः । यथा—नित्यः शब्दोऽस्पर्शवत्त्वादित्यादौ, पर्वतो धूमवान् वह्नेरित्यादौ, परमाणुः सावयवः परमाणुत्वादित्यादौ च व्याप्त्यभावेऽपि साध्यज्ञानम्; यथा वा शशविषाणं तीक्ष्णं विषाणत्वात्, आकाशं रूपवत् चाक्षुषत्वादित्यादौ च पक्षधर्मताभावेऽपि साध्यानुमितिः । यथा वोत्पत्तिकालीने घटे पृथिवीत्वाद् गन्धानुमितिर्बाधसत्त्वे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बौद्धचार्वाकादिशास्त्रेषु य उपदेशस्तत्प्रमाणमिति ज्ञानं शाब्दमिथ्याप्रत्ययः । शरीरेन्द्रियमनः-स्वात्माभिमानोऽपि विपर्ययः तेभ्यो व्यतिरिक्तस्य ज्ञातुः प्रतिपादनात् । धर्माधर्मयोरभावेऽपि सुखदुःखादिवैचित्र्यज्ञानं लौकायतिकानां तच्छिष्याणाञ्च विपर्ययः ।

प्राणिनो न हिंसितव्याः, मलपङ्कादिकमशुचि न धारयितव्यमित्यादिकं हितमुपदिशत्सु वेदवृद्धेषु अहितत्वप्रकारकज्ञानम् शाब्देऽशाब्दत्वमित्याप्रत्ययः, प्राणिहिंसा परो धर्मो मलपङ्कधारणमेव श्रेयस इत्यहितमुपदिशत्सु क्षपणकसंसारमोचकादिषु हितमिति विज्ञानमपि तच्छिष्याणामशाब्दे शाब्दत्वमिथ्याप्रत्ययः ।

विपर्ययस्तु विपरीतख्यातिरेवेति पूर्वोक्तमसहमाना वादिनो विवदन्ते ।

तेषां मतान्यत्र पर्य्यालोच्यन्ते—

अख्यातिवादः

तत्र मीमांसकमनीषिणो गुरवः सांख्याश्चेन्द्रियाणां यथार्थज्ञानजननस्वभावत्वमभ्युपगम्य विपर्ययमपलपन्ते ।

तेषामयमाशयः —इदमिति नयनप्रत्यासन्नशुक्तिकाशकलसाधारणाकारग्रहे नेत्रदोषविशेषाच्च शुक्तित्वादिविभेदकविशेषाग्रहे, शुक्लभास्वरतादिसादृश्यसन्दर्शनसमुद्बुद्धसंस्कारकारणकं रजतगोचरं स्मरणमुपजायते । तच्च गृहीतग्रहणस्वभावमपि मानसदोषविशेषवशात्तत्तांशप्रमोषाद् ग्रहणस्वरूपम-वतिष्ठते । तथा च रजतगोचरस्मरणस्य पुरोवर्त्तिसाधारणाकारग्रहस्य च मिथः स्वरूपतो विषयतश्च विभेदानवभासनात् सम्पूर्णसमीचीनरजतप्रत्ययसारूप्येण 'इदमिति रजतमिति च' भिन्ने अपि ग्रहण-स्मरणे अभेदव्यवहारं सामानाधिकरण्यव्यपदेशञ्च प्रवर्त्तयतः । तदुक्तं—

'सन्निहितरजतशकले रजतमतिर्भवति यादृशी सत्या ।
भेदानध्यवसायादियमपि तादृक् परिस्फुरति ॥
साधारणं हि रूपं तस्या अस्याश्च विद्यते तेन ।
तन्मात्रप्रतिभानात् समानतामेव मन्यन्ते ॥
तत्तुल्यव्यवहारः प्रवृत्तिरपि युज्यते चाऽतः ।
तद्विनिवारणकारणाद्बाधकता बाधकस्याऽपि ॥'[1]

एकत्र भ्रमत्वन्नाम स्वरूपतो विषयतश्चागृहीतविवेकानेकज्ञानत्वम् । अयमेवाख्यातिवाद इत्युच्यते ।

---

१. प्रकरणपञ्चिकायां श्लोकाः । ९३-९५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न चैकेन्द्रियकत्वाद् रजतविज्ञानस्य न स्मरणस्वरूपत्वमिति वाच्यम्; परिशेषेण तस्य सिद्धत्वात् । तथाहि—न तावद्रजतनयनसम्प्रयोगसमुपजातमिदमिति युक्तमक्षाणामतिविप्रकृष्टविषय-सन्निकर्षासम्भवात् । नापि दोषदूषिताक्षसन्निकर्षः शुक्तिशकलमेव कलधौततया बोधयतीति साम्प्रतम्; रजतनिर्भासस्य शुक्तिकालम्बनत्वाभ्युपगमस्यायुक्तत्वात् प्रतीतिविरोधात् । यतो हि यद् यस्मिन् विज्ञानेऽवभासते तत्तदालम्बनम् । न च रजतविज्ञाने शुक्तिकावभासत इति कथमसावस्यालम्बनम् । तद्भासनाभ्युपगमे वा कथं नानुभवविरोधः ।

अपि चेन्द्रियसन्निकर्षस्य समीचीनज्ञानजनकत्वात् समीचीनसंवेदनसाधनादक्षसन्निकर्षादन्यथावभासो न युक्तः तथा सति गोधूमबीजादावपि कदल्यङ्कुरोत्पादप्रसङ्गात् । न च दोषहकारिसमवधान-विशेषात्तथापि भवितुमर्हति यथा दावदग्धबीजानां विपरीतं रम्भाकाण्डारम्भकत्वं दृष्टं यथा वा दशरात्रं कांस्यपात्रोपितघृतस्य मरणकारणत्वं दृष्टं तथा दोषदूषिताक्षादेरपि मिथ्यार्थावभास-जननयोग्यत्वमिति वाच्यम्, दोषाणां कार्योपजननसामर्थ्यविघातमात्रहेतुत्वात् । यथा तैलकलुषितं गोधूमबीजं न विधत्ते विपरीतं कार्यम्, अन्यथा तैलकलुषितगोधूमबीजादपि यवाङ्कुरोत्पत्तिप्रसङ्गात् । अतएव स्वकार्यप्रसवशक्तिप्रतिरोधमात्रमेव दोषकृत्यं न त्वतिशयाधानमित्यास्थेयम् ।

किञ्च विषयव्यभिचारे विज्ञानानां सर्वत्रानाश्वासप्रसङ्गः । प्रतिभासमानाकारस्य च बहिरपलापे विज्ञानाकार एवाश्रितस्स्यात्तथा च महायानिकपक्षः प्रसज्ज्येत । अतः प्रतीतिविरोधानाश्वासासत्ख्याति-प्रसङ्गरूपबाधकेभ्यः शुक्तिशकलस्य रजतात्मनावभासस्वीकारेऽप्यवभासस्यासम्प्रयुक्तरजतगोचर-तैवास्थेया ।

लिङ्गाद्यनुपलम्भावस्थायां जायमानप्रत्ययस्यानुमितित्वन्तु सम्भावयितुमेव न शक्यम् । तथा च सदृशसंदर्शनसमुद्बुद्धसंस्कारकारणोपपत्तेः परिशेषतः स्मरणरूपत्वमेवास्याश्रयणीयम् ।

न केवलं परिशेषादस्य स्मरणरूपत्वमपितु मानान्तरादपि । तथाहि—इदं स्मरणमना-कलितरजतस्य पुरुषस्यानुत्पद्यमानत्वाद् । यद्यदनाकलिते यद्यदर्थेऽनुत्पद्यमानं तत्तदर्थे स्मरणम् यथोभय-वाद्यविवादास्पदं रजतस्मरणम् । न च तत्तांशवैधुर्यात्सम्प्रतिपन्नग्रहणवदिदमस्मरणमिति साम्प्रतम्; घटो नास्तीत्यभावज्ञाने प्रतियोगिस्मरणस्यैव निमित्तत्वात् तेन च तत्ताथाऽनवगाहनात् तत्रैव तत्तांशविधुरत्वस्या-स्मरणत्वव्यभिचारात् । अथ नेह भूतले कुम्भ इत्यत्र प्रतियोगिग्रहणमेवाभावज्ञाननिमित्तं; यत्र च स्मरणस्यैव निमित्तत्वं तत्र पक्षे स घटोऽत्र नास्तीति तत्तांशपरामर्शो भवत्येवातो नानैकान्त्यमिति चेत्, स घटोऽत्र नास्तीतिप्रतीतेरसार्वत्रिकत्वाद् घटस्मरणादपि घटोऽत्र नास्तीतिप्रतीतेरानुभविकतया तत्रोक्त-व्यभिचारस्य दुष्परिहरत्वात् भूयसां च पदात्पदार्थस्मरणानामनुल्लिखिततत्तांशानामुपलम्भाच्च । तथाहि—सम्बन्धग्रहणकाले गृहीतमर्थं शब्दः स्मारयति, अनधिगतेऽर्थे सम्बन्धग्रहणाभावेन तदप्रत्यायक-त्वात् 'पदमभ्यधिकाभावात् स्मारकान्न विशिष्यत' इति वचनात् । तथा च गामानयेत्यादिवाक्येषु पदात् पदार्थस्मृतिरेव । सा च तत्तांशविधुरैवेति तत्रानैकान्त्यं दुर्निवारमिति ।

एवञ्च ग्रहणस्मरणाविवेकनिमित्तत्वमेव व्यवहारस्येत्यकामेनाप्यभ्युपगन्तव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ ग्रहणस्मरणयोर्न व्यवहारप्रयोजकत्वम् पीतः शङ्ख इत्यादौ तदसम्भावदिति चेन्न, अविविक्तज्ञानद्वयस्यैव सर्वत्र प्रयोजकत्वात्। पीतः शङ्ख इत्यादौ तु द्वे ग्रहणे एवागृहीतान्योन्यभेदे अयथाव्यवहारमापादयतस्तथाहि—विनिर्गच्छन्नयनरश्मिवर्त्तिनः पित्तधातोः पीतिमा द्रव्यरहितो गृह्यते। शङ्खोऽपि नयनदोषवशादनाकलितशुक्लगुणः स्वरूपेणावभासते, एवञ्चानयोर्गुणगुणिनोः संसर्गयोग्ययोरसंसर्गाग्रहाद् धर्मस्मरणधर्मिग्रहणयोरिव अद्रव्यपीतस्मरणशङ्खग्रहणयोरपि तत्कार्यकारित्वम् निर्बाधम्।

ननु नेदमिति बाधकस्य प्रसक्तप्रतिषेधरूपतया निषेधान्यथानुपपत्त्या पुरोवर्त्तिनि शुक्त्यादौ रजतत्वग्राहिणो ज्ञानस्य सिद्धिरिति चेन्न भेदाग्रहप्रसञ्जिताभेदव्यवहारबाधनादेव नेदमिति प्रत्ययस्य बाधकताया उपपत्तिसम्भवात्।

न च सर्वप्रत्ययानां यथार्थत्वे भ्रान्तिज्ञानमिदं सम्यग्ज्ञानमिदमिति लोकसिद्धव्यवहारस्यापलापप्रसङ्ग इति शङ्क्यम्, यथार्थत्वेऽपि ज्ञानानां संवादिविसंवादिव्यवहारजनकत्वेन सम्यङ्मिथ्याविभागसिद्धेरप्रत्यूहत्वात्।

तस्मात्—सर्वे विवादास्पदीभूताः प्रत्यया यथार्थाः प्रत्ययत्वात् सम्प्रतिपन्नसमीचीनप्रत्ययवदित्यनुमानं निष्प्रत्यूहमिति।

पर्यालोचनम्

तदिदं केवलं स्वसिद्धान्तश्रद्धाविजृम्भितम्, अख्यातिवादिमीमांसकनये वस्तुस्वरूपातिरेकेणाभावानङ्गीकारात् सर्वभावानां विभेदस्वभावाभ्युपगमात्। स्वयंप्रकाशत्वेन स्फुटतरावभासयोः संविदोस्तदधीनप्रकाशयोश्चार्थयोः विवेकाग्रह इति तु युक्तिपराहतम्, वस्तूनां ग्रहणे भेदस्यापि गृहीतत्वात्, ज्ञानयोर्ग्रहणे भेदस्य सुतरां ग्रहणादिति विज्ञानानां तज्ज्ञेयानां विवेकाग्रहमात्रं विभ्रम इति मतं कपोलकल्पितमेव।

न च स्वरूपावभासेऽपि भेदानवभासः स्यादिति वाच्यम्; भेदस्य वस्तुस्वरूपातिरेकेणानङ्गीकारादवभासमानभावस्वभावत्वाद् वस्तुनोऽवभासो भेदानवभास इत्यवभासानवभासरूपविरुद्धधर्मसंसर्गस्यैकस्मिन्नसम्भवात्। न चेदंरजतरूपसामान्यविशेषयोः संसर्गयोग्ययोर्विवेकाग्रह एव तत्रेति साम्प्रतम्; असंसर्गस्य संसर्गाभावरूपत्वात्तस्य चेदमिति च रजतमिति च भासमानभावमात्रातिरेकिणो दुर्भणत्वात् भूतलातिरेकिणो घटाभावस्येव। तथा च प्रतिभासमानभावभिन्नस्तदसंसर्गो न गृह्यत इति विरुद्धमेव। एवञ्च साधारणाकाराकलितपुरोवर्त्तिनि रजतविभेदकाकारानवभासाद् रजते च स्वरूपतो विवेचकाकारहीने स्मरणविपरिवर्त्तिनि विभेदानवभास इति तु प्रलापमात्रमेव।

सर्वत्र संसर्गव्यवहारस्य व्यवह्रियमाणपदार्थसंसर्गज्ञानपूर्वकत्वमेवास्थेयम्। अन्यथा मध्यमवृद्धव्यवहारेऽप्यसंसर्गाग्रहादेव व्यवहारोपपत्तौ व्युत्पित्सोः संसर्गज्ञानानुमानाभावाच्छाब्दप्रामाण्यभङ्गप्रसङ्गः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथाहि—प्राभाकराः शब्दशक्तिनिश्चयो व्यवहाराद् भवतीत्यभ्युपगच्छन्ति । यथा—गामानयेत्युत्तम-वृद्धवचनश्रवणानन्तरं मध्यमवृद्धस्य गवानयनं दृष्ट्वा व्युत्पित्सुर्बाल इत्थमाकलयति—ज्ञानपूर्विकेयमस्य प्रवृत्तिः स्वतन्त्रप्रवृत्तित्वात् मदीयस्वतन्त्रप्रवृत्तिवदिति । तथैव स्वात्मदृष्टान्तेन प्रवर्त्तकप्रत्यये 'प्रवर्त्तकज्ञानं शब्दपूर्वकं शब्दसमनन्तरभावित्वादि, त्यनुमानेन शब्दस्य शक्तिं गृहणाति । तदनु च प्रयोगान्तरेषु गां बधानाश्वमानयेत्यादिष्वानयनगोशब्दयोरुद्धारे तदर्थयोरप्युद्धारात् प्रक्षेपे च प्रक्षेपदर्शना-दन्वयव्यतिरेकाभ्यां गवादिविशेषार्थेषु पदविशेषस्य शक्तिं गृह्णाति । एवञ्च तत्र संसृष्टव्यवहारस्या-संसर्गाग्रहादेवोपपत्तौ संसृष्टपदार्थविषयकप्राथमिकज्ञानानुदयात् तद्द्वारा सङ्गतिग्रहासम्भवाच्छब्दप्रा-माण्यभङ्गः स्यात् ।

एवं यथा शब्दोऽनित्यश्चाक्षुषत्वाद् घटवदित्याद्यनुमानाभासेषु संसृष्टव्यवहारोऽसंसर्गाग्रहमात्रात् तथैव सदनुमानेष्वप्यसंसर्गाग्रहादेव संसर्गव्यवहारोपपत्तौ सत्यामनुमानोच्छेदप्रसङ्गः ।

अपि च सोऽयं देवदत्त इत्यादिप्रत्यभिज्ञावलेन बौद्धसम्मतक्षणिकत्वं वारयतामास्तिकानां प्रत्यभिज्ञाप्रामाण्यस्याप्युच्छेदप्रसङ्गो, ज्वालैकत्वव्यवहारवत्सर्वत्र प्रत्यभिज्ञायामसंसर्गाग्रहादेव संसर्ग-व्यवहारोपपत्तेः ।

यस्तु रजतज्ञानस्य शुक्तिकालम्बनत्वेऽनुभवविरोध इति बाधकतर्कोऽभिहितस्सोऽप्यसम्यक्, रजताकारायाः प्रतीतेः शुक्तिकालम्बनतानभ्युपगमात् । न हि विपरीतख्यातिवादिभिरपि रजतं शुक्ति-रिति प्रतीतिरुपेयते । तत्सिद्धमेतद् विवादाध्यासितं रजतविज्ञानं पुरोवर्त्तिवस्तुविषयं रजतार्थिनस्तत्र नियमेन प्रवर्त्तकत्वादुभयसम्प्रतिपन्नरजतविज्ञानवदिति ।

यत्पुनरस्य परिशेषात् स्मृतिरूपत्वसाधनम् तदप्ययुक्तम्, दोषदूषितलोचनजन्यत्वादेव परिशेषासिद्धेः । तेनैव च संस्कारमात्रजननत्वायोगेन स्मृतित्वासिद्धेश्च । न च सर्वत्र साक्षात्कारिज्ञाने तज्जनकस्यैव विषयत्वाद्रजतस्य चासम्प्रयुक्तत्वेन विषयत्वमनुपपन्नमिति शङ्क्यम्, प्रत्यभिज्ञायां तत्ताया अपि गोचरत्वात् । न च तत्र तत्तायाः संस्कारोपस्थापितत्वात्संस्कारसहितमिन्द्रियं तत्तां गोचरयतीति न तत्तायाः प्रत्यक्षगोचरत्वमिति वाच्यम्, इदं रजतमित्यादावपि संस्कारोपनीतं रजतं दोषकलुषितेन्द्रियेण विषयीक्रियत इति स्वीकारेऽनुपपत्त्यभावात् ।

यत्तु 'इदं स्मरणमनाकलितरजतस्यानुत्पद्यमानत्वाद्' इत्यनुमानमुपन्यस्तं तदप्यपरोक्षावभासितया स्फुटतरस्मरणभेदोपलम्भात् प्रत्यक्षबाधितम्, रजतबोधाधेयसंस्कारमादायानैकान्तिकतादोषदूषितमपि । न च संवेदनत्वे सतीति विशेषणान्न तद्दोष इति वाच्यम्, रजतास्पदसमीहितसाधनतानुमानेनानैका-न्तिकत्वस्य तादवस्थ्यात्, रजतप्रत्यभिज्ञानेऽप्यनैकान्तिकत्वस्यानुद्धाराच्च । यदपीन्द्रियाणां यथार्थव्यवहार-जनकत्वादभ्रमत्वसाधनम्, तदप्ययुक्तम्; यथाऽख्यातिवादिमते स्वतो ज्ञानानां स्वभावतो यथार्थव्यवहार-जनकत्वेऽपि दोषवशादयथार्थव्यवहारहेतुत्वोपपत्तिस्तथैव दोषदूषितचक्षुरादेस्तत्करणत्वोपपत्तौ बाधकाभावात्, दुष्टाना करणानां विपरीतज्ञानहेतुताया अपि सम्भवात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्तु दोषाणां कार्योपजननसामर्थ्यविघातमात्रहेतुत्वमित्युक्तं तदप्ययुक्तम्; दावदाहस्य वेत्रबीज-विनाशकत्वरूपान्तरजनकत्वोभयस्यापि दृष्टत्वात्, भस्मकदोषदूषितस्य जाठरजातवेदसो बहुतराहार-दाहहेतोरुपलम्भात्, गोभक्षितगोधूमबीजादपि धत्तूराङ्कुरोत्पत्तिदर्शनाच्च।

न च दावदाहादेस्तु वेत्राङ्कुरादावेव दोषता, कदलीकाण्डादौ तु गुणभाव एवेति वाच्यम्, कामलादेः सम्यग्ज्ञाने दूषणत्वेऽपि मिथ्याज्ञाने गुणत्वस्यैव वक्तुं शक्यत्वात्।

यदपि संविदां विषयव्यभिचाराभ्युपगमेऽनाश्वासप्रसङ्गोद्भावनम्, तदप्ययुक्तम्; अख्याति-वादिमतेऽपि घटोऽयमिति बोधोदयेऽपि किमसौ स्मृत्यविवेकरूपः किं वैकानुभवरूप इति संशयावतारस्य दुर्वारत्वात्। येन हि नियामकेन संविदां क्वचिद्विसंवादिव्यवहारजनकत्वेऽपि न सर्वत्र तच्छङ्कया प्रवृत्त्युच्छेदस्तस्यैवान्यथाख्यातिवादेऽपि प्रवृत्त्युच्छेदवारकत्वात्।

यत्तु भेदाग्रहप्रसञ्जिताभेदव्यवहारबाधनाच्च नेदमिति प्रत्ययस्य बाधकतोपपत्त्युपपादनम्, तदप्ययुक्तम्, तथा सति शुक्तौ रजतसंवेदनसमनन्तरमतदर्थिनो विरक्तस्य व्यवहारानुदये नेदं रजतमिति विवेकवेदनस्याबाधकत्वप्रसङ्गात्। तदर्थिनो व्यवहारविच्छेदकत्वं बाधकत्वमित्युच्यमानेऽपि न निस्तारः, यत्र यागाद्यनुष्ठाने चौरादिज्ञानाद्विच्छिन्नोद्योगत्वं तत्र चौरादिज्ञानस्यापीदं रजतमिति प्रत्ययबाधकता-प्रसङ्गात्। न च योग्यताविच्छेद एव बाध इति साम्प्रतम्, तद्विच्छेदे समयान्तरेऽपि तत्र व्यवहारा-भावप्रसङ्गात्। न चापि—योग्यताया यावद्द्रव्यभावितयाऽनुच्छेदात्तत्प्रतिबन्धमात्रं बाधः, स तु सूपपन्नः—इति वक्तुं युक्तम्; सकलकारणसमवधानकालावच्छिन्नत्वे सति कार्यानुत्पादप्रयोजकस्यैव प्रतिबन्धकत्वकल्पनात्। इह च शुक्तिरजतयोर्विवेकग्रहणसमये विवेकाग्रहलक्षणकारणाभावादेव व्यवहाररूपकार्यानुत्पत्तौ योग्यताकल्पनानवकाशात्। नाप्यग्रहणनिवृत्तिर्बाध इति वक्तुं युक्तम्, सर्वेषामपि ज्ञानानां स्वप्रागभावरूपाग्रहणनिवर्त्तकत्वेन (निवृत्तित्वेन वा) ज्ञानमात्रस्य बाधकत्वे (बाधत्वे वा) सिद्धे तेषामभ्रान्तत्वापत्तेः।

योऽपि प्रयोग उपस्थापितः—'यथार्थाः सर्वे विवादास्पदीभूताः प्रत्ययाः प्रत्ययत्वात् समी-चीनप्रत्ययवत्—इति, सोऽप्ययुक्तः; इदंविशेष्यकत्वविशिष्टरजतत्वादिज्ञानस्याभ्युपगमेऽख्यातिवादसिद्धान्त-विरोधात्। अनभ्युपगमे तु पक्षाप्रसिद्धिदोषस्य जागरूकत्वात्। न चायथार्थव्यवहारहेतोरेव प्रत्ययस्य पक्षीकरणान्नदोष इति वाच्यम्; 'सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्ययः' इति न्यायेन सर्वेषामपि भ्रमवादिनां सिद्धसाधनत्वात्। यथार्थस्यापीश्वरज्ञानस्य सर्वव्यवहारहेतुत्वेना-यथार्थव्यवहारं प्रत्यपि हेतुतया नैयायिकानाम्, इदमंशे विषयसत्यत्वाङ्गीकारेण वेदान्तिनाञ्च सिद्धसाधनत्वात्।

तस्मादख्यातिवादोऽयुक्त इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथार्थख्यातिवादिविशिष्टाद्वैतिमतम्

विशिष्टाद्वैतिनस्तु भ्रमस्थले सत्ख्यात्यपरपर्यायां यथार्थख्यातिमभ्युपगच्छन्ति । तदनुसारेण पञ्चीकरणप्रक्रियया आरोपितस्य सद्भावोऽधिष्ठानेऽप्यस्त्येव । प्रमाणाप्रमाणव्यवस्था त्वस्मिन् पक्ष इत्थम्—बाध्यव्यवहारहेतुर्ज्ञानमप्रमाणं भ्रान्तिरिति । अबाध्यव्यवहारहेतुर्ज्ञानम् प्रमाणमभ्रान्तिरिति हि लोके व्यवह्रियते । तत्र कदाचित्पक्षिबुद्बुदादौ प्रवृत्तिविसंवादो विषयापक्रमादिना भवति । यद्यपीदं रजतमित्यादौ इदमंशे रजतांशस्य विद्यमानत्वाज्ज्ञानविषयस्य सत्यत्वमेव तथापि तत्र रजतांशस्य स्वल्पत्वात्तज्ज्ञानं भ्रम इति व्यवह्रियते लोके । शुक्तंचशभूयस्त्वज्ञानाद्भ्रमनिवृत्तिः । मरुमरीचिकायामपि पञ्चीकरणानुरोधेन तोयसद्भावोऽस्त्येव । तत्रेन्द्रियदोषेण तेजःपृथिव्योरग्रहणम् । अदृष्टवशाच्चाम्बुन एव ग्रहणम् । रज्ज्वामपि सर्पांशानां विद्यमानत्वेन विषयस्य सत्यत्वमेव । तदंशानामल्पत्वेन तत्रायं सर्प इति व्यवहारो भ्रमान्यकाले न भवति । अत एव तस्यासत्यत्वम्, न तु विषयासत्यत्वात् । स्वप्नेऽपि रथादीनां सद्भाव एव, तत्तत्पुरुषानुभाव्यतया तत्तत्कालावसानाद्रथादीन् परमपुरुषः सृजतीति 'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजत[१]' इति श्रुत्यावगमात् ।

अत एवातस्मिंस्तद्बुद्ध्यसत्त्वेऽपि, अतज्जातीयभेदाग्रहस्य चाप्रवर्त्तकत्वेऽपि तज्जातीये स्वाभीष्ट-योग्यायोग्यादिनष्टानष्टादिभेदाग्रहात् प्रवृत्ता व्यवहृतिर्विसंवदेतेति अप्रामाण्यव्यवहारोऽस्त्यर्थं घटत एव । शुक्तिलीनं रजतं मरुमरीचिकास्थं जलं चाङ्गुलीयकसेकाद्यनर्हम् । अतस्तदनर्हे तदर्हभेदाग्रहात् प्रवृत्तिर्वितथा भवति । एवं स्वाप्नेष्वपि धनपित्रादिषु जागरदृष्टसरूपेषु तत्तद्भेदाग्रहात् प्रवृत्ता दुराशा मोघा भवति । तदिदमुक्तं तत्त्वमुक्ताकलापे—

> नाथैरुक्ता यथार्था विमतिरपि न्यायतत्त्वे तदेतद्,
> भाष्येऽनूक्तन्तदत्र व्यवहृतिरुभयी बाधिताबाधिताख्या ।
> शुक्तौ रूप्यं प्रभाम्भः श्रुतिनयवशतः स्वाप्नमप्यस्तु सत्यं,
> योग्यायोग्यादिभेदाग्रह इह चरमां गाहते सम्प्रतिष्ठाम्[२] ।। इति ।

तन्मतपर्यालोचनम्

तदेतन्मतं न विचारसहम्—पूर्वं पंचीकरणप्रक्रियया रजतावयवसद्भावाभ्युपगमे नेदं रजतमिति निषेधस्य रजताभावविषयत्वानुपपत्तेः । रजतांशानां बहुत्वनिषेधाभ्युपगमे नेदं रजतमिति सर्वात्मना रजतंनिषेधरूपबाधबुद्धेस्सर्वानुभवसिद्धाया अपलापप्रसङ्गात् । न च नेदं रजतमिति बाधो रजतबह्ववय-वाभावविषय एवेति वाच्यम्; पूर्वं रजतावयवे बहुत्वभानस्यानुभवविरोधेनानङ्गीकारात् । न च पूर्वं बहुत्वासंसर्गाग्रहेणैव व्यवहारोपपत्तौ पश्चाद् बाधोपपत्तिरिति वाच्यम्; सर्वत्र संसर्गज्ञानस्यैव

१. बृहदारण्यकोपनिषद् । ४।३।१० ।
२. तत्त्वमुक्ताकलापस्थबुद्धिसरे कारिका । १० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रवर्तकत्वस्याख्यातिनिरासप्रसङ्गे व्यवस्थापितत्वेनाग्रहस्य व्यवहारप्रवर्त्तकत्वाभावात् । नापि कटकादियोग्यरजताभावो नेदं रजतमितिप्रत्ययविषय इति वक्तुं शक्यम्; शुक्तौ कटकयोग्यत्वस्य पूर्वं ग्रहेऽन्यथाख्यात्यनुप्रवेशात्, अग्रहे तन्निषेधानुपपत्तिप्रसङ्गात् । तत्र कटकादिकार्ययोग्यत्वासंसर्गाग्रहान्निषेध इत्यप्यसाम्प्रतम्; अख्यातिवादस्य दत्तावसरत्वप्रसङ्गात्तद्दिशैवैतदभ्युपगमस्य निरस्तत्वात् ।

किञ्च पञ्चीकरणबलेन सर्वेषां भूतानां सर्वत्र सत्त्वेभ्युपगम्यमानेऽपि पृथिव्यादिकं जलादिना संसृष्टमित्येवायाति, न पुनरेकपार्थिवेऽपरपार्थिवस्यावयवसंस्थानादिविशिष्टरूपेण सत्त्वम्, तद्रूपेण सत्त्वाङ्गीकारे प्रभूतसिकतातोऽपि तैलोपलब्धिप्रसङ्गात् । तथा च रजतस्य तेजस्त्वेन तदंशानां पञ्चीकरणप्रक्रियया शुक्तिकादिरूपपृथिव्यां सत्त्वोपपादनेऽपि रज्जुसर्पादिविभ्रमे गत्यभावः । एकपार्थिवेऽपरपार्थिवस्यावयवसंस्थानादिविशिष्टरूपेण सत्त्वाङ्गीकारे यत्र-कुत्रापि घटादौ पटादिविभ्रमप्रसङ्गात् । सादृश्यं नियामकमिति चेत्; अवयवानां सादृश्यस्य च पश्चादपि सत्त्वे सर्वदैव भ्रमप्रसङ्गात् ।

अपि च रज्ज्वामेव सर्पभ्रमधाराभ्रमभूदलनभ्रमाद्यनेकविधविभ्रमाः सम्भवन्तीति सूक्ष्मरूपेण सर्पधाराभूदलनानामेकत्र स्वीकारापत्तिः स्यात् ।

पञ्चीकरणानुरोधेन सर्वं तदात्मना सर्वत्रास्तीत्यभ्युपगमे सर्वेषां भावकार्यपदार्थानां सर्वत्र तद्रूपेणैव सत्त्वाङ्गीकारे कार्यात्मना परिच्छिन्नत्वाद्यनुभवविरोधात् । नीलं नभ इत्यादौ तु पञ्चीकरणप्रक्रियाशरणागतावपि न निस्तारः, पञ्चीकरणबलेनैकद्रव्यस्यान्यत्र सत्त्वोपपत्तावपि गुणानां पञ्चीकरणस्य कुत्राप्यश्रवणात् ।

यत्तु—'पीतः शङ्ख इत्यादौ नयनवर्तिपित्तद्रव्यसंयुक्ता नायनरश्मयः शङ्खादिभिः सह संयुज्यन्ते । तत्र पीतगतपीतिमाभिभूतः शङ्खगतशुक्लिमा न गृह्यते'—इति यतीन्द्रमतदीपिकायामुक्तं, तदप्ययुक्तम्, पीतिम्नः शुक्लिमभानप्रतिबन्धकत्वकल्पने गौरवात्, नयनगतपीतिमैव शङ्खे भासत इत्यन्यथाख्यात्यभ्युपगम एव लाघवं स्यात् । एतेन 'तिक्तो गुड' इत्यादिप्रत्ययोऽप्यन्यथाख्यातित्वेन व्याख्यातः ।

यदपि तत्रैव—'दिग्भ्रमोऽपि तथैव, दिशि दिगन्तरस्य विद्यमानत्वात्'—इत्युक्तम्, तत्तु स्वोत्तरवर्त्तिना 'अवच्छेदकमन्तरेण दिगिति द्रव्यान्तरानङ्गीकाराच्च'—इति वाक्येनैव परास्तम्; अवधिमपेक्ष्यैव दिशो वक्तव्यत्वेनैककालावच्छेदेनैकदेशस्थित एव प्रमातरि सैव दिक् प्राची भवति सैव च प्रतीच्यपीत्यननुभवात् ।

आत्मख्यातिवादः

आत्मख्यातिवादिनस्तु—ज्ञानाकारस्यैव बहिरवभासो विभ्रम इति वदन्ति ।

तेषामयमाशयः—अत्यन्तासतो गगनकुसुमादेरप्रतिभासमानत्वाद् यद् यथा प्रतिभासते तत्तथैवेत्यभ्युपेयम् । औत्सर्गिकान्यथात्वं तु बलवद्बाधकप्रत्ययोपनिपाताद् भवति । नेदं रजतमिति बाधानुभवस्य चेदन्तामात्रापबाधनादप्युपपत्तौ न रजतगोचरत्वमुचितम । तथा स्वीकारे रजतस्य धर्मिणो धर्मस्य चेदन्त्वस्य बाधे गौरवात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवञ्च प्रतिषिद्धेदंकारास्पदत्वमर्थादान्तरज्ञानरूपमवतिष्ठते ।

न चेदन्त्वनिषेधे देशान्तरेऽपि तत्सत्त्वसम्भवात् कथं ज्ञानरूपत्वमेवेति वाच्यम्; रजतं ज्ञानाकार इन्द्रियसन्निकर्षानधीनापरोक्षत्वात् संवेदनवदित्यनुमानेन तत्सिद्धेः । न च रजतादेर्ज्ञानरूपत्वे भ्रान्तिं विनापि तद्दर्शनप्रसङ्गः; ज्ञानान्यत्वेऽपि पटादिवद् भ्रान्तिं विनापि दर्शनप्रसङ्गस्य तुल्यत्वादिति वदन्ति ।

तत्पर्यालोचनम्

अयमपि वादो न विचारसहः —अत्यन्तासतोऽपि वहिष्ट्वस्याप्रतिभासमानत्वाभावात् ।

यत्तु—'इदन्तामात्रापबाधनादपि बाधोपपत्तौ न तस्य रजतगोचरतोचिता गौरवात्'—इत्युक्तम्; तत्तु निःसारम्, गौरवदोषस्तु तत्कल्पने स्यात् । न चेह रजतापबाधः कल्प्यः 'इदं रजतमि'ति प्रतिपन्नरजतानुवादेन नेदं रजतमिति तदपबाधात्मनो बाधानुभवस्य स्वयं संविदितत्वात् । न च विनिगमनाविरहादिदन्तामात्रापबाध एव किन्न स्यादिति वाच्यम्; तन्मात्रस्यापबाधे रजतस्यान्तरतयावशेषादहं रजतमिति प्रत्ययप्रसङ्गात् ।

इन्द्रियसन्निकर्षानधीनापरोक्षत्वहेतोस्तु अबुद्ध्याकारेऽपि वहिष्ट्वे वर्त्तमानत्वेनानैकान्तिकत्वान्न साधकत्वमिति ।

असत्ख्यातिवादः

माध्वा बौद्धैकदेशिनश्चात्यन्तमसन्तमर्थमवभासयन्ती संविदेव भ्रम इत्यभ्युपगच्छन्ति ।

तेषामयमाशयः —नेदं रजतमिति बाधावबोधवशाद्रजतस्यात्यन्तिकी असत्तैवावभासते । न चासतः शशविषाणवदप्रकाश इति वक्तुं युक्तम्; स्वसामर्थ्यादसतः प्रतिभासासम्भवेऽपि ज्ञानसामर्थ्यात् प्रतिभासोपपत्तेः । शशविषाणवदिति तु साध्यविकल एव दृष्टान्तस्तस्यापि तच्छब्दात्प्रतिभासमानत्वात् ।

अपि चासतश्चेन्न प्रतिभासः कथन्तर्हि बाधानुभवो युज्येत । तत्र हि नेदमित्यसद्रूपमेवावभासते । एवञ्च सम्भवत्येवासतोऽपि स्वरूपेणावभासो न तु सद्रूपेणेत्यपि वक्तुं युक्तम्, यस्मात् सदाकाराकलितस्यैव रजतस्य तत्त्वतोऽसद्रूपता बाधधिया बोध्यते ।

पर्यालोचनम्

अयमप्ययुक्तो वादः । नेदं रजतमित्यभावबोधस्य हट्टस्थरजताभावविषयतया लौकिकपरमार्थरजताभावविषयतया वा बाधकत्वोपपत्तेः 'बाधावबोधादसत्तैवावभातरजतस्यावेद्यत' इत्यस्यासमीचीनत्वात् । ज्ञेयसामर्थ्यमन्तरेणापि ज्ञानसामर्थ्यात्प्रतिभास इत्यप्ययुक्तम्, विकल्पासहत्वात् । तथाहि—यासावसत्प्रकाशनशक्तिर्विज्ञानवर्तिनी तस्याः शक्यस्यैव निरूपणानर्हत्वम् । यद्यसदेव शक्यमित्युच्यते चेत्तदा किमेतत्कार्यमाहो स्विज्ज्ञाप्यम् । न तावत्कार्यम्, असतः कार्यत्वे तज्जननशक्तिरेव विज्ञानस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यान्न प्रकाशनशक्तिः । असङ्गतञ्चैतत् प्रमाणस्य व्यञ्जकत्वेन प्रमेयोत्पादकत्वस्यायुक्तत्वात् । नापि प्रकाश्यं, प्रकाशान्तरानुपलम्भात्, प्रकाश्यमित्यस्य एतज्जनितज्ञानविषय इत्यर्थत्वात्; तथा च यदनया शक्त्या जन्यं ज्ञानं तत्किं ज्ञानान्तरमाश्रयभूतमेव वा । नाद्यः, असज्ज्ञानमन्तरेण द्वितीयज्ञानानुपलब्धेरुपलब्धौ वाऽनवस्थानाच्च । न च भ्रमनिष्ठशक्तेर्न ज्ञानान्तरं शक्यमपि तु स एव भ्रमस्तेन नानवस्थेति वाच्यम्; एकस्यैव जन्यजनकत्वप्रकाश्यप्रकाशकत्वयोर्विरोधात् । तर्हि मास्तु शक्यमित्यपि न वाच्यम्, शक्तेःशक्यनिरूपणाधीनत्वाच्छक्यं विना शक्तेरङ्गीकारायोगात् ।

ननु शक्तिरपि मा भूद् विज्ञानमेवासतः इति चेन्न; असत इति षष्ठ्याः सम्बन्धे वचनीयत्वेन सम्बन्धस्य चात्र दुर्निरूपत्वात् । न चासदधीननिरूपणत्वमसता सतो ज्ञानस्य सम्बन्ध इति वाच्यम्; सर्वोपाख्याहीने निरूपकत्वस्याप्यसम्भवात्, अनुषङ्गमन्तरेण च निरूप्यनिरूपकभावासम्भवात् । तथाहि—गोत्वादयो हि खण्डादिभिरनुषक्ता एव निरूप्यन्ते । न चासतोऽनुषङ्गान्तरमस्तीति कथमिदं तदधीननिरूपणं विज्ञानम् । न चासति प्रत्ययः किञ्चिदाधत्ते येनायं तदीयः स्यादसत आधारत्वानुपपत्तेः ।

अथायमसदनुभव इत्यसता विना नानुभवो निरूप्यत इति तेनाविनाभावः सम्बन्धोऽभ्युपेयत इति चेन्न; अतदुत्पत्तिरतदात्मा चासौ प्रत्ययस्तदविनाभूत इति वक्तुमशक्यत्वात् । तस्मादत्यन्तासतः प्रकाश इत्यनर्थकमेव वचनम् ।

यत्तु शशविषाणदृष्टान्तस्य साध्यविकलत्वमेव, तस्यापि तदभिधानादवभासमानत्वादित्युद्भावितम्; तदप्यसमीचीनम्, विकल्पज्ञानोदयमन्तरेणाप्रकाशमानत्वाद् विकल्पविषयस्य च सर्वथाऽप्रसिद्धेः । तदुक्तं महर्षिणा—'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः[१]' इति । तस्य प्रकाशगोचरत्वेऽपि नापरोक्षप्रतिभासगोचरत्वम् । अतो रजतस्यापरोक्षप्रतिभासगोचरत्वादसच्छशविषाणादि वैलक्षण्यमास्थेयमिति ।

तस्मादसत्ख्यातिवादोऽप्ययुक्तः ।

अन्यथाख्यातिवादस्वरूपम्

पूर्वोक्तरीत्याऽख्यातिवादयथार्थख्यातिवादात्मख्यातिवादासत्ख्यातिवादानामयुक्तत्वाद्वैशेषिका नैयायिकाश्च भ्रमस्थलेऽन्यथाख्यात्यपरपर्यायां विपरीतख्यातिमेवाभ्युपगच्छन्ति ।

तेषामयमाशयः —रजताविवेकनिबन्धनायां पुरोवर्त्तिवस्तुविषयायां प्रवृत्तौ प्रतिषिद्धायां रजतारोपे चावश्याश्रयणीये सति अत्यन्तासतोऽर्थस्य पूर्वोक्तरीत्या प्रतिभासासम्भवात् बाधविरोधाच्चात्यन्तिकसत्ताया अनुपपत्तिः । एवञ्च शुक्तिशकलमेव कामलादिदोषदूषितलोचनालोचितमर्थान्तरं रजतात्मनावभासत इत्यवश्यमेवाङ्गीकरणीयम् ।

१. योगसूत्रम् ।१।९ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न च नेदं रजतमिति बाधावबोधवशाद्रजतस्यात्यन्तिक्यसत्तैवेति वक्तुं युक्तम्; बाधकस्य तादात्म्यमात्रविषयतयोपपन्नत्वेन रजताबाधकत्वेन सन्निहितेदंकारास्पदतादात्म्यमात्रनिषेधकत्वेन चार्थस्यासन्निधेरेवापादकत्वादात्यन्तिक्यसत्ताया अनापादकत्वात् ।

अथ बाधकात्तादात्म्यनिषेध एव नत्वत्यन्तासत्त्वमित्यत्र किं नियामकमिति चेदुच्यते—यथा वामेन न पश्यतीत्यादौ विशेषप्रतिषेधस्य शेषाभ्यनुज्ञापूर्वकत्वं तथैव 'यद्रजतं तदिदं न भवती'ति निषेधस्य विशेषविषयत्वमेव, रजतमात्रनिषेधे न रजतमिति बाधप्रसङ्गः स्यात्, इदन्त्वरूपधर्ममात्रबाधेन बाधकस्योपपत्तौ धर्मिबाधविषयत्वे कल्पनागौरवाच्च।

अथ बाधकस्य तादात्म्यमात्रनिषेधेनोपपत्तौ, परिशेषात्प्रदेशान्तरे सत्त्वेऽभ्युपगम्यमाने तस्य चक्षुःसन्निकर्षाभावादापरोक्ष्यं न स्यादिति चेत् । प्रतिभासमानस्य साकल्येन सन्निकर्षाभावादपरोक्षत्वानुपपत्तिः किं वैकदेशसन्निकर्षाभावाद् ? न तावदाद्यः, प्रत्यभिज्ञानस्याप्यपरोक्षत्वाभावप्रसङ्गात् तत्तांशेऽसन्निकर्षाद् । एकदेशसन्निकर्षाभावस्तु नास्ति, शुक्तिशकलस्यासन्निकृष्टत्वाभावात्, तस्यैवानाकलितनिजाकारस्य नेत्रदोषवशादेव रजताकारेणापरोक्षप्रतिभासगोचरत्वमित्यभ्युपगमाद् । न च तर्हि तावदेव (शुक्तिशकलमेव) प्रतीयेत, न रजतमिति वाच्यम्, तत्तांशवद्रजतस्यापि संस्कारोपस्थापितत्वाद् । न च संस्कारोपस्थापितत्वे तदेवेदं रजतमिति प्रत्ययप्रसङ्गः, स्मृत्युपनीते पदार्थे तत्तांशनियमाभावात् । न च तद्वदेवाभ्रमत्वप्रसङ्गः, दोषादन्यथाभावोपपत्तेः ।

ननु रजतात्मना प्रतिभासगोचरत्वे प्रमाणं किमिति चेदुच्यते—'विवादपदं रजताकारेणावभासते तदर्थिनो नियमेन प्रवृत्तिविषयत्वाद् । यद् यदर्थिनो नियमेन प्रवृत्तिविषयस्तत्तदाकारेणावभासते यथोभयवाद्यविवादास्पदं रजतम्' इत्यनुमानस्य प्रमाणत्वसम्भवात् । इदं रजतमिति चाङ्गुल्या निर्देशदर्शनात्प्रत्यक्षानुभवोऽपि हि प्रमाणम् ।

नेदं रजतमिति च बाधोदयानन्तरमुपजातमेतावन्तं कालं रजतमित्यभादिति प्रत्यभिज्ञानमप्यमुमेवार्थमञ्जसा वेदयति, बाधात्पूर्वमिदमो रजतत्वेनाप्रतिभासे रजतमिदमभादिति प्रत्यभिज्ञा न स्यात् ।

औपनिषदानामन्यथाख्यात्यालोचनप्रकारः

औपनिषदास्तु अन्यथाख्यातावपि दोषमाविष्कुर्वन्ति । तेषामयमाशयः —अन्यथाख्यातिवादे यद्-अत्यन्तासतः प्रतिभासासम्भवाद् बाधधीविरोधाच्च यथावभाससत्तानुपपत्तौ शुक्तिरेवार्थान्तररजताकारेणावभासत इत्यभ्युपगम्यते; तदयुक्तम्, यद्यसतो न प्रतिभासः कथन्तर्हीदंकारास्पदस्य रजतात्मता प्रतिभासेत । नहि रजतस्य स्वरूपेण सतोऽपि अतदात्मनाऽपि सत्ता तात्त्विकी येनैतादृशोऽनुभव उपपद्येत । एवञ्चासत्ख्यात्यनुप्रवेशः । तद्भयात् शुक्तेरिदमात्मना रजतसत्ताङ्गीकारे बाधधियो निरालम्बनतापत्तेः भ्रान्तिबाधयोर्विपर्ययश्च स्यात् । तथाहि—इदं रजतमिति भ्रान्तिरूपस्य प्राचः प्रत्ययस्याप्रामाण्यं; नेदं रजतमिति बाधरूपस्य पराचः प्रत्ययस्य च प्रामाण्यमिति हि स्थितिः । किन्तु तथा रजतसत्ताङ्गीकारे प्राचः प्रत्ययस्य प्रतिभासमानार्थसद्भावात्प्रामाण्यं पराचस्तु तदभावादप्रामाण्यमिति भ्रान्तिबाधविपर्ययः स्फुटः । अथेदमंशरजतांशयोरत्र तादात्म्यस्यासत्त्वेऽप्यन्यत्र सत्त्वान्नासत्ख्यातिप्रसङ्गो गगनकुसुमादेरनेवंभूतत्वादित्यस्ति महद्वैषम्यमसत्ख्यातित इति चेन्न । इदंकारास्पदस्य रजतात्मता किमन्यत्रैव सती उतात्रापि । आद्ये कथं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नात्यन्तासतः प्रतिभासरूपासत्ख्यात्यनुप्रवेशः । उत्तरस्मिंस्तु पूर्ववद् बाधधियो निरालम्बनत्वं भ्रान्तिबाध-विपर्ययौ च स्यातामेव ।

अथ नाभावो नाम भावादन्यः कश्चिदपितु भाव एव भावान्तरात्मनाऽभावः, स्वरूपेण तु भावः । यथोक्तम्—

'भावान्तरमभावोऽन्यो न कश्चिदनिरूपणात्[1] ।' इति । तथा चासतोऽपि सदात्मनोपाख्येयतया युज्येतैवोपालम्भगोचरत्वं न पुनरत्यन्तासतो निरुपाख्यस्येति चेन्न । शुक्ते रजतात्मना सोपाख्यत्वाभावा-दनुभवगोचरतानुपपत्तेः । सोपाख्यत्वाभ्युपगमे तु भ्रमबाधयोरनुपपत्तेः ।

नन्विदंकारास्पदरजतयोरन्योन्याभावात्मनोः सतोस्तदात्मनैव गोचरयंस्तु प्रत्ययः स्यादबाध्यः, परम-न्योन्यात्मना गोचरयन् कथं न विभ्रमः कथं वा न बाध्य इति चेन्न, तादृशी अन्योन्यात्मता किं सत्त्वेन उतासत्त्वेन । नाद्यः, अन्योन्याभावात्मनोरैकात्म्यविरोधाद् बाधानुपपत्तेस्तादवस्थ्याच्च । नान्त्यः, वस्त्वन्तर-मेव हि वस्त्वन्तरस्य (भवन्मते) असत्त्वमास्थीयते । न चारोपितेयमन्योन्यात्मकता वस्त्वन्तरमिति वक्तुं शक्यम् । तथाहि—तदिदंकारास्पदमेव वा, रजतमेव वा, उभयरूपमेव वा, उभयातिरेकिघटादिकमेव वा ? आद्ये इदमित्येव प्रत्ययः स्यान्न पुना रजतमिति । द्वितीये तु स्वर्णकारकूटादावेव रजतमिति स्यान्न पुनरिदमिति, तृतीये तु बाधाद्यनुपपत्तिः । तुरीये तु रजतमिति प्रतिभासो दूरनिरस्तावकाश एव । न चास्ति प्रकारान्तरेणोपाख्येयत्वसम्भवः । तत्सम्भवे वा दुर्निवारमनिर्वाच्यत्वम् ।

असत्ख्यातिभयात्स्वरूपसत्त्वं चेदङ्गीक्रियते तर्हि यत्र शुक्तिशकलादौ प्रतीयते तत्रैव कस्मान्न स्वीक्रियते ।

यत्तु अन्यथाख्यातिवादिभिः शुक्तिशकलमेव कामलादिदोषदूषितलोचनालोचितमर्थान्तररजता-त्मनावभासत इत्युच्यते, तदप्ययुक्तम् । यतो हि अर्थान्तरता नाम सदन्तरत्वम् । तत्तु तत्रैव भवितुं नार्हति बाधाभावप्रसङ्गादन्यथाख्यातिवादिभिरनभ्युपगमात् । अन्यत्रापि भवितुं नार्हति । तथाहि—तत्खल्वनुभवा-द्वाऽन्यत्रव्यवस्थापिताऽनुपपत्तितो वा । अनुभवोऽपि रजतावभासरूपो वा भवेद्, बाधावभासरूपो वा, उत वाऽन्यरूपः । न तावत्प्रथमकल्पे प्रथमः, यतोहि रजतावभासरूपोऽनुभवो हीदंकारास्पदं रजतमावेदयति न त्वसन्निहितां तत्सत्ताम् । नापि तत्र द्वितीयः, बाधावभासो हि रजताभावमाल-मिहावभासयन्ननुभूयते, न पुनरस्यान्यत्रापि सत्ताम् । नापि च तत्र तृतीयः, अन्यः कश्चिदनुभवस्तु अस्यान्यत्र सत्तामावेदयन्नानुभूयते । नापि द्वितीयःकल्पोयुज्यते, अन्यत्र व्यवस्थापितानुपपत्तिरपि किमन्यत्र रजतस्य सत्तां विना रजतावभासानुपपत्तिरूपा, किं वाऽसत्ख्यात्यनुपपत्तिरूपोत वा बाधानुपपत्तिरूपा ? न तावदाद्या, रजतावभासो ह्यवभासमानमेवालम्बनमन्तरेणानुपपन्नो न पुनरनवभासमाना-

---

१. श्लोकवार्तिकनिरालम्बनवादे श्लोकः ।११८ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मप्यन्यत्र सत्तां विना । नापि द्वितीया, रजतस्य पुरोवर्तिनिष्ठत्वमसदेव यथा प्रतीयते रजतमप्यसदेव तथैवावभासेत, न चान्यत्र सत्त्वसिद्धिमपेक्षते तत् । नापि बाधावबोधस्यान्तरेणान्यत्र सत्तामनुपपत्तिः । सा खलु प्रसक्तप्रतिषेधतया प्राप्तिमेव रजतस्यात्राक्षिपेद्; न पुनरन्यदेशादौ, तत्रानुपयोगाद् । तदिदमुक्तं तत्त्वप्रदीपिकायां चित्सुखमुनिभिः —

"यत्र बाध्यते ततोऽन्यत्रास्तीति चेन्न । तत्र प्रमाणानिरूपणात् । तथाहि भ्रान्त्यनुभवस्तत्र-प्रमाणम्, उत बाधानुभवः, किं वा भ्रमानुपपत्तिः ? बाधानुपपत्तिर्वा, असत्ख्यात्यनुपपत्तिर्वा । नाद्यः, तस्य पुरोवर्तिरजतसत्तामात्रगोचरतयाऽसन्निहिततत्सत्तायामौदासीन्यात् । न द्वितीयः, बाधानुभवस्यापि पुरोवर्तिन्यारोपिताभावविषयस्य देशान्तरतत्सत्तानावेदकत्वात् । न तृतीयः, रजतावभासस्य यथा-प्रतीतपुरोवर्तिरजतसत्तां विनाऽनुपपत्तावपि देशान्तरे तदीयसत्तान्तरेणानुपपत्त्यभावात् । न चतुर्थः, बाधस्य प्रतिषेधात्मनस्तत्रैव तत्सत्ताक्षेपकतयाऽन्यत्र तत्सत्तानाक्षेपकत्वात् । न चान्यत्रापि तस्यासत्त्वे तत्रापि कुतो न तस्य बाधः स्यादिति वाच्यम्, तत्र तस्याप्रमवतेरेव बाधाभावोपपत्तौ तत्सत्ताध्यवसायायोगात् । नेदं रजतमिति पुरोवर्तिनि रजततादात्म्यनिषेधात्मबाधानुभवो रज मर्थात् क्वापि परिशिनष्टीति चेत्, न; तथा सति वनस्पत्योरिव विविक्तयोर्द्वयोरप्यत्रैवानन्तरं प्रतीतिप्रसक्तेः । नापि पञ्चमः, असतः संसर्गस्येव रजतस्याप्यसतः ख्यात्युपपत्तेरि[1]"ति । तत्र चतुर्थेऽयं भावः—बाधावबोधस्य हीदमितिप्रतिपन्नरजतानुवादेन तद्रूपमेव आवेदयत उपजायमानत्वात्, न तादात्म्यमात्रनिषेधो; यतो हि प्रसक्तयोर्धर्मिणोस्तादात्म्यमात्रनिषेधस्थले तदुत्तरक्षणे उभयावभासो भवत्येव । नेदं रजतमित्यादि-निषेधानन्तरं तूभयावभासाभावात् स्वरूपापबाध एवाध्यवसीयत इति ।

किञ्च अवभासानुसारेण रजताकारानाश्रयणे परोक्षरजतात्मनैव शुक्तेरवभासे तस्याः परोक्षतया प्रतिभासप्रसङ्गादसम्प्रयुक्तरजतावभासोऽयुक्तः । न च शुक्तिशकलस्य सम्प्रयुक्तत्वात्सत्त्वाच्च नासत्ख्यातिर्नाप्यसम्प्रयुक्तार्थावभासतया पारोक्ष्यप्रसक्तिरितिवाच्यम्, नहि स्वरूपतः सम्प्रयुक्तस्याप्य-सम्प्रयुक्तासदाकारेणावभासोऽसत्ख्यातिमतिशेते । सम्प्रयुक्तस्य तु सतोऽप्यप्रतिभासे सत्यकिंचित्करत्वात् । न च प्रत्यभिज्ञास्थलीयतत्तावद् रजतस्य संस्कारोपस्थापितत्वेन सम्प्रयोगाभावो न दोषमावहतीति वक्तुं युक्तम्; तथा सति प्रत्यभिज्ञानवदेव याथार्थ्यप्रसङ्गाद् । न च दुष्टेन्द्रियसन्निकर्षोपजनितत्वा-दयथार्थत्वं सेत्स्यतीति वाच्यम्; ज्ञानस्य स्वरूपतः सत्यत्वे समीचीनज्ञानवदेव दुष्टेन्द्रियसन्निकर्षोप-जनितत्वायथार्थत्वयोरनुपपत्तेः । अथ तथात्वाभावेऽद्वैतसिद्धान्तेऽपि कथं संशयविपर्ययोर्ज्ञानत्वव्यवहारो भवतीति चेद्; न अनिर्वचनीयाविद्याविवर्तत्वेन तयोर्मायावादे विज्ञानत्वानङ्गीकाराद् । तथा चोक्तम् । 'सदसद्भ्यामनिर्वाच्याऽविद्या वैद्यैः सह भ्रम[2]' इति । ननु तथाविधघटज्ञानान्यपि संशया-दितुल्यानि अनिर्वचनीयत्वादिति चेद् । न । ज्ञानानां स्वरूपसत्यत्वे तुल्यत्वापत्तिसाम्यात् । सत्यत्वेऽपि

१. तत्त्वप्रदीपिकायां प्रथमपरिच्छेदे पृ० १२३-१२४ ।
२. इष्टसिद्धिः कारिका ।९ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दुष्टादुष्टसामग्रीवैषम्येन तद्वैषम्योपगम इव मायाऽविद्याविवर्तत्वेन प्रकृतेऽपि वैषम्योपपत्तेः । तथाहि— यथाऽन्यथाख्यातिवादिमतेऽदुष्टसामग्रीजन्यत्वेन ज्ञानस्य यथार्थत्वम्, दुष्टसामग्रीजन्यत्वेन चायथार्थत्वम्, तथैव मायाविवर्तत्वेन व्यावहारिकत्वमविद्याविवर्तत्वेन च प्रातिभासिकत्वमिति न काऽप्यनुपपत्तिः । किञ्चानिर्वचनीयत्वसाम्येन यथार्थत्वाभावापादने सत्त्वाविशेषेण यथार्थत्वाभावोऽद्वैतिभिरप्युद्भावयितुं शक्य इति तुल्य एव पर्यनुयोगः । घटादिज्ञानानां च तत्त्वावेदनप्रामाण्याभावसाधनेऽद्वैतिनां सिद्धसाधनम् । व्यावहारिकप्रामाण्याभावस्य च साधने कालात्ययापदिष्टत्वञ्च प्रसज्ज्येतेति ।

ननु रजतस्य निषेधादात्यन्तिकमेवासत्त्वमित्यसत्ख्यातिप्रसङ्ग इति चेन्न । रजतस्यानिर्वचनीयताभ्युपगमादसत्त्वस्याप्रसक्तेः ।

यत्तु विवादपदं रजताकारेणावभासते तदर्थिनो नियमेन प्रवृत्तिविषयत्वाद् यदित्थं ततथा यथोभयवाद्यविवादास्पदं रजतमित्यन्यथाख्यातिवादिभिरनुमानप्रयोग उपन्यस्यते, तन्न रजतात्मना प्रतिभाससाधने साध्यवैकल्यं प्रसज्ज्येतेति ।

एतेन बाधोदयसमनन्तरं जायमानं 'एतावन्तं कालमिदं रजतमित्यभाद्' इति प्रत्यभिज्ञाबलेनान्यथाख्यातिसिद्धिरपि दुराशामात्रमित्यायातमस्य प्रत्यभिज्ञानस्याद्वैतमतेऽपि सूपपन्नत्वात्तत्रानिर्वचनीयरजतावभासाभ्युपगमादिति ।

अनिर्वचनीयख्यातिनिरूपणम्

औपनिषदा अभ्युपगच्छन्ति विभ्रमस्थलेऽनिर्वचीयार्थावभासरूपामनिर्वचनीयख्यातिम् । अतस्तैरनिर्वचनीयरजतोत्पत्तिः स्वीक्रियते ।

तत्रानिर्वचनीयत्वं न निर्वचनानर्हत्वं; शुक्तिरूप्यादिविषये मूकीभावप्रसङ्गाद्, अनिर्वचनीयेतिपदेनैव निरुच्यमानत्वेन वदतो व्याघाताच्च । नापि सदसत्प्रकारविलक्षणत्वम् । तथाहि—एकैकप्रकारविलक्षणत्वरूपत्वाभ्युपगमे सत्प्रकारवैलक्षण्येनासतः, असत्प्रकारवैलक्षण्येन च सतोऽनिर्वचनीयतापत्तेः । उभयप्रकारविलक्षणत्वरूपत्वाभ्युपगमेऽपि एकैकस्योभयवैलक्षण्योपपत्तेरनिर्वाच्यत्वापत्तेः । अत एव न सत्त्वासत्त्वोभयरहितत्वरूपं तद्, एकैकस्याप्यनिर्वाच्यत्वापत्तेः । अपि तु—सद्विलक्षणत्वे सत्यसद्विलक्षणत्वे सति सदसद्विलक्षणत्वरूपं वा, सत्त्वासत्त्वाभ्यां विचारासहत्वे सति सदसत्त्वेन विचारासहत्वरूपं वा, सत्त्वरहितत्वे सत्यसत्त्वरहितत्वे सति सदसत्त्वरहितत्वं वा, ज्ञानबाध्यत्वं वाऽनिर्वचनीयत्वमुपगन्तव्यम् ।

न च परस्परविरुद्धयोः सदसत्त्वयोर्निषेधसमुच्चयोऽनुपपन्न एकतरनिषेधस्यान्यतरविधिनान्तरीयकत्वादिति वाच्यम्; निषेधसमुच्चयस्य तात्त्विकत्वानङ्गीकारात् । सत्त्वादितत्तत्प्रतियोगिदुर्निरूपतामात्रप्रकटनाय तद्विलक्षणत्वाभिलापात् । न हि स्वरूपेण सदसत्त्वादिभिर्दुर्निरूपस्य किञ्चिदपि वास्तवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपं सम्भवति । सम्भवे तु तात्त्विकत्वप्रसङ्गात् । न चैकतरनिषेधोऽन्यतरविधिनान्तरीयकोऽनिर्वचनीयतावादिनं प्रत्येतादृशव्याप्तेरसिद्धेः । न चोभयतात्त्विकत्ववदुभयातात्त्विकत्वमप्येकत्र विरुद्धमिति वाच्यम्; पलालकूटादावेकत्र गजत्वगिरिशिखरत्वयोरतात्त्विकत्वदर्शनात् । सत्त्वासत्त्वयोर्न परस्परविरहरूपत्वं किन्तु परस्परविरहव्याप्यत्वमेव । न चैतादृशपारिभाषिकसदसद्वैलक्षण्योक्तावन्येषामिष्टापत्तिरिति वाच्यम्; सत्त्वमबाध्यत्वम्, असत्त्वं सत्त्वेन प्रतीत्यनर्हत्वम्; तदुभयवैलक्षण्यं च जगत्सत्यत्ववादिनां मते जगत्यसम्प्रतिपन्नमितीष्टापत्तेरङ्गीकारासम्भवाद् ।

नन्वेतादृशानिर्वचनीयवस्तु न प्रमाणसिद्धमिति चेन्न; मिथ्यैव रजतमभादिति प्रत्यक्षस्यैव प्रमाणत्वसम्भवात् । न चात्र मिथ्याशब्दोऽसत्पर्याय इति वक्तुं शक्यं, नृशृङ्गादिसाधारणासत्त्वस्य ख्यायमानरूप्यादौ वक्तुमशक्यत्वात् ।

अनुमानमप्येतादृशानिर्वचनीये वस्तुनि प्रमाणम् । तथाहि—विमतं (शुक्तिरूप्यं) सत्त्वरहितत्वे सति असत्त्वरहितत्वे सति सत्त्वासत्त्वरहितं बाध्यत्वाद्दोषप्रयुक्तभानत्वाद्वा । यन्न सत्वरहितत्वे सत्यसत्त्वरहितत्वे सति सत्त्वासत्त्वरहितं, न तद्बाध्यं दोषप्रयुक्तभानविषयो वा, यथा ब्रह्म । न चात्र साध्याप्रसिद्धिः, सत्त्वासत्त्वे समानाधिकरणात्यन्ताभावप्रतियोगिनी धर्मत्वाद्रूपरसवदित्यनुमानेन साध्यप्रसिद्धेः ।

अर्थापत्तिरपि प्रमाणम् । तथाहि-नात्यन्तासतः शशशृङ्गादेरपरोक्षावभासो, नाप्यत्यन्तसतश्चिदात्मनो बाधगोचरता । तदिहोभयान्यथानुपपत्त्योभयविलक्षणता शुक्तिरूप्यादेरावेद्यत इति ।

अत्रेदमवधेयम्-भ्रमस्थले भ्रमकाले बाध्यस्य रजतादेरुत्पत्तिः स्वीक्रियते, तेषां प्रातीतिकत्वेन भ्रमपूर्वमविद्यमानत्वात् । तत्र षट् पदार्था भासमाना भवन्ति—(१) इदम् (२) इदन्त्वसमवायः । (३) रजतम् । (४) रजततादात्म्यम् । (५) रजतत्वस्य समवायः । (६) इदंतादात्म्यम् ।

एतेषु मध्ये प्रथममिदंपदार्थं विहाय पञ्चानामनिर्वचनीयपदार्थानामुत्पत्तिः भ्रमस्थले स्वीक्रियते ।

नन्वनिर्वचनीयख्यातौ रजतत्वादीनामेवोत्पत्तिस्वीकारेण प्रतीतिबाधयोस्सम्भवात् तद्वत उत्पत्तिस्वीकारे गौरवमिति चेन्न । रजतत्वबहुमूल्यत्वाद्यनेकधर्माणामुत्पत्तिकल्पनापेक्षयैकस्य धर्मिण एव कल्पनायां लाघवसम्भवात् । अखण्डरजतत्वादेरुत्पत्तिस्वीकारे तस्य पूर्वमननुभूतत्वेन पूर्वानुभूतरजतत्वादिप्रकारकप्रवृत्त्याद्यनुत्पत्तेः । तथा चेदमादितादात्म्यस्य रजताद्यवच्छेदेनोत्पत्तिः प्रातीतिकभ्रमस्थलेऽपरिहार्यैव ।

अनिर्वचनीयख्यातौ तादात्म्यद्वयोत्पत्तिप्रकारः

अत्रायमभिसन्धिः—इदं रजतमित्यादौ एक एवाकार उल्लिख्यते इति तार्किकादयः । तत्र द्व्याकारतानियम इति त्वौपनिषदः पन्थाः । तथा चोक्तं शारीरकभाष्ये भगवत्पूज्यपादश्रीशङ्कराचार्यैः—

'अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्य[1]'ति ।

---

१. ब्रह्मसूत्रशांकरभाष्यम् ।१।१।१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चपाद्यामपि—'यदि युष्मदर्थस्यैव प्रत्यगात्मन्यध्यासः स्यात् प्रत्यगात्मा न प्रकाशेत[1]' इति ।

संक्षेपशारीरकेऽपि—'इदमर्थवस्त्वपि भवेद्रजते परिकल्पितं रजतवस्त्विदमि ।

रजतभ्रमेऽस्य च परिस्फुरणात् न यदि स्फुरेन्न खलु शुक्तिरिव ।।[2]'

एवञ्चानेन वचनेन—न यदीदमर्थः कल्पितस्तदा भ्रमे न स्फुरेत्, शुक्तित्वविशिष्टवत् । शुक्तित्ववि शिष्टस्येव संसर्गोपहितेदमादेरकल्पितत्वेन बाधकाबाध्यत्वापत्त्या भ्रमाविषयत्वापत्तिः स्यात् ।

तथा चे'दं रजतमि'त्यादौ सर्वत्र भ्रमे द्वयाकारतादर्शनादिदं रजतं नेत्यादिप्रत्ययेन विनिगमका-भावाद् द्वयोरपि बाध्यमानत्वाच्चेदमादिसम्बन्धावच्छेदेन रजतादिसम्बन्धस्य च प्रत्ययेन तदुभयमध्यस्तम् । तत्र रजतादेस्तादात्म्यसम्बन्ध इव स्वरूपमप्यध्यस्तम् । इदमादेस्तु सम्बन्ध एवाध्यस्तो न स्वरूपं 'रजतमिदं 'नेत्यादिबाधेन संसर्गस्यैव बाध्यमानत्वात्, तादृशबाधोत्तरमपि 'एतत्संसृष्टतया रजतं ज्ञात, मित्यङ्गुल्या निर्देशोपलम्भात् ।

किञ्चे'दं रजतमिति यज्ज्ञानं तन्मिथ्ये'ति प्रत्ययेनाकारद्वयसहितधीमिथ्यात्वावगाहनादाकार-द्वयघटकसम्बन्धद्वयमवश्यं मिथ्येति वक्तव्यम् । इदमादेरपि संसृष्टरूपेण भ्रमविषयत्वान्मिथ्यात्वसम्भवाच्च मिथ्यात्वम् । तदेतदुक्तं लघुचन्द्रिकाकारैः—

"ननु एकेनैव तादात्म्येनेदंरजतयोराकारद्वये परस्परं प्रति विशेषणतया भानसम्भवात् तादात्म्यद्वयोत्पत्तौ मानाभाव इति चेन्न । आकारभेदानुपपत्तेः । आकारो हि ज्ञानानां मिथो वैलक्षण्यम् । तच्च विभिन्नविषयत्वरूपं न तु विषयिताविशेषमात्रम् । तथा सति बहिर्विषयमात्रलोपापत्त्या साकारवादापत्तेः[3]" इति ।

'तथा चेदंप्रतियोगिकरजतप्रतियोगिकतादात्म्ययोर्भिन्नयोराकारयोरुत्पत्तिरावश्यिकी[4]' ति च ।

वस्तुतस्तु सर्वभ्रमाणां द्वयाकारता सर्वैर्विचारकैः स्वीकर्त्तव्यैव । तथाहि—विशेष्यतावच्छिन्नं प्रकारत्वं प्रकारतावच्छिन्नं विशेष्यत्वं वेति विनिगमकाभावादाकारद्वयमपि सविकल्पकधीमात्रनिष्ठमस्ति,

---

१. पंचपादिकाविवरणम् ।१।१।१ ।

२. संक्षेपशारीरके ।१।३४ ।

३. अद्वैतसिद्धेर्लघुचन्द्रिकाटीकायां पृ० ३९ ।

४. अद्वैतसिद्धेर्लघुचन्द्रिकाटीकायां पृ० ४० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुव्यवसायादिना तद्ग्रहणात् । तादृशाकारद्वयञ्च प्रकृते 'रजततादात्म्येनेदं साक्षात्करोमि, इदंतादात्म्येन रजतं साक्षात्करोमि,' इत्याकारकम् 'इदं रजतं साक्षात्करोमी'त्यादौ सार्वलोकधीभिर्गृह्यते। रजतप्रकारत्वमिदंविशेष्यत्वञ्च परस्परानवच्छिन्नमिति प्रतिज्ञामात्रेणार्थासिद्धेः । तथा चेदंविषयतायां रजतविषयतावच्छेदकत्वं रजतविषयतायामिदंविषयतावच्छेदकत्वञ्चे'दं रजत' मित्यादिधीषु भाति, 'मूलविशिष्टः संयोगी'त्यादौ संयोगित्वरूपे विधेये उद्देश्यतावच्छेदकीभूतमूलवैशिष्टचस्यावच्छेदकत्वभानवत् 'रजतमि'दमित्यादौ रजतविषयकसाक्षात्कारे इदंतादात्म्यविषयकत्वस्य विधेयत्वेन इदंतादात्म्यविषकत्वस्य रजतविषयतावच्छिन्नत्वलाभात्, 'इदं रजत'मित्यादौ त्विदंविषयकसाक्षात्कारे रजततादात्म्यविषयकत्वस्य विधेयत्वेन तत्र इदंविषयतावच्छिन्नत्वलाभात्, एकविषयतावच्छेदकापरविषयतात्वस्यैव विशेष्यतात्वरूपत्वादिति[1] ।

अतो भ्रमस्थल औपनिषदानामनुमताऽनिर्वचनीयख्यातिस्सर्वाधिकयुक्तिसंगतेति प्रतिभाति ।

अनध्यवसायः

संज्ञाविशेषानवधारणात्मिका प्रतीतिरनध्यवसायः । अयमपि संशयविपर्ययवत् प्रत्यक्षानुमानविषय एव भवति ।

प्रत्यक्षानध्यवसायः —अयन्तु प्रत्यक्षविषये भवति । येऽर्थाः पूर्वं विदितास्तेषु अन्यत्रासक्तचित्तत्वाद्विशेषप्रतीत्यर्थित्वाद्वा किमित्यालोचनात्मकं ज्ञानं प्रत्यक्षानध्यवसायः । यथा गते प्रसिद्धे राजनि कोऽप्यनेन पथा गत इति ज्ञानम् ।

अप्रत्यक्षविषये—त्वपरिज्ञानादेवानध्यवसायो भवति । यथा दक्षिणदेशोद्भूतस्यार्यावर्ते प्राथमिकागमने सति पनसवृक्षदर्शनानन्तरमेतद्द्रव्यं, पार्थिवोऽयं, वृक्षोऽयं, रूपादिमान, शाखादिमांश्चेति सत्त्वद्रव्यत्वपृथिवीत्ववृक्षत्वाद्यपेक्षयाऽध्यवसायो निर्विकल्पकात्मको भवति किन्तु पनसशब्दवाच्योऽयमिति ज्ञानं न भवति । केवलं किमप्यस्य नामधेयं भविष्यतीत्येतावन्मात्रप्रतीतिर्जायते । अतएव संज्ञाविशेषानवधारणात्मकत्वादनध्यवसायोऽयमिति ।

यथा वा—नारिकेलद्वीपे गवाभावात्तत्रत्यो लोकोऽप्रसिद्धगोजातीयः । तदद्वीपीये कस्मिंश्चित्पुरुषे गोमद्देशेष्वार्यावर्तादिष्वागते सति वने सास्नामात्रदर्शनात् सामान्येन पिण्डमनुमाय तत्र जातिविशेषविषयत्वेन को नु खल्वयं प्राणी स्यादित्यनवधारणात्मकं ज्ञानमनध्यवसायः ।

तत्र विशिष्टाद्वैतिमतम्

विशिष्टाद्वैतिनस्तु—अनध्यवसायस्यैककोटिकसंशयत्वमभ्युपगम्य तस्य पृथग्विभागं प्रतिक्षिपन्ति । उक्तञ्च वेदान्तदेशिकेन—

---

१. अद्वैतसिद्धेर्लघुचन्द्रिकायां प्रथममिथ्यात्वनिरूपणे विस्तरेण विवेचितमिदम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'किं संज्ञकोऽयं वृक्ष इत्येवमादिरूपोऽनध्यवसायो नामान्यो ज्ञानविशेष इति केचित् । तदसारम् । तस्य संज्ञादिविशेषसन्देहसमनन्तरभावितद्विशेषबुभुत्सात्मकत्वात्[1]' इति ।

तत्पर्यालोचनम्

तदेतन्न विचारसहम् अनध्यवसायस्य स्वरूपतः कारणतश्च संशयाद्भिन्नत्वात् । तथाहि—परस्परोपमर्दकसन्तन्यमानभावाभावगोचरज्ञानपरम्परारूपत्वं संशयस्याभ्युपगच्छन्ति ते (विशिष्टाद्वैतिनः) । अत एतल्लक्षणानाक्रान्तत्वात्सुतरामेवैतस्य संशयात्पृथक्त्वम् । संशये कोटिभानमावश्यकं, नैतदनध्यवसाये । कारणभेदोऽपि सुतरां सिद्ध एव, संशयस्योभयविशेषानुस्मरणोत्तरभावित्वादनध्यवसायस्य चातथात्वात् । अनध्यवसितपदार्थानामसाधारणधर्माणामज्ञानदशायामपि भवत्यनध्यवसायः । न त्वेवं संशये, तन्नानवस्थितोभयकोटिसंस्पर्शस्य सत्त्वात् ।

अपि च संशयेऽन्यतरकोटिव्याप्यस्यादर्शनं कारणम् 'विशेषापेक्षो विमर्शः संशयः' इति वचनात् । अनध्यवसाये तु वस्तुनो विस्पष्टतया भानसत्त्वेन न विशेषापेक्षेति महान् भेदो जागर्ति ।

यत्तु बुभुत्सात्मकत्वमुक्तम्, तदप्यनुभवविरुद्धम् उपेक्षायां सत्यामपि अनध्यवसायात्मकज्ञानोत्पत्तिदर्शनात् 'भविष्यत्ययं कश्चित्प्राणी, तेनास्माकं किमुपचीयतेऽपचीयते वे'त्याकारकप्रत्ययदशायामप्यनध्यवसायस्य जागरूकत्वात् ।

तस्मादनध्यवसायस्य संशयात्पृथक्त्वं निष्प्रत्यूहमिति ।

स्वाप्नम्

यदा अहनि गमनागमनतः परिश्रान्तस्य प्राणिनो रात्रौ श्रमोपशमनार्थं भुक्तपीताहारस्य रसादिभावेन परिणामार्थञ्चादृष्टकारितप्रयत्नापेक्षादात्मान्तःकरणसंयोगान्मनसि जायमानात् क्रियाप्रबन्धात् बाह्येन्द्रियसम्बन्धशून्य आत्मप्रदेशे निश्चलं मनस्तिष्ठति तदा स प्राणी प्रलीनमनस्कसंज्ञको भवति । प्रलीने च तस्मिन् मनस्युपरतेन्द्रियग्रामो भवति, अन्तःकरणानधिष्ठितानामिन्द्रियाणां विषयग्रहणाभावात् । तस्यामवस्थायां बाहुल्येन प्राणापानवायुसन्तानर्निगमप्रवेशलक्षणायां प्रवृत्तौ सम्भवन्त्यामात्ममनःसंयोगात् स्वापाख्यात् संस्काराच्च पूर्वानुभूतविषयाद्देशकालव्यवहितेषु विषयेषु इन्द्रियद्वारेण यत्पूर्वाधिगमानपेक्षं मनोमात्रप्रभवमपरोक्षसंवेदनाकारमनुभवनं तत्स्वाप्नज्ञानमित्युच्यते ।

तत्त्रिविधम्—(१) संस्कारपाटवाद् । (२) धातुदोषाद् । (३) अदृष्टाच्च ।

(१) संस्कारपाटवाद्—यदा कामी क्रुद्धो वा यमर्थमनुमन्यमानश्चिन्तयन् स्वपिति तदा सैव स्मृतिसन्ततिः संस्कारातिशयात् साक्षादर्थविभासिनी सञ्जायते । एतत्तु संस्कारपाटवात् स्वाप्नज्ञानम् ।

१, न्यायपरिशुद्धौ प्रत्यक्षाध्यायद्वितीयाह्निके ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(२) धातुदोषाद्—वसासृङ्मांसमेदोमज्जास्थिशुक्रात्मानः शरीरधारणाद् धातव इत्युच्यन्ते । तेषां वातादिदोषदूषितावस्थायां विपर्ययो भवति । तथाहि—वातप्रकृतिः, कुतश्चिन्निमित्तेनोपचितेन वातेन दूषितो वा स्वस्याकाशगमनमितस्ततो धावनादिकं पश्यति । पित्तप्रकृतिः, पित्तदूषितो वा अग्निप्रवेशकनकपर्वताभ्युदितार्कमण्डलादिकं पश्यति । श्लेष्मप्रकृतिः, श्लेष्मदूषितो वा सरित्समुद्र-प्रतरणहिमपर्वतादीन् पश्यति ।

(३) अदृष्टात्—स्वयमनुभूतेषु परत्राप्रसिद्धेषु, स्वयमननुभूतेषु वा परत्र प्रसिद्धेषु सत्सु यद्गजारोहणच्छत्रलाभादिकं शुभावेदकं स्वप्ने दृश्यते तत्सर्वं संस्कारधर्माभ्यां भवति । तद्विपरीतं तैलाभ्यञ्जनखरोष्ट्रारोहणादिकमधर्मसंस्काराभ्यां भवति ।

अत्यन्ताप्रसिद्धेषु स्वतः परतश्चाप्रतीतेषु चन्द्रादित्यभक्षणादिषु ज्ञानन्तु तददृष्टादेव भवति, अननुभूतेषु संस्काराभावात् ।

यद्यपि स्वाप्नप्रत्ययस्य संस्कारपाटवाद्धातुदोषाददृष्टाद्वा समारोपितबाह्यस्वरूपत्वेन अतस्मिंस्तत्प्रकारकत्वाद्विपर्ययान्तःपातित्वमेव, तथाप्यन्यविपर्ययेभ्योऽवस्थाविशेषभावित्वाद् विपर्यया-त्पृथक्त्वेन वैशेषिकाचार्यैरुक्तम् ।

अविद्यान्तराणामपि सत्त्वाक्षेपपरिहाराः

स्वप्नान्तिकस्यापृथक्त्वनिरूपणम्—अथावस्थाविशेषभावित्वेन स्वाप्नस्य विपर्ययात् पृथग्गणने स्वप्नान्तिकस्यापि पृथक्स्वीकारापत्तिस्तस्य स्वप्नदृष्टार्थानां स्वप्नावस्थायामेव प्रतिसन्धानरूपत्वात् 'अयं मया दृष्ट' इति पूर्वानुभूतस्य स्वप्नस्यान्तेऽवसाने भवतीति व्युत्पत्तेरिति चेन्न; पूर्वानुभूतस्यैव स्वाप्नज्ञानप्रबन्धस्यानुसन्धानात्तस्य स्मृत्यन्तर्भूतत्वादिति ।

तर्कस्यापृथक्त्वनिरूपणम्

अथैवमप्यविद्यायाश्चातुर्विध्यानुपपत्तिरेव रूढस्य तर्कज्ञानस्यापि सम्भवेन पञ्चमप्रकारस्यापि सम्भवात् । अनुभूयतेऽन्तरा संशयं निर्णयञ्च तर्कः । तथाहि—उत्पत्तिधर्मक आत्मेत्येके (चार्वाका) वदन्ति । अनुत्पत्तिधर्मक इत्यपरे (आस्तिका) आमनन्ति । ततो विप्रतिपत्तेस्संशयो भवति—किं स्विदयमुत्पत्तिधर्मक, आहो स्विदनुत्पत्तिधर्मको वा । एतादृशसंशयानन्तरं विचारात्मकस्य तर्कस्य प्रवृत्तिः, यद्ययमुत्पत्तिधर्मकः स्यात्तदाऽस्यानेकशरीरादिसंयोगरूपसंसारस्तदत्यन्तविमोक्षरूपश्चापवर्गो न घटताम् । अनुत्पत्तिधर्मकत्वे तु संसारापवर्गावुपपद्येतामित्यनुत्पत्तिधर्मकत्वमेवास्येति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्य सम्भावनात्मकप्रत्ययस्य प्रयोजनन्तु तत्त्वज्ञानमेव, वस्तुद्वैरूप्यस्यासम्भवात् प्रतिपक्ष-निश्चयवत्प्रतिपक्षसंशयस्यापि प्रवृत्तिव्याघातकरत्वात्। तथा चोक्तम्—

'यावच्चाव्यतिरेकित्वं शतांशेनापि शंक्यते।
विपक्षस्य कुतस्तावद्धेतोर्गमनिकाबलम्[1]॥' इति।

अत एव तर्कप्रयोक्ता पुरुषः प्रथमं तूत्पत्तिधर्मकत्वं व्युदस्यानुत्पत्तिधर्मकत्वं विषये विवेचयति। विवेचने च जाते सत्प्रतिपक्षाप्रसरादनुमानम् प्रवर्त्तत इति विषयविवेचनद्वारेण प्रमाणानुग्राहकतया तर्कस्तत्त्वज्ञानाय घटते, प्रमाणस्य करणत्वेनेतिकर्त्तव्यतास्थानीय (व्यापारस्थानीय) तर्कसहायस्यैव स्वकार्ये प्रवर्त्तमानत्वात्। अनपेक्षितदृढमुष्टिनिपीडितस्य जालमकरपञ्जरोदरे विलुण्ठतोऽपि कठोरधारस्य कुठारस्य निष्ठुरकाष्ठोच्छेदेऽसामर्थ्यदर्शनात्तथा चोक्तमभियुक्तैः :—

'न हि तत्करणं लोके वेदे वा किञ्चिदीदृशम्।
इतिकर्त्तव्यतासाध्ये यस्य नानुग्रहेऽर्थिता[2]॥' इति।

किञ्च तर्कस्यास्वीकारे परस्यानिष्टापादनात्मकप्रसङ्गरूपदोषस्याप्यभ्युपगमविरोधः स्यात्तस्य तर्कादनतिरिच्यमानात्मत्वादिति। तस्मात्तर्कोऽतिरिच्यते।

तत्राभिधीयते—किं परपक्षाभावप्रतीतिरूपस्तर्कः स्वपक्षसम्भावनारूपो वा। आद्ये पक्षे त्वस्य प्रमाणत्वमेव, ज्ञातुरनित्यत्वे संसारापवर्गयोरसम्भव इति ज्ञानस्याप्रमाणत्वे ततो विपक्षाभावासिद्धेर-प्रमाणेन कस्यचिदर्थस्य सिद्धेरनुपपत्तेरस्य प्रवृत्तिहेतुत्वायोगात् विषयविवेकाभावप्रसङ्गात्। तथा चास्माद्विपक्षाभावस्सिद्धयति चेत् प्रमाणमिदं प्रत्यक्षादिषु मध्ये कस्मिंश्चिदन्तर्भविष्यति, तद्व्यतिरेकेणास्य प्रतीतिसाधनाभावात्।

प्रसङ्गस्यापि विरोधोद्भावनरूपत्वेन कस्यचिद्बलीयसो विपरीतप्रमाणस्योपदर्शनरूपत्वमेव। अत एव विपरीतात् प्रमाणात् तदुपदर्शकाच्च वचनान्नान्यस्तर्क इति।

द्वितीयपक्षाभ्युपगमे तु अस्य कारणानुपपत्तिः। तथाहि—स्वपक्षसाधकं प्रमाणं नैव भवितुमर्हति, तर्केण विवेचिते विषये स्वपक्षसाधकस्य प्रमाणस्य प्रवर्त्तनात्, तस्यैव प्रमाणस्य तर्ककारणत्वेऽन्योन्याश्रयात्।

---

१. न्यायकुसुमाञ्जलेः ।३।७। श्लोकव्याख्याने हरिदासीटीकायामुद्धृतः श्लोकः।

२. श्लोकवार्त्तिके सम्बन्धाक्षेपवादे श्लोकः ।३७।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नापि विपक्षाभावप्रतीतिरस्य कारणं भवितुमर्हति, विपक्षाभावे प्रतीते स्वपक्षसम्भावनाजननादिति वाच्यम् एवं सति परस्परविरुद्धयोरेकप्रतिषेधस्येतरविधिनान्तरीयकत्वादस्य विपक्षाभावलिङ्गकानुमानत्वमेव ।

नन्वनुमितौ तु प्रमाता विषयमवधारयत्येवमेवेदमिति, तर्के तु केवलमनुजानाति एकतरं धर्ममित्यस्त्येव महान्भेदोऽनुमानात् । अयं संशयस्तु भवितुं नार्हत्युभयकोटिसंस्पर्शाभावात् । किन्त्वयं संशयात्प्रच्युतो निर्णयं चाप्राप्तः सम्भावनाप्रत्ययो विलक्षण एव । श्रूयते हि लोके—'एवमहं तर्कयामी'ति । एवञ्च तर्कयामीत्यनुव्यवसायसिद्धो विलक्षण एव प्रत्ययस्तर्क इति चेन्न । योग्यतावधारणाद्यत्र विपक्षाभावस्तत्रान्यतरपक्षोपपत्तिः, यत्र तु योग्यतासम्भवमात्रं तत्रोपपत्त्यभाव इत्यन्वयव्यतिरेकदर्शी विपक्षाभावं प्रतिपद्यमानः पुरुषो'ऽयमनुत्पत्तिधर्मको भविष्यती'त्यस्मिन्नर्थे प्रमाणं सम्भावयति यद्—'एतत्प्रतिपादनाय योग्योऽयमर्थ'-इति । एवञ्चात्र प्रमाता प्रमाणयोग्यतां विषयस्याध्यवस्यतीत्यनुमानत्वमेव तस्य पर्यवसितम् । उक्तरीत्यैवानुगृह्णाति तर्कः प्रमाणम्, योग्यताप्रतीतेः प्रमाणप्रवृत्तिहेतुत्वात् । अन्यथा त्विदं सम्भावनामात्रमनर्थकमेव स्यात्, स्वयमप्रमाणस्य सिद्ध्युपलम्भयोरनङ्गत्वाद्विषयविवेकस्य तु विपक्षाभावप्रतिपादनपरबाधकप्रमाणेनैव सिद्धत्वादिति ।

केचित्तु संशयप्रभेद एव तर्कोऽनवधारणात्मकत्वादित्यभ्युपगच्छन्तीति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[द्वितीयखण्डः]

नैयायिकपद्धत्या सांख्ययोगपद्धत्या च ज्ञानभेदविमर्शः

न्यायशास्त्रानुसारेण ज्ञानस्य विभागः

न्यायशास्त्रे तु सूत्रेषु बुद्धेर्विभाजकं कण्ठतो नोपलभ्यते । आर्थिकस्तल्लाभ इत्थं भवति— प्रमाणप्रमेयेत्यादिसूत्रे प्रमीयतेऽर्थोऽनेनेति प्रमाणमिति प्रमाकरणार्थाभिधायित्वम् प्रमाणशब्दस्यावगम्यते । 'प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानमि'[1]त्युपमानलक्षणसूत्रे 'साध्यसाधन' मिति पदं सर्वप्रमाणसाधारणम् । एवञ्च साध्यसाधनत्वस्य सर्वप्रमाणसाधारण्योक्तिप्रतीतौ साध्यसाधनस्य प्रमाकरणस्य प्रमाणत्वावगतिर्भवति । एतेन सूत्रकारस्य प्रमाकरणानां चातुर्विध्योक्त्युपलम्भेन प्रमितीनामपि चातुर्विध्यमेवेति सूचितं भवति ।

यद्यपीन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमित्यादिप्रत्यक्षलक्षणसूत्रे 'ज्ञान'शब्दपाठादिन्द्रियार्थसन्निकर्षोत्पन्ने-त्यादिलक्षणानि प्रत्यक्षादिप्रमितीनामेवेति सम्भावयितुं शक्यम्, 'अथ तत्पूर्वक'[2], मितयादिसूत्रे तादृशपदपाठासत्त्वेऽनुमानमित्येव पाठस्य च सत्त्वेऽपि भावल्युटा अनुमितिपरत्वं तस्य योजयितुं शक्यम्, यथा प्रामाण्यवादप्रथमविप्रतिपत्तिदीधितौ 'भावल्युटा च तादृशज्ञानत्वं करणल्युटा च तादृशज्ञानकरणत्वं तद्धितान्तेनोपस्थाप्यत[3]' इत्यादौ, यथा वा अवयवगादाधर्यां—'तच्चानुमान[4]' मित्यस्य द्वितीयव्याख्याने 'अनुमानम्—अनुमितिरि' त्यादौ, एवमनयैव रीत्या 'प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानमित्यत्रापि 'उपमा'नमित्यस्योपमितिपरत्वं योजयितुं शक्यम्; तथापि 'आप्तोपदेशः शब्दः[5]' इत्यत्र तादृशगत्यन्तरा-सम्भवात् सर्वेषां सूत्राणां प्रमाकरणरूपप्रमाणलक्षणपरत्वमेवाङ्गीकरणीयम् । प्रत्यक्षलक्षकसूत्रे श्रीविश्वनाथभट्टाचार्योक्तदिशा यत इति पूरणं विधाय तस्यापि तादृशप्रमाणलक्षणपरत्वमेवाङ्गीकरणीयम् । एवञ्च करणानां चातुर्विध्यादेव प्रमितीनां चातुर्विध्यमवगन्तव्यमिति ।

---

१. न्यायसूत्रम् ।१।१।६।

२. न्यायसूत्रम् ।१।१।५।

३. प्रामाण्यवाददीधितिः पृ० ६० ।

४. अवयवगादाधरी पृ० ६१ ।

५. न्यायसूत्रम् ।१।१।७ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रमितिभिन्नस्यापि प्रमितित्ववारणाय, तत्करणस्य च प्रमाणत्ववारणाय सर्वप्रमाणसाधारण्येन अर्थसन्निकर्षोत्पन्नम् 'अव्यभिचारि' 'व्यवसायात्मक' मिति पदत्रयमुपात्तं सूत्रकारेण। तेन स्मृतिविपर्यय संशयानां प्रमितित्वं संस्कारादीनां च प्रमाणत्वं वारितं भवति । तथाहि—प्रत्यक्षप्रमितेरिन्द्रियार्थसन्निकर्षोत्पन्नत्वेन, अनुमितेर्हेतौ व्याप्तिरूपसन्निकर्षोत्पन्नत्वेन, उपमितेश्च शक्ये सादृश्यज्ञानरूपसन्निकर्षोत्पन्नत्वेन, शाब्दप्रमितेश्चार्थे पदवृत्तिरूपसन्निकर्षोत्पन्नत्वेन प्रमितिमात्रस्यार्थसन्निकर्षजत्वमवगम्यते । अतः स्मृतेरर्थसन्निकर्षजत्वाभावात्तस्याः प्रमात्वस्य, तत्करणस्य संस्कारस्य च प्रमाणत्वस्य व्युदासः । अव्यभिचारिपदोपादानेनार्थव्यभिचारिणाम् देहात्मप्रत्ययानां शुक्तिरजतादिप्रत्ययानाञ्च प्रमितित्ववारणम्, तत्करणरूपदोषाणाञ्च प्रमाणत्ववारणम् भवति । व्यवसायात्मकत्वकथनेन दोलायमानात्मकस्य संशयस्य व्यावृत्तिः। भाष्येऽपि-'अस्त्येकः सर्वविषयः स्वज्ञानप्रबन्धं स्मृतिप्रबन्धं च प्रतिसन्धते[१]' इत्यनेन वाक्येनानुभवस्मृतिभेदेन ज्ञानद्वैविध्यमुक्तम्, तत्र ज्ञानपदस्यानुभवपरत्वादन्यथा पौनरुक्त्यापत्तेः।

एवञ्च निम्नलिखितोऽस्य सम्मतो विभागः—

(१) ज्ञानं द्विविधम्-अनुभवस्मृतिभेदात् ।

(२) पुनरपि ज्ञानं द्विविधम्-प्रमाऽप्रमाभेदात् ।

(३) अप्रमापि द्विविधा-संशयविपर्ययभेदात् ।

तत्रानुभवात्मिकायाः प्रमितेः प्रत्यक्षानुमित्युपमितिशाब्दभेदेन चातुर्विध्यं पूर्वमुक्तमेव ।

प्रत्यक्षषाड्विध्यं—प्रत्यक्षन्तु न्यायनये 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्[२]' इतिलक्षणलक्षितम् । एवञ्च प्रत्यक्ष इन्द्रियाणां करणत्वात्तेषाञ्च बहिरन्तरात्मकानां समेषां षड्विधत्वात् प्रत्यक्षस्य षड्विधत्वमवगम्यते । तथाहि—'घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः[३]' इति सूत्रेण बहिरिन्द्रियाणां पञ्चविधत्वमुक्तमेव । 'चक्षुषा पश्यति, घ्राणेन जिघ्रति, स्पर्शनेन स्पृशति, एवं मन्तुः सर्वविषयस्य मतिसाधनमन्तःकरणभूतं सर्वविषयं विद्यते येनायं मन्यत इति[४]', 'यथा चक्षुषा गन्धो न गृह्यत इति करणान्तरं घ्राणमेवं चक्षुर्घ्राणाभ्यां रसो न गृह्यत इति करणान्तरं रसनम् । एवं शेषेष्वपि। तथा चक्षुरादिभिः सुखादयो न गृह्यन्त इति करणान्तरेण भवितव्यम्[५]' इत्यादिभाष्येण 'मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति[६]' इतिश्रीमद्भगवद्गीतावचनाच्च मनसोऽपीन्द्रियत्वं गृह्यते ।

अत एव सूत्रभाष्यादिषु प्रत्यक्षस्य षड्विधत्वमुक्तं भवति घ्राणजं, रासनं, चाक्षुषं, स्पार्शनं, श्रौत्रं मानसञ्चेति भेदेन। तदेव सुष्ठूक्तं विश्वनाथभट्टाचार्यैः—

'घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम्[७]'। इति।

---

१. न्यायभाष्यम् ।३।१।१५।

२. न्यायसूत्रम् ।१।१।४।

३. न्यायसूत्रम् ।१।१।१५।

४. न्यायभाष्यम् । ३।१।१७।

५. न्यायभाष्यम् । ३।१।१८ ।

६. श्रीमद्भगवद्गीता ।१५।७।

७. कारिकावल्यां का० ।५२।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मानसप्रत्यक्षानङ्गीकर्तृ विशिष्टाद्वैतिमतम्

विशिष्टाद्वैतिनस्तु अयोगिनां मानसप्रत्यक्षं नाङ्गीकुर्वन्ति। उक्तञ्च वेदान्तदेशिकेन—

'मानसप्रत्यक्षमप्यस्मदादीनां नास्त्येवेति वृद्धसम्प्रदायः । आत्मस्वरूपस्य तद्धर्मभूतज्ञानस्य च स्वयंप्रकाशत्वात् । सुखदुःखेच्छाद्वेषप्रयत्नानां तत्तद्धेतुतयाभिमतज्ञानविशेषानतिरेकस्य वेदार्थसङ्ग्रहे समर्थितत्वादि[1]'ति ।

विशिष्टाद्वैतिमतेन सुखादीनां ज्ञानरूपत्वम्

ज्ञानस्यैवामी भेदाः सुखं दुःखमिच्छाद्वेषप्रयत्न इति । कारणाधीनो हि भावानां भेदो भवितुमर्हति । समानकारणानामपि भेदस्वीकारे न कारणकृतं पदार्थानां नियतं रूपमिति तदाकस्मिकत्वापत्तेः । यथोक्तम्—

'तदतद्रूपिणो भावास्तदतद्रूपहेतुजाः ।
तत्सुखादि किमज्ञानं विज्ञानाभिन्नहेतुजम् ।।' इति ।
तस्माज्ज्ञानरूपाः सुखादयः तदभिन्नहेतुजत्वादिति ।

तदुक्तं—

'बुद्धिरेवोपाधिभेदात् सुखदुःखेच्छाद्वेषप्रयत्नरूपा, सुखादिजनकतयाऽभ्युपगतज्ञानातिरेके प्रमाणाभावात् । इच्छामि द्वेष्मीत्यादिव्यवहारस्य स्मरामीत्यादिवज्ज्ञानविशेषेणैवोपपत्तेः । वैषयिकसुखदुःखरूपत्वं ज्ञानस्य विषयाधीनमित्यनुकूलत्वप्रतिकूलत्वाविशेषाद्विषयस्यापि सुखदुःखशब्दवाच्यत्वमस्त्येव[2] ।' इति ।

तन्मतपर्यालोचनम्

तदेतदयुक्तम् प्रतिभाति—प्रत्यक्षेण बाधदर्शनात्, स्वरूपासिद्धेश्च । सुखादि संवेद्यमानमानन्दादिरूपतयाऽनुभूयते, ज्ञानन्तु विषयानुभवस्वभावतयेति प्रत्यक्षसिद्ध एव भेदः प्रतीयत उभयोः । ज्ञानमेव हि विषयग्रहणरूपं प्रकाशते; न सुखं, दुःखं वा । अपि च सुखज्ञानं दुःखज्ञानमित्यादिप्रत्ययबलेन ज्ञानसुखयोर्भेद एव प्रतीयते। तस्मादपि सुखदुःखादीनां न ज्ञानरूपत्वम् ।

ननूक्तसुखज्ञानं दुःखज्ञानमित्यादिप्रत्ययबलेन न ज्ञानसुखयोर्भेद आपादयितुं शक्यः संशयज्ञानं विपर्ययज्ञानमित्यादिवदभेदेऽपि तादृशप्रत्ययानामुपपत्तौ बाधकाभावादिति चेन्न । संशयविपर्ययादीनां विषयानुभवस्वभावत्वं सुखदुःखादीनामतथात्वमिति रीत्या महद्वैषम्यात् । तथाहि—संशयो विषयग्रहणात्मकोऽनुभूयतेऽनिश्चितं तु विषयं गृह्णाति, विपर्ययोऽपि विषयग्रहणात्मक एव, विपरीतमसन्तं वा विषयं गृह्णातीत्यन्यदेतत् । सुखं, दुःखं वा न केनापि विषयग्रहणस्वभावमनुभूयते । तत्तु ग्राह्यैकस्वभाव आन्तरो धर्मः । न च स्वप्रकाशत्वात् सुखादेर्न ग्राह्यैकस्वभावत्वमतश्च ग्राह्यग्रहणोभयस्वभावत्वाज्ज्ञानमेव तदिति वाच्यम्; सुखस्य ग्रहणस्वभावत्वाननुभवात्; स्वप्रकाशत्वस्यापि नैयायिकैरनभ्युपगमात् ।

---

१. न्यायपरिशुद्धौ प्रत्यक्षाध्यायद्वितीयाह्निके ।
२. न्यायसिद्धाञ्जने बुद्धिपरिच्छेदे पृ० ५३७ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नन्वान्तरधर्मस्य सुखस्य स्वप्रकाशत्वानभ्युपगमे सुखादेरुत्पादानुत्पादयोरविशेषात्सर्वदा सुखित्वं न कदाचिद्वा स्यादिति चेन्न। सुखस्योत्पन्नस्यैव सपदि ज्ञानेन गृह्यमाणत्वादुत्पादानुत्पादयोरविशेषस्याप्रसक्तेः। स्वप्रकाशसुखवादिनामेव तादृशदोषप्रसक्तेश्च। तथाहि-स्वप्रकाशस्य प्रदीपादेः सर्वान् प्रत्यविशिष्टत्वात्, क्वचित् स्वप्रकाशसुखोत्पादात् तेनैव प्रकाशेन सुखेनान्योऽपि सुखी स्यात्।

किञ्च समवायिकारणस्यात्मनोऽसमवायिकारणस्यात्ममनःसंयोगस्य चाभेदेऽपि निमित्तकारणस्य सुखत्वज्ञानत्वादेर्भिन्नत्वेनाभिन्नहेतुजत्वादिति हेतुरपि स्वरूपासिद्ध एव।

क्वचिच्च सङ्कल्पस्यापि सुखकारणत्वदर्शनेन सुखादि ज्ञानपूर्वकमेव भवतीति निश्चीयते। न चैवं ज्ञानस्य ज्ञानपूर्वकत्वनियमः, गर्भादौ मदमूर्च्छाद्यनन्तरं वा जायमानज्ञानस्य कथमपि ज्ञानपूर्वकत्वासम्भवात्।

अपि च विशिष्टाद्वैतिमते ज्ञानस्य नित्यत्वेन स्वयंप्रकाशत्वेन च सुखदुःखयोरपि नित्यत्वस्वयंप्रकाशत्वप्राप्तौ सर्वदा सुखं दुःखमेव वा स्यादेकस्य ज्ञानस्योभयरूपताया अभ्युपगमेऽनुभवविरोधात्। अथ कदाचित्सुखं कदाचिद्दुःखमिति चेत्तदा नित्यत्वविरोधः एककालावच्छेदेनोत्पन्नस्य पादे मे सुखं शिरसि च वेदनेत्याद्यनुभवपराहतिश्च।

सुखमनुभवामि दुःखमनुभवामीत्यादौ कर्मकर्त्तृभावबलादपि ज्ञानं न सुखरूपमित्युक्तप्रायम्।

तस्मात् सुखदुःखादीनां ज्ञानरूपत्वाभावे सिद्धे तत्प्रत्यक्षार्थं मानसं प्रत्यक्षमवश्यमेवाभ्युपेयमिति।

स्वीकृतञ्चैतद्वेदान्तदेशिकपूर्वाचार्यैः श्रीभाष्यकारैः—

'इन्द्रियसम्भवं च—बाह्यसम्भवम्, आन्तरसम्भवं चेति द्विधा[1]।' इति। व्याख्यातञ्च श्रुतप्रकाशिकायाम्—'आन्तरसम्भवं चेति आन्तरशब्देन मनो विवक्षित[2]' मिति।

अग्रेऽपि भाष्ये—'आन्तरसुखदुःखादिव्यतिरिक्तबहिर्विषयेषु तस्य बाह्येन्द्रियानपेक्षप्रवृत्त्यनुपपत्तेः[3]' इत्युक्तम्।

तत्र श्रुतप्रकाशिका—'आन्तरसुखदुःखादीत्यत्रान्तरशब्द आत्मतद्धर्मपरः, तद्ग्राहित्वादेव हि मनसोऽप्यान्तरत्वम्[4]।' इति।

एतेन मनस आन्तरिन्द्रियत्वं, बाह्यमानसभेदेन प्रत्यक्षद्वैविध्यं, आत्मसुखदुःखादीनां मानसप्रत्यक्षग्राह्यत्वं स्वीकृतं श्रीभाष्यकारैरित्यतिरोहितम्।

मनोव्यतिरिक्तजीवात्मानभ्युपगन्तृश्रीराखालदासन्यायरत्नमतम्

अत्यर्वाचीना राखालदासन्यायरत्नमहोदयास्तु मनस एव जीवत्वं स्वीकुर्वन्तो मनोव्यतिरिक्तस्य जीवाख्यपदार्थान्तरस्य स्थितिमपलपन्ति। तथा चान्तःकरणरूपमनसः पृथगस्वीकार आत्ममनःसन्निकर्षमात्राज्जायमानसुखादिप्रत्यक्षात्मकस्य मानसप्रत्यक्षस्य स्वयमेवापलापः स्यात्। अत आवश्यकत्वात्तन्मतमुद्धृत्य पर्यालोचनं विधीयते।

---

१. श्रीभाष्यम् ।१।१।३ ।
२. तत्रैव श्रुतप्रकाशिका पृ० २३८ ।
३. श्रीभाष्यम् ।१।१।३ ।
४. तत्रैव श्रुतप्रकाशिका पृ० ·३८ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्त्वसारनामकग्रन्थारम्भे न्यायरत्नैः —

'जीवः सर्वमूर्तसंयोगी परममहान् एकदावस्थितयावच्छरीरभेदेन भिन्नः । स एव च स्वर्गनरकादिभोक्ता । मनस्त्वणुतरं पदार्थान्तरं शरीरभेदेन भिन्नं ज्ञानादेः करणञ्च । न तु महत्त्व-परिमाणाश्रयश्चैतन्याद्याश्रयश्च । एतदेवोक्तं प्राचीनैः —

'अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते ।'

अपि च 'मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् । इति च[1] ।' इतिग्रन्थेन प्राचीननैयायिकमतम् प्रतिपाद्य नव्यमतमित्थमुपन्यस्तम्—

'मनसामेव चैतन्यं तत्रैवेच्छादिका गुणाः ।
अहम्प्रतीतिस्तत्रैव न तु जीवान्तरस्थितिः ॥ १० ॥

अयमाशयः —ज्ञानेच्छाद्वेषादृष्टकृतिभावना मनसामेव गुणाः । एतद्गुणगणधर्मितया मनसामेव साधनीयत्वात् । न पुनस्तद्धर्मितया जीवान्तरसिद्धिरिपि गौरवान्मानाभावाच्च । अत एव "भव हृदय साभिलाषं............। आशङ्कसे यदग्नि........... ।।" इति तत्र भवतःकालिदासस्य वाक्य-मपि साधु सङ्गच्छते । अन्यथाभिलाषवत्त्वस्य आशङ्कारूपज्ञानवत्त्वत्स्य च मनसि बाधेन तदीय-काव्यवाक्यस्य बाधितार्थकत्वं प्रसज्ज्येत । अत एव भारतपुराणमहाकाव्यादिष्वपि मनसामेव ज्ञानहर्षादिमत्त्वं बोधयन्ति बहुतरवाक्यानीति दृश्यते । तेष्वेव तादृशगुणवत्त्वं श्रुतिरपि प्रमाणयति । श्रुतिर्यथा—"कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिर्ह्रीर्धीरधृतिर्भीरितत्सर्वं मनस्येवेति[2]" । न च मनसा वेत्तीत्यादिव्यवहारस्यापि सर्वसिद्धतया तद्बलान्मनसि ज्ञानकरणत्वस्यैव प्रतिपत्तेः कर्तृत्वकरणत्वयोस्तु परस्परविरोधेन तदाश्रयकर्त्रन्तरस्वीकारावश्यकत्वमिति वाच्यम्; "आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मनेत्यादिकालिदासाद्युक्तिदर्शनेन तयोर्विरोधे मानाभावात्[3] ।' इति ।

तत्पर्यालोचनम्

तदिदमशोभनम् प्रतिभाति—जीवपदार्थमनभ्युपगम्य ज्ञानेच्छाद्वेषादीनां मनोगुणत्वस्वीकारे सुस्मूर्षाजिज्ञासाप्रत्यभिज्ञादीनां स्वरूपव्याहतिः स्यात् । तथाहि—अर्थविशेषस्मरणेच्छया कश्चिदन्यो मनसो धारणरूपं प्रणिधानं करोति । मनसा सुस्मूर्षितलिङ्गचिन्तनानन्तरमर्थस्मृतिः प्रायशो जायत इति सर्वानुभवसिद्धमेव । तत्रातिस्फुटरूपेण प्रतीयते यत् कश्चिदन्य एव मनः प्रेरयति । मनस्तस्य करणभूतं प्रतीयते । अत एव यस्य प्रेरणयाऽन्यपदार्थेभ्यः पृथग्भूत्वा मनसाऽर्थविशेषे प्रणिधानं कृतम् तस्यापलापो न कर्तुं शक्यते । उपरिष्टाच्चायमर्थो न्यायभाष्यालोडनप्रसङ्गे व्यक्तीभविष्यति ।

---

१. तत्त्वसारः पृ० २ ।
२. वृहदारण्यकोपनिषद् ।१।५।३ ।
३. तत्त्वसारः पृ० २ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपि च तान्त्रिकाः संस्कारकारणतावच्छेदककोटावुपेक्षान्यत्वं निवेशयन्ति । तदपि ज्ञातृ-इन्द्रियार्थेभ्योऽन्यस्य कस्यचित् करणत्वस्वीकार एव सङ्गच्छते, यस्य सम्यग्रूपेण सान्निध्याभाव इन्द्रियसम्प्रयोगादीनां सर्वेषां कारणानां समवधानेऽपि जायमानाज्ज्ञानात् संस्कारो नोत्पद्यते, सान्निध्यसत्त्वे चावश्यमेवोत्पद्यते । अत एवाभ्यामन्वयतिरेकाभ्यां यस्यावस्थितिर्निश्चीयते, न तस्यापलापः कर्तुं शक्यत इति । तदुक्तं 'ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम्[1]', इतिसूत्रस्य भाष्ये-'ज्ञातुः खलु ज्ञानसाधनान्युत्पद्यन्ते । चक्षुषा पश्यति, घ्राणेन जिघ्रति, स्पर्शनेन स्पृशति, एवं मन्तुः सर्वविषयस्य मतिसाधनमन्तःकरणभूतं सर्वविषयं विद्यते येनायं मन्यत इति । एवं सति ज्ञातर्यात्मसंज्ञा न मृष्यते मनःसंज्ञाभ्यनुज्ञायते । मनसि च मनःसंज्ञा न मृष्यते मतिसाधनं त्वभ्यनुज्ञायते । तदिदं संज्ञाभेदमात्रं नार्थे विवाद इति' इति ।

अत्रायमभिसन्धिः—ज्ञातुः कर्तृत्वं तु प्रायशः सर्वानुभवसिद्धमेव । न हि कर्त्तैव करणं भवितुमर्हति कर्तृत्वकरणत्वयोर्विरोधात् । अन्यथा-कर्तृत्वस्य 'स्वतन्त्रः कर्त्ता[2]' इति नियमेन स्वातन्त्र्यावगतेः, स्वातन्त्र्यस्य चेतरकारकाप्रयोज्यत्वे सति सकलकारकप्रयोक्तृत्वादेकस्यैव कर्तृत्वेनेतर-कारकाप्रयोज्यत्वं, करणत्वेन च प्रयोज्यत्वमिति स्वीकारापत्तिः स्यात् ।

यत्तु मानाभावादित्युक्तम्, तद्रिक्तं वचः; अनेकेषु पदार्थेषु इन्द्रियसम्प्रयोगसत्त्वेऽपि युगपदनेक-ज्ञानानामनुत्पाददर्शनेन बाह्येन्द्रियव्यतिरिक्तकरणान्तरस्यानुमेयत्वादुपर्युक्तप्रमाणस्यापि सत्त्वाच्च ।

यत्तु गौरवमुद्भावितं, तत्तु न्यायभाष्यकारैः पूर्वमेव परिहृतं लाघवानुरोधेन मनसोऽपलापे सर्वेन्द्रियापलापप्रसङ्गापादनमुखेन । तथा चोक्तं भाष्ये—'प्रत्याख्याने वा सर्वेन्द्रियविलोपप्रसङ्गः । अथ मन्तुः सर्वविषयस्य मतिसाधनं सर्वविषयं प्रत्याख्यायते नास्तीति एवं रूपादिविषय-ग्रहणसाधनान्यपि न सन्ति, इति सर्वेन्द्रियविलोपः प्रसज्यत इति[3]' । अर्थाद् य एव जीवस्थानापन्नो मन इत्यभ्यनुज्ञायते तस्य सर्वविषयकत्वमपि स्वीक्रियत एवेत्यन्येषामपि करणानां नावश्यकत्वमिति । तदेतत्सर्वमभिप्रेत्योक्तं भाष्ये—'यच्च सुखाद्युपलब्धौ करणं तच्च ज्ञानायौगपद्यलिङ्गम् । तस्येन्द्रियमिन्द्रियं प्रति सन्निधेरसन्निधेश्च न युगपज्ज्ञानान्युत्पद्यन्त इति[4]' इति ।

यत्तु कालिदासवाक्यमुदाहृतम् तेनापि जीवमनसोः पृथगेव स्थितिः प्रतिपादिता भवति । तथाहि—अभिलाषवत्त्वाय यः प्रेरयति सोऽवश्यमेव हृदयादन्योऽन्यथा सम्बोधनानुपपत्तेः । अस्मदेतदोः

---

१. न्यासूत्रम । ३।१।१७ ।

२. पाणिनिसूत्रम् । १।४।५४ ।

३. न्यायभाष्यम् । ३।१।१७ ।

४. न्यायभाष्यम् । ३।१।१८ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'एते वयम्' इत्यादिप्रयोगानुरोधेनाविरोधेऽपि अस्मद्युष्मदोर्भेदस्य परिहारोऽशक्य एवेति 'युष्मदस्मत्प्रत्ययगोचरयो'[१], रितिशाङ्करभाष्यं व्याचक्षाणेन षड्दर्शनकान्तारकेसरिणा श्रीवाचस्पतिमिश्रेण प्रतिपादितत्वेन, 'आशङ्क्से' इत्यत्र मध्यमपुरुषप्रयोगदर्शनात् प्रेरयितुः पृथगेव निश्चीयमानत्वात् । अतो मनसा पृथक्त्व एव कालिदासोक्तिस्सङ्गच्छत इति विद्वांसो विदाङ्कुर्वन्तु । एवञ्च श्रीमन्न्यायरत्नोक्तोदाहरणं तन्मतस्यैव व्याघातकमिति प्रतिभाति ।

यदुक्तं 'भारतपुराणमहाकाव्यादिष्वपि मनसामेव ज्ञानहर्षादिमत्त्वं बोधयन्ति बहुतरवाक्यानीति दृश्यत' इति ।

तत्रेत्थं विमृश्यते–मनसो ज्ञानहर्षादिमत्त्वप्रतिपादनेऽपि मनोव्यतिरिक्तस्य देहिनोऽपलापो न कुत्रापि दृश्यते । तथाहि—भारतान्तर्गतश्रीमद्भगवद्गीतायाम् मनः शब्दो बहुत्रोपलभ्यते । तत्र विस्तरभयात् कतिपयश्लोकानादायैव संक्षेपेण प्रकृते विचार्यते । तृतीयाध्याये—

'इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष देहे देहिनमव्ययम्[२] ॥'

इत्यत्र भगवता विमोहनक्रियाकरणत्वेन मनसः प्रतिपादनपूर्वकं तद्व्यतिरेकेण कर्मत्वेन देहिनः प्रतिपादनदर्शनात् मनोव्यतिरेकेण जीवोऽतिरोहितरूपेण निश्चीयते । तत्रैव—

'इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः[३] ॥

इत्यत्र तु बुद्ध्याख्यपदार्थस्यैव मनसः पृथक्त्वपरत्वयोः श्रवणाज्जीवस्य पृथक्त्वपरत्वे कैमुतिकन्यायेन सिद्धे ।

'कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्[४]'
'यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन[५]'

इति श्लोकयोरपि मनसः करणत्वेन स्मरणात् स्मरणात्मकक्रियानिरूपितकर्तृत्वस्य आरम्भात्मकक्रियानिरूपितकर्तृत्वस्य च समर्पणार्थं तद्वाचकपदयोः 'य' इत्यनेन पृथक् पाठात्करणत्वकर्तृत्वयोर्विरोधान्मनोव्यतिरेकेण जीवसिद्धिर्निष्प्रत्यूहा ।

'सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन्[६] ॥'

इत्यत्र न्यासक्रियाकरणत्वस्य मनसि कथनेन तद्व्यतिरिक्तस्य सुतरां सिद्धिः, देहिनस्तु ततः पृथगवधारणात् ।

'कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये[७] ।'

---

१. ब्र० सू० शाङ्करभाष्यम् । १।१।१ ।
२. श्रीमद्भगवद्गीता । ३।४० ।
३. श्रीमद्भगवद्गीता । ३।४२ ।
४. श्रीमद्भगवद्गीता । ३।६ ।
५. श्रीमद्भगवद्गीता । ३।७ ।
६. श्रीमद्भगवद्गीता । ५।१३ ।
७. श्रीमद्भगवद्गीता । ५।११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति पूर्वश्लोकेऽपि कुर्वन्तिक्रियाकरणत्वेन मनसः, तत्कर्तृत्वेन च योगिजीवस्य पृथक् स्मरणमतिस्फुटम् ।

'सर्वद्वाराणि संयम्य मनो हृदि निरुद्धच च ।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम्[1] ॥
'ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमां गतिम्[2] ।'

इत्यत्र तु प्रयाणक्रियाकर्तृत्वेन देहिनो 'य' इति शब्देन समर्पणात्, मनसस्तु तदुपकरणत्वेन समर्पणान्न केवलं जीवमनसोर्भेदो भगवता द्योतितोऽपि तु 'हृदि निरुद्धच' इति कथनेन मनसो हृदयपुण्डरीके निष्प्रचारापादनरूपो निरोधोऽप्यभिहितः ।

तथैव च मनसोऽपृथक्त्वे—'मय्यावेश्य मनो ये मां[3]' 'मय्येव मन आधत्स्व[4]' इत्याद्युक्तिरप्यनुपपन्ना स्यात् मनस आधानकर्मत्वस्य तन्नोपदेशात् । मनस एव देहित्वे तु 'मय्येव स्वमाधत्स्व' इत्यस्यैवौचित्यं स्यात् । किञ्च—'इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना[5]' इत्यादौ 'मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति[6] ॥ इत्यादौ च मनस इन्द्रियत्वं शब्दत एव लभ्यते, 'रुद्राणां शङ्करश्चास्मि[7]' 'अश्वत्थः सर्ववृक्षाणा[8]'—मित्यादौ तज्जातीयेपु मध्य एव शङ्कराश्वत्थादीनां श्रेष्ठत्वश्रवणात् !

एवञ्च श्रीमद्भगवद्गीतानुसारेण मनसः कामसङ्कल्पादिधर्मित्वेऽपि देहिनः पृथक्सत्वं निष्प्रत्यूहमेवेति ।

मनुस्मृतावपि—'अद्भिर्गात्राणि शुद्धचन्ति मनः सत्येन शुद्धचति ।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुद्धचति[9] ॥

इत्यादिश्लोकेऽतिस्फुटपदैर्मनोभूतात्मनोर्भेदः, तयोः शुद्धेः पृथगुपायौ च दर्शितौ ।

पुराणेपु तु मार्कण्डेयपुराणस्थश्रीदुर्गासप्तशत्याम्—

'वरदाहं सुरगणा वरं यन्मनसेच्छथ[10] ।' इति श्रीभगवतीवाक्यादपि मनसः करणत्वमेवावधार्यते ।

किञ्च—'या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः[11] ।' इत्यादौ तु कृतधियामितिपदाध्याहारेण देहिनो, हृदयेष्वित्यनेनान्तःकरणस्य, बुद्धेश्च स्पष्टरूपेण पृथक्त्वं प्रदर्शितम् ।

---

१. श्रीमद्भगवद्गीता । ८।१२ ।
२. श्रीमद्भगवद्गीता । ८।१३ ।
३. श्रीमद्भगवद्गीता । १२।२ ।
४. श्रीमद्भगवद्गीता । १२।८ ।
५. श्रीमद्भगवद्गीता । १०।२२ ।
६. श्रीमद्भगवद्गीता । १५।७ ।
७. श्रीमद्भगवद्गीता । १०।२३ ।
८. श्रीमद्भगवद्गीता । १०।२६ ।
९. मनुस्मृतिः । ५।१०९ ।
१०. श्रीदुर्गासप्तशती । ११।३७ ।
११. श्रीदुर्गासप्तशती । ४।५ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीदेवीभागवतमहापुराणे तु—

"विद्यया तपसा वापि योगाभ्यासेन भूपते ।
विना कामादिशत्रूणां नैव नाशः कदाचन ।
मनस्तु चञ्चलं राजन् स्वभावादतिदुर्ग्रहम् ।
तद्वशः सर्वथा प्राणी त्रिविधो भुवनत्रये ।
कामक्रोधादयो भावाः चित्तजाः परिकीर्त्तिताः ।
ते तदा न भवन्त्येव यदा वै निर्जितं मनः[१] ।"—

इत्यादौ प्राणिनो मनसः पृथक् प्रतिपादनं विधाय तस्य मनोवशित्वं प्रतिपादितम् । 'निर्जितं मन' इत्याद्यनुरोधेनापि मनोनिष्ठजेतव्यत्वनिरूपितजेतृत्वाश्रयत्वेन प्राणिनः पृथग् व्यवस्थापनमावश्यकमिति । एवं च कामादीनां मनोधर्मत्वेऽपि देहिनः पदार्थान्तरत्वमसन्दिग्धमेव ।

श्रीदेवीगीतायां तु—

'ज्ञानकर्मेन्द्रिययुतं प्राणपञ्चकसंयुतम् ।
मनोबुद्धियुतं चैतत्सूक्ष्मं तत्कवयो विदुः ।
अपञ्चीकृतभूतोत्थं सूक्ष्मदेहोऽयमात्मनः ।
द्वितीयोऽयमुपाधिः स्यात् सुखादेरवबोधकः[२] ।'

× × × ×

'अन्तःकरणमेकं स्याद् वृत्तिभेदाच्चतुर्विधम् ।
यदा तु सङ्कल्पविकल्पकृत्यं तदा भवेत्तन्मन इत्यभिख्यम्[३] ॥

इत्यादिना तु स्पष्टरूपेणैव सूक्ष्मशरीराङ्गत्वं मनसः प्रतिपाद्यान्तःकरणत्वं तस्य द्योतितम् । अत एव—

'तस्मात्सर्वप्रयत्नेन श्रीगुरुं तोषयेन्नग ।
कायेन मनसा वाचा सर्वदा तत्परो भवेत्[४] ।' इति

तत्रस्थोक्तिरपि साधूपपद्यते 'भवे'त्क्रियोपकरणरूपकायसामानाधिकरण्येन मनसः पाठात् । मनसो देहिरूपत्वे 'तत्पर'पदसामानाधिकरण्येन मनःपदस्य प्रथमान्तत्वमेवोपयुज्येतेति ।

एवमेवान्यपुराणेष्वपि देहिनः पदार्थान्तरत्वं दर्शयितुं शक्यते किन्तु विस्तरभयान्नेह प्रतन्यते ।

---

१. श्रीदेवीभागवते । ६।१५।५७-५९ ।
२. श्रीदेवीभागवते । ७।३४।२७-२८ ।
३. श्रीदेवीभागवते । ७।३२।३६ ।
४. श्रीदेवीभागवते । ७।३६।२७ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'या तु कामः सङ्कल्पे[१]' त्यादिना बृहदारण्यकश्रुतिरुदाहृता, तत्र मनस्येवेति पाठस्त्वनुपलब्धप्राय एव; सर्वत्र 'मन एवे' त्येव पाठः । तस्य 'मनस्येव' इति व्याख्यानमप्रामाणिकम् । तथा च मनः सामानाधिकरण्यमेव कामसङ्कल्पादिषूपलभ्यते । तेन च कामसङ्कल्पादीनां मनःपरिणामत्वमित्यवसीयते ।

उपर्युक्तरीत्या कामसङ्कल्पादीनां मनोधर्मत्वेऽपि देहिनः पदार्थान्तरत्वमव्याहतमेव । तथाहि— "त्रीण्यात्मनेऽकुरुतेति मनो वाचं प्राणं तान्यात्मनेऽकुरुतान्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति मनसा ह्येव पश्यति मनसा शृणोति" इति मन्त्रपूर्वभागः । तेन जीवस्य मनःप्रयोजनकत्वं शब्दत एवोक्तम् भवति, वाचं प्राणमितिपदयोस्सामानाधिकरण्येन मन इति पाठात् ।

किञ्च मनसो देहिरूपत्वे 'अन्यत्राभूवं नादर्शमन्यत्राभूवं नाश्रौषमि' त्येव सर्वत्र पठितं स्याद् अन्यत्राहमभूवमित्येव वा स्यात् ।

अत एव—

'आत्मानं रथिनं विद्धि शरीरं रथमेव तु[३]' ।

'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः[४]' । इत्याद्याः,

'यस्मिनृचः सामयजूंषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः ।
यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु[५] ।।'

इत्याद्याश्च श्रुतयः ज्ञानादीनां मनःकार्यत्वमभिधायापि स्पष्टतयैव मनसो देहिभिन्नत्वमभिप्रयन्ति ।

यदप्यग्रे—'न च मनसा वेत्ती'त्यादिना मनसि करणत्वमाशङ्क्य कर्तृत्वकरणत्वयोरेकत्र सत्त्वमभ्युपगम्य परिहृतं, तद्विषये 'आत्मानमात्मना वेत्सी'त्यादिकालिदासवाक्यसंवादश्च प्रदर्शितस्तदपि न विवेकपदवीमारोहति, अनेकार्थ एकशब्दप्रयोक्तॄणां व्यञ्जनावृत्तिमाश्रित्य पदप्रयोक्तॄणां च साहित्यिकानां वाक्यस्य यथाश्रुतार्थे तात्पर्यापर्यवसानात्,

'आत्मा चित्ते धृतौ यत्ने धिषणायां कलेवरे ।
परमात्मनि जीवेऽर्के हुताशनसमीरयोः स्वभावे[६]'

इति हैमवचनादात्मशब्दस्यानेकार्थत्वाच्च । अत एव श्रीमद्भगवद्गीतायाः—

'उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः[७] ।'

इति श्लोकव्याख्यानावसरे श्रीवामनाचार्याः—

'बुद्धेरधीनं हि मनःकिरीटिन् । शक्ता च सैकैव नियन्तुमेतत् ।
विवेकमारोहति धीर्न यावत्तावन्मनो मज्जति वासनाब्धौ ।।

---

१. बृहदारण्यकोपनिषद् । १।५।३ ।
२. बृहदारण्यकोपनिषद् । १।५।३ ।
३. कठोपनिषद् । १।३।३ ।
४. कठोपनिषद् । १।३।४ ।
५. शुक्लयजुर्वेदे । ३४।५ ।
६. हैमकोषे श्लोकः । २७० ।
७. श्रीमद्भगवद्गीता । ६।५ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मग्नं मनो मज्जति वासनाब्धौ धीनिघ्न एवास्य गुणस्तथापि ।
धियः स्वभावः स्वसुखाभिलाषः स्वत्वावसानं च चिदात्मरूपे ॥

यत्र भाति सुखं तत्र प्रवर्त्तयति धीर्मनः ।
यत्र दुःखं ततस्तूर्णं निवर्तयति सैव तत् ॥
विषयेभ्यः पृथक्सौख्यं क्वचिन्नास्तीति जानती ।
तद्वासनाप्रवाहे धीर्मनः पातयति ध्रुवम् ।
सत्सङ्गाद्विषयान्दुःखमयाञ्जानाति सा यदा ।
परमार्थे सुखं मत्वा तदा भक्तौ प्रवर्तते ॥
प्रत्याहृतं ततो बुद्धचा विषयेभ्यो भृशं मनः ।
विहाय तांश्चिन्तयति ब्रह्मावगमसाधनम् ॥

× × ×

बुद्धचोद्धरेन्मन इति तस्मादत्राब्रवीद् हरिः ।
आत्मशब्दोऽभिधत्तेऽसौ मनो बुद्धी उभे अपि ॥ इत्युक्तवन्तः ।

अत एव चात्र वेंकटब्रह्मानन्दगिर्याख्याने—

'आत्मना मनसा, आत्मानं जीवमुद्धरेदिति प्रथमः सम्बन्धः[1]'

हि यस्मान् मन एव जीवस्य हितकारी बन्धुरि'त्याद्युक्तम् ।
अतश्चाग्रेऽपि—'बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत्[2]" ॥

इति श्लोकव्याख्यानावसरे—

'आत्मा कार्यकरणसंघातो येन वशीकृतः, जितेन्द्रिय इत्यर्थः' इति श्रीशङ्कराचार्या ऊचुः ।'

मध्वाचार्या अपि—'आत्मा मनः, आत्मनो जीवस्य ।...........
आत्मैव मनः, आत्मना बुद्धचा जीवेनैव वा ।' इति व्याचक्रुः ।

ब्रह्मवैवर्त्तपुराणेऽपि—

'उद्धरेन्मनसा जीवं न जीवमवसादयेत् ।
जीवस्य बन्धुः शत्रुश्च मन एव न संशयः ॥' इति

'जीवेन बुद्धचा हि यदा मनो जितं तदा बन्धुः शत्रुरन्यत्र चास्य ॥
ततो जयेद्बुद्धिबलो नरस्तद्देवे च भक्त्या मधुकैटभारौ[3] ।' इति चोक्तम् ।

---

१. श्रीमद्भगवद्गीता । ६।५ ।
२. श्रीमद्भगवद्गीता । ६।६ ।
३. उपर्युक्तश्लोकव्याख्यानावसरे श्रीमध्वाचार्यैर्ब्रह्मवैवर्तवचनत्वेनोद्धृतौ श्लोकौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवञ्च—'भूर्वारि पवनः तेजः परमात्मा तथा मनः ।
द्रव्याणि षड्विधान्येव जीवादिर्नेतरस्ततः[१] ।।'' इति कस्यचिन्मनःप्रसादार्थमेव न्यायरत्नेन प्रतिपादितमिति प्रतिभाति ।

तथा च आत्ममनःसंयोगाज्जायमानं मानसप्रत्यक्षं निष्प्रत्यूहमेवञ्च प्रत्यक्षपाड्विध्यमपि सूपपन्नमिति । अधुना विभिन्नदार्शनिकसम्मतप्रत्यक्षलक्षणानि संक्षेपेण पर्यालोच्यन्ते ।

मीमांसकसम्मतप्रत्यक्षलक्षणपर्यालोचनम्

मीमांसकास्तु 'सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमिति' सूत्रेण[२] प्रत्यक्षं लक्षयन्ति । अस्य लक्षणस्य 'सति इन्द्रियार्थसम्बन्धे या पुरुषस्य बुद्धिर्जायते तत्प्रत्यक्षम्' इत्यर्थोऽवगम्यते भाष्यकारादिरीत्या । अत्र च जन्मग्रहणं 'जन्मैव बुद्धेर्व्यापार' इति प्रदर्शनार्थम् । तथा चोक्तम्—

'व्यापारः करणानां तु दृष्टो जन्मातिरेकतः ।
ज्ञानेऽपि हि तथा मा भूदिति जन्मविवक्ष्येत[३] ।।'

तदिदमलक्षणमिति प्रतिभाति संशयविपर्ययोरतिव्याप्तत्वात् शुक्तिरूपवर्तमानवस्तुनेन्द्रियसन्निकर्षानन्तरम् 'इदं रजत' मिति प्रत्यक्षाभासस्याप्युत्पत्तिदर्शनात् ।

अथ भाष्यकारमतानुसारेणोपर्युक्तार्थग्रहणे प्रसरत्विदं दूषणम्, किन्तु तत्सतोर्व्यत्यासेन 'तत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म सत्प्रत्यक्षमि'ति लक्षणस्य पर्यवसितत्वात्, तदनुसारेण च 'तत्सम्प्रयोगात्तद्विषयविज्ञानं सत्प्रत्यक्षमन्यसम्प्रयोगादन्यविषयज्ञानं प्रत्यक्षाभासः' इति लक्षणार्थस्य पर्यवसानाददोषः, न हि शुक्तिरूप्यज्ञानं रजतसम्प्रयोगादुत्पन्नमिति चेत् । तदप्यनुपपन्नम् प्रतिभाति । तथाहि—तत्र किं प्रतिभासमानेनाकारेण कृत्स्नेन सम्प्रयोगजजायमानत्वं विवक्षितम् । उतैकदेशेनापि । न तावदाद्यः, 'सोऽयं देवदत्त' इति प्रत्यभिज्ञायां तत्तांशे सम्प्रयोगाभावादव्याप्तेः । न च तत्रापि तत्तांशे संयुक्तविशेषणतालक्षणः सम्प्रयोगोऽस्तीति वाच्यम्; षष्ठप्रमाणवादिना तस्य प्रत्यक्षप्रयोजकत्वानङ्गीकारात्, अङ्गीकारे वा निर्घटं भूतलमित्यत्र तथाभूतसन्निकर्षभावादभावस्य प्रत्यक्षतोपपत्तौ षष्ठप्रमाणाभ्युपगमवैयर्थ्यापत्तेः । नापि द्वितीयः, विभ्रमेष्वपि तस्य सत्त्वेनातिव्याप्तेः, तत्राप्यधिष्ठानसम्प्रयोगस्य भावात् ।

ननु सम्प्रयोग इत्यत्र समितिविशेषणेन दुष्टेन्द्रियसम्प्रयोगजन्यत्वस्य व्यावर्तितत्वाद्दुष्टेन्द्रियसंयोगजन्येषु विभ्रमेषु नातिव्याप्तिः;

तथा चोक्तम् भट्टपादैः —

सम्यगर्थे च संशब्दो दुष्प्रयोगनिवारणः ।
प्रयोग इन्द्रियाणां च व्यापारोऽर्थेषु कथ्यते ।।
दुष्टत्वाच्छुक्तिकायोगो वार्यते रजतेक्षणात्[४] ।

१. तत्त्वसारः पृ० २६ ।
२. जैमिनिसूत्रम् ।१।१।४ ।
३. श्लोक वा० ।४।५४ ।
४. श्लोकवा० ।४।३८ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति चेन्न । प्रत्यभिज्ञायां तत्तांशेन तथाभूतसम्प्रयोगाभावादव्याप्तेस्तादवस्थ्यात् । इन्द्रियतत्सम्प्रयोगयोरप्रत्यक्षत्वेन दोषाभावस्याप्यप्रत्यक्षत्वात् दुष्टसामग्रीजन्यत्वाभावस्य दुर्घटत्वाच्च ।

सांख्याभिमतप्रत्यक्षलक्षणपर्यालोचनम्

सांख्यास्तु—'प्रतिविषयाध्यवसायो दृष्ट[१]' मित्येवं रीत्या प्रत्यक्षं लक्षयन्ति । तदपि न युक्तं प्रतिभाति, अनुमानादिज्ञानानामपि विषयाध्यवसायस्वभावत्वेनातिव्याप्तेः । यत्तु राजवार्तिक उक्तम्—

'प्रतिराभिमुख्ये वर्तते तेनाभिमुख्येन विषयाध्यवसायः प्रत्यक्षमिति[२]' तदप्यनुमानादावतिव्याप्तमेव, घटोऽयमितिवद् वह्निमान् पर्वत इत्याभिमुख्येनैव प्रतीतेः ।

विशिष्टाद्वैत्यभिमतप्रत्यक्षलक्षणपर्यालोचनम्

विशिष्टाद्वैतिमते साक्षात्कारिप्रमा प्रत्यक्षम् । साक्षात्त्वं च जातिरूप उपाधिरूपो वा कश्चिज्ज्ञानस्वभावविशेषः स्वात्मसाक्षिकः । तदुक्तम् तत्त्वरत्नाकरे—

'अपरोक्षप्रमाध्यक्षमापरोक्ष्यं च संविदः ।
व्यवहार्यार्थसम्बन्धिज्ञानजत्वविवर्जनम्[३] ॥' इति ।

प्रमेयसंग्रहेऽपि—'साक्षादनुभवः प्रत्यक्षम्[४] । साक्षात्त्वं जाति'रित्याद्युक्तम् । मानयाथात्म्यनिर्णयेऽपि—अपरोक्षप्रमा प्रत्यक्षम् । प्रमाया आपरोक्ष्यं नाम विशदावभासत्वमिति ब्रूमः । वैशद्यं नामासाधारणाकारेण वस्त्ववभासकत्वमित्यादि प्रतिपादितम् ।

तन्मते साक्षात्त्वं द्विधा—नित्यं चानित्यं च ।

तत्रेश्वरज्ञाननिष्ठं नित्यम् । तद्भिन्नम् (अस्मदादिज्ञाननिष्ठम्) अनित्यम् । अस्मदादिप्रत्यक्षं द्विधा—योगिप्रत्यक्षमयोगिप्रत्यक्षं च । तत्र योगिप्रत्यक्षं प्रकृष्टादृष्टविशेषजन्यम् । तद्युक्तावस्थायां मनोमात्रजन्यम् । वियुक्तावस्थायां तु बाह्येन्द्रियजन्यमपि । तच्च बुभुत्सादिप्रतिनियतविषयमागमैकसिद्धञ्च ।

प्रकारान्तरेणापि तन्मते प्रत्यक्षं द्विविधमर्वाचीनमनर्वाचीनञ्च । तत्र युगपदशेषविशेषविषयसाक्षात्कारक्षममनर्वाचीनम् । तद्योगिमुक्तेश्वराणां प्रभावविशेषाधीनम् । तद्भिन्नानामर्वाचीनम् प्रत्यक्षम् ।

तत्रेत्थं विमृश्यते—पारोक्ष्यस्य आपरोक्ष्यस्य वा जातित्वे जातिसङ्करप्रसङ्गः । तथाहि—साक्षात्त्वस्य जातिरूपत्वे प्रमात्वं परम्; आपरोक्ष्यं (साक्षात्त्वम्) अपरम्, विपरीतं वा । नाद्यः, यत्र

---

१ सांख्यकारिका । ५ ।
२ तत्रैव राजवार्त्तिकम् ।
३ न्यायपरिशुद्धिप्रत्यक्षाध्यायद्वितीयाह्निक उदाहृतम् ।
४ तत्रैव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साक्षात्त्वं तत्र प्रमात्वस्य नियमेन प्राप्तौ साक्षात्कारिभ्रमाभावप्रसङ्गात् । नापि द्वितीयः, तथा सति यत्र-यत्र प्रमात्वं तत्र-तत्र साक्षात्त्वमिति स्थितौ परोक्षप्रमाभावप्रसङ्गात् । न च प्रमात्वं परमेव तद्रहितेषु विभ्रमेष्वापरोक्ष्यव्यवहारस्तु यत्किञ्चिदुपाधि—(इन्द्रियकरणकत्वादि) कृत इति वाच्यम्; तथा सति प्रमादावपि सर्वत्र यत्किञ्चिदुपाधिनिबन्धनतयैव तद्व्यवहारोपपत्तिसम्भवे जातिकल्पनावैयर्थ्यापत्तेः ।

किञ्च साक्षात्त्वजातेर्व्यञ्जकमप्यसम्भव्येव । तथाहि—तत्किमिन्द्रियार्थसन्निकर्षजन्यत्वे सति प्रमात्वं, लिङ्गादिप्रमाकरणाजन्यत्वं वा । नाद्यः, ईश्वरज्ञानस्यापि परोक्षत्वप्रसङ्गात् । नापि द्वितीयः स्मृतेरपि साक्षात्त्वप्रसङ्गात् ।

योगजप्रत्यक्षनिरूपणम्

अस्मदादीनां चक्षुः निकटस्थमव्यवहितं घटपटादिरूपस्थूलमर्थमालोकमपेक्ष्य पश्यति । बिडालस्तु निबिडान्धकारस्थितानपि घटपटादिपदार्थान् पश्यति । सम्पातिनामा गृध्रराजो योजनशतव्यवहितामपि श्रीसीतां ददर्शेत्यादिकाव्ये रामायणे स्मर्यते । अयं दर्शनातिशयः शुक्लादिगुणातिशय इव तारतम्य-समन्वित इति परं निरतिशयमतिशयं गमयति । यत्रास्य दर्शनस्य परः प्रकर्षस्ते योगिन उच्यन्ते । ज्ञानस्य परः प्रकर्षश्च सूक्ष्मव्यवहितविप्रकृष्टभूतभविष्यदादिविषयकत्वम्, धर्माधर्माद्यतीन्द्रियार्थ-विषयकत्वञ्च ।

अथ स्वविषयानतिक्रमेण दर्शनातिशयकल्पनाया युक्तत्वेऽपि धर्मादीनां चक्षुराद्यविषयाणां कथं तद्विषयत्वम् । तथा चोक्तं भट्टैः —

'यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात् ।
दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता[1] ॥'

इति चेन्न । बाह्यान्तरिन्द्रियजन्यज्ञानेषु च परप्रकर्षस्य पार्थक्येन विवक्षितत्वात् । तथा चोक्तयोः प्रकर्षयोराद्यस्य बहिरिन्द्रियजन्यज्ञाने, द्वितीयस्य च आन्तरेन्द्रियजन्यज्ञानेऽभिप्रेतत्वान्नोदीरितो दोषः ।

न च योगजधर्मस्य तत्तदिन्द्रिययोग्यानामेव ग्रहणे तत्तदिन्द्रियेषु सामर्थ्यविशेषसम्पादकतयाऽतीन्द्रियस्य सर्वेषामिन्द्रियाणामयोग्यस्य धर्माधर्मादेर्ग्रहणे कस्यापीन्द्रियस्य सामर्थ्यासम्पादनाद् धर्माधर्मादेः योगिप्रत्यक्षगम्यत्वमसङ्गतमिति वाच्यम्; धर्माधर्मादिषु सर्वेषामिन्द्रियाणामविषयत्वस्यैवासिद्धत्वात् सर्वार्थग्राहिणो मनसो विषयत्वस्यैव तत्रोपगमात् । न च धर्माधर्मादेर्मनोविषयत्वेऽयोगिनामपि कुतो न तन्मानसप्रत्यक्षमिति शङ्क्यम्; धर्माधर्मादेः प्रत्यक्षताया अनानुभविकत्वेन लौकिकप्रत्यक्षप्रणालिकया तद्विषयत्वानभ्युपगमेऽपि अनुमानादिप्रणालिकया तु तद्विषयत्वे बाधाभावात् । अतो योगजधर्मेण मनसः सामर्थ्योपचये तेन तत्प्रत्यक्षं सुघटमेवेति ।

---

१ श्लोकवार्त्तिके द्वितीयसूत्रे श्लोकः ।११३।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथैवमपि 'स्वर्गकामो यजेते'त्यादि वेदमात्रगम्यस्य यागगतस्वर्गसाधनत्वादेः कथं प्रत्यक्षप्रमाणेनावगतिरिति, चेन्न, तत्तदर्थस्य वेदादिमात्रगम्यताया अयोगिनं प्रत्येवाभिप्रेतत्वेन योगिनां शब्दगम्यत्व इव प्रत्यक्षगम्यत्वेऽपि बाधकाभावात् । अयोगिनस्ताराव्यूहचतुर्दशभुवनकायव्यूहादिविषयकविज्ञानानां शास्त्रेणैव सम्भवेऽपि योगिनः प्रत्यक्षेणैव तत्सम्भवस्य 'चन्द्रे ताराव्यूहज्ञानम्[1]'; 'भुवनज्ञानम् सूर्ये संयमात्[2]', 'नाभिचक्रे कायव्यूहज्ञानं[3]', 'प्रतिभाद्वा सर्वं' मित्यादिसूत्रेषु महर्षिणा पतञ्जलिना प्रतिपादितत्वात् ।

दर्शनवैचित्र्यस्य च लोकेऽपि दोषादिनैव—

'कामशोकामयोन्मादचौरस्वप्नाद्युपद्रुताः ।
अभूतानपि पश्यन्ति पुरतोऽवस्थितानिव ॥'

इत्यभियुक्तोक्तरीत्या दृष्टचरत्वात् । न चैतेषां मिथ्याज्ञानत्वान्न योगिविज्ञाने दृष्टान्तत्वं युक्तमिति वाच्यम्; अर्थस्य सन्निकृष्टत्वाद्यसत्त्वेऽपि स्फुटाभासमात्रतया दृष्टान्तत्वोपपत्तेः । दृष्टान्तदार्ष्टान्तिकयोस्सर्वात्मना तुल्यत्वस्यानावश्यकत्वादसम्भवाच्च । एवञ्च कामशोकादिभावनाभ्यासभुवां प्रतिभासानां बाधकवैधुर्याभावादप्रामाण्यं भविष्यति न त्वितरेषां योगिप्रतिभासानां, बाधकवैधुर्यसत्त्वात्; स्फुटाभासत्वं तूभयत्रापि तुल्यमिति ।

नन्वभ्यासोऽपि क्रियमाणो नात्यन्तमपूर्वमतिशयमावहति लंघनाभ्यासवत् । प्रतिदिनमनन्यकर्माऽपि हि यः पुरुषो लंघनमभ्यस्यति सोऽपि कतिपयपदपरिमितं पृथिवीतलमभिलंघयति न तु पर्वतमम्बुधिं वेति चेन्न, वैषम्यात् । तथाहि—लंघनस्य देहधर्मत्वेन देहस्य च भौतिकत्वेन तत्राभ्यासस्य कफादिक्षयद्वारा शरीरलाघवमात्रप्रयोजकत्वेनातिरिक्तयत्किञ्चिदतिशयाधानप्रयोजकत्वाभावेऽपि, योगाभ्यासस्य संस्काराधायकत्वेन संस्कारस्य च क्रमेणोपचीयमानत्वात् परातिशयकारणत्वसम्भवः । तदुक्तम् महर्षिणा—

'तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्याज्ज्ञेयमल्पम्[4]' इति । अयोगिनां तु रागादिमलावरणधूसरम् मनो न तादृशं ज्ञानप्रकर्षं लभते । योगिनां तु मनो भावनाभ्यासाद् रजस्तमोमलनिर्मुक्तत्वेन सकलविज्ञेयसाक्षात्कारक्षममित्यत्र न किमप्याश्चर्यम् ।

उक्तञ्चोपनिषदि—

'आसनेन रुजं हन्ति प्राणायामेन पातकम् ।
विकारं मानसं योगी प्रत्याहारेण मुञ्चति[6] ।' इति

ननु नेदं प्रत्यक्षं, तस्य 'सम्बद्धं वर्तमानञ्च गृह्यते चक्षुरादिने'ति नियमेन वर्तमानमात्रविषयकत्वेन भविष्यदादिविषयकत्वाभावादिति चेन्न; अनागतग्राहिणोऽपि प्रत्यक्षस्य सम्भवात् । तस्य च 'श्वो मे भ्राताऽऽगन्ते'त्यादौ प्रसिद्धचरत्वात् ।

---

१ योगसूत्रम् ।३।२८।
२ तत्रैव ।३।२७।
३ तत्रैव ।३।३०।
४ तत्रैव ।३।३४।
५ तत्रैव ।४।३०।
६ योगचूडामण्युपनिषद् ।१०६।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ननु योगिनां सर्वज्ञता किमेकेन प्रमाणेन, बहुभिर्वा ? नाद्यः, एकस्मिन् ज्ञाने परस्परविरोधिनामर्थानां शीतत्वोष्णत्ववदवभासमानत्वायोगात् । न द्वितीयः; यतो हि तत्र बहूनि ज्ञानानि युगपद्भवेयुः, क्रमेण वा । तत्राद्यस्तु पक्षोऽयुक्त एव, सूक्ष्मान्तःकरणसापेक्षत्वेन ज्ञानानां यौगपद्यायोगात् । द्वितीयोऽपि न युक्तः, क्रमभाविभिर्ज्ञानैः सकलत्रिभुवनगतनिखिलपदार्थसाक्षात्कारस्य मन्वन्तरशतैरपि दुर्घटत्वादिति चेन्न । युगपदेकयैव वुद्धया सर्वत्र सर्वानर्थान् प्रत्यक्षीकुर्वन्ति योगिन इति स्वीकारात् । विरुद्धानामपि नीलपीतादीनामेकत्र चित्रप्रत्यये भासमानत्वदर्शनेन परस्परविरोध्यर्थानामपि एकज्ञानविषयत्वस्वीकारे बाधकाभावात् । एकत्र मेचकप्रत्यये सन्निहितपदार्थव्यतिरिक्तसकलवस्त्वभावग्रहणस्य दर्शनात् । शीतोष्णयोरपि क्वचिदवसरे युगगपदुपलभ्यमानत्वात् । तथाहि— ग्रीष्मकाले प्रतपत्यादित्ये हिमशकलसंवलितपयःपूर्णसरसि निमग्नाभिदध्नदेहस्य पुरुषस्य युगपदेव सरःसलिलसूर्यातपवर्तिनौ शीतोष्णस्पर्शावनुभवविषयौ भवत एव ।

अथैकेन ज्ञानेन सर्वानर्थान् भूतभाविनः परोक्षानपि पश्यन्तो योगिनः कथमखिलत्रैलोक्यसाक्षात्कारिणः सकलजगद्गुरोरीश्वराद्विशिष्येरन्निति चेन्न । ऐश्वरतथाविधज्ञानस्य नित्यत्वेन, योगिनां तु योगाभ्यासप्रभवत्वेन मिथो विशेषादिति ।

औपनिषदमतेन प्रत्यक्षनिरूपणम्

औपनिषदानां नये स्मृतेः प्रमात्वास्वीकारपक्षेऽनधिगतावाधितविषयज्ञानत्वम् प्रमात्वम् । तत्स्वीकारपक्षेऽबाधितविषयज्ञानत्वमात्रम् ।

वेदान्तपरिभाषायां प्रमायाः करणं प्रमाणमिति व्युत्पत्तिमभिधाय 'तानि च प्रमाणानि षट् प्रत्यक्षानुमानोपमानागमार्थापत्त्यनुपलब्धिभेदात्[1]' इत्युक्तम् । तेन प्रमितेर्विभागोऽप्युपलब्धो भवति । अत एवात्र प्रमितिः षड्विधा प्रत्यक्षानुमित्युपमितिशाब्दार्थापत्त्यनुपलब्धिकभेदात् ।

अत्र वृत्तिरूपज्ञानस्य मनोधर्मत्वम्, 'कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव[2]' इति श्रुतौ धीशब्देन वृत्तिरूपज्ञानस्योक्तत्वादिति पूर्वमेवासकृदावेदितम् ।

अस्मिन् मते प्रत्यक्षप्रमा तु चैतन्यमेव 'यत्साक्षादपरोक्षाद् ब्रह्म[3]'ति श्रुतेः । चैतन्यस्यानादित्वे चक्षुरादेः करणत्वानुपपत्तौ प्रमाणत्वानुपपत्तिरिति तु न शङ्क्यम्; तदनादित्वेऽपि तदभिव्यञ्जकान्तःकरणवृत्तेरिन्द्रियसन्निकर्षादिना जायमानत्वस्वीकारेण वृत्तिविशिष्टचैतन्यस्यादिमत्त्वोपपत्तेः । वृत्तावपि ज्ञानत्वोपचारो भवति । स च तस्या ज्ञानावच्छेदकत्वमूलकः ।

---

१ वेदान्तपरिभाषा पृ० ३० ।

२ वृहदारण्यकोपनिषद् । १।५।३ ।

३ वृहदारण्यकोपनिषद् । ३।४।१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिविधं हि चैतन्यं प्रमातृचैतन्यं, प्रमाणचैतन्यं, विषयचैतन्यञ्चेति । अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम् । अन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यम् । घटाद्यवच्छिन्नचैतन्यं विषयचैतन्यम् ।

तत्र प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभेदे सति प्रत्यक्षज्ञानं जायत इति व्यवह्रियते ।

तत्तदिन्द्रिययोग्यवर्त्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तस्मिंस्तस्मिन् ज्ञानांशे प्रत्यक्षत्वप्रयोजकम्—प्रणाली तु प्रायशः सांख्यशास्त्रसदृश्येव । सा चेत्थम्—

यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान्प्रविश्य केदाराकारं गृह्णाति तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते । अयमेव परिणामो वृत्तिरित्यभिधीयते । एवञ्चायं घट इत्यादिप्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकत्र देशे समवधानात्तदुभयावच्छिन्नचैतन्यस्यैकत्वमेव, विभाजकयोरन्तःकरणवृत्तिघटादिविषययोरेकदेशस्थत्वेन भेदाजनकत्वात् । एकदेशस्थितत्वेनोपाध्योर्भेदाजनकत्वं तु सुतरां दृष्टचरमेव । यथा मठघटरूपोपाध्योर्भेदे सत्यपि मठे घटस्य वर्तमानतादशायां न घटावच्छिन्नाकाशस्य मठावच्छिन्नाकाशाद्भेदप्रत्ययस्तयोरेकदेशस्थत्वात्तथैवान्तःकरणवृत्त्यवच्छिन्नचैतन्यविषयावच्छिन्नचैतन्ययोरप्यभेदः सम्भवति ।

एकदेशस्थत्वमात्रस्योपधेयाभेदप्रयोजकत्वोपगमेऽहं पूर्वं सुखीत्यादिस्मृतावतिव्याप्तिवारणाय वर्तमानत्वं विषयविशेषणम् । स्वकीयधर्माधर्मौ यदा शब्दादिना ज्ञायेते तदा तादृशशाब्दज्ञानादावतिव्याप्तिस्तत्र धर्माद्यवच्छिन्नतद्वृत्त्यवच्छिन्नचैतन्ययोरेकत्वादतो योग्यत्वमपि विषयविशेषणम् ।

पर्वतो वह्निमानित्यादौ च पर्वतांशे वह्न्यंशे चान्तःकरणवृत्तिभेदाङ्गीकारेण पर्वतांशेऽपरोक्षत्वम् वह्न्यंशे च परोक्षत्वं, तत्तद्वृत्त्यवच्छेदकभेदेन परोक्षत्वापरोक्षत्वयोरेकत्र चैतन्ये वृत्तावविरोधात् ।

विषयेऽपरोक्षत्वव्यवहारनियामकन्तु स्वाकारवृत्त्युपहितप्रमातृचैतन्यसत्तातिरिक्तसत्ताकत्वशून्यत्वे सति योग्यत्वम्—धर्माधर्मयोः प्रत्यक्षविषयत्ववारणाय योग्यत्वमिति विषयविशेषणम् पूर्ववत् । रूपी घट इत्यादिप्रत्यक्षस्थले संख्यापरिमाणादेः प्रत्यक्षविषयत्ववारणाय सत्यन्ते स्वाकारवृत्त्युपहितेति प्रमातृविशेषणम् । तथा च रूपसंख्यादीनामेकदेशस्थत्वेन तदवच्छिन्नचैतन्यानामैक्याद्रूपावच्छिन्नचैतन्यस्य प्रमात्रभेदे संख्याद्यवच्छिन्नस्यापि प्रमात्रभिन्नतया संख्याद्यवच्छिन्नचैतन्यसत्ताया रूपप्रमातृचैतन्यसत्तातिरिक्तत्वाभावेऽपि न संख्यादीनां रूपाद्याकारवृत्तिदशायां प्रत्यक्षविषयत्वं, तदानीं संख्याद्याकारवृत्त्यभावेन संख्यादिसत्तायाः संख्याद्याकारवृत्त्युपहितप्रमातृचैतन्यसत्तातिरिक्तत्वात् । बाह्यविषये वस्तुतः प्रमात्रभेदस्य 'अहमिमं पश्यामी'ति भेदानुभवबाधितत्वात् प्रमात्रभिन्नत्वं परित्यज्य प्रमातृचैतन्यसत्तारिक्तसत्ताकत्वशून्यत्वपर्यन्तानुधावनम् । तादृशशून्यत्वं ब्रह्मचैतन्ये स्वत एवास्ति चैतन्यांशस्यैकत्वेनैवैकसत्ताकत्वात्, बाह्ये घटादौ त्विन्द्रियसन्निकर्षादिबलेनान्तःकरणं यदा बहिर्निःसरति तदा विषयचैतन्यप्रमातृचैतन्ययोरेकदेशस्थत्वेनैक्यात्स्वावच्छिन्ने ब्रह्मचैतन्येऽध्यस्तं घटादिकं प्रमातृचैतन्य एवाध्यस्तं भवति, आरोपितस्याधिष्ठानभूतविषयचैतन्याभिन्नप्रमातृचैतन्यसत्तामात्रत्वात्, आरोपितपदार्थस्याधिष्ठानसत्तारिक्तसत्ताया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनङ्गीकारात् । अत एवानुमित्यादिस्थले न वह्न्यादेः प्रत्यक्षविषयत्वं, तत्रान्तःकरणस्य बहिर्निर्गमनाभावाद् विषयचैतन्यप्रमातृचैतन्ययोरेकत्वाभावेन प्रमातृचैतन्यस्याधिष्ठानत्वाभावाद् वह्न्यादेस्ततः पृथक्सत्ताकत्वात् ।

अथवाऽनुगतमेवापरोक्षत्वम् निवृत्ताज्ञानत्वरूपं लाघवात् । तच्च चितोऽज्ञानविषयताशून्यत्वे सति चिद्रूपत्वम् । दृश्यानां घटादीनान्त्वज्ञानविषयतानवच्छेदकत्वे सति दृश्यत्वम् 'आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवले'[1]ति संक्षेपशारीरकानुसारेण सिद्धान्ते स्वीकारात् स्वतोऽज्ञानाविषयस्य घटादेः सर्वदाऽपरोक्षत्ववारणायाद्ये चिद्रूपत्वमिति । तत्राज्ञाननाशकवृत्तेः पूर्वमपि साक्षिणोऽपरोक्षव्यवहारवारणायाज्ञानविषयताशून्यत्वे सतीति विशेषणम् । विकल्पोल्लिखिते तुच्छेऽतिव्याप्तिवारणाय द्वितीये (दृश्यापरोक्षलक्षणे) दृश्यत्वमित्युक्तम् । तत्रैव सत्यन्तमाकाशादेः प्रत्यक्षविषयत्ववारणाय ।

ज्ञानस्यापरोक्षत्वं तूपर्युक्तापरोक्षत्वयोरन्यतराश्रयविषयकत्वम् ।

अयमत्र विशेषः– चिदचितोर्द्वयोरपि पूर्वोक्ताज्ञानशून्यत्वं तु प्रमासामग्र्यैव प्रमाकाले भवति 'तरति शोकमात्मविद्[2], 'विद्वान्नामरूपाद् विमुक्त[3]' इत्यादिश्रुतिभिर्ज्ञानसमकालं मुक्त इति वृद्धोक्तिभिश्चाज्ञाननाशस्य ज्ञानसमकालिकत्वप्रतिपादनेन प्रमासामग्र्या एवाज्ञाननाशकत्वज्ञापनात् । सा च सामग्री घटादिप्रत्यक्षे इन्द्रियसन्निकर्षादिरूपा । आत्मसाक्षात्कारे तु योग्यत्वंपदार्थभिदपरशब्दादितात्पर्यनिश्चयरूपा । प्रमया तु प्राकट्यं विषयस्येति न प्रमाया अपि वैयर्थ्यमिति ।

तत्त्वमसीत्यादौ वाक्यादप्यपरोक्षानुभवप्रकारः

अयमत्रापरो विशेषः—ज्ञानस्य वस्तुमाहात्म्यकृतमेव परोक्षत्वमपरोक्षत्वं वा, न तु प्रमास्वभावकृतमित्येवाङ्गीकर्त्तव्यम्; अन्यथा श्वैत्याद्यनुमानादिना पीतः शङ्ख इत्यादिभ्रमनिवृत्तेरदर्शनेन परोक्षज्ञानस्य चापरोक्षाध्यासाप्रतिक्षेपकत्वस्यावश्याङ्गीकर्त्तव्यत्वात्, शाब्दसामग्र्याश्च परोक्षज्ञानजननस्वाभाव्यात् तत्त्वमस्यादितो ब्रह्मात्मैक्यसाक्षात्कारो न स्यात् । अत एव 'प्रज्ञानं ब्रह्म[4]', 'तत्त्वमसि[5]' 'अयमात्मा ब्रह्म[6]' इत्यादिवाक्यतो दशमस्त्वमसीत्यादिवाक्यवदपरोक्षमेव ज्ञानं जायते तत्प्रतिपाद्यस्य ब्रह्मणो 'यत्साक्षादपरोक्षाद् ब्रह्म[7]' तिश्रुतेः स्वतोऽपरोक्षत्वावधारणात् ।

ननु दशमस्त्वमसीत्यादिवाक्यघटकतत्तत्पदार्थोपस्थितौ मानसः संसर्गबोधो, वाक्यसहकृतेन चक्षुषैव वा साक्षात्कार इति रीत्याऽपरोक्षबोधसम्भवे वाक्यजन्यसाक्षात्काराभ्युपगमो निरर्थक इति चेन्न । तथा सति आद्यपक्षे सर्वस्मिन्नपि वाक्ये मानससंसर्गबोधस्यैव सम्भवेन शब्दप्रमाणमात्रोच्छेदापत्तिः स्यात्, द्वितीये तु वाक्यसत्त्वे ज्ञानं जायतेऽसत्त्वे तु न जायत इत्यन्वयव्यतिरेकविरोधप्रसङ्गः ।

---

१ संक्षेपशारीरकम् ।१।३१९।
२ छान्दोग्योपनिषद् ।७।१।३।
३ मुण्डकोपनिषद् ।३।२।८।
४ ऐतरेयोपनिषद् ।५।३।
५ छान्दोग्योपनिषद् ।६।८।७।
६ बृहदारण्यकोपनिषद् ।२।५।१९।
७ बृहदारण्यकोपनिषद् ।३।४।१।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न चालोकादेरिवान्वयव्यतिरेकौ न कारणत्वसाधकाविति वाच्यम्; तथा सति व्यासङ्गदशायां सत्यपीन्द्रियसम्बन्धे प्रत्यक्षादर्शनान्मन एव सर्वत्र प्रमाणं, चक्षुरादि तु सहकारिकारणमिति कल्पनायाः सम्भवेन मनोभिन्नप्रमाणमात्रोच्छेदापत्तिः स्यात् । अत एव दशमस्त्वसि, तत्त्वमसीत्यादौ शब्द एव करणं तज्जन्यञ्चापरोक्षमेव, तदनन्तरं साक्षात्करोमीति प्रतीतेः सर्वजनानुभवसिद्धत्वात् ।

अत एव 'इन्द्रियकरणकं ज्ञानं प्रत्यक्षमिति' प्रत्यक्षलक्षणानुरोधाद् भावनासहकृतेन मनसैवापरोक्षप्रमेति स्वीकर्त्तव्यम्, वाक्यात्तु प्रथमतः परोक्षप्रमैव भवति करणस्वाभाव्यादित्याक्षेपोऽपि निरस्तः इन्द्रियकरणकमेव ज्ञानं प्रत्यक्षमिति प्रत्यक्षलक्षणानुरोधिनो मनसैव तस्यापरोक्ष्याभ्युपगमे 'यन्मनसा न मनुत[१]' इति श्रुतिविरोधः, भावनाजन्यत्वे तस्य कामशोकभयोन्मादादिजन्यव्यवहितयोषिदादिसाक्षात्कारस्येवाप्रामाण्यप्रसङ्गश्च ।

ननु भावनाजन्यत्वं न तत्राप्रामाण्यप्रयोजकं किन्तु बाधितविषयत्वम्, शुक्तिरजतादिभ्रमेषु भावनां विनापि जातेषु बाधितविषयत्वेनैवाप्रामाण्यनिश्चयाद्, ब्रह्मसाक्षात्कारे त्वबाधितविषयत्वात्प्रामाण्यं भावनाजन्यत्वेऽपि न व्याहन्यते, नापि भावना सर्वत्र दोषो येन भावनारूपदोषजन्यत्वेनाप्यप्रामाण्यं स्यादिति चेत् । सत्यम् । तथापि परोक्षज्ञानमूलकभावनाया अपरोक्षधीजनकत्वासामर्थ्यस्य वह्न्यनुमितिमूलकभावनायां दृष्टत्वान्न भावनाशतकोटिभ्योऽपि साक्षात्कारो भवितुमर्हति किन्तु शब्दादेव, तदर्थस्यापरोक्षत्वादिति ।

इदमत्रावधेयम्—योगिनां मते तु श्रुतिभिरेवावगतस्य भावनासहकृतेन मनसाऽऽपरोक्ष्यम् 'मनसैवेदमाप्तव्यमि'तिश्रुतिस्वारस्यात् । न च 'यन्मनसा न मनुत' इति श्रुतिविरोधो भावनां विना मनोगम्यं न भवतीति तदर्थत्वात् । अन्यथा औपनिषदत्वमपि न स्यात् 'यतो वाचो निवर्त्तन्त' इतिश्रुतेः । तस्माद्यथा औपनिषदत्ववागगम्यत्वयोर्द्वयोरप्यविरोधाय शक्त्या वाचो निवर्त्तन्ते इत्येवार्थो न तु सर्वथा निवर्त्तन्त एवेति, तथा प्रकृतेऽपि 'यन्मनसा न मनुते' 'मनसैवानुद्रष्टव्यमि'तिद्वयोरविरोधाय भावनां विना न कदाचिन्मनसा जानाति भावनायान्तु जानात्येवेत्यर्थोऽङ्गीकार्यः । एवमभ्युपगमे परोक्षत्वापरोक्षत्वयोः प्रमाणस्वभावकृतत्वेऽपि न हानिः, मनोरूपेन्द्रियजन्यत्वेन ब्रह्मज्ञानस्यापरोक्षत्वाभ्युपगमात् । एवं भावनाजन्यत्वेन व्यवहितयोषिदादिसाक्षात्कारवन्नाप्रामाण्यमपि अबाधितार्थकत्वेन प्रामाण्यसम्भवात् ।

अयमत्र निष्कर्षः—शाब्दापरोक्षत्ववादिमते 'मनसैवेदमाप्तव्यमि[२]'त्यत्र कर्तृत्वं तृतीयार्थो, न करणत्वं, 'यन्मनसा न मनुत[३]' इति श्रुतिविरोधात्, औपनिषदसमाख्याविरोधाच्च । तथा च साधनचतुष्टयसम्पादनानन्तरं श्रुतिकरणकमनःकर्तृकदर्शनविषय आत्मेत्यर्थस्तन्मते ।

१ केनोपनिषद् ।१।५।

२ कठोपनिषद् ।४।११ ।

३ केनोपनिषद् ।१।५ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योगजापरोक्षवादिमते तु शब्दात् परोक्षम्, अपरोक्षं तु भावनासहकृतान्मनस एव, केवलमनसो व्यभिचारित्वेन करणत्वासम्भवेऽपि योगसहकृतस्यायोग्यपरमाण्वादिप्रत्यक्ष इव कारणत्वे बाधकाभावात्, 'निदिध्यासितव्य[1]' इत्यादिना भावनायाः कारणत्वप्रतिपादनाच्च । तत्र प्रथममते श्रवणमनननिदिध्यासनानां क्रमेणाप्रामाण्यशंकाऽसम्भावनाविपरीतभावनानां निवृत्तिः फलम् । द्वितीयमते तु ज्ञानं प्रत्येव द्वारद्वारिभावेन हेतुत्वमिति विवेकः ।

न्यायमतेनानुमानविभागनिरूपणम्

वैशेषिकशास्त्रे स्वार्थपरार्थभेदेन, दृष्टसामान्यतोदृष्टभेदेन चानुमानस्य द्वैविध्यम् पूर्वं प्रदर्शितम् । न्यायसूत्रे तु 'अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतो दृष्टं च[2]' इत्यादिना तस्य त्रैविध्यं स्वीक्रियते ।

पूर्ववत्—यत्र कारणदर्शनेन कार्यस्यानुमितिर्भवति तत्पूर्ववदित्युच्यते यथा वृष्ट्युन्मुखेन मेघेन भविष्यत्कालिकी वृष्टिरनुमीयते । अत्र मेघोन्नतिः कारणम्, वृष्टिश्च कार्यम् ।

शेषवत्—यत्र कार्यदर्शनेन कारणविषयकानुमितिर्भवति तच्छेषवदित्युच्यते । यथा धूमरूपकार्येण तत्कारणस्य वह्नेरनुमानम् ।

सामान्यतो दृष्टम्—अन्यत्र दृष्टस्य यदन्यत्र दर्शनं तद्गतिपूर्वकमेव भवति यथा प्रयागे दृष्टस्य चैत्रस्य यत्काश्यां दर्शनं तद्गतिपूर्वकमेव भवति गतिहीनस्य तथादर्शनाभावादिति सामान्यतो दर्शनेनाप्रत्यक्षमनुमीयते । एवमेव चन्द्रस्य पूर्वस्यां दृष्टस्य यत्पश्चिमायां दर्शनं तेन देशान्तरप्राप्ति-दर्शनेनाप्रत्यक्षापि गतिस्तस्यानुमीयते ।

एतत्प्रकारेणानुमानस्य विभागेऽपरितुष्यन्तो भाष्यकाराः पुनः प्रकारान्तरेण विभागं चक्रुः । यथा—

पूर्ववत्—सपक्षे हेतुना साध्यानुमानं पूर्ववत् । यथा सपक्षे प्रत्यक्षभूतयोर्वह्निधूमयोर्मध्येऽन्य-तरस्य धूमस्य दर्शनेनाऽप्रत्यक्षस्य वह्नेरनुमानम् ।

शेषवत्—शेषवन्नाम परिशिष्टे पर्यवसानम् । यथा शब्दस्योपलभ्यमानत्वेन सत्त्वनिश्चये विनाशित्वेन चानित्यत्वनिश्चये जाते, अनित्यत्वेन च सामान्यविशेषसमवायेष्वनन्तर्भावात्, एकद्रव्यत्वेन च द्रव्येष्वनन्तर्भावात्, शब्दान्तरहेतुत्वेन च कर्मस्वन्तर्भावासम्भवात् परिशिष्टे गुणेऽन्तर्भावः शेषवदनुमानेन । तथा चोक्तं भाष्ये—'सदनित्यमित्येवमादिना द्रव्यगुणकर्मणामविशेषेण सामान्यविशेष-समवायेभ्यो निर्मुक्तस्य शब्दस्य तस्मिन् द्रव्यगुणकर्मसंशये न द्रव्यमेकद्रव्यत्वात्, न कर्म शब्दान्तरहेतुत्वात् । यस्तु शिष्यते सोऽयमिति शब्दस्य गुणत्वप्रतिपत्तिः[3]' इत्यन्तेन ग्रन्थेन ।

---

१ बृहदारण्यकोपनिषद् ।४।५।६ ।

२ न्यायसूत्रम् ।१।१।६ ।

३ तत्रैव भाष्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किन्त्वत्र तात्पर्यटीकाकाराः—'इदन्तु परिशेषोदाहरणं नादरणीयम् व्यतिरेकिणो हि नामान्तरमिदं परिशेष इति । एष पुनरन्वयव्यतिरेकी द्रव्यकर्मान्यत्वे सति सदाद्यभेदस्य सपक्षे रूपादौ सत्त्वाद्विपक्षे सामान्यादावभावात् । तस्मादात्मतन्त्रतासाधनं परिशेषोदाहरणं द्रष्टव्यम्[1] ।' इत्यादिना भाष्याभिप्रायं प्रत्यश्रद्धां प्रदर्शयन्ति ।

सामान्यतो दृष्टानुमानं यथा वैशेषिकदर्शनप्रसङ्ग उक्तं तथैवात्रापि स्वीक्रियते ।

उद्योतकराचार्याः पुनः—पूर्वेण तुल्यं वर्तत इति पूर्ववत्क्रियातुल्यतायां च वतिः । यथा पूर्वमन्यतरदर्शनेन सहान्यतरदर्शनं दृष्टान्तधर्मिणि एवं साध्यधर्मिणि (पक्षे) अन्यतरसाधनधर्मदर्शनेनान्यतरस्य साध्यधर्मस्यादर्शनमिति क्रियातुल्यता—इतीममाशयमवलम्ब्य 'पूर्ववदिति वतिप्रत्यय एष, यथा पूर्वं प्रत्यक्षेण दृष्टोऽर्थस्तथानुमानेनापि तमेवार्थं प्रतिपद्यत इति पूर्वदृष्टो भवति, यदितरधर्मदर्शनाद्धर्मिणोऽधिगतिसाधनं तत्सामान्यतो दृष्टं यथेच्छादिभिरात्मा[2]' इत्यादिग्रन्थेन—यत्र साध्यतावच्छेदकहेतुतावच्छेदकरूपपुरस्कारेण व्याप्तिग्रहस्तत्पूर्ववदनुमानं यत्र च साध्यतावच्छेदकव्यापकधर्मपुरस्कारेण व्याप्तिग्रहस्तत्सामान्यतो दृष्टमनुमानम् (यथेच्छादिभिरात्मनि साध्ये इच्छात्वात्मत्वव्यापकाभ्यां गुणत्वद्रव्यत्वाभ्यां व्याप्तिग्रहः)—इति पूर्ववत्सामान्यतो दृष्टयोर्भेदमुरीकुर्वन्तः —इच्छादीनां गुणत्वेन पारतन्त्र्यप्रतिपत्तिः सामान्यतो दृष्टानुमानेन साधनीया, आत्मतन्त्रताप्रतिपत्तिस्तु परिशेषानुमानात् । तथाहि—इच्छादयो गुणाः अनित्यत्वे सत्यस्मदाद्यचाक्षुषप्रत्यक्षत्वाद् गन्धवत्, ते च क्वचिदाश्रिता गुणत्वाद्रूपवदिति सामान्यतो दृष्टानुमानद्वाराऽनिर्धारिते कस्मिंश्चिदाश्रये सिद्धे, न तावत् पृथिव्यादिचतुष्टयगुणाः प्रत्यक्षत्वे सत्यकारणगुणपूर्वकत्वान्नाप्याकाशविशेषगुणाः बाह्येन्द्रियाप्रत्यक्षत्वात्, नापि दिक्कालमनसां गुणाः विशेषगुणत्वादित्येवं प्रसक्तप्रतिषेधे सति इच्छादयोऽष्टद्रव्यातिरिक्तद्रव्याश्रिता इत्यादिरीत्याऽऽत्मतन्त्रतासिद्धिः परिशेषानुमानादूहनीयेति विवेचयन्ति । खण्डयन्ति च भाष्योक्तमादित्यगत्यनुमानस्य सामान्यतो दृष्टोदाहरणत्वम् 'यदि तावद् गतिमानादित्य इति अस्य गतिरनुमीयते । तत्केन प्रतिपद्यते । न ह्यादित्यस्य गतेश्च किञ्चित् सम्बन्धि लिङ्गमस्ति' इत्यादिना 'तस्माद्देशान्तरप्राप्तिदर्शनमयुक्त[3]' मित्यन्तेन ग्रन्थेन । तन्मते 'देशान्तरप्राप्तिमानादित्यः अचलचक्षुषो व्यवधानानुपपत्तौ दृष्टस्य पुनर्दर्शनाविषयत्वाद् देवदत्तवद्' इत्यादिप्रयोगबलेन देशान्तरप्राप्तिमत्त्वमनुमाय पुनश्च तया देशान्तरप्राप्त्या गतिरनुमातुं शक्यते । गतेश्च साक्षादनुमितिविधेयता अनुभवविरुद्धेति ।

न्यायसूत्रवृत्तिकाराः श्रीविश्वनाथपंचाननभट्टाचार्यास्तु—

पूर्ववदित्यन्वय्यनुमानं शेषवदिति व्यतिरेक्यनुमानमिति वार्तिकप्रथमपक्षरीत्या त्रिभागमभ्युपगच्छन्ति ।

---

१ न्यायवार्तिकतात्पर्यटीका ।१।१।५ । २ न्यायसूत्रवार्तिकम् ।१।१।५ ।

३ तत्रैव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकत्राप्युदाहरणे त्रैविध्यं प्रदर्शयितुं शक्यते । तद्यथा—इच्छादिकार्यमाश्रितं कार्यत्वाद् घटवदित्याश्रयमात्रे साध्ये पूर्ववदनुमानम् । प्रसक्तानां शरीरेन्द्रियादीनामाश्रयत्वप्रतिषेधेन विशिष्टाश्रयकल्पने तदेव परिशेषानुमानम् । अनुमेयस्य नित्यपरोक्षत्वात् तदेव सामान्यतो दृष्टञ्च ।

एवञ्चात्रायमभिसन्धिर्वक्तुं शक्यते—यत् परिशेषानुमानप्रवृत्तावन्यः पन्थाः सामान्यतो दृष्टस्यान्यः । तथाहि—इच्छादिकार्यं देहादिविलक्षणाश्रयं शरीरादिषु बाधकप्रमाणोपपत्तौ सत्यां कार्यत्वादिति सामान्यतो दृष्टस्य क्रमः । परिशेषानुमाने तु इच्छादेराश्रयत्वेन प्रसक्तानि शरीरेन्द्रियमनांसि निषिध्यन्ते । दिक्कालादौ च तत्प्रसङ्गो नास्ति । तत्परिशेष्यादात्मैव तदाश्रय इति क्रमः ।

एवं सामान्यतो दृष्टानुमाने साध्यस्य नित्यपरोक्षतैव । न च परिशेषानुमानेऽयं नियमः गोमयाग्निकल्पनादिदर्शनादिति ।

केवलान्वय्यादिभेदेनानुमानभेदः

प्रकारान्तरेणानुमानं त्रिविधम्—केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिसाध्यकभेदात् । उक्तञ्च—

'तच्चानुमानं त्रिविधं[1] ....'

तत्रासद्विपक्षः केवलान्वय्यनुमानम् , यथा घटः प्रमेयो द्रव्यत्वादिति । अत्र प्रमेयत्वरूपसाध्यस्य कुत्रापि व्यतिरेकासत्त्वेनासद्विपक्षत्वरूपं केवलान्वयित्वं वर्त्तते । न चात्र विचारप्रयोजकसंशयानुपपत्तिरिति वाच्यम्; प्रमेयत्वं घटनिष्ठाभावप्रतियोगि न वेत्यादिरूपेण तत्सम्भवात् ।

केवलान्वयित्वं त्वत्र नात्यन्ताभावाप्रतियोगित्वरूपं, संयोगाभावाकाशादावव्याप्तेस्तेषामपि संयोगादिरूपात्यन्ताभावप्रतियोगित्वादभावाभावस्य भावत्वात् । किन्तु भावभिन्नो यो वृत्तिमदत्यन्ताभावस्तत्प्रतियोगित्वरूपम् । आकाशश्च न वृत्तिमान् नापि संयोगाभावो भावरूप इति न काप्यनुपपत्तिः ।

अगृहीतान्वयसाध्यकं केवलव्यतिरेकि । गृहीतान्वयव्यतिरेकिसाध्यकमन्वयव्यतिरेकि ।

उदयनाचार्यास्तु हेतुव्यापकसाध्यसामानाधिकरण्यज्ञानमेवानुमिति हेतुः । व्यतिरेकव्याप्तिज्ञानं तु शशशृंगायमाणमेव, साध्याभावव्यापकीभूताभावप्रतियोगी हेतुरित्याकारकव्यतिरेकसहचारेणाप्यन्वयव्याप्तेरेव गृह्यमाणत्वादित्यनुमन्यन्ते । तथा चैतन्मते व्याप्तिग्राहकसहचारभेदेनैवानुमानभेदोऽभ्युपगन्तुं शक्यते । उपन्यस्तं चैतन्मतं दीधितिकारैः—'व्याप्तिग्राहकसहचारभेदाद्भेदे तु अन्वयसहचारमात्रगृहीतव्याप्तिकत्वं केवलान्वयित्वम्[2]' इत्यादिना ।

---

१ केवलान्वयिप्रकरणे चिन्तामणौ पृ० १ ।

२ केवलान्वयिप्रकरणे दीधितौ पृ० २१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतन्मते वह्निमान् धूमादित्यादावपि यदाऽन्वयसहचारमात्राद्व्याप्तिग्रहस्तदा केवलान्वयित्वमेव, यदा तु तत्रैव व्यतिरेकसहचारमात्रेण व्याप्तिर्गृह्यते तदा केवलव्यतिरेकित्वं, यदा तूभयसहचारेण व्याप्तिर्गृह्यते तदाऽन्वयव्यतिरेकित्वम् । तदुक्तं तर्कालङ्कारैः —

'दशाविशेषे वह्निसाध्यकधूमादिहेतोरपि केवलान्वयित्वमङ्गीकुर्वतामाचार्याणां मतमाहे[१]'ति ।

एवञ्चैतन्मते स्वजनकज्ञानविषयसहचारत्वव्यापकान्वयसहचारत्वकप्रकृतव्याप्तिज्ञानविशेष्यत्वम् । स्वपदं प्रकृतव्याप्तिज्ञानपरम् । प्रकृतहेतुधर्मिकसाध्यसामानाधिकरण्यग्रहाजन्यव्याप्तिग्रहविशेष्यत्वम् केवलव्यतिरेकित्वम् । तदुक्तम्—

'सहचारभेदाद्भेदे व्यतिरेकसहचारमात्रगृहीतान्वयव्याप्तिकत्वं केवलव्यतिरेकित्वम्[२] ।' इति ।

प्रकृतहेतुधर्मिकसाध्यसहचारग्रहजन्यत्वे सति साध्याभावधर्मिकहेत्वभावसहचारग्रहजन्यो यो व्याप्तिग्रहस्तद्विशेष्यत्वमन्वयव्यतिरेकित्वम् । उक्तञ्च—'एवमुभयसहचारगृहीतान्वयव्याप्तिकत्वमन्वयव्यतिरेकित्वं बोध्यमि[३]'ति ।

मणिकारमते तु व्यतिरेकव्याप्तेरप्यनुमित्यौपयिकत्वमङ्गीक्रियते । उक्तं च—'अन्वयव्यरेकव्याप्त्योर्द्वयोरेव ज्ञानमनुमितिहेतुः, न तु व्यतिरेकसहचारान्वयसहचाराभ्यामेवान्वयव्याप्तिमवगत्यैवानुमितिरिति चिन्तामणिकृतां मतमवलम्ब्याहे[४]'ति ।

एतन्मतमनुसृत्य दीधित्याद्यनुसारिकेवलान्वयिलक्षणन्तु प्रकृतहेतुकप्रकृतसाध्यानुमितिजनकीभूतज्ञानविषयव्याप्तित्वव्यापकप्रकृतसाध्यान्वयव्याप्तित्वकत्वमिति । यदि च व्यापकत्वघटितत्वेनैतल्लक्षणे गौरवमनुसन्धीयते चेत्तदा प्रकृतहेतुकप्रकृतसाध्यकव्यतिरेकपरामर्शाजन्यप्रकृतसाध्यकान्वयपरामर्शजन्यप्रकृतसाध्यकानुमितिकरणत्वम् । एतन्मनसि निधायैव तर्कालङ्कारैस्तथैव केवलव्यतिरेकित्वं परिभाषितम्—

'प्रकृतहेतुकप्रकृतसाध्यकान्वयपरामर्शाजन्यप्रकृतहेतुकप्रकृतसाध्यकव्यतिरेकपरामर्शजन्यप्रकृतसाध्यकानुमितिकरणत्वं केवलव्यतिरेकित्वम्[५]' इति ।

स्थलविशेषेषु यत्र हेतुसाध्ययोर्व्यतिरेकपरामर्शोऽप्रसिद्धस्तत्र केवलान्वयिलक्षणे व्यतिरेकपरामर्शाजन्यत्वं, यत्र च तयोरन्वयपरामर्शोऽप्रसिद्धस्तत्र केवलव्यतिरेकिलक्षणेऽन्वयपरामर्शाजन्यत्वं न निवेशनीयम् अन्यथाऽप्रसिद्धिनिबन्धनाऽव्याप्तिः स्यात् ।

मणिकारमतानुसार्यन्वयव्यतिरेकिलक्षणं तु—

'प्रकृतहेतुकप्रकृतसाध्यकान्वयव्यतिरेकोभयपरामर्शजन्यप्रकृतहेतुकप्रकृतसाध्यकानुमितिकरणत्वम्[६]' इत्यादिना तर्कालङ्कारैर्निरूपितम् ।

---

१. केवलान्वयिप्रकरणे जागदीशीटीका पृ० २१ ।
२. तत्रैव पृ० ८७ ।
३. तत्रैव पृ० ८८ ।
४. केवलान्वयिप्रकरणे जागदीशीटीका पृ० ९८।
५. तत्रैव पृ० ९० ।
६. तत्रैव पृ० ९१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भाट्टास्तु—केवलव्यतिरेक्यनुमानं नानुमन्यन्ते तत्स्थानेऽर्थापत्तिस्वीकारात् । तदुक्तम्—

'तं च कौमारिलाः प्रायो नेच्छन्ति व्यतिरेकिणम् ।
तत्स्थाने चाभिषिञ्चन्ति पञ्चमीं प्रमितिं पुनः[1] ।।'

दीधितिकारा अप्यर्थापत्तिमनुमन्यमानाः केवलव्यतिरेक्यनुमानं दूषयन्तीत्यस्य ग्रन्थस्य १०८ पृष्ठे निरूपयिष्यते ।

ते तु पुनः केवलान्वयिनमप्यनुमानं नानुमन्यन्ते । तथा चोक्तम्—'प्रमेयत्वादेश्च घटादिवृत्तित्वं केवलान्वयित्वेन कथञ्चित्तद्धर्मव्यापकत्वेन वानुमेयम् । न ज्ञेयत्वादिहेतुका तदनुमितिरानुभविकी[2]'ति ।

एवञ्चैतन्मतानुसारेण सर्वमप्यनुमानमन्वयव्यतिरेक्येवेति ।

न्यायवार्तिकादौ प्रकारान्तरेणाप्यनुमानं विभक्तम् । तद्यथाऽनुमानं त्रिविधमन्वयि, व्यतिरेकि, अन्वयव्यतिरेकिभेदात् । पुनरन्वयव्यतिरेकि द्विधा--सजातीये सदेव, सदसच्च । तत्रानित्यः शब्दः कृतकत्वादिति सपक्षे सदेव । अनित्यः शब्दोऽस्मदादिप्रयत्ननान्तरीयकत्वादिति सपक्षे सदसत् ।

एवं रीत्याऽन्वयिनोऽपि द्वैविध्यं निर्वक्तुं शक्यते । तत्र सपक्षे सदेव यथा परमाण्वादयः कस्यचित्प्रत्यक्षाः प्रमेयत्वाद् घटवदिति । सपक्षे सदसद् यथा परमाण्वादयः कस्यचित्प्रत्यक्षाः सत्त्वाद् घटादिवदिति ।

एवं व्यतिरेक्येकरूपम् सपक्षाभावात् ।

पुनः पञ्चधा भिन्नमनुमानं त्रैकाल्यभेदेन पञ्चदशधा भवति । तदपि प्रतिपन्नाप्रतिपन्नसन्दिग्धविपर्यस्तपुरुषाणां भेदानुविधानात् षष्टिभेदं पुनस्तस्यान्तर्गणिकतयाऽनन्तभेदं च भवितुमर्हतीति ।

शाब्दप्रमितेः पृथक्त्वनिरूपणम्

गौरस्ति, गामानयेत्यादिशब्दादस्तित्वविशिष्टा गौः, गोकर्मकमानयनं कार्यमित्यादिरूपं यज्ज्ञानं जायते तदेव शाब्दबोध इति कथ्यते । अधुना त्वस्य बोधस्यानुमितिव्यतिरिक्तत्वं व्यवस्थाप्यते ।

तत्र नैयायिकाः—शब्दश्रवणानन्तरं सर्वत्र व्याप्तिज्ञानपुरस्सरमेव बोधो जायत इत्यत्र प्रमाणाभावाच्छाब्दी प्रमाऽन्यैव नानुमितिरिति व्यवस्थापयन्ति । तथा चोक्तं भट्टाचार्यैः—तत्र सम्यग्विना व्याप्तिबोधं शब्दादिबोधत[3]' इति ।

---

१. मानमेयोदयस्थप्रमेयप्रकरणे पृ० ५६ ।
२. केवलान्वयिप्रकरणे दीधितौ पृ० २५३ ।
३. भाषापरिच्छेदे कारिका । १४१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मणिकारास्त्वत्र वैशेषिकैरुपस्थापिते एते पदार्थाः परस्परसंसर्गवन्तः योग्यतादिमत्पदोपस्थापितत्वादित्यनुमाने योग्यताया न लिङ्गविशेषणत्वमुचितम् लिङ्गस्य निश्चितस्यैव निश्चायकतया योग्यतायाश्च संशयेऽपि शाब्दबोधदर्शनात्तस्य बोधस्यानुमितित्वं न कथमपि कल्पयितुं शक्यमित्युरीकुर्वन्ति ।

श्रीजगदीशतर्कालङ्कारास्तु—गौरस्ति, गामानयेत्यादिसाकांक्षशब्दजन्यबोधानन्तरमरितत्वेन गां शृणोमीत्येवानुव्यवसायो भवति न त्वनुमिनोमीति । तादृशानुव्यवसायबलेन प्रमित्यन्तरत्वास्वीकारेऽनुमितेरप्यपलापापत्तेः; पर्वतो वह्निमानित्यादिस्थलेऽपि वह्निं जानामि, पर्वतं जानामि, न तु वह्निमत्त्वेन पर्वतं जानामीत्यस्य सुवचत्वात् । किञ्च प्रत्यक्षानुमित्योरसति बाधके पूर्वपरामृष्टस्य वस्त्वन्तरस्यापि भानं भवति, न त्वेवं शाब्दबोधस्थले । तथा च—

'सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमा[1]' ।।—

इत्यादिरीत्या तस्य प्रमित्यन्तरत्वं स्थिरीकुर्वन्ति ।

शाब्दबोधस्यानुमित्यात्मकत्वे यथा अनुमितिस्थलेऽसत्यां सिषाधयिषायां सिद्धिसत्त्वेऽनुमितिर्न भवति तदभावे तु भवति तथैव शाब्दबोधस्थलेऽपि कल्पनाप्रसङ्गः । न हि सा तत्रानुभविकीत्यपि विद्वद्भिः पर्यालोचनीयम् ।

अथ यथा गृहीतसम्बन्धस्य लिङ्गदर्शनानन्तरं व्याप्त्यनुस्मरणं ततोऽतीन्द्रियार्थस्यानुमितिस्तथैव शब्दश्रवणात्समयानुस्मरणे सति परामर्शज्ञानं, तस्माच्च परोक्षार्थप्रतिपत्तिर्भवतु । तथाहि—अयं गौरस्तित वान् स्वधर्मिकास्तित्वान्वयबोधानुकूलाकाङ्क्षाश्रयपदस्मारितत्वाद् घटवद्, अस्तिपदसमभिव्याहृतगोःपदस्मारितत्वाद्वा चक्षुर्वत् । न हि नैयायिकादयोऽपि पदानामेकवाक्यतापन्नत्वरूपसमभिव्याहृतत्वनिश्चयं विनैवान्वयबोधं स्वीकुर्वन्ति । तथा च क्वातिरिक्ता शाब्दी प्रमेति चेन्न । पदस्मारितत्वाभावग्रहकालेऽपि गौरस्तीतिशब्दजन्यस्यास्तितावती गौरिति बोधस्यानुभवसिद्धत्वेनोक्तपरामर्शाभावकालीनोत्पन्नज्ञानस्यानुमितावन्तर्भावासम्भवात् । स्वरूपसत्या एव पदजन्यपदार्थस्मृतेरन्वयबुद्धावुपयोगेन तस्या ज्ञानस्यानुपयोगात्, पदैरस्मारितस्यापि तत्स्मारितत्वग्रहदशायामन्वयधीप्रसङ्गाच्च ।

अपि च धूमादिवच्छब्दोऽर्थज्ञाने न स्वाभाविकं सम्बन्धमपेक्षत इति पूर्वमुक्तमेव । स तु पुरुषेच्छासम्पादितसमयापेक्ष एवार्थप्रतिपादकः । स्वाभाविकसम्बन्धे हि विनापि संकेतं म्लेच्छादिशब्दश्रवणादर्थप्रतिपत्तिः स्यात् । संकेतापेक्षस्य त्वर्थप्रतिपादकत्वे स एवास्त्वलं नित्यसम्बन्धेन । तथा च शब्दानां समयवशेनार्थप्रतिपादकत्वादुपपन्नं शाब्दबोधस्यानुमित्यपेक्षया प्रमित्यन्तरत्वमिति ।

नापि गौःपदमस्तित्ववद्गोगोचरज्ञानपूर्वकमस्तिपदसाकांक्षगोःपदत्वात् । यन्नास्तित्ववद्गोगोचरज्ञानपूर्वकं न तदस्तिपदसाकांक्षगोःपदम् यथा आकाशपदमितिपदपक्षकानुमानं शाब्दप्रमितेरनुमितित्व-

---

१. शब्दशक्तिप्रकाशिकायां कारिका । ३ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यवस्थापनेऽलम्; अस्तित्ववद् गोविषयकज्ञानपूर्वकत्वाभावनिश्चयदशायामुत्पन्नस्य गवादिमुख्यधर्मिकास्तित्वाद्यन्वयबोधस्य सर्ववादिसिद्धत्वात् । तदानीमनुमितित्वकल्पने तु बाधनिश्चयदशायां तादृशबोधानुपपत्तेः ।

किञ्च घटादन्य इत्यादौ घटप्रतियोगिकान्यत्वादिप्रकारेण निरवच्छिन्नविशेष्यताको घटान्यस्य बोधः सर्वजनानुभवसिद्धः । स च वैशेषिकमतेऽनुपपन्नो भेदो घटप्रतियोगिताकस्तत्साकांक्षान्यपदस्मारितत्वादित्यादिरीत्यैव तत्रानुमितेर्वाच्यत्वेन पक्षविधयाऽन्यस्य भानेऽप्यन्यत्वप्रकारेणान्यस्य तत्राभानात् निर्धर्मितावच्छेदककानुमितेरनभ्युपगमात् । नैयायिकादिमते तु सूपपन्नः, घत्वावच्छिन्नविषयतानिरूपित—अत्वावच्छिन्नविषयतेत्यादिरूपानुपूर्वीमत्पदज्ञानत्वेनैव तन्मते तं प्रति कारणत्वस्याभ्युपगम्यमानत्वेन तस्य चोपपत्तौ बाधकाभावात् ।

'श्रोतव्यो मन्तव्य[१]' इत्यादिश्रुतौ श्रवणमननयोः पृथग्विधानश्रवणादपि शाब्दप्रमितेरनुमितितोऽन्यत्वमवसीयते ।

न्यायकन्दलीकारेण तु पुरुषः सास्नादिमदर्थविवक्षावान् गोशब्दोच्चारणकर्तृत्वादित्यनुमानमागमस्यानुमानेऽन्तर्भावप्रदर्शनार्थमुपन्यस्तम् । तत्रेत्थं **परामृश्यते**—गोशब्दोच्चारणकर्ता सर्वो धर्मी, केवलं लौकिकशब्दोच्चारणकर्ता वा पक्षत्वेन विवक्ष्यते ? आद्ये 'गवा यजेते'त्यादिवैदिकगोशब्दाध्येतृपुरुषभागे बाधः स्याद् उपनीतमाणवकानामगृहीतसङ्गतिकानां ककुदादिमदर्थविवक्षया गोशब्दप्रयोगायोगात् । द्वितीयेऽपि तत्रैवानैकान्त्यम् पूर्वोक्ताध्येतृपुरुषे गोशब्दोच्चारणकर्तृत्वसत्त्वेऽपि सास्नादिमदर्थविवक्षाभावात् । उभयत्रापि 'गोरेवायं पुमानि'ति पुंसि मूढत्वविवक्षया गोशब्दोच्चारणकर्त्रा व्यभिचारश्च ।

अपि च गोशब्दोच्चारणकर्तृत्वेन पदार्थविवक्षा अनुमेया, यद्वा पदार्थानां परस्परसंसर्गोऽप्यनुमेयः । नाद्यः, वैयर्थ्यात्, नहि भूयो भूयः समधिगतं पदार्थमात्रं केचिद्बुभुत्सन्ते प्रतिपिपादयिषन्ति वेति । न द्वितीयः, संसर्गे तु बुभुत्सिते अभिप्रायमात्रस्यानैकान्त्यात्, यद्याप्ताभिप्रायो लिङ्गं तर्हि तत्र विशेषणीभूतमाप्तत्वं कीदृशम्? अन्यथावगतस्यान्यथा तदूहो विप्रलम्भः, तद्राहित्यं हि आप्तत्वम्; इति चेत्; तर्हि तदाप्तत्वं किं सर्वस्मिन् विषये, उत यत्र कुत्रापि, विवक्षितविषये वा । नाद्यः, असर्वज्ञानां सर्वविषयकाध्यवसायासम्भवात्, भ्रान्तेः पुरुषधर्मत्वात् । न द्वितीयः, यत्र कुत्रचिदाप्तत्वस्यानाप्तसाधारण्यात् । नापि तृतीयः, प्रथमत एव ससर्गाग्रहे विवक्षितसंसर्गविशेषविषय आप्तत्वस्य दुर्ग्रहत्वात् । अनधिगते तु विशेषणे विशिष्टबुद्ध्युत्पादायोगात् ।

श्रीमदुदयनाचार्यैस्तु किरणावल्यामागमस्यान्तर्भाव इत्थं प्रदर्शितः—एते पदार्थाः मिथः संसर्गवन्तः आकांक्षादिमद्भिः पदैः स्मारितत्वाद् गामभ्याजेति पदार्थवत् । न च विशेषासिद्धिरूपो दोषः, संसर्गस्य संसृज्यमानविशेषादेव विशिष्टत्वात् । यद्वा एतानि पदानि स्मारितार्थज्ञानपूर्वकाणि आकांक्षादिमत्त्वे सति तत्स्मारकत्वाद् गामभ्याजेतिपदवत् । न च ज्ञानस्यानुमेयत्वे वाक्यार्थः संसर्गो

१. वृहदारण्यकोपनिषद् । २।४।५, ४।५।६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न सिद्धयेदिति वाच्यम्; ज्ञानावच्छेदकतयैव तत्सिद्धेः । न च ज्ञानावच्छेदकत्वेन संसर्गसिद्धावपि पदार्थविशेषासिद्धितादवस्थ्यम्, तस्य च संसृज्यमानोपहितस्यैवावच्छेदकत्वाद् विशेषाप्रतिलम्भाभावात् (पदार्थांशे ज्ञानमनुवाद इत्यभ्युपगमाद्) इति ।

एतदपि न विचारसहम् । तथाहि—एते पदार्था मिथः संसर्गवन्त इत्यनेन संसृष्टा एवेति नियमो वा साध्यः सम्भावितसंसर्गत्वं वा साध्यम् । तत्र नाद्यो भवितुमर्हति, अनाप्तोक्तपद-कदम्बस्मारितैरनैकान्त्यात् । न चाप्तोक्त्या विशेषणान्न दोष इति वाच्यम्; विशेषणीभूताप्तत्वस्य पूर्वोक्तरीत्याऽनिरूपणात् । अथागमप्रामाण्याभ्युपगमवादेऽपि किं शब्दमात्राद्विवक्षितार्थप्रतिपत्तिः अथवा यथादृष्टवादित्वरूपाप्तोक्तत्वादिसहिताच्छब्दविशेषात् । नाद्यः, अनाप्तवाक्ये व्यभिचारात् । नापि द्वितीयः 'आप्तोदेश आगम' इति शब्दलक्षणस्य पर्यवसितत्वादाप्तत्वसिद्धौ तदुपदेशरूपः शब्दः प्रमाणम्, ततश्च तदुपदिष्टार्थसिद्धौ तद्विषयमाप्तत्वं सिद्धयेदिति परस्पराश्रयत्वप्रसक्तिरिति चेन्न । शब्दस्य स्वतः प्रामाण्यस्वीकारेण विकल्पानवकाशात् । ईश्वरप्रणीतत्वादपौरुषेयत्वाद्वा न जायत एवाप्रामाण्यशङ्का । पुरुषवचनानामपि स्वार्थप्रत्यायने नाप्तोक्तत्वापेक्षा अनाप्तवाक्यादपि संसर्गावगमात् । कथमपरथा ततः प्रवर्तेत । एवमनभ्युपगमे द्रविडादिवचनेष्विव गौडदेशीयस्य प्रवृत्तिसंकल्पोऽपि न स्यात् । किन्तु अनाप्तसम्बन्धः प्रामाण्यविरोधी, तदपसारणायाप्तत्वावधारणम् । अवगते संसर्गे तद्विषयं प्रमाणान्तरं सुकरमेव । तथाहि—अयमस्मिन्नर्थे न मां प्रति विप्रलम्भवान् मम हितकारित्वान्मदीयपित्रादिवत् । नापि प्रमाददान् भूयो भूयः पर्यालोच्य वक्तृत्वात् । नाप्यशक्तः सम्यगेव शब्दानामुच्चारयितृत्वात् । नाप्यज्ञानवान् मिथ्याज्ञानवान् वा एतद्विषयकज्ञानपुष्कलहेतु-मत्त्वादित्याद्यनुमानैः सुकरमेवाप्तत्वावधारणमिति ।

अथैवं यथाऽऽप्तोक्तत्वेनाविशेषिताच्छब्दात्संसर्गावबोधस्तथैव लिङ्गादपि भवत्विति चेन्न; लिङ्गस्याविदितत्वाऽव्यभिचारमनिश्चायकत्वात् अन्यथा सर्वेष्वनुमानेष्वव्यभिचारपरिच्छेदवैयर्थ्यप्रसङ्गाद् विपक्षवाधकोपन्यासोपाधिनिरासादिना आभासानाभासविवेचनवैयर्थ्यप्रसङ्गाच्च ।

सम्भावितसंसर्गत्वं साध्यमिति द्वितीयपक्षोऽप्ययुक्तः; योग्यतामात्रसिद्धावपि संसर्गानिश्चयात्, वाक्यस्य च संसर्गनिश्चयार्थं प्रयोगात् । योग्यतामात्रस्य च प्रागेव सिद्धेः । अन्यथा तदसिद्धावा-सन्नसाकांक्षपदस्मारितत्वादित्येव हेतुः पर्यवस्येत, तथा च 'अग्निना सिञ्चे'दित्यादिस्मारितैरनैकान्तिकता, तेषां सर्वदा संसर्गायोग्यत्वात् ।

उदयनाचार्याणां द्वितीयमप्यनुमानमयुक्तम् । तत्र संसर्गज्ञानपूर्वकत्वे यथाश्रुते साध्ये श्रोतुः संसर्गभ्रान्तेरप्यापत्तिः, संसर्गज्ञानमात्रस्यानुमितस्याप्ययथार्थत्वसम्भवात् । संसर्गप्रमितिपूर्वकत्वे तु साध्ये विवक्षिते हेतोर्व्यभिचारतादवस्थ्यम्, अनाप्ताभिहितानामपि पदानामाकांक्षादिमत्त्वे सति स्मारकत्वात् । न च तेषां संसर्गप्रमितिपूर्वकत्वम् ।

यत्तु न्यायलीलावत्याम्—शब्दस्तु न मानान्तरम्, पदानि स्मारितार्थसंसर्गविज्ञप्तिपूर्वकाणि योग्यतासत्तिमत्त्वे सति संसृष्टार्थपरत्वात् 'गामभ्याज' इति पदकदम्बवदित्यनुमानादेव साध्यसिद्धेः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न च निराकाङ्क्षेण व्यभिचारः, तत्र संसृष्टार्थपरत्वस्यैवाभावात् । न च तात्पर्यस्याज्ञातस्य सत्तामात्रस्य प्रतीतिहेतौ न हेतुविशेषणत्वम्, ज्ञातस्यैव हेतुत्वात्, इतरथा तदसिद्धिप्रसक्तेरिति वाच्यम्, तात्पर्यस्य च ज्ञातस्यार्थप्रतीतिहेतुत्वात्, 'श्वेतो धावती'ति लक्षणायां तथा दर्शनात् । संसृष्टार्थपरत्वं चानन्यथासिद्धसम्भूयोच्चारणवशादेवावधार्यते इत्युक्तम् ।

तदपि चिन्त्यम्—विज्ञप्तिपूर्वकाणीति विज्ञानमात्रपूर्वकत्वे साध्ये श्रोतुर्विशिष्टार्थासिद्धिः, ज्ञानस्य भ्रान्तिरूपस्यापि सम्भवात् । प्रमितिपूर्वकत्वेऽनाप्तवाक्यस्थपदेषु व्यभिचारप्रसक्तिरित्युदयनमतनिरासरीत्यैव तन्निरासः । 'धावु गतिशुद्ध्योरि'तिस्मरणात् 'श्वेतो धावती'त्यत्र इतः शुनको गच्छतीति वा, श्वित्री (श्वेतकुष्ठवान्) निर्णिनेक्तीति (शोधयतीति) वाऽर्थ इति संशयेऽन्यतरतात्पर्यज्ञानेन, 'गङ्गायां घोष' इत्यत्र गङ्गापरत्वज्ञानेन च वाक्यार्थनिश्चयदर्शनात् तात्पर्यं ज्ञातमर्थप्रतीतिकारणमिति हेतुविशेषणत्वेनोपात्तम् । एवञ्च विशेषणासिद्ध्या विशिष्टहेतोरसिद्धिः । तथाहि—संसृष्टार्थेऽवगते तात्पर्यमवगम्यते, अनवगते वा ? नाद्यः, तस्यानुमानप्रवृत्त्युत्तरकालीनतया पूर्वं तदासिद्धिः, सिद्धौ वानुमानवैयर्थ्यात् । द्वितीये तु तात्पर्यं नावगन्तुं शक्येत अवच्छेदकावगमव्यतिरेकेणावच्छिन्नावगमायोगात् । संसृष्टार्थपरत्वविशेषणपरित्यागे 'अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्' इत्यादिनिराकाङ्क्षपदैर्व्यभिचार इति ।

अयं गोशब्दः ककुदादिमदर्थवान् गोशब्दत्वात् पूर्वोपलब्धैवंविधगोशब्दवदित्यप्यसाधीयः शब्दस्यार्थेन सह संयोगसमवायतादात्म्यविशेषणविशेष्यभावज्ञाप्यज्ञापकभावरूपसम्बन्धेषु कस्याप्यसम्भवेन मतुवर्थस्यासम्भवात् । न चार्थः शब्दस्य विषयतया विशेषणमस्तीति वाच्यम्; अनुमानविधयैव प्रामाण्यवादिनस्तव मते तज्ज्ञाप्यत्वमन्तरेण तद्विषयत्वायोगात् ।

यत्तु शब्दोऽनुमानं सम्बन्धावगमे सति तेन सम्बन्धेनार्थप्रतिपादकत्वाद् धूमवद् इति वृद्धवैशेषिकप्रयोगः, सोऽप्ययुक्तः प्रतिभाति, विशेषणासिद्धत्वात् । सङ्गतिसंस्कारसहकृतप्रतीयमानशब्दस्यैवार्थप्रतिपादकत्वात् । तथाहि—संस्कारवतः पुंसः शब्दज्ञानमर्थज्ञानकारणम् न तु स्वसम्बन्धितया ज्ञायमानशब्दः । सम्बन्धिन्यर्थेऽनवगते तत्सम्बन्धावगमार्थं शब्दप्रयोगे वार्थसिद्धौ शब्दवैयर्थ्यादिति ।

लौकिकवाक्यं मूलवाक्यापेक्षप्रमाणानुवादः वेदवाक्यं तु स्वतः प्रमाणमित्यर्द्धशब्दप्रामाण्यवादिप्राभाकरमतम्

प्राभाकरैकदेशिनस्तु—वैदिकवचसां मानान्तरमनपेक्ष्य स्वार्थबोधकत्वम्, अपौरुषेयत्वात् । लौकिकवाक्यानां तु विप्रलिप्सादोषभ्रमाशङ्कितप्रमादनिदानत्वसम्भवेनानृतभूयिष्ठत्वसम्भवाद्दोषशंकाकलंकितशक्तीनामनपेक्ष्य मूलमानं नाभिधेयबोधकत्वम् । स्वगोचरप्रवृत्तप्रमाणपुरस्सररचनत्वनिश्चये तु स्वाभिधेयबोधकत्वम् । तदुक्तं श्रीशालिकनाथैः :—

'शंक्यमानायथार्थत्वरचनं तेन पुंवचः ।
श्रुतमात्रकमेवार्थे न तावन्निश्चयावहम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यावद्वक्तुरविज्ञातं पूर्वभाविप्रमान्तरम् ।
विवक्षितार्थविषयमिन्द्रियार्थनिबन्धनम्[1] ॥' इति ।

न च वाक्यस्य स्वगोचरप्रतिपादकत्वे याऽनुपपत्तिः, सा वक्तृसमवायिज्ञानानुमानलिङ्गत्वेऽपि तुल्येति वाच्यम्; आप्तवाक्यस्य वक्तृज्ञानानुमाने लिङ्गत्वात् । तथाहि—त्रिविधा एव प्रयोक्तारो भवन्ति—निरवद्यत्वेन विदिताः, सावद्यत्वेन विदिताः, अनिरूपितोभयरूपाश्चेति । तत्र प्रथमकल्पे वक्तुर्वचनश्रवणसमनन्तरं यावद् एतद्वाक्यप्रयोक्ताऽपमाशयादिदोषरहितः, देवदत्तत्वात् पूर्वकालविशिष्ट-देवदत्तवदिति, एतद्वाक्यं निरवद्यपुरुषप्रयुक्तम् तत्पुरुषवाक्यत्वात् प्राक्तनतदर्थकवाक्यवदिति वा नानुमीयते तावद्यथार्थतात्पर्यनिश्चयो न भवति, अयोग्यपदसन्निधानशंकापि नापैति । न च आशयादिदोषरहितवाक्यस्य प्रयोक्तृस्वभावावगममनपेक्ष्य बोधकत्वं स्यादिति वाच्यम्; विस्मृततत्स्वभावस्य शंकोदयदर्शनात् । नापि द्वितीयः कल्पः साधीयान्, निरूपितविपरीतभावस्य पुंसो वचनाद् भ्रमादेरेवानु-मेयत्वात् । तृतीयकल्पोऽपि न युज्यते, यतो ह्यनिरूपितोभयवाक्ये प्रथमं शंकैव, पश्चाद्देशकालादिना तत्स्वभावमनुगमय्य भ्रमाद्यभावः सम्यज्ज्ञानञ्चानुमीयते । तथाहि—अस्मिन् देशे कालेऽस्य विप्रलिप्सादि न सम्भवति प्रयोजनाभावात्, एतदर्थावगमे सम्भावितनिरवद्यप्रमाणकारणवत्त्वात्, पर्यालोच्यैव स्पष्टतरमर्थप्रतिपादकत्वाच्चेत्यादिरीत्या वक्तुर्यथार्थवादित्वमवगम्यते । पश्चाद् एतद्वाक्यं विप्रलिप्सादिमूलं न भवति स्वगोचरप्रमाणमूलं च निरवद्यपुंवाक्यत्वात् सम्प्रतिपन्नवदित्यादिरीत्या सम्यज्ज्ञानानुमानम् । एवञ्च ज्ञानानुमाने ज्ञेयभूतवाक्यार्थस्यापि नान्तरीयकसिद्धत्वाद् वाक्यं पश्चादनुवादकमिति ।

तदेतन्मतं न विचारसहम्—आकाङ्क्षादिमत्प्रतियोग्यन्वितस्वार्थाभिधानशक्तिज्ञानमेव वेदे वाक्यार्थ-प्रतिपादनसामग्री । सा च लौकिकानामप्यविशिष्टेति कथमिव न तानि वाक्यार्थं प्रतिपादयेयुः । एवञ्च लोकवेदयोरेकरूपप्रयोजकसम्भवे तद्वैरूप्यकल्पनं गौरवादयुक्तम् ।

अपि च लौकिकवाक्यस्य न लिङ्गतया गमकत्वम् विषयाभावात् । तथाहि—स्वार्थप्रमाण-पुरस्सरत्वं निर्दोषपुरुषवाक्यत्वेनानुमेयम् । तस्य स्वार्थत्वं च तदभिधानशक्तिरस्यास्तीति प्रति-सन्धानमन्तरेण न स्यादिति तत्प्रतिसन्धानस्थितौ, तत एवार्थप्रतीतेर्वाक्यस्य वक्तृज्ञाने व्याप्तिपक्ष-धर्मत्वानुसन्धानेन पश्चाद् भवतोऽनुमानस्य सिद्धसाधकतया वैयर्थ्यमेव । तदुक्तमभियुक्तैः —

'अश्वैरपहृतं को हि गर्दभैः प्रार्थितुं क्षमः ।' इति । लौकिकवचसां शंकाकुण्ठितशक्तीनामनपेक्ष्य मानान्तरं नाभिधेयबोधकत्वमित्यप्ययुक्तम् मतम् । तथाहि—वाक्यप्रयोगानन्तरं तदर्थज्ञानस्योत्पत्त्यर्थं मानान्तरापेक्षा, प्रामाण्यसिद्ध्यर्थं वा ? नाद्यः, चक्षुरादेरिव शंकितव्यभिचारादपि वाक्याद् वाक्यार्थ-प्रत्ययस्य प्रथममुपजनितत्वात् । नापि द्वितीयः, तावता वाक्यस्य लिङ्गान्तर्गमकथाया दूरपराहतत्वात्, वाक्यार्थप्रत्ययजननानन्तरं पश्चाद्देशकालादितः शंकितव्यभिचारनिदानभूतभ्रमाद्यभावनिश्चयात् प्रामाण्यस्य निश्चीयमानत्वात् ।

---

१. प्रकरणपंचिकायां २६-२७ तमौ श्लोकौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्तु वेदे पदार्थसामर्थ्याधीनं तात्पर्यम्, लोके त्वाप्ताभिप्रायाधीनम्, विविधाभिप्रायाश्च पुरुषा वाक्यं रचयन्तो दृश्यन्ते । भ्रमादिना तत्राशयदोषादिशंकायां स्वार्थतात्पर्यानिश्चयादभिधानं न भवतीति जल्प्यते, तत्रोच्यते—उपक्रमोपसंहारादिना प्रकरणादिना वा वेदे तात्पर्यनिर्णयवत् प्रकरणादिना लोकेऽपि तात्पर्यनिश्चयसम्भवे बाधकाभावात् । अज्ञाततात्पर्यादेव वा शब्दादर्थप्रतिपत्ती तस्यान्यपरत्वाशंकानिरासे तात्पर्यनिश्चयोपयोगोपगमात्, वेदवल्लोकेऽपि पदपदार्थसामर्थ्यप्रयुक्तस्यैव तात्पर्यस्योरीकरणात् । लौकिकाः शब्दा नाभिप्रायाधीनतात्पर्याः शब्दत्वात् वैदिकशब्दवदित्यनुमानसम्भवात् । विपक्षे शक्तिमात्रस्य तात्पर्यप्रयोजकस्यानुगतैकरूपस्य सति सम्भवेऽनेकप्रयोजककल्पनागौरवस्य बाधकतर्कत्वात् ।

किञ्च विमतपदानि पदानि स्मारितार्थसंसर्गधीपूर्वकाणि, अदुष्टपुरुषप्रणीतपदकदम्बकत्वात् 'गामभ्याज' इति पदकदम्बकवदिति वक्तृज्ञानानुमानात् प्राग् वाक्यार्थोऽवगतोऽनवगतो वा ? आद्ये वाक्येनैव चेत् स्वार्थप्रतिपादनम् तस्यानपेक्षत्वसिद्धिः । प्रमाणान्तरेण चेत्, तेनैव वाक्यार्थविगमात् वक्तृज्ञानानुमानवैयर्थ्यम् । द्वितीये ज्ञानानुमानानुपपत्तिः, अगृहीतविशेषणाया विशिष्टावगतेरयोगात् ।

उपमितिः

गवयपदार्थमजानानो नागरिकः पुरुषः कुतश्चिदारण्यकपुरुषाद् 'गोसदृशो गवयपदवाच्य' इति श्रुत्वाऽरण्यं गतो गोसदृशं पिण्डं पश्यति 'अयं गोसदृश' इति । ततो 'गोसदृशो गवयपदवाच्य' इत्यतिदेशवाक्यार्थं स्मरति । अनन्तरं तस्य 'अयमसौ गवयपदवाच्य' इत्याकारकं ज्ञानं जायते । अत्र गोसादृश्यविशिष्टपिण्डे गवयपदवाच्यताज्ञानं यदुत्पद्यते तदेवोपमितिरिति । अस्यां गोसादृश्यज्ञानं करणम् । एतदेवोपमितिकरणत्वादुपमानमिति । 'गोसदृशो गवयपदवाच्य' इत्यतिदेशवाक्यार्थस्मरणं व्यापारो भवतीति ।

क्वचित्तु वैधर्म्यविशिष्टपिण्डदर्शनं करणम् । जलादिविधर्मगुणवती पृथिवीत्यतिदेशवाक्यार्थस्मृतिर्व्यापारः । पृथिवीत्वावच्छेदेन पृथिवीपदवाच्यत्वविषयकोपमित्यात्मकं ज्ञानं फलमिति ।

वेदेऽपि—

'वसन्ते सर्वशस्यानां जायते पत्रशातनम् ।
मोदमानास्तिष्ठन्ति यवाः कणिशशालिनः[1] ॥'

इत्यादौ (अशातितपत्रत्वरूप) वैधर्म्यविशिष्टपिण्डदर्शनं करणम् । 'गोधूमादिविधर्मा यव' इत्यतिदेशवाक्यार्थस्मृतिर्व्यापारः । यवत्वावच्छेदेन यवपदवाच्यत्वोपमितिः फलमिति ।

मीमांसकाभिमतोपमानस्वरूपम्

श्रुतातिदेशवाक्यस्य वने गवयपिण्डदर्शनानन्तरं नगरं गतस्य गोपिण्डमनुस्मरत एतेन सदृशो मामकीनो गौरिति ज्ञानमुपमितिः । तस्य विषयः सम्प्रत्यवगम्यमानगवयसादृश्यविशिष्टः परोक्षो गौः

१. शब्दशक्तिप्रकाशिकायां १०६ पृ० उदाहृतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तु गवयसादृश्यम् । अत एव तज्ज्ञानं न प्रत्यक्षं परोक्षगोपिण्डविषयत्वात् । अश्रुतातिदेशवाक्यस्याभावान्न शाब्दम् । तत्र गवयज्ञानमुपमितिकरणम् । गवयसादृश्यविशिष्टगोज्ञानमुपमितिः । गवयसादृश्यविशिष्टा गौः प्रमेयमिति । तदुक्तं शालिकनाथेन—

'सादृश्यदर्शनोत्थं सादृश्यविषयं ज्ञानमुपमानम् ।
विषयोऽस्य वृत्तिसिद्धो भिन्नो द्रव्य दिभावेभ्यः[1] ॥' इति ।

वेदान्तपरिभाषाकृतोऽपीममेव स्वरूपमङ्गीचक्रुः । उक्तं च परिभाषायाम्—'तदनन्तरं भवति निश्चयः अनेन सदृशी मदीया गौरिति । तत्रान्वयव्यतिरेकाभ्यां गवयनिष्ठगोसादृश्यज्ञानं करणम् । गोनिष्ठगवयसादृश्यज्ञानं फलमि[2]'ति ।

तत्र मीमांसकमते सादृश्यं 'सदृशोऽयमि'त्यनुभवसिद्धपदार्थान्तिरमभ्युपेयत इत्यवधेयमिति ।

तदिदं मीमांसकमतं चिन्त्यम्, अनुभवविरोधात् ; अश्रुतातिदेशकस्य नागरकस्य कानने परिभ्रमतोऽदृष्टपूर्वं गोसदृशं प्राणिनमुपलभमानस्य 'अहो नु गवा सदृश एष कश्चन प्राणी'ति प्रत्ययस्य, वाक्यप्रयोगस्य चोपलम्भात्, 'अनेन सदृशो गौरि'ति ज्ञानस्यैतादृशाभिधानस्य च कदाप्यनुपलम्भाच्च । यद्येतादृशमपि ज्ञानं कस्यचिदनुभवपथमवतरतीत्येवाग्रहस्तदापि न तस्य स्मृत्यतिरेकित्वम् । न च गोपिण्डमात्रे तादृशबुद्धेः स्मृतित्वेऽपि सम्प्रत्यवगतगवयसादृश्यवैशिष्टयस्य पूर्वमनुपलब्धचरस्याधुनैव गृह्यमाणत्वेन न स्मृतित्वापत्तिरिति वाच्यम्, गवयसादृश्यस्यापि पूर्वं गृहीतत्वेन तावताप्यनिस्तारात् । न चानवगतगवयेन गवि गवयसादृश्यस्यावगत्ययोग इति वाच्यम्; गवयीयत्वेनाभिव्यक्तरूपेणाग्रहणेऽपि तादृशाभिव्यक्तितिरस्कृतस्य सादृश्यस्य ग्रहणे बाधकाभावात् । तथाहि—वने गवयमालोक्य नागरिको न द्विरदमनुस्मरति, नोष्ट्रं, न तुरगमपितु विशिष्टमेव पिण्डमनुस्मरति । न च निर्निबन्धनमेवेदं विशिष्टविषयं स्मरणं भवितुमर्हति । अत एवाभिव्यक्तितिरस्कृतमपि सादृश्यं गृहीतमित्येवाङ्गीकार्यम् । एवञ्च सति स्मृत्यनतिरेकित्वमेव तस्यायातमिति ।

उपमितेः पृथक्प्रमात्वनिरूपणम्

केचित्तु उपमितिर्न प्रमित्यन्तरम् किन्तु शाब्दबोधात्मिकैव गोसदृशो गवय इति वाक्यात् सदृशपदेनोपस्थितसादृश्यावच्छेदेन गवयपदवाच्यत्वग्रहस्य गोसदृशो गवयपदवाच्य इत्याकारकस्यैवोपमितिस्वरूपत्वादिति वदन्ति ।

तत्तु न बुद्धिपथमारोहति, उक्तवाक्यघटकगवयपदश्रवणेऽपि तदानीं गवयत्वजातेरेव प्रत्यक्षतया तद्विशिष्टे शक्तिग्राहकप्रमाणाभावेन वृत्त्या गवयपदजन्यगवयत्वावच्छिन्नोपस्थितेरसम्भवेन तदवच्छिन्नधर्मिकगवयपदवाच्यत्वप्रकारकशाब्दबोधासम्भवेनोपमितेःप्रमित्यन्तरत्वस्यावश्यकत्वात् ।

---

१. प्रकरणपञ्चिकायां श्लोकः । १४५ ।
२. वेदान्तपरिभाषायामुपमानपरिच्छेदे पृ० १६२ ।

१६२१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ननु गोसादृश्यस्य गवयत्वस्य च प्रत्यक्षेणोपस्थितौ गवयत्वावच्छेदेनैव गवयपदवाच्यत्वोपमितिर्न तु मदुक्तप्रकारेण सादृश्यावच्छेदेन पदवाच्यत्वग्रह इत्यत्र नियामकाभाव इति चेन्न । उपस्थितेस्तुल्यत्वेऽपि गवयत्वजात्यपेक्षया गोसादृश्यस्य गौरवप्रतिसन्धानेन तदवच्छेदेन गवयपदवाच्यत्वग्रहानुदयात्, गवयत्वप्रकारकशाब्दबोधानुपपत्तेश्च, तत्प्रकारकशाब्दबोधे तदवच्छेदेन शक्तिग्रहस्य हेतुत्वात् । न च द्रव्यत्वविशिष्टे सादृश्यज्ञानाद् गवयत्वावच्छेदेन गवयपदवाच्यत्वोपमितेरनुदयात् तद्धर्मविशिष्टे सादृश्यज्ञानस्य तद्धर्मावच्छेदेनोपमितिजनकत्वमावश्यकम्; तथा च गवयत्वादिजातेरनुपस्थितावपि सादृश्यस्य संस्थानादिगुरुधर्मविशिष्टे ग्रहात्तदवच्छेदेन गवयादिपदवाच्यत्वोपमित्यापत्तिरिती वाच्यम् ; तादृशशाब्दबोधोत्पत्तावपि गोसादृश्यस्य गुरुत्वेन तत्र गवयपदवाच्यतावच्छेदकत्वस्य बाधितत्वात्, बाधितार्थविषयकत्वेन च तस्य भ्रमत्वात्ततो विषयासिद्धेः ।

किञ्चोपमित्यनन्तरमुपमिनोमीत्येवानुव्यवसायो न तु शाब्दयामि, साक्षात्करोमि वेत्यादिरूपेण । अतोऽपि तस्याः पृथक्प्रमितित्वं निष्प्रत्यूहमेवेति ।

यत्तु वेदान्त्याद्यभिमतोपमानस्य सा गौरनेन सदृशी स्वप्रतियोगिकसादृश्येनास्यावच्छेदकत्वात्; स्वसादृश्येन यद् यस्यावच्छेदकं तत् तेन सदृशं दृष्टं यथा भ्रात्रन्तरमित्यनुमानात् सिद्धिरिति कैश्चिच्छंक्यते; तदपि न शोभनम् प्रतिभाति, सन्निहितगवयेनासन्निहितगोसादृश्यस्याप्रसिद्धत्वादप्रसिद्धविशेषणतापत्तेः, दृष्टान्ते साध्यसाधनोभयवैकल्यादुभयवैकल्ये च सामान्यतो दृष्टस्याप्यसाधीयस्त्वात् ।

परिभाषाकृतस्त्वे'वंविधानुमानानवतारेऽप्यनेन सदृशी मदीया गौरिति प्रतीतेरनुभवसिद्धत्वादि'त्यादिनानुभवबलादेवोपमितेः पृथक्प्रमात्वमंगीचक्रुः ।

तत्रायमाशयः प्रतिभाति—यद्येतादृशानुमानेनोपमितेर्गतार्थत्वमुद्भाव्यते चेत्तदा तत्सिषाधयिषया सर्वत्रायं घटः कम्बुग्रीवादिमत्त्वाद् घटान्तरवदित्यादिरीत्याऽनुमानस्यैव सम्भवेन प्रत्यक्षस्याप्यनुमानेऽन्तर्भावापत्तिः स्यादिति ।

अर्थापत्तिः

व्यतिरेक्यनुमानमनभ्युपगच्छन्तो भट्टाः, दीधितिकारप्रभृतयो नव्यनैयायिका औपनिषदाश्च पूर्वोपदर्शितप्रमितिचतुष्टयविलक्षणामर्थापत्तिरूपां प्रमितिमप्यभ्युपगच्छन्ति ।

तत्र प्रमाणान्तरेण प्रमितार्थान्यथानुपपत्त्या यदर्थान्तरकल्पनम् साऽर्थापत्तिः । तथा चाहुर्भट्टपादाः—

'प्रमाणषट्कविज्ञातो यत्रार्थोऽनन्यथा भवन् ।
अदृष्टं कल्पयेदन्यं साऽर्थापत्तिरुदाहृता[1] ॥' इति ।

यथा 'पीनो देवदत्तो दिवा न भुङ्क्ते' इतिवाक्यश्रवणे सति दिवाऽभोजित्वविशिष्टपीनत्ववान् देवदत्त' इतिशाब्दप्रमितिर्जायते । तदन्यथानुपपत्त्या रात्रिभोजनरूपार्थान्तरस्य आपत्तिर्नाम कल्पना भवति । अर्थस्यापत्तिरर्थापत्तिरिति षष्ठीसमासपुरस्सरमर्थापत्तिशब्दस्य निष्पत्तिः ।

---

१. श्लोकवार्तिकेऽर्थापत्तिपरिच्छेदे श्लोकः ।१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदान्तपरिभाषाकृतस्तु—उपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिः । तत्रोपपाद्यज्ञानं करणम् । उपपादकज्ञानं फलम् । येन विना यदनुपपन्नं तत्तत्रोपपाद्यम्, यस्याभावे यस्यानुपपत्तिस्तत्तत्रोपपादकम् । यथा रात्रिभोजनेन विना दिवाऽभुञ्जानस्य पीनत्वमनुपपन्नमिति तादृशपीनत्वमुपपाद्यम् । यथा वा रात्रिभोजनस्याभावे तादृशपीनत्वस्यानुपपत्तिरिति रात्रिभोजनमुपपादकमित्यभ्युपगच्छन्ति ।

एषाऽर्थापत्तिः 'यत्र दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यते' इति शाबरभाष्याद् द्विविधा । एका 'प्रमाणषट्क......उदाहृता ॥' इत्यादिना लक्षिता दृष्टार्थापत्तिः । अपरा च—

'पीनो दिवा न भुङ्क्ते चेत्येवमादिवचः श्रुतौ ।
रात्रिभोजनविज्ञानं श्रुतार्थापत्तिरुच्यते[१] ॥'

इत्यादिना लक्षिता श्रुतार्थापत्तिः ।

दृष्टशब्दस्य प्रत्यक्षादिप्रमितयावन्मात्रपरत्वेऽपि गोबलीवर्दन्यायेन दृष्टाद्भेदेन श्रुतोपादानादागमप्रमाणव्यतिरिक्तप्रमाणपञ्चकप्रमितपरत्वेनार्थो नेयः ।

तथा च प्रमाणपञ्चकपूर्विका दृष्टार्थापत्तिः पञ्चविधा । आगमप्रमाणपूर्विका च श्रुतार्थापत्तिरेकविधेत्येवं षड्विधार्थापत्तिरित्यायातम् । श्रुतार्थापत्तिरपि द्विविधेति पश्चात् प्रदर्शयिष्यते ।

दृष्टार्थापत्तिषु मध्ये—

प्रत्यक्षपूर्विका—यस्यार्थस्यान्यथानुपपत्तिः स यदि प्रत्यक्षेण प्रमितस्तदा प्रत्यक्षपूर्विका, यथा वह्निसम्पर्कात् शरीरे प्रत्यक्षेण दहनसंवेदनात् वह्नेर्दाहशक्तिरस्तीति विज्ञानम् । तथा चाहुर्भट्टाः—

'तत्र प्रत्यक्षतो ज्ञानाद्दाहाद्दहनशक्तता । वह्नेः[२]' इति ।

अनुमानपूर्विका—यत्र त्वनुपपद्यमानोऽर्थोऽनुमानेन प्रमितस्तत्रानुमानपूर्विका । यथा देशान्तरप्राप्तिलिङ्गकेनानुमानेन चन्द्रगतिमनुमाय तदन्यथानुपपत्त्या गमने शक्तिरस्यास्तीति विज्ञानम् । भट्टैरुक्तमादित्यं पुरस्कृत्य—

'अनुमितात्सूर्ये यानात्तच्छक्तियोगिता[३] ।' इति ।

उपमानपूर्विका—तथैव तदर्थस्योपमितिविषयत्व उपमानपूर्विका । यथा गवयदर्शनादेतादृशो गौरित्युपमानेन गवि सादृश्यमुपमाय तदन्यथानुपपत्त्योपमानज्ञानं प्रति ग्राह्यशक्तिरस्तीति विज्ञानम् । अत्रोक्तं भट्टैः—

'गवयोपमिता या गौस्तज्ज्ञानग्राह्यता मता[४] ।' इति ।

---

१. श्लोकवार्त्तिकेऽर्थापत्तिपरिच्छेदे श्लोकः ।५१ ।
२. तत्रैव श्लोकः ।३ ।
३. तत्रैव ।
४. तत्रैव श्लोकः ।४ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्थापत्तिपूर्विका—पूर्वरीत्यैव तदर्थस्यार्थापत्तिविषयत्वेऽर्थापत्तिपूर्विका । यथा गोशब्दोच्चारण सत्यनन्यथासिद्धार्थप्रत्ययानुपपत्त्या वाचिका शक्तिस्तावत्प्रतीयते । पुनरर्थापत्तिप्रमितवाचकशक्त्यन्यथा-नुपपत्त्या शब्दस्य स्थायित्वं प्रतीयते । तथा चाहुर्भट्टाः—

'अभिधानप्रसिद्ध्यर्थमर्थापत्त्यावबोधितात् ।
शब्दे बोधकसामर्थ्यात्तन्नित्यत्वकल्पनम्[1] ।।' इति ।

अभावपूर्विका—पूर्वप्रमितार्थस्य योग्यानुपलब्धिविषयत्वेऽभावपूर्विका । यथा योग्यानुपलब्धिप्रमित-चैत्राभावविशिष्टगेहाद् बहिश्चैत्रज्ञानम् । उक्तञ्च भट्टैः —

प्रमाणाभावनिर्णीतचैत्राऽभावविशेषितात् ।
गृहाच्चैत्रबहिर्भावसिद्धिर्या त्विह दर्शिता ।।
तामभावोत्थितामन्यामर्थापत्तिमुदाहरेत्[2] ।।' इति ।

श्रुतपूर्विका—यदा सोऽर्थः शाब्दप्रमितिविषयस्तदा श्रुतपूर्विका । यथा पीनो दिवा न भुंक्त इत्याद्युदाहरणे ।

श्रुतार्थापत्तौ भट्टप्राभाकरयोर्मतभेदनिरूपणम्

अत्रास्ति मतद्वयम् । एकं तु अपरिपूर्णवाक्यस्थले द्वारमित्यादौ 'द्वारमितिपदस्य शाब्दबोध-जनकत्वं पिधेहीति पदं विनानुपपन्नमि'त्याकारिकयाऽर्थापत्त्या 'पिधेही'तिपदाध्याहारवादिनामभिहिता-न्वयमभ्युपगच्छतां भाट्टमीमांसकानाम्, तन्मते शाब्दी ह्याकांक्षा शब्देनैव प्रपूर्यत इति न्यायाभ्युपगमात् श्रुतशब्दस्य श्रुतेनैवाकांक्षापूरणात् । अत एव यत्र पदं किमपि न श्रूयते तत्र न पदाध्याहारः । उक्तञ्च भट्टैः —

'पश्यतः श्वेतिमा रूपं हेषाशब्दं च शृण्वतः ।
खुरविक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीः ।
दृष्टा वाक्यविनिर्मुक्ता न पदार्थैर्विना क्वचित्[3] ।' इति ।

तदुपादाय न्यायरत्नाकर इत्थं स्पष्टीकृतम्—

श्वेतं कंचित्पदार्थमव्यक्तं गवाश्वादिरूपं दूरादुपलभमानस्तस्मिन्नेव प्रदेशे हेषया खुरशब्देन चाश्वजातिं गतिं चाऽनुमिमानोऽनुपलब्ध्या च तस्मिन्प्रदेशे वस्त्वन्तराणामभावमवगच्छन् गुणजाति-क्रियाणामर्थान्तरान्वयमपेक्षमाणानां योग्यानामर्थापत्त्या परस्परं संसर्गं बुध्यते श्वेतो धावतीति, तदिह क्लृप्तं तावत्पदार्थानामाकाङ्क्षासन्निधियोग्यतावशेन सामान्यतोऽन्वयबोधनं' इति ।

न च घटमानयेत्यादौ पदानामेकवाक्यताज्ञानस्यार्थज्ञानसहकारित्वेन क्लृप्ततया तदभावेऽर्थबुद्ध्य-पधायकत्वासम्भवात् 'श्वेतोऽश्वो धावती'ति वाक्यमेव तत्र कल्प्यतां न तु तादृशस्यार्थज्ञानस्य शाब्दधीकारणत्वमिति वाच्यम्; नानावर्णघटितपदानां कल्पनापेक्षया एकस्यानुपपत्तिज्ञानस्यैव कल्पनाया लघुत्वात् । मीमांसकमते हि वर्णानां नित्यत्वाद् घकारोत्तरटकारत्वं न घटपदत्वं किन्तु घज्ञानोत्तरज्ञेय टत्वम् । तथा च वर्णसमसंख्याकज्ञानानां पदघटकत्वात् पदसमसंख्याकज्ञानानां च वाक्यघटकत्वाद्

१. श्लोकवार्त्तिकेऽर्थापत्तिपरिच्छेदे श्लोकः ।५। ३. श्लोकवार्त्तिकस्थवाक्याधिकरणे श्लोकौ ।३५८-३५९।
२. तत्रैव श्लोकौ । ८-९ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुपपत्तिज्ञानस्य चैकत्वात्तदपेक्षया स्फुटमेव लाघवम् । सम्भवति च श्वेतत्वं तद्देशे दृश्यमानमश्वान्यासंसर्गित्वेन प्रतीयमानमश्वसंसर्गित्वं विनानुपपन्नमिति धीः । एवं रीत्यैव धावनेऽप्यनुपपत्तिरिति ।

तदेतज्ज्ञानं भट्टमतेऽन्वयधीरिति कथ्यते ।

अयमत्र विशेषः —'श्वेतोऽश्वो धावती'त्यादौ पूर्वोक्तस्थले शाब्दधीत्वमर्थापत्तित्वमुभयमपि मीमांसकमते स्वीक्रियते पदज्ञानस्य पदार्थप्रमायामेवोपक्षीणत्वेन साकांक्षयोग्यासन्नार्थज्ञानस्यैव श्रूयमाणपदस्थले वाक्यार्थशाब्दधीकरणत्वेन क्लृप्ततया शाब्दधीत्वस्यापि स्वीकारे बाधकाभावात्, मीमांसकमते जातेः संस्थानव्यंग्यतास्वीकारेण गुणकर्मणोरवयवसंयोगविशेषरूपसंस्थानाभावेन तयोर्जातित्वास्वीकाराच्छाब्दत्वानुमितित्वादेर्ज्ञानगतस्याखण्डधर्मस्यैकस्मिन् ज्ञाने सांकर्येऽपि बाधकाभावादिति ।

सांकर्यापसारण एव दुराग्रहश्चेत्तदा अश्वान्यद्रव्यवृत्तित्वबाधधीसहकृता द्रव्यवृत्तित्वशाब्दधीसामग्री अश्वद्रव्यवृत्तित्वशाब्दधियं जनयति इतरबाधधीसहकृतसामान्यसामग्र्या विशेषरूपेण ज्ञानजनकत्वात् । तथा च तादृशज्ञानं शाब्दधीरेव नार्थापत्तिरित्यङ्गीकार्यम् ।

न्यायरत्नाकरकृद्भिस्तु प्राचीनमते सामान्यसामग्री सामान्यरूपेणैव ज्ञानजनिका; न त्वितरबाधसहकृतापि विशेषरूपेण; विशेषरूपं विनाऽनुपपत्तिधीस्तु विशेषरूपेणैव धीजनिकेत्याशयेनानुपपत्तिज्ञानानुसरणं कृतम् ।

अपरं पुनरपरिपूर्णवाक्यस्थले द्वारमित्यादौ पिधानरूपार्थस्यैवाध्याहारमभ्युपगच्छतामन्विताभिधानवादिनां प्राभाकराणाम् । तन्मते शब्दस्यापरिपूर्णता नाम नास्ति किञ्चिद्वस्तु । अर्थ एव केनचिदर्थेन विनाऽपरिपूर्णो भवति न पुनश्शब्दः, शाब्दाध्याहारेणाप्यनुपपत्तेरनुपशमाद् अर्थकल्पनेनैवोपपत्तेः किमन्तरा शब्दकल्पनेन, 'तद्धेतोरेव तदस्तु, मध्ये किं तेने'ति न्यायादित्यभ्युपगमात् ।

अतस्तन्मते 'पीनो देवदत्तो दिवा न भुंक्त' इत्यत्र श्रुतो दिवा भोजनाभावो रात्रिभोजनं विनाऽनुपपद्यमानो रात्रिभोजनमेव कल्पयति; न शब्दम् । न हि शब्देन विनाऽर्थस्यानुपपत्तिः किन्त्वर्थेन विनेत्युक्तत्वात् ।

किञ्च शब्दस्वरूपमात्रेऽवगतेऽप्यनुपपत्तिस्तावत्पर्यन्तं न शाम्यति, यावत्ततः शब्दाद्रात्रिसम्बन्धो भोजनस्य नावगम्यते । न हि 'पीनो देवदत्तो दिवा न भुंक्त' इति प्रयुज्य यदा पुनरेवमुच्यते 'क्षपायामत्ती'ति, तदा क्षपाशब्दे अत्तौ चाव्युत्पन्नस्य पूर्ववाक्यार्थविषयाऽनुपपत्तिरुपरमतीति । एवञ्चार्थस्यैव साक्षादुपपादकत्वम्, न शब्दस्य । तथा चोपपादकार्थविषयाया अर्थापत्तेर्न क्वचिदुपपादकावबोधकशब्दे प्रमाणतेति । अत एवैतन्मते श्रुतार्थापत्तिरपि शब्दग्राहिणी न भवति; किन्तूपपादकार्थग्राहिण्येवेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

औपनिषदमतेनार्थापत्तिनिरूपणम्

औपनिषदमतेऽप्येवमर्थापत्तिरंगीक्रियते, दृष्टार्थापत्तिश्रुतार्थापत्तिभेदेन विभज्यते च; किन्तु प्रायशो भट्टमतानुसारेण। उदाहरन्ति च वेदान्तपरिभाषाकृतः —

'तत्र दृष्टार्थापत्तिर्यथा इदं रजतमिति पुरोवर्तिनि प्रतिपन्नस्य रजतस्य नेदं रजतमिति तत्रैव निषिद्धचमानत्वं सत्यत्वेऽनुपपन्नमिति रजतस्य सद्भिन्नत्वं सत्त्वात्यन्ताभाववत्त्वं वा मिथ्यात्वं कल्पयतीति[1]।' इति

'श्रुतार्थापत्तिर्यथा यत्र श्रूयमाणवाक्यस्य स्वार्थानुपपत्तिमुखेनार्थान्तरकल्पनम्। यथा "तरति शोकमात्मविद्[2]" इत्यत्र श्रुतस्य शोकशब्दवाच्यबन्धजातस्य ज्ञाननिवर्त्यत्वान्यथानुपपत्त्या बन्धस्य मिथ्यात्वं कल्प्यते[3]।' इति च।

वस्तुतस्तु तत्र शुक्तौ रजतत्वप्रकारकभ्रमस्थले रजतस्यापरोक्षतयावभासः। स त्वसतो नरश्रृङ्गादितो वैलक्षण्यं विनाऽनुपपन्नोऽसतो नरश्रृंगादेरपरोक्षतयानवभासात्। तत्रैवानन्तरक्षणे 'नेदं रजतमि'ति बाधोऽपि रजतस्य सद्वैलक्षण्यं विनाऽनुपपन्नस्सतः प्रत्यगात्मनो बाधाभावात्। तस्मादर्थापत्त्या सदसद्विलक्षणत्वरूपं मिथ्यात्वं शुक्तिरूप्यस्य कल्प्यते।

श्रुतार्थापत्तिस्थलप्रदर्शितोदाहरणेऽप्ययमभिसन्धिः —

छान्दोग्योपनिषदि सनत्कुमारं प्रति देवर्षेर्नारदस्य वचनम्—'श्रुतं हि भगवद्दृशेभ्यस्तरति शोकमात्मविदिति[4]' इति। अत्र शोकशब्दवाच्याखिलबन्धसन्तरणोपायत्वेनात्मज्ञानमुक्तम्। तथा च शोकसन्तरणस्य फलत्वं, आत्मज्ञानस्य च तत्साधनत्वेन कारणत्वमित्यायाति। ज्ञानस्य ज्ञापकहेतुत्वमेव न तु कारकहेतुत्वमिति हि वस्तुस्थितिः। यथा रज्जौ दोषविशेषवशाद् दृश्यमानभुजङ्गस्य निवृत्तिरधिष्ठानरूपरज्जुयाथात्म्यज्ञानेन दृष्टा न तु सत्यभुजङ्गस्य, तथैवात्मनि प्रतीतं शोकपदवाच्यबन्धजातं यदि सत्यं स्यान्न निवर्तेतात्मज्ञानाद्, रज्जुसर्प इव कल्पितं चेन्निवर्तेतैव। वक्ति चात्र श्रुतिरात्मज्ञानं शोकसन्तरणोपायत्वेन। अत आत्मज्ञाने श्रूयमाणस्य शोकसन्तरणोपायत्वस्यान्यथानुपपत्त्या शोकपदवाच्यबन्धजातस्य मिथ्यात्वं कल्प्यते। अत्र यद्यपि शोकपदवाच्यबन्धस्य मिथ्यात्वबोधकपदं न श्रूयते तथापि बन्धमिथ्यात्वमकल्पयित्वा श्रूयमाणशोकसन्तरणसाधनत्वमात्मज्ञाने कथमपि न सेत्स्यतीत्यत आत्मज्ञाननिष्ठबन्धसन्तरणसाधनत्वरूपस्वार्थस्यान्यथानुपपत्त्या बन्धे मिथ्यात्वं कल्प्यत इति।

श्रुतार्थापत्तिः पुनः परिभाषाकृद्भिर्द्विधा विभक्ता—अभिधानानुपपत्त्यभिहितानुपपत्तिभेदेन। तत्राभिधानानुपपत्तिर्भवति यत्र द्वारमित्यादिलौकिकवाक्यैकदेशस्य विश्वजिता यजेतेत्यादिवैदिक-

१ वेदान्तपरिभाषायामर्थापत्तिपरिच्छेदे पृ० २७६। २ छान्दोग्योपनिषद् ।७।१।३।

३ वेदान्तपरिभाषामर्थापत्तिपरिच्छेदे पृ० २७६। ४ छान्दोग्योपनिषद् ।७।१।३।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाक्यैकदेशस्य वा श्रवणानन्तरमन्वयाभिधानानुपपत्त्या तदभिधानोपयोगिपदान्तरं 'पिधे' हीत्यादिरूपं 'स्वर्गकाम' इत्यादिरूपं वा कल्प्यते ।

इयन्तु भट्टानामनुमता प्राभाकराणामननुमतेति विवेचितप्रायम् ।

यत्र वाक्यावगतोऽर्थोऽनुपपन्नत्वेन ज्ञातः सन्नर्थान्तरं कल्पयति तत्राभिहितानुपपत्तिः । यथा 'स्वर्गकामो ज्योतिष्टोमेन यजेते' ति वाक्यश्रवणानन्तरं ज्योतिष्टोमयागस्य स्वर्गसाधनत्वमवगतम् । तस्य च द्रव्यत्यागरूपत्वेन क्षणिकत्वात् बहुकालानन्तरभाविस्वर्गसाधनानुपपत्तिरित्यर्थापत्त्या मध्यवर्तिनोऽपूर्वस्यावगतिर्भवति ।

अर्थापत्तेः प्रमित्यन्तरत्वम्

अथ पूर्वोपदर्शितार्थापत्तीनां यथायथं प्रत्यक्षानुमित्यादावन्तर्भावान्नार्थापत्तेः प्रमित्यन्तरत्वं न वा तत्करणस्य प्रमाणान्तरत्वम् । तथाहि—प्रत्यक्षेणैव वह्नौ दहनशक्तेरुपलम्भात् प्रत्यक्षपूर्विकाया अर्थापत्तेः प्रत्यक्ष एवान्तर्भावात्, चन्द्रे गमनशक्तेश्चानुमानपूर्वकार्थापत्तिगम्यत्वेनाभिमताया अनुमानेनैवाधिगतत्वात् न्यायसूत्रभाष्ये तथैव प्रतिपादनादन्येषां च प्रदर्शितभेदानां यथायथमनुमानादावन्तर्भाव न्न तस्याः पृथक्प्रमितित्वम् । तथा च प्रयोगः—नार्थापत्तिर्मानान्तरमविनाभावबलेनार्थप्रतिपादकत्वादिति । विशेषेण च—देवदत्तो बहिस्तिष्ठति, जीवनसम्बन्धित्वे सति गृहेऽनुपलभ्यमानत्वात् तदन्यपरिदृष्टपुरुषवदिति प्रयोगसम्भवादिति चेन्न । विकल्पासहत्वात् । तथाहि—सप्तम्या गृहस्याधिकरणत्वमनुपलब्धिं प्रति विवक्षितम्, उत देवदत्तं प्रति अथवा तदसत्त्वं प्रति । आद्येऽसिद्धिः, अनुपलब्धेरात्मधर्मत्वेन गृहाधिकरणत्वाभावात् । न चोपलब्ध्यत्यन्ताभावो गृहेऽप्यस्तीति वाच्यम्, तथा स्वीकारे जीवनसम्बन्धित्वे सति गृहनिष्ठात्यन्ताभावप्रतियोग्युपलब्धिगोचरत्वादिति हेतुस्वरूपस्य पर्यवसितत्वे गृहावस्थितचैत्रेण व्यभिचारप्रसङ्गात् । द्वितीयेऽप्यसिद्धिः, देवदत्तस्य तन्निष्ठत्वाभावात् । नापि तृतीयः पक्षो युक्तः, पक्षधर्मत्वासिद्धेः, गृहावच्छिन्नतदसत्त्वस्य देवदत्तवृत्तित्वानुपपत्तेः ।

किञ्च लिङ्गमविनाभावेन गमकं, न त्वर्थापत्तिर्गृहाभावबहिर्भावयोरेकप्रमाणेनास्फुरणादविनाभावग्रहणायोगात् ।

यत्त्वस्यानुमितावन्तर्भावाभ्युपगमे कथमत्र व्याप्तिर्ग्राह्या इति प्रश्ने 'यदाहमिह तदा नान्यत्र यदा चान्यत्र तदा नेहेति सर्वजनप्रत्यक्षसिद्धमेतत् कात्रापि कथन्तेति' परेषां समाधानम्— तदप्यशोभनमिव प्रतिभाति सर्वदेशाप्रत्यक्षत्वे तत्राभावस्य दुरवधारणत्वात् । न च प्रत्यक्षे स्वात्मनि तेषां संसर्गः प्रतिषिद्ध्यते, प्रतियोगिनश्च स्मृतिमात्रेणोपयुज्यन्त इति वाच्यम्; ग्राहतत्वात्, यदाहमिह तदा नान्यत्रेति सप्तम्या देशान्तराणामेव प्रतिषेधाधिकरणत्वेनाभिधानात् । सप्तम्यर्थो न विवक्षित इति चेत् । किं तर्हि विभक्त्यर्थाविवक्षैव, तत्प्रत्ययो वा । आद्ये यदाऽयमहम् तदा नान्य इति सन्निहितदेशतादात्म्येनासन्निहितदेशतादात्म्यनिषेधोऽभिधीयमानः सम्यगेव व्याप्तिं साधयेत् । द्वितीये यदाऽयं मयि तदाऽन्यो न मयीति वाक्यपर्यवसानेऽनुभवविरोधपरिहारस्याशक्यताप्रसङ्गः । सन्निहितदेशेऽवस्थितमात्मानमनुभवन् कथं च सर्वे देशा अदृष्टचराः स्मर्यन्ते येनात्मनि तान् प्रतिषेधेत् । न चागमावगताः स्मर्यन्त इति वाच्यम्; आगमादिसंस्काररहितानामपि अर्थापत्तिप्रसरात् । अथ देशान्तराणामाहार्यारोपरूपभ्रमतः प्रतिपन्नानां प्रतिषेध्यत्वमिति चेन्न । तेषां परमते प्रतिषेधायोगाद्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्यथा ईश्वरज्ञानमनित्यं ज्ञानत्वाद् अस्मदादिज्ञानवदित्यादिप्रयोगाणां दुर्निवारता स्यात् । तथा चोक्तम्—

"व्यावर्त्याभाववत्तैव भाविकी हि विशेष्यता ।
अभावविरहात्मत्वं वस्तुनः प्रतियोगिता[1] ॥" इति ।

न चैतदाभासप्रतिपन्नस्यास्तीति न तस्य निषेधाधिकरणत्वं निषेध्यत्वं वेति ।

किञ्चार्थापत्तिस्थले न पक्षधर्मत्वेन गमकत्वं, लिङ्गस्य तु पक्षधर्मत्वेनास्ति गमकत्वमिति महानेव भेदोऽर्थापत्त्यनुमित्योः । तथाहि—कोऽत्र पक्षधर्मो हेतुः, कश्च पक्ष इति विचारावसरे देवदत्तो धर्मी, जीवनसम्बन्धित्वे सति गृहेऽसत्त्वं हेतुरिति परैरुक्तस्य विचारासहत्वमेव, अस्य केवलव्यतिरेकिणि, केवलान्वयिनि अन्वयव्यतिरेकिणि वा कुत्राप्यनन्तर्भावात् । यतो हि आद्ये साध्यव्यावृत्तौ साधन-व्यावृत्तेरेव व्यतिरेकित्व एवं प्रयोगः स्यात्—अयं देवदत्तो बहिरस्ति जीवनसम्बन्धित्वे सति गृहेऽसत्त्वात्, यो बहिर्नास्ति न स जीवनसम्बन्धित्वे सति गृहेऽसन् यथाहमन्तरवस्थित इति। तथा च बहिरवस्थितचैत्रादेः सपक्षस्य सत्त्वादस्य केवलव्यतिरेकित्वव्याकोपः । नापि केवलान्वयिनि गृहाभ्यन्तरावस्थितमैत्रस्यैव विपक्षत्वसम्भवात् । नाप्यन्वयव्यतिरेकिणि, गृहावच्छिन्नतदसत्त्वस्य तद्धर्मत्वा-सिद्धेः । गृहसंसर्गासत्त्वप्रतियोगित्वविवक्षायां तदन्योन्याभावप्रतियोगिना तत्स्थचैत्रेण व्यभिचारात् । तस्मान्न बहिर्भाववेदनमनुमानम् पक्षधर्मत्वाद्यनपेक्षत्वात् प्रत्यक्षवेदनवत् ।

तथा चात्र बहिःसत्त्वसंवेदनेऽनुमितिभिन्नाया अर्थापत्तेरेवावकाशो न त्वनुमितेः । प्रकारश्चेत्थम्—कतिपयकालदेवदत्तजीवनगमकगणितागमेन सामान्यतो देवदत्तसत्त्वं गम्यते । अनुपलब्ध्या तु गृहेऽसत्त्वमिति साधारणासाधारणप्रमाणप्रमाणविरोधस्तस्य बहिःसत्त्वं कल्पयति । सर्वत्र चार्थापत्तौ साधारणासाधारणप्रमाणविरोध एव सामग्री । स एवानुपपत्तिरित्युच्यते । तदविरोधसम्पादनाय विषयान्तर एवैकस्य स्थापनम् । सा अर्थापत्तिः ।

अथैवं धूमोऽपि तदनुपपद्यमानतयैव वह्निं गमयेत् । न हि तेन विनाऽसावुपपद्यते । विरोधोऽपि धूमे सति वह्निना भवितव्यम् अनुपलब्ध्या च न भवितव्यमित्याकारकः । एवञ्चानुमानकु-लक्षय एवेति चेन्न । व्याप्तस्य पक्षधर्मतावगममन्तरेण तत्रानुपपत्तिप्रमाणविरोधयोरप्राप्तेरनुमानमस्तु। यत्र तदवगममन्तरेण विषयव्यवस्था तत्रार्थापत्तिरिति भेदादिति ।

दीधितिकृतोऽपि व्यतिरेकव्याप्तेरनुमित्यप्रयोजकत्वं व्यवस्थापयन्तोऽनुभवबलात्तदनन्तरभाविज्ञानेऽनुमितिविजातीयत्वं स्वीकुर्वन्ति । उक्तञ्च केवलान्वयिप्रकरणे—'एवं साध्याभावव्यापकाभावप्रति-योगित्वमपि नानुमित्यौपयिकं गौरवाद् व्यभिचारज्ञानाविरोधित्वाच्च[2]' इति । 'व्यतिरेकव्याप्तिग्रहाधीना च धीर्नानुमितिस्तत्त्वेनाननुभवात्, क्लृप्तकारणाभावात्, सामग्रीभेदकल्पनायाश्चानुभवैकाधीनत्वात् । किन्तु विजातीया । तत्करणमपि प्रमाणान्तरमर्थापत्तिरेव । क्लृप्तप्रमाणद्वयसमाहारसमशीलञ्च युगपदन्वयव्यतिरेकधर्मद्वयप्रतिसन्धानम् ।' इति च ।

---

१ न्यायकुसुमाञ्जलिकारिका ।३।२।

२ केवलान्वयिप्रकरणे दीधितिः पृ० २७० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वं तु अर्थापत्तिरनुमानं पक्षताजन्यत्वादित्यादिप्रयोगः स्वरूपासिद्धया दूषितोऽर्थापत्तिस्थले पक्षधर्मत्वेनागमकत्वमुद्भाव्य। दीधितिकृतस्तु ततोऽपि सूक्ष्मतरमीक्षमाणा व्यभिचारमुद्भावयन्ति पक्षताजन्यत्वस्यानुमितावप्रयोजकत्वप्रतिसन्धानेन। तथा चाग्र उक्तम्—'अनुमितावेव पक्षताया हेतुत्वस्य निरस्तत्वात्, साध्यादिभेदेनाननुगतत्वात्, तज्जन्यत्वस्याप्रयोजकत्वाच्चे[1]'त्यादि।

अनुपलब्धिः

इह घटो नास्तीति घटं प्रति सदुपलम्भकप्रमाणप्रवृत्त्यभावादसौ प्रमाणाभावो घटाभावं परिच्छिनत्ति। तदुक्तं—

'प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते।
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता ॥[2]' इति।

अग्रे पुनः — प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव उच्यते।
साऽऽत्मनोऽपरिणामो विज्ञानं वाऽन्यवस्तुनि ॥[3]'

अन्यवस्तुशब्देन घटाद्यभावग्रहणम्।

परिभाषाकृतस्तु—'ज्ञानकरणाजन्याभावानुभवासाधारणकारणमनुपलब्धिप्रमाणम्[4]।' इति ऊचुः। तत्र ज्ञानकरणाजन्येतिपदासत्त्वे अनुमानजन्यातीन्द्रियाभावानुभवहेतावनुमानादावतिव्याप्तिरतस्तदुपादानम्। अभावपदासत्त्वे भावानुभवकरणे चक्षुरादावतिव्याप्तिरतस्तस्याप्यावश्यकत्वम्।

अनुपलब्धेः पृथक्त्वम्

तत्र तावदिदं नास्तीति ज्ञानं न प्रत्यक्षजनितमिन्द्रियार्थसन्निकर्षाभावात्। सन्निकर्षो हि संयोगसमवायस्वभावः तत्प्रभावभेदो वा संयुक्तसमवायादिरिह नास्त्येव। संयुक्तविशेषणत्वमपि नैव सम्भवति घटाभावस्य भूप्रदेशविशेषणत्वाभावादुक्तविशेषणत्वस्य प्रत्यक्षायत्तत्वेन प्रत्यक्षपूर्वमसम्भवात्। न ह्यसंयुक्तमसमवेतं वा किञ्चिद्विशेषणं भवति संयुक्तदण्डादौ समवेतशुक्लगुणादौ च तथा दर्शनात्। अभावश्च न केनचित्संयुज्यते अद्रव्यत्वात्, नापि क्वचित्समवैति गुणादिवैलक्षण्यात्। यदि च संयुक्तविशेषणत्वसन्निकर्षोपकृतं चक्षुरभावं गृह्णाति तर्हि तदविशेषात् संयुक्तद्रव्यवर्तिनो रसादीनपि गृह्णीयात्। रसादीनामयोग्यत्वे तदभावस्यापि ग्रहणं मा करोतु, तस्य तद्योग्यत्वे प्रमाणाभावात्।

ननु चक्षुषि निमीलिते भूतलघटाभावावुभावपि न दृश्येते, उन्मीलने तु दृश्येते। तत्र समानेऽपि तयोरवगमे भूतलज्ञानं चाक्षुषं घटाभावज्ञानं तु न चाक्षुषमपि त्वानुपलब्धिकमिति कुतोऽर्द्धजरतीयकल्पनेति चेन्न। इन्द्रियान्वयव्यतिरेकानुविधानस्य भूतलग्रहणेनान्यथासिद्धत्वात्। तथाहि—यथा दूरस्थज्वालागतरूपानुमीयमानस्पर्शवेदने नयनान्वयव्यतिरेकानुविधानमन्यथासिद्धम् तथैवात्रापि भूतलप्रदेशोपलम्भाविनाभाविनि घटाभावग्रहणेऽपि चक्षुरन्वयव्यतिरेकानुविधानमन्यथासिद्धम्।

---

१ केवलान्वयिप्रकरणे दीधितिः पृ० २७०।

२ श्लोकवार्त्तिकेऽभावप्रामाण्यवादे श्लोकः १।

३ तत्रैव श्लोक: ११।

४ वेदान्तपरिभाषायां पृ० २८८।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घटाभावग्रहणे तु घटरूपदृश्यस्यादर्शनं करणम् । येन चाधिकरणं भूतलादिकं गृहीतं तस्यैव घटो दृश्यो भवति नान्यस्य । एवञ्च घटात्मकदृश्यस्यादर्शनसिद्धयेऽक्षापेक्षा, नाभावग्रहणे । अधिकरणे गृहीते प्रतियोगिनि च स्मृतेऽक्षस्थानीयेन दृश्यादर्शनसहायेन मनसैवाभावज्ञानमिति नेन्द्रियस्याभावग्रहणे शक्तिः कल्पनीया ।

किञ्चाभावग्रहणं प्रत्यक्षं चेदसम्बद्धे न भवेत् । भवत्येवासम्बद्धेऽपि तत्प्रतीतिरतोऽनुपलब्धिकरणकमेव । तथाहि—स्वरूपमात्रेण जाह्नवीकालिन्दीसङ्गममुपलब्धवतस्ततो देशान्तरं गतस्य पुंसः केनचित् 'तत्र देवदत्तोऽस्ति न वे'ति पृष्टस्य तन्मात्रं संगमप्रदेशमनुस्मरतस्तदानीमसन्निकृष्टेऽपि देवदत्तस्याभावे तदैव तस्य ज्ञानमुदेति । तत्र त्विन्द्रियकथापि नास्तीति कथमपि न तत्प्रत्यक्षत्वम् । न चानुमानगम्योऽयमभावः, संगमप्रदेशस्य तद्गतदेवदत्तादर्शनस्य वा लिङ्गत्वानुपपत्तेः । न च संगमप्रदेशो लिङ्गम् अगृहीतसम्बन्धस्यापि देवदत्ताभावप्रतीतिदर्शनेन अनैकान्तिकत्वादपक्षधर्मत्वात्, तदधिकरणाभावानन्त्येन सम्बन्धग्रहणासम्भवाच्च । नापि देवदत्तादर्शनं लिङ्गम्, तस्य पृष्टपुरुषधर्मत्वेन घटाभावाधर्मत्वेन चापक्षधर्मत्वात् । न च देवदत्ताभावप्रतीतिं प्रति व्याप्रियमाणत्वात्तद्धर्मत्वमस्यातीति वाच्यम्; तद्धर्मत्वे सति तत्र लिङ्गिप्रतीतिजनकत्वं, प्रतीतिजन्मनि च सति अदर्शनस्य तद्धर्मताज्ञानमितिरीत्याऽन्योन्याश्रयात् ।

अपि च लिङ्गं गृहीतव्याप्तिकं सदेवानुमापकं भवति । तथा च यद्यदर्शनं लिङ्गत्वेनाभिमतं स्यात्तदा गृहीतव्याप्तिकमेव भवेदनुमापकम् । व्याप्तिग्रहणञ्च हेतुसाध्योभयसम्बन्धिग्रहणपूर्वकमेव भवति । तत्र व्याप्तिग्रहणवेलायामेवाभावाख्यसम्बन्धिग्रहणस्यापेक्षा वर्त्तते । तादृशग्रहणं चानुपपन्नमेव, तस्यानुमित्यनन्तरभावित्वात् । तथा चात्राप्यन्योन्याश्रयप्रसक्तिः । अनुमानान्तरेण तद्ग्रहणचिन्तनेऽनवस्था, अदर्शनाख्यलिङ्गस्यापि दर्शनाभावस्वभावत्वात् तत्स्वरूपपरिच्छेदचिन्तायां पुनरनुमानान्तरस्य शरणीकरणीयत्वात् । अतो दूरं गत्वा अभावपरिच्छेदकप्रमाणान्तराभ्युपगमाद्वरमत्रैव तदभ्युपगम इति । तथा च नाभावस्यानुमेयत्वम् । शब्दोपमानार्थापत्तयस्तु अत्र नैव सम्भवन्तीति अभावग्राहिणा अनुपलब्धिप्रमाणेनावश्यमेव भाव्यम् । अतश्चानुपलब्धिजन्यमभावज्ञानं पृथक्प्रमितिरिति ।

अनुपलब्धेरन्तर्भावप्रकारः

अनुपलब्धेः पृथक्प्रमाणत्वं तज्जन्यज्ञानस्य पृथक् प्रमितित्वं वा भट्टानामौपनिषदानाञ्चानुमतम् न तु प्राभाकराणां तार्किकादीनां वा, प्राभाकरैरभावाख्यपदार्थानभ्युपगमेन तदवगमार्थमनुपलब्धिप्रमाणस्याप्यनभ्युपगमात्, नैयायिकमते चाभावाख्यपदार्थाभ्युपगमेऽपि प्रत्यक्षेणैव तदवगमस्वीकारात्, इह कुण्डे बदरमितिज्ञानवदिह घटो नास्तीत्यस्याप्येकज्ञानत्वात् । तज्ज्ञानं प्रत्यक्षमनुपलब्धिजन्यं वेति चिन्तायां त प्रत्यक्षमित्येवं स्वीकर्तुमुचितमधिकरणस्य भूतलादेः सर्वमत एव प्रत्यक्षतायाः स्वीक्रियमाणत्वात् । पर्वतो वह्निमानित्याद्यनुमित्यादिस्थले धूमग्रहणानन्तरं व्याप्तिस्मरणादिवुद्धयन्तरव्यवधानसम्भवादनिन्द्रियजः प्रतिभास उचितः । अत्र तु न तथा, भूप्रदेशवद् घटनास्तितावुद्धेरविच्छेदेनानुभूयमानत्वात् । न च पर्वतस्थवह्निवदनीक्षणविषयता तस्य भवति । पर्वते हि व्यापृताक्षोऽपि न तद्गतवह्निमवलोकयितुं क्षमते । अत्र तु घटाभावमपरिम्लाननयनव्यापार एव पश्यतीति चाक्षुषमेवाभावज्ञानं, तदन्वयव्यतिरेकसिद्धत्वात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ननु दूरावस्थितवह्निरूपदर्शनपूर्वकस्पर्शानुमानवदिदमन्वयव्यतिरेकानुविधानमन्यथासिद्धमित्युक्तमेवेति चेन्न। वैषम्यात्। तथाहि—तत्र बहुप्रयोगैश्चक्षुषः स्पर्शकौशलशून्यत्वमवधारितं विद्यते, स्पर्शपरिच्छेदि च कारणान्तरं त्वगिन्द्रियं प्रयोगैरेवावधारितम्, व्याप्तिश्च तथाविधयो रूपस्पर्शयोरुलब्धेत्यनुमेयत्वमेव युक्तं स्पर्शस्येति तत्र स्पर्शग्रहणे युक्तं चक्षुर्व्यापारस्यान्यथासिद्धत्वम्। प्रकृते तु नेदृशस्य प्रकारस्य सम्भवः।

न चैकत्रान्वयव्यतिरेकानुविधानमन्यथासिद्धमिति सर्वत्र तथा कल्प्यते रूपस्यापि चाक्षुषत्वाभावप्रसङ्गात्।

ननु 'उद्भूतरूपं नयनस्य गोचरः[1]' इत्यादिवचनात् 'सम्बद्धं वर्तमानञ्च गृह्यते चक्षुरादिने'-त्याद्युक्तेश्चोद्भूतरूपवतश्चक्षुःसंयुक्तस्य चैव चाक्षुषत्वमित्यवगम्यते नीरूपस्यासम्बद्धस्य चाभावस्य कथं चाक्षुषत्वं युक्तमिति चेन्न। चाक्षुषत्वे चक्षुर्जनितज्ञानविषयत्वस्यैव प्रयोजकत्वेन रूपवत्त्वस्याप्रयोजकत्वात् रूपवतामपि परमाणूनामचाक्षुषत्वेन तत्र व्यभिचारात्। आकाशस्य सम्बद्धत्वेऽपि चाक्षुषत्वाभावेन सम्बद्धत्वस्य चाक्षुषतायामप्रयोजकत्वात्।

न चोद्भूतरूपेन्द्रियसम्बन्धयोरेकतरमात्रस्य चाक्षुषत्वप्रयोजकत्व एवोक्तदोषौ भवतः, महत्त्वोद्भूतरूपालोकसम्बन्धेन्द्रियसम्बन्धानां सम्भूय चाक्षुषत्वप्रयोजकत्वे न कश्चिद्दोष इत्यभावे निरुक्तानां चाक्षुषत्वप्रयोजकानां दुर्घटतया न कथञ्चिदपि तस्य चाक्षुषत्वं सम्भवतीति वाच्यम्; उक्तानां भावचाक्षुषत्वस्यैव प्रयोजकत्वस्वीकारेण तैर्विधुरस्याप्यभावस्य चाक्षुषत्वे बाधकाभावात्। षट्प्रकारसन्निकर्षव्यवस्थाया अपि भावमात्रविषयत्वात्। सम्बद्धं हि यद् गृह्यते तत् षण्णां सन्निकर्षाणामन्यतमेन सन्निकर्षेणेत्येव नियमनस्य तात्पर्यात्। इन्द्रियाणां प्राप्यकारित्वव्यवस्थापि भावगोचरैव। अत एवासम्बद्धत्वेऽप्यभावस्य ग्रहणे न दोषः।

किञ्चाधिकरणैः सार्धमभावस्य विशेषणतासम्बन्धसम्भवेनाधिकरणविशेषणतयोक्तप्रयोजकानां सन्निधानमभावेऽपि सूपपादमिति न काऽप्यनुपपत्तिरिति।

इद पुनरिहावधेयम्—अभावानुभवार्थं यद्यधिकरणप्रत्यक्षसामग्र्यतिरिक्तं किञ्चिन्नापेक्ष्यते तदाधिकरणप्रत्यक्षकालावच्छेदेन तन्निष्ठानामनन्तानामभावानामनुभवापत्तिस्स्यादिति।

अनुपलब्धिभेदाः

अनुपलब्धिस्त्वेकादशधा

(१) स्वभावानुपलब्धिः—यथा नेह घटोऽनुपलब्धेरित्यादौ।
(२) कारणानुपलब्धिः—यथा नात्र धूमो वह्न्यनुपलब्धेरित्यादौ।
(३) व्यापकानुपलब्धिः—यथा नात्र शीतस्पर्शः पाथसोऽनुपलब्धेरित्यादौ।
(४) कार्यानुपलब्धिः—यथा नात्र निरपवादा धूमहेतवः सन्ति धूमानुपलब्धेरित्यादौ।
(५) स्वभावविरुद्धोपलब्धिः—यथा नात्र शीतस्पर्शः पावकोपलब्धेरित्यादौ।
(६) स्वभावविरुद्धकार्योपलब्धिः—यथा नात्र शीतस्पर्शो धूमोपलब्धेरित्यादौ।

---

१ भाषापरिच्छेदे कारिका ५४।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(७) विरुद्धव्याप्तोपलब्धिः—यथा नाध्रुवभाविभूतस्यापि भावस्य विनाशो हेत्वन्तरापेक्षणादिति ।

(८) कार्यविरुद्धोपलब्धिः—यथा नात्र शीतकारणमप्रतिबद्धसामर्थ्यमस्ति ज्वलनोपलब्धेरित्यादौ ।

(९) व्यापकविरुद्धोपलब्धिः—यथा नात्र तुहिनस्पर्शः वह्निदर्शनादित्यादौ ।

(१०) कारणविरुद्धोपलब्धिः—यथा नैतस्य रोमहर्षशरीरकम्पादिविशेषाः सन्ति सन्निहितवह्न्यधिष्ठितविशेषादित्यादौ । अत्र शरीरकम्पादेः कारणं शैत्यं, तद्विरुद्धस्य तापस्योपलब्धिः ।

(११) कारणविरुद्धकार्योपलब्धिः—यथा रोमहर्षशरीरकम्पादिविशेषयुक्तपुरुषाधिष्ठित एष देशो न भवति धूमवत्त्वादित्यादौ ।

अत्र तु शरीरकम्पादेः कारणं शैत्यं, तद्विरुद्धो वह्निस्तत्कार्यस्य धूमस्योपलब्धिरिति ।

सम्भवैतिह्ययोरन्तर्भावनिरूपणम्

पौराणिकास्तु सम्भवैतिह्यरूपं पृथक्प्रमाणद्वयं स्वीकुर्वन्ति । तत्र सम्भवप्रमाणेन समुदायेन समुदायिनोऽवगतिः क्रियते यथा सम्भवति योजने क्रोशः, सम्भवति सहस्रे शतमित्यादि । एतादृशसम्भवाख्यात् प्रमाणाद् यत् क्रोशादिज्ञानं तत्सम्भवप्रमाणफलं सम्भवप्रमितिरिति ।

तत्रेदमालोच्यते—यत् सम्भवोऽनुमानमेवाविनाभावबलेऽर्थप्रतिपादकत्वाद् । न यदेवंविधं न तदेतादृशं यथा प्रत्यक्षमितिरीत्याऽनुमानेऽन्तर्भावस्सम्भवति । यो यः योजनपरिमाणवान् स स क्रोशपरिमाणवानित्यादिरीत्या व्याप्यव्यापकभावः । तथा च यथा वह्निनाऽविनाभूतो धूमो ज्ञातः सन् वह्निमनुमापयति तथा क्रोशाद्यविनाभूतं योजनत्वं योजनप्रमाणं प्रतीतं सत् क्रोशादिसत्त्वमवगमयतीत्यनुमानधर्मत्वान्नानुमानादतिरिक्तं सम्भवाख्यं प्रमाणमिति । तथा चोक्तम् प्रशस्तपादाचार्यैः—सम्भवोऽप्यविनाभावित्वादनुमानमेव ।' इति ।

पौराणिकानामेव मते यत्र—'वृद्धा इति ह ऊचुः' इत्येवं रूपमनिर्दिष्टप्रवक्तृकं प्रचुरजनरवस्य पौर्वापर्येणानुक्रममात्रं वर्तते, असावुच्चारयिता एतद्गोचरप्रमाणवान्-इत्येवं विशेषेण निर्दिष्टस्तत्प्रवक्ता च नास्ति-तत्र तादृशं वचनमैतिह्यप्रमाणम् । 'पारम्पर्योपदेशे स्यादैतिह्यमिति हाव्ययम्[1]' इत्यमरकोपाद् 'इति ह' इति निपातसमुदायः पारम्पर्योपदेशार्थकः । तस्मात् 'अनन्तावसथेतिह भेषजाञ्ञ्यः[2]' इति स्वार्थे ञ्यप्रत्यये ऐतिह्यमिति पारम्पर्योपदेशार्थकं पदं सिद्ध्यति इति ।

तत्रेदं पर्यालोचनीयम्—अनिश्चितोच्चारयितृत्वेन सन्दिग्धत्वादिदं प्रमाणमेव नेति कुत्रान्तर्भावोऽस्य कर्तव्य इति प्रदर्शनस्यानावश्यकत्वम् । यदि च आप्तोक्तिमूलक एव पारम्पर्योपदेश ऐतिह्यं प्रमाणं, न तु प्रवादपरम्पराप्रतीतमात्रमित्युच्यते; तदापि आगमस्तत्, न तु पृथक्प्रमाणतामर्हतीति ।

---

१ अमरकोषः ।२।७।१२।

२ पाणिनिसूत्रम् ।। ५।४।२३ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सांख्ययोगनये ज्ञानस्यविभागः

सांख्यनये तु प्रायशः पूर्वोक्तरीत्यैव ज्ञानस्य विभाग उपलभ्यते । स्वल्प एव भेदः । तथाहि—

ज्ञानमनुभवस्मृतिभेदेन द्विविधमिति तु 'बोधश्च पौरुषेयः फलं प्रमा[१]' 'एतेन संशयविपर्ययस्मृतिसाधनेष्वप्रसङ्गः[२]' इति तत्त्वकौमुदीवाक्याभ्यां प्रतीयते । प्रमाऽप्रमाभेदेन द्वैविध्यमप्याभ्यामेव वाक्याभ्यां प्रतीयते । अप्रमायाश्च संशयविपर्ययभेदेन द्वैविध्यस्योपलब्धिरपि भवति ।

किन्तु प्रमाऽत्र त्रिविधैव । तदुक्तम्—

'त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि[३] ।' इति ।

'द्वयोरेकतरस्य वाऽप्यसन्निकृष्टार्थपरिच्छित्तिः प्रमा, तत्साधकं यत् तत् त्रिविधं प्रमाणम्[४] ।' इति च ।

अन्तर्भवति चोपमानमागमेऽनुमाने वा । तथा चोक्तम्—

'उपमानं तावद्यथा गौस्तथा गवय इति वाक्यं तज्जनिता धीरागम एव । योऽप्ययं गवयशब्दो गोसदृशस्य वाचक इति प्रत्ययः सोऽप्यनुमानमेव[५]' इति ।

वैशेषिकाचार्यैरभ्युपगतमार्षमप्यनुमन्यत एतैः । तदुक्तम्—

'एतच्च लौकिकप्रमाणाभिप्रायम्, आर्षं तु विज्ञानं योगिनामूर्द्ध्वरेतसां न लोकव्युत्पादनायालमिति सदपि नाभिहितमनधिकारात्[६] ।' इति ।

प्रत्यक्षस्य लक्षणं तु पूर्वमेव पर्यालोचितमेतत्प्रकरणादौ । नैयायिकाभिमतं प्रत्यक्षषाड्विध्यमत्राप्यनुमन्यत एव 'प्रतिविषयाध्यवसायो दृष्ट' मित्यादिकारिकागत'विषय'पदव्याख्यानानुसारे 'विषयाः पृथिव्यादयः', इत्यनेन घ्राणजादिपञ्चविधस्य 'सुखादयश्च' इतिग्रन्थेन मानसस्य च निर्देशात् ।

अनुमानागमौ त्वत्रापि पूर्ववदेव लक्षितौ—

'व्याप्तिदर्शनाद्व्यापकज्ञानमनुमानं प्रमाणमित्यर्थः[७]' इति, 'आप्तोपदेश शब्दः[८]' इति च ।

पूर्ववदादिभेदेनात्राप्यनुमानत्रैविध्यम्—

'अनुमानं तावत् त्रिविधं भवति—पूर्ववत्, शेषवत्, सामान्यतो दृष्टं च[९]' इति ग्रन्थात्प्रतीयते । लक्षणानि पूर्वमतानुसारीण्येव ।

---

१ सांख्यतत्त्वकौमुदी ।४।
२ तत्रैव ।
३ सांख्यकारिका ।४।
४ सांख्यसूत्रम् ।१।८७।
५ सांख्यतत्त्वकौमुदी ।५।
६ तत्रैव ।
७ सांख्यप्रवचनभाष्यम् ।१।१००।
८ सांख्यसूत्रम् ।१।१०१।
९ सांख्यप्रवचनभाष्यम् ।१।१०३।
सांख्यतत्त्वकौमुदी ।५।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपर्युक्त सांख्यशास्त्रानुसारेणैव योगशास्त्रेऽप्यनुभवस्य त्रैविध्यम्[1]। अत्राप्रमाया अपि विपर्यय-विकल्पनिद्राभेदेन त्रैविध्यं प्रतीयत इति विशेषः। विपर्ययस्तु 'मिथ्याज्ञानमतद्रूपप्रतिष्ठमि[2]'ति लक्षण-लक्षितस्संशयमपि क्रोडीकरोति। तथा चोक्तं भोजदेवैः—

'संशयोऽप्यतद्रूपप्रतिष्ठितत्वान्मिथ्याज्ञानं यथा स्थाणुर्वा पुरुषो वेति[3]' इति।

पदार्थासत्त्वेऽपि शब्दश्रवणानन्तरं तत्प्रतिपादितार्थसमानाकारा चित्तवृत्तिरुदेति। तथा च वस्तुनस्तथात्वमनपेक्ष्य केवलं शब्दश्रवणानन्तरमुत्पन्नः प्रत्ययो विकल्पः। यथा शशविषाणादिप्रत्ययः। यद्यप्ययं नैयायिकाभिमतेनाहार्यज्ञानेन कथञ्चित्साम्यं भजते तथापि वरीवर्त्ति महान् भेद उभयोः। तथाहि—नैयायिकाभिमत आहार्यज्ञाने विषया नात्यन्तमप्रसिद्धाः, विकल्पाख्यवृत्तेर्विषयास्त्वप्रसिद्धा एव। अत एव 'पर्वते वह्निज्ञानं जायतामि'तीच्छायां सत्यां धूमाद्यदर्शनेऽपि जायमानवह्निज्ञाने नैयायिकैराहार्यत्वव्यवहारः, योगिभिश्च तत्र विकल्पाख्यवृत्तेरनभ्युपगमः। किञ्चाहार्यज्ञान इच्छाऽवश्यम्भाविनी, अथ च शब्दस्यानुपयोगः किन्तु विकल्पे नेच्छाऽवश्यम्भाविनी शब्दस्य च कारणत्वमिति विवेकः। तदुक्तम्—

'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः[4]' इति।

अयमत्रापरो विशेषः—अत्र निद्रापि वृत्तिविशेषरूपा अथ च प्रत्ययविशेषः। तदुक्तम्—'सा च संप्रबोधे प्रत्यवमर्शात् स्मरणात् प्रत्ययविशेषः[5]' इति 'निद्रायास्तु वृत्तित्वे परीक्षकाणामस्ति विप्रति-पत्तिरिति वृत्तित्वं विधेयम्[6]' इति च।

एतैरभ्युपगतमृतम्भरप्रज्ञादिजन्यप्रत्यक्षन्तु वैशेषिकदृष्टयाऽऽर्षविज्ञाने, नैयायिकदृष्टया योगज-प्रत्यक्षे वाऽन्तर्भवितुमर्हति। तथा च योगशास्त्रसम्मतोऽयं विभागः प्रतिभाति—

(१) ज्ञानं द्विविधम्—अनुभवस्मृतिभेदात्।

(२) पुनर्ज्ञानं द्विविधम्—प्रमाऽप्रमाभेदात्।

(३) अप्रमाऽत्र त्रिविधा—विपर्ययविकल्पनिद्राभेदात्।

---

१ योगसूत्रम् ।१।७। द्रष्टव्यम्।
२ तत्रैव ।१।८। द्रष्टव्यम्।
३ उपर्युक्तसूत्रस्य राजमार्तण्डवृत्तिः।
४ योगसूत्रम् ।१।९।
५ योगसूत्रव्यासभाष्यम् ।१।१०।
६ तत्रैव तत्त्ववैशारदी टीका।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चमपरिच्छेद

ज्ञानार्थमपेक्षितसामग्रीविमर्शः

(Source of Knowledge)

अथेदानीं ज्ञानानुगुणसामग्रीविषयको विचार उपस्थाप्यते। जन्यज्ञानस्य कार्यत्वेन कार्यसामान्यं प्रत्यपेक्षितसामग्रीणां तत्रापि नैयत्यमिति प्रागभावकालदिगदृष्टानीश्वरस्तज्ज्ञानेच्छाकृतयश्च ज्ञानं प्रत्यपि कारणानि। जन्यज्ञानस्यात्मविशेषगुणत्वं प्रथमपरिच्छेदे आत्माश्रितत्वं च तृतीयपरिच्छेदे सम्यङ्निरूपितमित्यात्ममनःसंयोगरूपा जन्यात्मविशेषगुणसामग्री जन्यज्ञानजन्मन्यपेक्ष्यते।

जन्यज्ञानं प्रति त्वङ्मनःसंयोगस्य कारणत्वविवेचनम्

सुषुप्तिकाले मनसः पुरीतत्यवस्थानस्य सर्वमतसिद्धत्वेन तदानीं ज्ञानस्यानुत्पादस्त्वङ्मनःसंयोगस्यापि जन्यज्ञानं प्रति कारणत्वमाक्षिपति। अथ कारणान्तरविरहस्य तदानीं ज्ञानानुत्पादनियामकत्वं, न तु त्वङ्मनःसंयोगस्य तद्, येन तस्य जन्यज्ञानहेतुत्वं सिद्ध्येत्। तथाहि—चक्षुरादिवहिरिन्द्रियजन्यप्रत्यक्षे चक्षुरादिभिर्मनःसंयोगस्य कारणत्वेन तदभावाद्बहिरिन्द्रियजन्यप्रत्यक्षासम्भवः, ज्ञानेच्छादीनामभावाद्विषयाभावेन मानसासम्भवस्तत एवात्मनोऽपि न मानसप्रत्यक्षसम्भवो ज्ञानादियोगेनैवात्मनो मानसत्वोपगमात्। व्याप्तिज्ञानादीनां तदानीमभावादनुमितेरप्यसम्भावना। तथैव सादृश्यज्ञानाभावादुपमितेः, पदज्ञानाभावेन शाब्दबोधस्य चोत्पत्तेरशक्यत्वमिति; तथा च न त्वङ्मनःसंयोगस्य जन्यज्ञानहेतुत्वमिति चेन्न। विशेषसामग्र्या एव तत्तज्ज्ञानं प्रति कारणत्वमुपगम्य जन्यज्ञानसामान्यं प्रति त्वङ्मनःसंयोगस्य कारणत्वास्वीकारे स्वप्नान्तिमक्षणे उत्पन्नस्य विशेषगुणात्मकस्य 'अहं सुखी'त्यादिज्ञानस्य, विशेषणतया आत्मनः प्रत्यक्षे कारणीभूतस्य सुषुप्तिप्रथमक्षणे वर्तमानत्वेन तदाश्रयतया आत्मविषयकमानसप्रत्यक्षापत्तेर्दुर्वारत्वात्। त्वङ्मनःसंयोगस्य जन्यज्ञानसामान्यकारणत्वाभ्युपगमे तु नैवमापत्तिस्तादृशसंयोगस्य स्वप्नान्तिमक्षणपर्यन्तमात्रस्थायितया सुषुप्तिप्रथमक्षणे नाशेन सामान्यकारणासमवधानात्।

ननु जन्यज्ञानमात्रे त्वङ्मनःसंयोगस्य कारणत्वव्यवस्थापने रासनचाक्षुपादिप्रत्यक्षेष्वपि त्वङ्मनःसंयोगस्य कारणत्वमित्यायातम्। तथा च सर्वदैव यत्किञ्चिद्रासनादिकाले त्वाचप्रत्यक्षं नियमेन स्यात्। न च चाक्षुषादिसामग्र्याः स्पार्शनप्रतिबन्धकत्वमभ्युपगम्य त्वाचप्रत्यक्षं वारयितुं शक्यमिति वाच्यम्; विनिगमनाभावेन रासनादिकं प्रति स्पार्शनसामाग्र्या अपि प्रतिबन्धकत्वस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वक्तुं शक्यत्वेन किमपि प्रत्यक्षं न स्यादिति चेन्न । त्वाचप्रत्यक्षसामग्रीदशायां चाक्षुषादिप्रत्यक्षसामग्रीसत्त्वे चाक्षुषादिप्रत्यक्षोत्पत्तिरूपाया विनिगमनायाः सत्त्वात् ।

श्रीपक्षधरमिश्रास्तु[1]—त्वगिन्द्रियाधिष्ठानं चर्म । तेन सह मनःसंयोगस्य जन्यज्ञानसामान्यं प्रति हेतुत्वमनुमीयते । तथा चायं प्रयोगः—चर्ममनःसंयोगो जन्यज्ञानसामान्यकारणम् जन्यज्ञान-सामान्याभावाधिकरणसुषुप्त्यवच्छिन्नाभावप्रतियोगित्वात् । यत्कार्याभावाधिकरणकालावच्छिन्नवृत्तिका-भावप्रतियोगी यः स तत्कारणम् । भवति हि कपालद्वयसंयोगे घटाभावाधिकरणकालावच्छिन्न-वृत्तिकाभावप्रतियोगित्वमिति । न चाधिष्ठानरूपचर्मणा सह संयोगे त्वचापि संयोगनैयत्यप्रसङ्गेन पूर्वमतादविशेषापत्तिरिति वाच्यम् ; चर्माधोभागेन मनसः संयोगस्यैव चर्ममनःसयोगरूपत्वाभ्युपगमेन तदुपरिभागस्थया त्वचा तदानीं मनःसंयोगस्याभावेन चर्ममनःसंयोगस्य त्वङ्मनःसंयोगनियतत्वा-भावात् । न चैवमपि मनसः परमाणुरूपत्वेन चक्षुरादीनां च चर्मोपरिभागस्थितत्वेन चाक्षुषादि-ज्ञानजननेऽपेक्षितयोश्चर्ममनःसंयोगचक्षुर्मनःसंयोगयोरुत्पत्तेरेकदाऽसम्भवेन चाक्षुषाद्यनुपपत्तिप्रसङ्गभयादनुप-पन्नमिद चर्ममनःसंयोगस्य जन्यज्ञानसामान्यकारणत्वमिति वाच्यम् ; विभिन्नदिगवच्छेदेन परमाणु-रूपस्यापि मनसो मूर्तद्वयेनैकदा संयोगसम्भवात् । न च परमाणुरूपे निरवयवे दिगादिव्यवहारा-सम्भवेन पूर्वोक्तानुपपत्तितादवस्थ्यमिति वक्तुं युक्तम् , दिग्भेदस्य सावयवद्रव्येण पूर्वमेव सिद्धतया तत्सिद्ध्यर्थं मनसोऽनपेक्षणात्, सिद्धेन तेन मनस्यपि दिग्व्यवहारसम्भवे बाधकाभावात् ।

नव्यास्तु सुषुप्तिप्राक्कालोत्पन्नेच्छादिव्यक्तेस्तत्सम्बन्धेनात्मनश्च प्रत्यक्षापत्तिवारणाय त्वङ्मनःसंयोगस्य चर्ममनःसंयोगस्य वा जन्यज्ञानमात्रं प्रति हेतुत्वादिकल्पनमयुक्तम्, यतो ह्यात्ममनः संयोगस्य ज्ञानासमवायिकारणत्वम् पुरीतत्यात्मकोत्तरदेशेन मनःसंयोगस्य सुषुप्तित्वं च सर्वैः स्वीक्रियते । सुषुप्तिप्राक्काले च तस्यैवानुपपत्तिः, यतस्तदर्थं सुषुप्त्यनुकूलमनःक्रियाया अवश्यं वक्तव्यत्वेन तज्जन्यात्मन आत्मविभागादात्ममनःसंयोगनाशस्य ध्रौव्यादसमवायिकारणस्य च कार्यसहभावेन हेतुतया प्रकृते असमवायिकारणरूपात्ममनःसंयोगस्याभावेन सुषुप्तिक्षणे ज्ञानोत्पत्तेरसम्भवात् ।

किंच पुरीततिमनःसंयोगस्य जन्यज्ञानमात्रं प्रति प्रतिबन्धकतयैव सुषुप्तिकाले ज्ञानोत्पत्ति-प्रसङ्गस्य वारणीयत्वेन त्वङ्मनःसंयोगस्य चर्ममनःसंयोगस्य वा जन्यज्ञानसामान्यहेतुत्वकल्पने मानाभाव इति वदन्ति ।

तन्न युज्यते—कार्यसहभावेन कारणसत्त्वावश्यकत्वपक्षे ज्ञानोत्पादापत्तेरुद्धारेऽपि कार्यपूर्वकाल-वृत्तितयैव कारणापेक्षापक्ष आत्ममनःसंयोगस्य पूर्वमक्षतत्वेन तादृशापत्तेर्वज्रलेपायितत्वापत्तेः । तद्वारणार्थञ्चावश्यमेव चर्ममनःसंयोगस्य त्वङ्मनःसंयोगस्य वा जन्यज्ञानहेतुत्वस्यावश्यं कल्पनी-यत्वात् ।

इदमेव सर्वमभिप्रेत्योक्तं विश्वनाथेन—

'द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणम्[2]' इति ।

---

१. एतेषां मतम् ५७ भाषापरिच्छेदीय तमकारिकायाः पूर्वार्द्धभागव्याख्यानावसर 'अन्ये तु' इत्या-दिनो पन्यस्तं न्यायसिद्धान्तमुक्तावल्याम्।

२. भाषापरिच्छेदे कारिका । ५७ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्यक्षज्ञानार्थमावश्यकसन्निकर्षविवेचनम्

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमित्यादिप्रत्यक्षलक्षणं चतुर्थकरणे निरूपितम्[1] । प्रत्यक्षषाड्विध्यमपीन्द्रियषाडविध्याद्दर्शितम् । अधुनेन्द्रियस्यार्थेन सन्निकर्षाद् यदुत्पद्यते ज्ञानं तत्प्रत्यक्षमिति लक्षणेन प्रतीयमानाया इन्द्रियार्थसन्निकर्षरूपसामग्र्या विषये विचारः प्रस्तूयते ।

तत्र बाह्यानां रूपादीनां ग्रहणे सन्निकर्षचतुष्टयं कारणम्—(१) आत्ममनःसन्निकर्षः (२) मनइन्द्रियसन्निकर्षः, (३) द्रव्येन्द्रियसन्निकर्षः, (४) रूपादिभिरिन्द्रियसन्निकर्षश्च ।

आन्तराणां सुखादीनां ग्रहणे सन्निकर्षद्वयमेवापेक्षितम्—आत्ममनःसन्निकर्षः संयोगात्मकः, सुखादिमनःसन्निकर्षश्च संयुक्तसमवायरूपः ।

स च सन्निकर्षो लौकिकालौकिकभेदेन द्विविधः । लौकिकसन्निकर्षश्च षड्विधः—(१) संयोगः, (२) संयुक्तसमवायः, (३) संयुक्तसमवेतसमवायः, (४) समवायः, (५) समवेतसमवायः, (६) सन्निकृष्टविशेषणता चेति । तत्र पार्थिवजलीयतैजसवायवीयानां द्रव्याणां चक्षुःस्पर्शनाभ्यां ग्रहणे बहिरिन्द्रियसंयोगः सन्निकर्षः । आत्मप्रत्यक्षे च मनःसंयोगः सन्निकर्षः । द्रव्यसमवेतानां द्रव्यत्वादिजातीनां, रूपादिगुणानां कर्मणां च प्रत्यक्षे इन्द्रियसंयुक्तसमवायः सन्निकर्षः, चक्षुःसंयुक्ते घटादौ जातिगुणादेः समवायात् । तथैवात्मसमवेतसुखदुःखेच्छादीनां मानसप्रत्यक्षे मनःसंयुक्तसमवायः सन्निकर्षः । द्रव्यसमवेतगुणादिसमवेतजातीनां गुणत्वकर्मत्वादीनां ग्रहे संयुक्तसमवेतसमवायः सन्निकर्षः, चक्षुरादिसंयुक्तघटादिसमवेतरूपादौ कथितजातीनां समवायात् । तद्वदेव आत्मसमवेतसमवेतसुखत्वादीनां प्रत्यक्षे मनःसंयुक्तसमवेतसमवायः सन्निकर्षः । शब्दग्रहे समवायः सन्निकर्षः, श्रोत्रस्य गगनात्मकत्वेन तस्मिन् शब्दस्य समवायात् । शब्दसमवेतशब्दत्वकत्वखत्वादिजातिग्रहे समवेतसमवायः सन्निकर्षः, श्रोत्रसमवेतशब्दे ककारादौ च शब्दत्वस्य कत्वखत्वादीनाञ्च समवायात् ।

तदिदमुक्तं भाषापरिच्छेदे—

'द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः ।
द्रव्येषु समवेतानां तथा तत्समवायतः ॥
'तत्रापि समवेतानां शब्दस्य समवायतः ।
तद्वृत्तीनां समवेतसमवायेन तु ग्रहः[२] ॥' इति ।

द्रव्ये समवायप्रत्यक्षेऽभावप्रत्यक्षे चेन्द्रियसंयुक्तविशेषणता सन्निकर्षः । सा च नानाविधा । तथाहि—क्वचित् सा संयुक्तविशेषणतारूपा, यथा चक्षुरादिसंयुक्ते भूतलादौ पटाद्यभावप्रत्यक्षे । क्वचित् संयुक्तसमवेतविशेषणता, यथा चक्षुरादिसंयुक्तघटादिसमवेते रूपादौ रसत्वाद्यभावप्रत्यक्षे । क्वचित् संयुक्तसमवेतसमवेतविशेषणता, यथा चक्षुःसंयुक्तघटादिसमवेतरूपादिसमवेतरूपत्वादौ रसत्वाद्यभावग्रहे । क्वचिच्छ्रोत्रावच्छिन्नविशेषणता, यथा श्रोत्रे शब्दाभावग्रहे, श्रोत्रस्य गगनात्मकत्वेन तस्मिन् शब्दाभावस्य

---

१ अस्य ग्रन्थस्य ७१-७२ पृष्ठयोः ।

२ कारिके ।५९-६० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशेषणतया वृत्तेः । क्वचित् श्रोत्रावच्छिन्नसमवेतविशेषणता, यथा श्रोत्रसमवेते ककारादौ खत्वाद्यभावग्रहे । क्वचिच्चेन्द्रियसंयुक्तविशेषणविशेषणता, यथा पटाभावे घटाभावप्रत्यक्ष इत्यादि ।

भूतलादौ घटादेरुपलम्भदशायां घटाद्यभावाग्रहात् प्रतियोग्यनुपलम्भोऽपि अभावप्रत्यक्ष इन्द्रियसहकारी ।

प्राभाकरास्तु—गुणत्वादीनामनभ्युपगमेन तत्प्रत्यक्षार्थमभ्युपगतः संयुक्तसमवेतसमवायाख्यः सन्निकर्षो नास्त्येव । एवमेव समवेतसमवायोऽपि नाभ्युपगम्यते, शब्दत्वप्रत्यक्षार्थं तस्य स्वीकृतत्वेनात्र मते शब्दत्वस्यैवानङ्गीकारेण तस्य पराहतत्वात् । तथैव संयुक्तविशेषणताख्योऽपि सन्निकर्षो न स्वीक्रियते; अभावप्रत्यक्षार्थमेव तस्य स्वीकृतत्वेन तत्पदार्थस्यैवात्रानुपगमात् । अत एव त्रिविध एव सन्निकर्षः—संयोगः, संयुक्तसमवायः समवायश्चेति प्रपञ्चयन्ति ।

विशिष्टाद्वैतिनस्तु—द्रव्याणां प्रत्यक्षमिन्द्रियेण सह संयोगाख्यसन्निकर्षात् । द्रव्याश्रितानां रूपादीनां संयुक्ताश्रयणाख्यसन्निकर्षात् । अतः सन्निकर्षद्वयमेव लौकिकप्रत्यक्षोपयोगि । तदुक्तं तत्त्वरत्नाकरे--

'अत्र वृद्धा विदामासुः संयोगः सन्निकर्षणम् ।
संयुक्ताश्रयणं चेति यथासम्भवमूह्यताम्[1] ।।' इति ।

तत्र त्वक्चक्षुर्मनांसि द्रव्याद्रव्योभयग्राहकाणि, श्रोत्रजिह्वाघ्राणान्यद्रव्यग्राहकाणीति स्वीकुर्वन्ति ।

वहिरिन्द्रियजन्यद्रव्यप्रत्यक्षस्य सामग्रीवर्णनम्

'अनेकद्रव्यवत्त्वस्यापि बाह्यद्रव्यप्रत्यक्षे हेतुत्वम् । उक्तं यथा—'अनेकद्रव्यसमवायाद् रूपविशेषाच्च रूपोपलब्धिः[2]' इति । अत एव परमाणोर्द्व्यणुकस्य चाप्रत्यक्षता तयोरनेकद्रव्याश्रिताश्रितत्वरूपानेकद्रव्यवत्त्वाभावात् । वस्तुतस्तु लाघवान् महत्त्वमेव प्रत्यक्षे कारणमित्यङ्गीकरणीयम् । तस्य च परमाणोर्द्व्यणुके चाभावादेव न तयोः प्रत्यक्षम् । तस्य च द्रव्यप्रत्यक्षे समवायसम्बन्धेन कारणत्वम् । द्रव्यसमवेतगुणकर्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवायसम्बन्धेन कारणत्वम्, गुणादीनामाश्रये द्रव्ये समवायसम्बन्धेन महत्त्वस्यावश्यकत्वात् । द्रव्यसमवेतसमवेतगुणत्वादीनां प्रत्यक्षे तु स्वाश्रयसमवेतसमवायसम्बन्धेन कारणत्वम् ।

प्राचीनानां मते बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे रूपं कारणम् । यथोक्तं मुक्तावल्याम्—'तथा च वहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणम्[3]' इति । एतन्मते वायोः स्पार्शनमपि प्रत्यक्षं न भवतीत्यवधेयम् । नव्यानां मते तु वहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वावच्छिन्नकार्यतानिरूपितकारणतैवाननुगता । अत एवानुगतरूपेण कारणत्वं न वक्तुं शक्यते । प्रातिस्विकरूपेण तु कार्यकारणभावो व्यवस्थापयितुं युज्यते । यथा चाक्षुषप्रत्यक्षे रूपं कारणम् । स्पार्शन-

१ यतीन्द्रमतदीपिकायाम् ६ संख्यके पृष्ठ उदाहृतः ।
२ न्यायसूत्रम् ३।१।३८, वैशेषिकसूत्रम् ४।१।८ ।
३ ५६ कारिकाव्याख्याने ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्यक्षे स्पर्शः कारणमित्यादि । अथवा आत्माऽवृत्तिशब्दभिन्नविशेषगुणवत्त्वमस्त्वनुगतं बाह्यद्रव्यप्रत्यक्षस्य कारणताया अवच्छेदकं रूपम् । अत्रात्माऽवृत्तीत्यनुक्तावात्मनोऽपि बहिरिन्द्रियजन्यप्रत्यक्षस्यापत्ति, शब्दभिन्नसुखदुःखादिरूपविशेषगुणवत्त्वस्य तत्र सत्त्वादतस्तदुपादानम् । आत्माऽवृत्तिविशेषगुणवत्त्वमात्र-कथने शब्दात्मकात्मावृत्तिविशेषगुणवत्त्वेनाकाशस्य बहिरिन्द्रियजन्यप्रत्यक्षविषयत्वापत्तिः, अतः शब्दभिन्नेति । आत्माऽवृत्तिशब्दभिन्नगुणवत्त्वमात्रकथने संख्यादिपञ्चगुणवत्त्वेन काले दिशि तादृशप्रत्यक्षविषयत्वापत्तिरिति तद्वारणाय विशेषेति ।

इन्द्रियाणां प्राप्यकारित्वविमर्शः

इन्द्रियेभ्यो विषयाणां प्रत्यक्षस्य प्रणाली तु चतुर्थपरिच्छेदे आत्मा मनसा युज्यते, मन इन्द्रिये-णेन्द्रियमर्थेनेति रीत्या आपाततो दर्शिता ।

अधुना त्विन्द्रियाणां विषयदेशे गमनेन विषयेण सह तेषां संयोगः, उत वा विषयाणामिन्द्रियं प्रत्युपसर्पणेनेन्द्रियार्थसन्निकर्षोपपत्तिर्भवतीति विषये विचार्यते ।

सर्वाणि हीन्द्रियाणि स्वस्वविषयसम्बद्धान्येव सन्ति प्रत्यक्षज्ञानं जनयन्ति । तत्र त्वगिन्द्रियं रसनेन्द्रियं च स्वसम्बद्धवस्तुप्रकाशकमित्यनुभवबलादेव सर्वैरपि तान्त्रिकैरास्थीयते । दूरस्थगन्धोऽपि वायु-वशात् समीपग एव घ्राणेन्द्रियेण गृह्यते, अत एव प्राप्यकारिण्येतानि त्वग्रसनघ्राणेन्द्रियाणि स्वस्थान-स्थितान्येव स्पार्शनं, रासनं, घ्राणजं च प्रत्यक्षं जनयन्ति ।

तार्किकास्त्विन्द्रियाणां भौतिकत्वं प्रसाध्य पुनर्भौतिकत्वेनैव हेतुना प्राप्यकारित्वं व्यवस्थापयन्ति । उक्तं च सूत्रे—'अव्यभिचाराच्च प्रतिघातो भौतिकधर्मः[1]' इति ।

तत्र भाष्यम्—'यश्चावरणोपलम्भादिन्द्रियस्य द्रव्यविशेषे प्रतिघातः स भौतिकधर्मो न भूतानि व्यभिचरति' इति ।

भौतिकत्वसाधकप्रयोगस्तु—'चक्षुस्तैजसं परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवत्[2]' इत्यादिरीत्या मुक्तावल्यामुपन्यस्तः । तच्च प्राप्यकारित्वमनुभवबलाच्चन्द्रादिविषयाणामागमना-सम्भवाच्चक्षू रश्मिद्वारा विषयदेशेन सम्बद्धीभूय प्रत्यक्षं सम्पादयतीत्यादिरीत्यैवास्थेयम् । तस्य च रश्मयः प्रसरन्तो द्रव्येण संयुज्यन्ते । ते च प्रसरणशीला इति पृथून्यपि द्रव्याणि प्राप्नुवन्ति । चक्षूरश्मीनामनुभवस्तु निशीथकाले मार्जारादीनां लोचनेषु सर्वजनानुभवसिद्धः । अन्यजन्तुगतचक्षूरश्मीनामनुद्भूतरूपवत्त्वा-न्नोपलब्धिः । तथा च प्राचीनवैज्ञानिकानां मते रश्मयो विषयदेशपर्यन्तं गच्छन्तीति । नवीन-वैज्ञानिकास्त्वेतद्वैपरीत्येन नेत्रगोलके विषयप्रतिबिम्बनं स्वीकुर्वन्ति । अत्र मते रश्मयो विषयान्नेत्रमु-पसर्पन्तीति । मतस्यैतस्य युक्तायुक्तत्वमुपरिष्टाद्विवेचयिष्यते ।

---

१ न्यायसूत्रम् ३।१।४१ ।

२ मुक्तावल्याम् ४१ कारिकाव्याख्याने ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथवा चक्षुरिन्द्रियं प्राप्यप्रकाशकारि इन्द्रियत्वात् त्वगादीन्द्रियवदित्यनया रीत्या चक्षुषः प्राप्यप्रकाशकारित्वमनुमेयम्। विषयदेशोपसर्पणोपपत्तिस्तु पूर्वोक्तैव।

ननु चक्षुरप्राप्यग्राहकं काचाभ्रपटलादिभिर्व्यवहितानां ग्राहकत्वान्मनोवदिति चेन्न, वस्तुस्वभावमाहात्म्येन काचाभ्रपटलादीनां चक्षुरवरोधकत्वाभावाच्चक्षुषस्तदन्तरितेनाप्यर्थेन सह सम्बन्धात्। तथाहि—यथा आदर्शप्रतिघातानन्तरं परावृत्ता नयनरश्मयः स्वेन मुखेन सन्निकर्षे सति प्रतिबिम्बग्रहणात्मकं स्वमुखोपलम्भनमादर्शस्वभावमहिम्नैव जनयितुं प्रभवन्ति, कुड्यादिप्रतिघातानन्तरमचादर्शरूपोपघाते सति आदर्श एव प्रतिघातानन्तरं च न तज्जनयितुं प्रभवन्ति; तथैव वस्तुस्वाभाव्यात् काचाभ्रपटलादिभिरविघातश्चक्षूरश्मेः, कुड्यादिभिश्च प्रतिघातो वस्तुस्वाभाव्यात्। एवमस्वीकारेऽप्राप्यग्रहणाभ्युपगमेऽपि कुड्यादिव्यवहितं न ग्राह्यम्, काचादिव्यवहितं तु ग्राह्यमित्यत्रापि विनिगमनाभावः प्रसज्येतेति। स्वभाववैचित्र्यादेवाञ्जनादिसंस्कृतनयनप्रभायाः पृथिव्यादावपि प्रतिघाताभावेनानुप्रवेशात् तद्युक्तचक्षुषां निधिप्रभृतेरुपलम्भ इति।

अथैवमप्युन्मिषितमात्रं चक्षुश्चन्द्रं प्रत्यक्षीकरोति। न चैकस्मिन् क्षणे तावान् देशो लङ्घयितुं शक्यः। क्रमे तु प्रतिपरमाण्ववच्छेदं विलम्ब्य गमनात् प्रतीतिरपि विलम्ब्येत। दूरासन्नग्रहणकालतारतम्यं च स्यात्। किरणप्रसरणव्यवस्थाया अभावे तु प्राप्यप्रकाशकारित्वव्याघात इति चेन्न, सूर्योदये सकलदिग्व्यापिन्याः प्रभाया इवेन्द्रियरश्मेरपि तादृशवेगातिशयाङ्गीकारेणादोषात्। तत्र विद्यमानस्यापि क्रमस्य दुर्लक्ष्यतया पद्मपत्रशतवेधरीत्या यौगपद्याभिमानात्।

इदं पुनरिहावधेयम्—चक्षुषो विषयदेशोपसर्पणानभ्युपगमे विषयप्रत्यक्षेण सह जायमानं दूरत्वज्ञानं विषयाधिष्ठितदेशसम्बन्धिदिशो ज्ञानं च न स्यात्। यथा घ्राणेन्द्रियं गन्धं प्रत्यक्षीकरोति, किन्तु कियत्परिमाणान्तरात् कस्माद् दिशो वा आगतो गन्ध इति तु न प्रत्यक्षीकर्तुं प्रभवति।

यत्त्वाधुनिका चक्षुषो विषयदेशोपसर्पणमनभ्युपगम्य नेत्रगोलके विषयप्रतिबिम्बनमभ्युपगच्छन्ति चित्रयन्त्रे (कैमरापदवाच्ये) विषयप्रतिबिम्बनमिव; तन्न युक्तिसहम्, दूरत्वप्रत्यक्षानुपपत्तेस्तावतानुद्धारात्। तथाहि—यन्त्रे विषयदूरत्वेऽपि चित्रन्यूनत्वम्, विषयनैकट्येऽपि चित्रदीर्घत्वं संजायते यन्त्रगततालानुसारात्। अत एव यन्त्रगतचित्रं गृहीत्वा दूरत्वस्यानुमितिमेव केवलां कर्त्तुं प्रभवति पुरुषः, न तु प्रत्यक्षम्। अत एव यदा कदा प्रत्यक्षार्थं तद् यन्त्रं विहाय तद्विषयीभूतान् मनुष्यान् पश्यति।

वस्तुतस्तु चित्रदैर्घ्यह्रस्वत्वे न केवलं वस्तुसमीपत्वदूरत्वप्रयोज्ये, अपि तु यन्त्रस्यानुमापविशेष[1] प्रयोज्ये। एवञ्च चित्रनिर्माणयन्त्रोदाहरणं विषमम्। अतस्तदुदाहरणं पुरस्कृत्य नेत्रे विषयप्रतिबिम्बप्रयोज्ये। एवञ्च चित्रनिर्माणयन्त्रोदाहरणं विषमम्। अतस्तदुदाहरणं पुरस्कृत्य नेत्रे विषयप्रतिबिम्बबलादिविषयप्रत्यक्षमिति सिद्धान्तस्योपपत्तिर्न भविष्यति, प्रतिबिम्बबलेन प्रत्यक्षाभ्युपगमे दूरत्वज्ञानस्योपपत्तेः कथमप्यसम्भवात्।

---

१. नाभीयदूरत्वम् (Fcoal length)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किञ्च, यदा कदाचिद्विदूरस्थविषयदर्शनार्थं निर्निमेषदर्शनं मनसस्तद्विषय एकाग्रीकरणं चापेक्षितं भवति । अनेनापि चक्षुषो गमनं ध्रुवमवगम्यते ।

अपि च सुदूरस्थवस्तूनामव्यवधानेनाधिककालपर्यन्तं दर्शनान्नेत्रेऽनुभूयमानः श्रमो विषयदेशे चक्षुषो गमनाभ्युपगम एवोपपन्नो भवतीति विद्वद्वरैर्विवेचनीयमिति ।

श्रोत्रमपि प्राप्यकारीति पूर्वमेव प्रतिपादितम् । तद्विषये वैदिकदर्शनेषु वर्त्तते मतभेदः । तत्र नैयायिकवैशेषिकयोर्मतानुसारेण भेर्यादिशब्दो भेर्याद्यवच्छिन्नाकाशे प्रथममुत्पद्यते । तदनन्तरं कर्णशष्कुलीप्रदेशपर्यन्तं वीचीतरङ्गन्यायेनानन्तशब्दा उत्पद्यन्ते । कर्णशष्कुलीप्रदेशे शब्दोत्पत्त्यनन्तरं शब्दस्य श्रावणप्रत्यक्षं जायते । वीचीतरङ्गन्यायश्चेत्थमवगन्तव्यः—यदा तटाकस्थप्रशान्तसलिले लोष्ठादिप्रक्षेपः क्रियते, तदा लोष्ठजलसंयोगाज्जायते प्रथममेकस्तरङ्गस्तदनन्तरं प्रथमाद् द्वितीयस्ततो द्वितीयात्तृतीय इत्यादिक्रमेण सुदूरपर्यन्तं तरङ्गानामुत्पत्तिर्भवति । तद्वदेव भेरीदण्डसंयोगात् कर्णपर्यन्तमनन्तशब्दानामुत्पत्तिर्भवति । भौतिकवैज्ञानिकः ठोसपदार्थेषु, कदाचिच्च द्रवपदार्थेष्वप्यनयैव रीत्या (अनुप्रस्थतरङ्गैः[1]) शब्दसञ्चारमभ्युपगच्छन्ति ।

कदम्बगोलकन्यायाद्वा[2] कर्णशष्कुल्यवच्छिन्नाकाशे शब्द उत्पद्यते । तथाहि—प्रथमशब्दस्तु भेरीदण्डसंयोगादुत्पद्यते । तस्माच्छब्दाद् दशसु दिक्षु शब्दा उत्पद्यन्ते । तत उत्पन्नात् प्रत्यकशब्दाद् दशसु दिक्षु अन्ये शब्दा उत्पद्यन्ते । अनया प्रक्रियया यदा श्रोत्रप्रदेशे शब्द उत्पद्यते तदा श्रावणप्रत्यक्षं जायत इति ।

न च 'शब्दोऽत्रागत' इत्यनुव्यवसायाभावाद् 'भेरीशब्दो मया श्रुत' इत्यनुव्यवसायस्य विद्यमानत्वाच्च श्रोत्रस्यैव भेरीदेशपर्यन्तगमनमुचितमिति वाच्यम्; वेगातिशयाच्छब्दस्यात्राऽऽगमनाप्रतीतेः, भेरीशब्दो मया श्रुत इत्याद्यनुव्यवसायस्य भ्रमत्वाच्च । तदेतत्सर्वमुक्तं न्यायभाष्ये—

'कृष्णसारोपनिबद्धं चक्षुर्बहिर्निःसृत्य रूपाधिकरणानि द्रव्याणि प्राप्नोति । स्पर्शादीनि त्विन्द्रियाणि विषया एवाश्रयोपसर्पणात् प्रत्यासीदन्ति । सन्तानवृत्या शब्दस्य श्रोत्रप्रत्यासत्ति[3]' रिति ।,

अन्ये तु वीचीतरङ्गादिन्यायेन कर्णशष्कुलीप्रदेशपर्यन्तमनन्तशब्दोत्पत्तितद्ध्वंसकल्पने महागौरवम् । 'भेरीशब्दो मया श्रुत' इत्याद्यनुव्यसायस्य च भ्रमत्वकल्पनमयुक्तम्; श्रवणोत्तरकाले कस्यापि श्रोत्रवत्पुरुषस्य 'भेरीशब्दो मया न श्रुतः' इत्याकारकवाग्व्यवतारादर्शनात् ।

किञ्च, शब्दस्य कर्णप्रदेशे सन्तानवृत्या आगमनेनैव प्रत्यासत्तिस्वीकारे यथा गन्धविषये कियद्दूरत आगतः, कस्या दिशश्च आगत इति ज्ञानं न भवति, तथैव शब्दोऽपि कुत आगतः कस्या दिशश्चेति ज्ञानं न भवेत् । तथा च शब्दवेधिशरानुसन्धातॄणां लक्ष्यभेदानुपपत्तिः स्यात् । दृश्यते हि शब्दप्रयोगानन्तरमेव तेषां बाणप्रयोगो लक्ष्यभेदनं च । तस्मान्नेत्रवच्छ्रोत्रमपि भेर्यादिदेशं गच्छतीत्येवास्थेयम् । न च

---

१ Transverse waves.

२ न्यायोऽयं भौतिकशास्त्रे हाईजीनसिद्धान्तत्वेन प्रसिद्धिमुपगतः ।
Huygen's Principle : Every point on a wave front may be considered as a new source of disturbance, sending wavelets in forward directions.

३ ।३।१।६२। सूत्रे भाष्यम्, मूलपुस्तके पृ० १४२।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समीपस्थपुरुषस्य स्पष्टतरश्रावणप्रत्यक्षदर्शनेन दूरस्थस्य चास्पष्टतद्दर्शनाद् दूरस्थव्यक्तिसकाशे शब्दस्य तरङ्गवत्सूक्ष्मतादर्शनेन वीचीतरङ्गन्यायेन शब्दाऽऽगमनमेव युक्तमिति वाच्यम् ; समीपस्थस्य पुरुषस्य स्पष्टतरचाक्षुषप्रत्यक्षदर्शनाद् दूरस्थस्य चास्पष्टतद्दर्शनाद् दूरस्थपुरुषस्य नेत्रशक्तिः रूपवत्प्रदेशगमनकाल-पर्यन्तं क्षीयत इत्यस्यैव वक्तुमुचितत्वेन श्रावणप्रत्यक्षस्थलेऽपि तथैव श्रोत्रशक्तेः क्षीणताकल्पनस्यैवो-चितत्वादिति वदन्ति ।

अत्र पुनरिदमनुसन्धेयम्—सर्वेषामिन्द्रियाणां प्राप्यकारित्वमिति हि सिद्धमेव । तत्र घ्राण-रसनत्वगिन्द्रियाणामर्था इन्द्रियपर्यन्तमुपसर्पन्तीत्यनुभवबलात् सर्वैः स्वीक्रियत एव । चक्षुःश्रोत्रे तु विषयदेशं गत्वा स्वस्वविषयान् गृह्णीतः । शेषाणि तु स्वगोलकस्थितान्येव आगतद्रव्यगतं स्वविषयं गृह्णन्तीति ।

विशिष्टाद्वैतिनस्तु—चक्षुरादीनां प्राप्यप्रकाशकारित्वं चक्षुषो विषयदेशमुपसृप्य प्रकाशकत्वं च स्वीकुर्वन्ति । किन्तु भौतिकत्वं नानुमन्यन्ते । उक्तं च—सात्त्विकाहङ्कारोपादानकं द्रव्यमिन्द्रिय-मि[1]तीन्द्रियलक्षणम् इति । 'श्रोत्रादीन्द्रियाणां भौतिकत्वप्रतिपादनम्, भूताप्यायितृत्वेनौपचारिकम्[2]' इति च ।

नैयायिकानाम्—घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धमात्राभिव्यञ्जकत्वादित्यादिरूपं भौतिकत्वसाधकमनुमानं च व्यञ्जकत्वं किमभिव्यक्तिं प्रति कारणत्वं, हेतुत्वमात्रं वा । नाद्यः, स्वरूपासिद्धेः, यस्मिन् सत्यविलम्बेन कार्योत्पत्तिस्तस्य करणत्वेनेन्द्रियसंयोगस्य करणत्वेऽपीन्द्रियाणामकरणत्वात् । नान्त्यः, इन्द्रियाधिष्ठानतत्संस्कारादिभिर्व्यभिचारित्वात्—इत्यादिरीत्या **दूषयन्ति** ।

तन्न युक्तम्—इन्द्रियसंयोगेनेन्द्रियाणामभिव्यक्तिं प्रत्यन्यथासिद्धयुद्भावने मनसोऽन्यत्र व्यासक्ता-वस्थायामिन्द्रियसंयोगसत्त्वेऽप्यभिव्यक्तेरदर्शनादिन्द्रियसंयोगस्याप्यन्यथासिद्धिप्रसङ्गः स्यात्, सर्वाभिव्यक्तिषु मनस एव करणत्वौचित्यात् । किञ्च; व्यापारवदसाधारणं कारणं करणमिति हि लक्षयन्ति करणं तान्त्रिकाः । तत्रेन्द्रियाणां करणत्वं सुतरां युज्यते, अर्थसंयोगरूपव्यापारद्वाराऽभिव्यक्तिरूपकार्यं प्रति कारणत्वस्य सुघटत्वात् । संयोगस्यैव करणत्वाभ्युपगमेऽन्तरा व्यापारस्थानीयस्य कस्यचित् कल्पयितुम-शक्यत्वात्, तस्य कारणत्वमात्रसिद्धावपि करणत्वानुपपत्तेः । तस्मादिन्द्रियाणामेव करणत्वमाद्यपक्षश्च युक्त एव, नैयायिकानामनुमानमपि निष्प्रत्यूहमिति ।

सांख्यास्तु—इन्द्रियाणि कारकत्वात् प्राप्यकारीणि; प्राप्यकारित्वं च न भौतिकत्वे सम्भवति दूरस्थविषयग्रहणानुपपत्तेः । किं च भौतिकत्वस्वीकारे यत्परिमाणं ग्रहणं तत्परिमाणं ग्राह्यमिति स्वीकारस्यावश्यकत्वेन कृष्णसाराधिकपरिमाणस्य वृक्षपर्वतादेर्हीनपरिमाणस्य च वटधानादेर्ग्रहणानुपपत्तेः । अत एवेन्द्रियाणामाहङ्कारिकत्वमभ्युपगन्तव्यम् । एवञ्च तेषां व्यापकत्वाद्विषयाकारा वृत्तिर्वृत्तिमदभिन्नरूपा सम्भवतीति पक्षमुपस्थापयन्ति ।

तदपि न युज्यते—प्राप्यकारित्वभौतिकत्वयोर्विरोधाभावात्, भर्जनकपालादिभिर्व्यवहितस्यापि द्रव्य-स्याग्नेयेन तेजसा दाहदर्शनात् । गोलकमात्रस्य कृष्णसारस्यैव वा चक्षुष्ट्वाभावाच्च । न च दर्शनादौ

---

१ यतीन्द्रमतदीपिकायां चतुर्थावतारे पृ० ३७ ।

२ तत्रैव पृ० ३८ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृष्णसारादीनामन्वयव्यतिरेकित्वात् तेषामेव चक्षुष्ट्वाद्युपपत्तिरिति वाच्यम्; तेषां तेजोरूपचक्षुरधिकरणत्वेन दर्शने तदन्वयव्यतिरेकानुविधायित्वोपपत्तेः, चक्षुषस्तेजस्त्वे चातिवेगवद्द्रव्यत्वेन प्रसरणशीलत्वेन च तेन झटिति वटधानपर्वतादेर्ग्रहणसम्भवात्, कृष्णसारस्य चक्षुष्ट्वे कथमपि प्राप्यकारित्वानुपपत्तेः ।

ननु चक्षुषस्तेजस्त्वे भास्वरशुक्लरूपोष्णस्पर्शावपि स्याताम् । न च तावुपलभ्येते । तस्मादुपर्युक्तं तेजस्त्वमयुक्तमिति चेन्न, उद्भूतत्वानभिभूतत्वयोरपि प्रत्यक्षोपलम्भे प्रयोजकत्वेन नायनस्य तेजसश्च वस्तुस्वभावादनुद्भूतत्वेन भास्वरशुक्लरूपोष्णस्पर्शयोरप्रत्यक्षतोपपत्तेः । तथाहि—यथा ग्रीष्मकाले सर्वत्र प्रसरत्यपि तेजोद्रव्ये वस्तुस्वभावाद् भास्वरशुक्लरूपाग्रहणेऽपि उष्णस्पर्शस्य ग्रहणम्; उदकान्तर्गते च तेजसि उष्णस्पर्शस्योपलम्भः, न तु भास्वरशुक्लरूपस्य; कार्तस्वरादौ च वस्तुस्वभावादेव भास्वरशुक्लरूपोपलम्भेऽप्युष्णस्पर्शस्यानुद्भूतत्वादग्रहणम्, तथैव नयनरश्मेस्तेजस्त्वेऽपि भास्वरशुक्लरूपोष्णस्पर्शोभयस्याप्यनुद्भूतत्वादग्रहणम् । वस्तुस्वभावादेव हि विडालादीनां नयनरश्मौ निविडे तमस्युद्भूतत्वाद् भास्वरशुक्लरूपस्य ग्रहणमप्येवंरीत्या सङ्गच्छते । आहङ्कारिकत्वपक्षे च विडालादीनां नयनरश्मौ भास्वरशुक्लरूपोपलम्भानुपपत्तिः अहङ्कारविशेषस्य तत्र कल्पने मानाभावात्, पूर्वग्रन्थेषु कुत्राप्यनुक्तत्वाच्च ।

अथैवमपि तेजस्त्वाभ्युपगमे वराकस्य नायनतेजसो महीयसा भास्करतेजसाऽभिभूतत्वेन प्रतिघाताद् भास्करदर्शनानुपपत्तिरिति चेन्न, वस्तुस्वभावादेव भास्करतेजसाऽनभिभवस्योपपत्तेः । कार्यसत्त्वयैव हि तथाविधकारणस्य कल्पनीयत्वात् । तथा चोक्तं महर्षिप्रवरैः—'दृष्टानुमितानां नियोगप्रतिषेधानुपपत्तिः प्रमाणस्य तत्त्वविषयत्वा[1]त्' इति ।

अथ तथापि तेजस्त्वाभ्युपगमे चिकित्सादिप्रयोगानुपपत्तिः, तेजसश्चिकित्साविषयत्वासम्भवात् । तथा च चिकित्साविषयस्य गोलकस्यैवेन्द्रियत्वाभ्युपगमो युक्तः । नेत्रस्य प्रसिद्धगुणदोषाणां[2] गोलक एवोपलम्भादपि गोलकस्यैव चक्षुष्ट्वं युक्तमिति चेन्न, गोलकस्य चक्षुराधारत्वेन तच्चिकित्सायाश्चक्षुरुपकारकत्वोपपत्तेः । तथैव च प्रसिद्धगुणदोषाणामनुवर्तनस्याप्युपपत्तेः ।

किञ्च, गोलकप्राप्तस्याप्यञ्जनशलाकादेरग्रहणदर्शनात् तदप्राप्तस्यापि पर्वतादेर्ग्रहणदर्शनाद् गोलकस्य प्राप्यकारित्वानुपपत्तिस्तस्य दर्शनादिक्रियायां करणत्वासम्भवं द्योतयतीति तेजस एव चक्षुष्ट्वपक्षो युक्तस्तस्य प्राप्यकारित्वादिस्वीकारे बाधकाभावात् ।

नन्वेवमपीन्द्रियाणामाहङ्कारिकत्वमेव युक्तम्, न तु भौतिकत्वम् । तथा सति वायवीयेन स्पर्शनेन्द्रियेण पृथिव्यादिस्पर्शस्य, जलीयेन च रसनेन्द्रियेण पार्थिवस्य रसस्य, तैजसेन च चक्षुषा पार्थिवस्य रूपस्य ग्रहणानुपपत्तेः । आहङ्कारिकत्वपक्षे तु न काप्यनुपपत्तिः, स्पर्शादितन्मात्राणामहङ्कारकार्यत्वादिति चेन्न, रूपादिविषय एवैषां नियमस्य पर्यवसानेन रूपाद्याश्रयविषये नियमाभावात् । तथाहि – रूपस्य पृथिव्यादावपि सत्त्वेन यथा तैजसस्य प्रदीपादिद्रव्यस्य पृथिव्यादिगतयावद्रूपप्रकाशकत्वम्, यथा च रसस्य पृथिव्यामपि सत्त्वेनाप्यद्रव्यस्य (जलस्य) नवीनघटशरावादिपार्थिवद्रव्यगतरसव्यञ्जकत्वम्, तथैव वायवीयाद्यैः स्पर्शनादीन्द्रियैः पृथिव्यादिगतस्पर्शग्रहणे न किञ्चिद् बाधकम् ।

---

१ न्यायसूत्रम् ।३।१।५३ ।

२ दूरदृष्ट्यादीनाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इन्द्रियाणामहङ्काररूपैकप्रकृतित्वे सर्वविषयप्रकाशनक्षममेकमेवेन्द्रियं स्यात्, सर्वेषां सर्वविषयग्राहकत्वं वा भवेत्, कार्यनियमस्य कारणनियमाधीनत्वात्, कारणस्य चाहङ्काराख्यस्यैकत्वात्। भौतिकत्वपक्षे तु नैष दोषः, भूतानां भिन्नत्वेन नियतगुणोत्कर्षयुक्तत्वान्नियतविषयग्राहित्वस्य सुतरामुपपत्तेः, रूपरसाद्यनेकविषयसन्निधानेऽपि प्रदीपादितेजसो रूपमात्रग्रहणे क्षमत्वदर्शनात्।

इदन्त्वत्रावधेयम्—बाह्येन्द्रियाणां घ्राणादीनां मध्य आद्यानां चतुर्णां पृथिव्यप्तेजोवायुप्रकृतित्वं तार्किकैः, प्राभाकरैः, भाट्टैः, औपनिषदैश्च स्वीक्रियते। श्रोत्रं तु विवादग्रस्तम्। तत्र भाट्टानां मते 'दिशः श्रोत्रम्'[1] इति वाक्याद् दिगात्मकं श्रोत्रमित्यभ्युपेयते। तथा चोक्तम्—

'यदि ह्यवश्यं कर्त्तव्यः तार्किकोक्तिविपर्ययः।
ततो वेदानुसारेण कार्या दिक्श्रोत्रतामतिः॥
यावांश्च कणभुङ्न्यायो नभोभागप्रकल्पने।
दिग्भागेऽपि समस्तोऽसावागमात्तु विशिष्यते[2]॥' इति।

अन्येषां तु मत आकाशात्मकं श्रोत्रमिति।

चाक्षुषप्रत्यक्षसामग्र्या निर्वचनम्

प्रमाणेषु प्रत्यक्षे, प्रत्यक्षेषु च चाक्षुषे लोकस्य सर्वाधिकनिर्भरतयेतरसकलप्रमाणापेक्षया विश्वसनीयतया च तदायत्तप्रत्यक्षसामग्र्या निरूपणं प्रथममुपक्रम्यते।

तत्र चाक्षुषप्रत्यक्षे चक्षुः करणम्। अर्थेन सह चक्षुषः संयोगादिरूपः सन्निकर्षो व्यापारः। सामान्येन सन्निकर्षनिरूपणावसरेऽस्मिन्नेव प्रकरणे लौकिकालौकिकभेदेन सन्निकर्षद्वैविध्यम्, लौकिकसन्निकर्षस्य च षाड्विध्यम् प्रतिपादितम्। अलौकिकचाक्षुषादिप्रत्यक्षस्य प्रणाल्या विवरणमुपरिष्टादुपस्थापयिष्यत इत्यधुना लौकिकसन्निकर्षजप्रत्यक्षस्यैव प्रणाली वर्ण्यते।

लौकिकविषयतया द्रव्यस्य चाक्षुषप्रत्यक्षे अर्थेन चक्षुःसंयोगस्य समवायसम्बन्धेन कारणत्वम्। तादृशविषयतासम्बन्धेन द्रव्यसमवेतगुणादेश्चाक्षुषप्रत्यक्षे चक्षुःसंयुक्तसमवायसन्निकर्षस्य स्वरूपसम्बन्धेन कारणत्वम्, विषयतासम्बन्धेन चाक्षुषप्रत्यक्षस्य द्रव्यसमवेतगुणे वर्त्तमानत्वात्तत्र च चक्षुस्संयुक्तपटादिद्रव्यसमवायस्य स्वरूपसम्बन्धेन सत्त्वात्। तादृशसम्बन्धेन द्रव्यसमवेतगुणादिसमवेतगुणत्वादेश्चाक्षुषप्रत्यक्षे चक्षुःसंयुक्तसमवेतसमवायस्य स्वरूपसम्बन्धेन कारणत्वम्, विषयतासम्बन्धेन चाक्षुषप्रत्यक्षस्य द्रव्यसमवेतगुणसमवेतगुणत्वादौ सत्त्वात्तत्र च चक्षुःसंयुक्तपटादिद्रव्यसमवेतगुणसमवायस्य स्वरूप सम्बन्धेन वर्त्तनात्।

बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे महत्त्वोद्भूतरूपयोः सहकारिनिमित्तत्वमिति पूर्वं निरूपितम्। आभ्यां सह तृतीयस्यालोकसंयोगस्याप्यत्र चाक्षुषप्रत्यक्षे हेतुत्वम्।

---

१ तैत्तिरीयब्राह्मणे ३।६।६।, बृहदारण्यकोपनिषदि ३।२।१३।
२ श्लोकवार्त्तिके १४६-५० का०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ननु द्रव्यसमवेतसमवेतानां प्रत्यक्षे महत्त्वोद्भूतरूपयोः स्वाश्रयसमवेतसमवायसम्बन्धेन कारणत्वमिति पूर्वमुक्तम्। तथा च लौकिकविषयतासम्बन्धेन नीलत्वजातेश्चाक्षुषप्रत्यक्षं प्रति तेन सम्बन्धेन महत्परिमाणस्योद्भूतरूपस्य च कारणत्वक्लृप्तौ एकस्या एव नीलत्वजातेर्घटगतनीलरूपे, परमाणुगतनीलरूपे च समवायेन वर्त्तमानत्वात् परमाणुगतनीले नीलत्वजातेश्चाक्षुषापत्तिः। तथैव पृथिवीत्वजातेरप्येकत्वेन परमाणौ तस्या अपि चाक्षुषापत्तिः। एवं सत्ताजातेरप्येकत्वाद् वायौ तस्या अपि चाक्षुषापत्तिस्तत्रापि स्वसमवायिसमवेतत्वसम्बन्धेन घटद्वारा महत्परिमाणस्योद्भूतरूपस्य च सत्त्वात्। एवं वायुस्पर्शेऽपि सत्तायाश्चाक्षुषापत्तिस्तत्रापि घटद्वारा महत्परिमाणस्योद्भूतरूपस्य च स्वाश्रयसमवेतसमवायसम्बन्धेन सत्त्वात् सत्ताजातेश्चैकत्वादिति चेन्न। उद्भूतरूपमहत्परिमाणावच्छिन्नचक्षुःसन्निकर्षस्य हेतुत्वोपगमे क्षत्यभावात्। तथा चोद्भूतरूपावच्छिन्नो महत्त्वावच्छिन्नश्च यश्चक्षुःसंयोगस्तद्वत्समवायस्य द्रव्यसमवेतरूपादिगुणचाक्षुषे हेतुत्वम्। तद्वत्समवेतसमवायस्य च द्रव्यसमवेतसमवेतानां रूपत्वादीनां चाक्षुषे हेतुत्वम्। एवञ्च परमाणौ महत्परिमाणाभावेन तद्गतचक्षुःसंयोगस्य च महत्त्वावच्छिन्नत्वाभावेन महत्परिमाणविशिष्टो यश्चक्षुःसंयोगस्तद्वत्समवेतसमवायस्य परमाणुनीलगतनीलत्वेऽभावान्न तत्र नीलत्वस्य चाक्षुषम्। एवं महत्परिमाणविशिष्टो यश्चक्षुःसंयोगस्तद्वत्समवायस्य पृथिवीपरमाणुगतपृथिवीत्वेऽभावान्न तत्र पृथिवीत्वस्य चाक्षुषापत्तिः। तथैव वायुगतचक्षुःसंयोगस्य रूपावच्छिन्नत्वाभावेनोद्भूतरूपावच्छिन्नो यश्चक्षुःसंयोगस्तद्वत्समवायस्य वायुनिष्ठसत्तायां सुतरामभावान्न तच्चाक्षुषम्। तथैव चोद्भूतरूपावच्छिन्नो यश्चक्षुःसंयोगस्तद्वत्समवेतसमवायस्य वायुस्पर्शनिष्ठसत्तायामभावान्न तस्या अपि चाक्षुषापत्तिः।

अथैवमपि यत्र निविडे तमसि वर्त्तमानस्य घटस्योदरभागे आलोकसंयोगश्चक्षुःसंयोगस्तु घटस्य बाह्यभागे वर्त्तते तत्र महत्त्वावच्छिन्नोद्भूतरूपावच्छिन्नचक्षुःसंयोगस्य आलोकस्य च सत्त्वेऽपि न घटचाक्षुषमिति कार्यकारणभावेऽन्वयव्यभिचार इति चेन्न. एकावच्छेदसामानाधिकरण्यसम्बन्धेनाप्यालोकसंयोगविशिष्टचक्षुःसंयोगस्य विशेषणीयत्वात्। तथा च यत्र बाह्यदेश उक्तरूपश्चक्षुःसंयोगस्तत्रैवालोकसंयोगसत्त्वे सम्भवति चाक्षुषम्। पूर्वोपदर्शितस्थले च भिन्न-भिन्नदेश आलोकसंयोगस्य चक्षुस्संयोगस्य च सत्त्वात्क्लृप्तकारणस्यैवासमवधानमिति न कोऽपि दोषः।

यत्तु चाक्षुषप्रत्यक्षं प्रत्युद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नालोकसंयोगावच्छिन्नचक्षुःसंयोगत्वेन हेतुत्वे साञ्जनचक्षुषो बिडालादेर्वा तमःस्थितघटादिचाक्षुषप्रत्यक्षानुपपत्तिरतो विजातीयत्वमपि चतुर्थविशेषणम् चक्षुस्संयोगे देयम्। तादृशवैजात्यं तु आलोकेतरसकलकारणसमवधानकालीनचाक्षुषानुपधानप्रयोजकचक्षुस्संयोगादिव्यावृत्तं चक्षुस्संयोगमात्रवृत्त्येवेति कल्पनीयमिति **मतम्। तदसमीचीनं प्रतिभाति**— आलोकसंयोगाभावस्य चाक्षुषप्रतिबन्धकत्वमुपगम्याञ्जनसंयोगस्य बिडालचक्षुस्संयोगस्य च स्वातन्त्र्येणोत्तेजकत्वाभ्युपगमे तादृशानुपपत्त्यभावात्।

अत्रायं विशेषः—आलोकसंयोगघटकालोकपदार्थे प्रबलरश्म्यनभिहतत्वं विशेषणं देयम्, दिवसे प्रबलसूर्यरश्म्यभिहतचक्षूरश्मिभिर्गृध्रादीनां संयोगाभावप्रयुक्ततददर्शनस्य सर्वानुभवसिद्धत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

येषां गुणानां चाक्षुषं भवति त इत्थं परिगणिताः—

'संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म च रूपिद्रव्यसमवायाच्चाक्षुषाणि[१] ॥' इति ।

संक्षेपेण स्पार्शनाद्यन्यविधप्रत्यक्षसामग्रीनिर्वचनम्

लौकिकविषयतासम्बन्धेन द्रव्यस्य स्पार्शनप्रत्यक्षं प्रति महत्त्वावच्छिन्नोद्भूतस्पर्शावच्छिन्नत्वक्संयोगस्य समवायसम्बन्धेन कारणत्वम् । तादृशसम्बन्धेन द्रव्यसमवेतानां (संयोगविभागादीनां) स्पार्शनप्रत्यक्षे महत्त्वावच्छिन्नोद्भूतस्पर्शावच्छिन्नत्वक्संयुक्तसमवायस्य पूर्ववदेव स्वरूपसम्बन्धेन कारणत्वम् । तथैव द्रव्यसमवेतसमवेतानां (संयोगत्वविभागत्वादीनां) स्पार्शनप्रत्यक्षे महत्त्वावच्छिन्नोद्भूतस्पर्शावच्छिन्नत्वक्संयुक्तसमवेतसमवायस्य स्वरूपसम्बन्धेन कारणत्वमिति ।

अत्रेदमवधेयम्—चक्षुस्त्वङ्मनांसि त्रीण्येव द्रव्यग्राहकाणीति घ्राणेन पृथिव्या अग्रहणाद् घ्राणसंयोगस्य घ्राणजप्रत्यक्षे, रसनेन्द्रियेणापि द्रव्यस्याग्रहणाद् रसनासंयोगस्य रासनप्रत्यक्षे च कारणत्वं न सम्भवतीति । एवञ्च गन्धप्रत्यक्षे महत्त्वावच्छिन्नघ्राणसंयुक्तसमवायस्य स्वरूपसम्बन्धेन कारणत्वम् । गन्धसमवेतगन्धत्वस्य घ्राणेन्द्रियजन्यप्रत्यक्षे महत्त्वावच्छिन्नघ्राणसंयुक्तसमवेतसमवायस्य स्वरूपसम्बन्धेन कारणत्वम् । तथैव रसविषयकप्रत्यक्षे महत्त्वावच्छिन्नरसनासंयुक्तसमवायस्य, रससमवेतरसत्वप्रत्यक्षे च महत्त्वावच्छिन्नरसनासंयुक्तसमवेतसमवायस्य कारणत्वमिति । श्रोत्रेणापि न द्रव्यप्रत्यक्षं किन्त्वाकाशात्मकद्रव्यगतशब्दादेरेव, श्रोत्रस्य चाकाशात्मकत्वेन श्रोत्रात्मकाकाशसमवेतशब्दस्य प्रत्यक्षे श्रोत्रानुयोगिकसमवायस्य स्वरूपसम्बन्धेन कारणत्वम् । तेन न देशान्तरीणशब्दप्रत्यक्षस्यापत्तिस्तस्याकाशेन सह समवायसम्बन्धसत्त्वेऽपि तादृशसमवायस्य तद्देशस्थश्रोत्रानुयोगिकत्वाभावात् । शब्दसमवेतगुणत्वशब्दत्वादेः प्रत्यक्षे श्रोत्रानुयोगिकसमवेतसमवायस्य स्वरूपसम्बन्धेन कारणत्वम् । विषयतासम्बन्धेन शब्दप्रत्यक्षे सामानाधिकरण्यसम्बन्धेनाकाशगतपरममहत्परिमाणस्य हेतुत्वमित्यविस्मरणीयमेव ।

आत्मनो मानसप्रत्यक्षे 'सुखी अह'मित्याकारके आत्मनिष्ठपरममहत्परिमाणस्य कारणत्वान्मानसप्रत्यक्षेऽपि महत्त्वस्य कारणत्वं निराबाधम् ।

समवायाभावयोः प्रत्यक्षविषयकसामग्रीविमर्शः

अधुना तु समवायाभावयोः षडिन्द्रियवेद्ययोः प्रत्यक्षविषये विचार्यते ।

'रूपसमवायवान् घट' इत्यत्र समवायप्रत्यक्षस्थले चक्षुःसम्बद्धघटे विशेषणं समवायः स्वरूपसम्बन्धेन वर्त्तते । स्वरूपसम्बन्धावच्छिन्नवृत्तितैव विशेषणतेत्युच्यते । सा विशेषणतारूपा विषयता प्रकृतस्थले समवायनिष्ठा । अतः समवायप्रत्यक्ष इन्द्रियसम्बद्धविशेषणतासन्निकर्षस्य कारणत्वम् ।

---

१. वैशेषिकसूत्रम् । ४।१।११ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यद्यप्यनयैव प्रणाल्या विशेषणविशेष्यभावाख्यसन्निकर्षादभावस्यापि प्रत्यक्षं भवति। तथाहि—चक्षुरादीन्द्रियसंयुक्तविशेषणं घटाभावः स्वरूपसम्बन्धेन वर्त्तते। अतः स्वरूपसम्बन्धावच्छिन्नवृत्तितारूपविशेषणता घटाभावे। एवञ्चाभावप्रत्यक्षेऽपीन्द्रियसम्बद्धविशेषणतारूपसन्निकर्षो हेतुः। तथाप्यभावप्रत्यक्षस्य विशेषेण निरूपणं किञ्चिदुपरिष्टात्करणीयमस्तीति नेह तत् प्रतन्यते।

विशेषणविशेष्यभावाख्यः सन्निकर्षो द्विधा—इन्द्रियसम्बद्धविशेष्यत्वम्, इन्द्रियसम्बद्धविशेषणत्वं चेति। 'घटे रूपसमवायः', 'भूतले पटाभावः', इत्यादिप्रत्ययस्थले 'घटवृत्तितावान् रूपसमवायः', 'भूतलवृत्तितावान् पटाभाव' इत्यर्थलाभाद् रूपसमवायपटाभावादीनां विशेष्यपदार्थत्वेन, घटभूतलादेश्च वृत्तितासम्बन्धेन रूपसमवायपटाभावादौ विशेषणत्वाद् रूपसमवायपटाभावादीनां प्रत्यक्षे चक्षुः—संयुक्तघटभूतलादिनिरूपितविशेष्यताख्यस्य सन्निकर्षस्य हेतुत्वम्। रूपसमवायवान् घट' 'पटाभाववद् भूतल'मित्यादिप्रत्ययस्थले रूपसमवायपटाभावादीनां घटभूतलादौ विशेषणत्वमिति तत्र चक्षुःसंयुक्तघटभूतलादिनिरूपितविशेषणतासन्निकर्षस्य हेतुत्वमिति।

अयं विशेषणविशेष्यभावाख्यः सन्निकर्षो बहुविध इति—एतत्प्रकरणारम्भे सन्निकर्षसामान्यनिरूपणप्रसङ्ग एव निरूपितम्। येन-येन सम्बन्धेन पदार्थाः सम्बद्धा भवन्ति तत्तत्सम्बन्धपरम्परान्ते विशेषणतायोजनेनायं लभ्य—इत्यनया रीत्याऽस्यानुगतः परिचय उपस्थातुं शक्यः। यथा—भूतले घटाभावप्रत्यक्षस्थले चक्षुःसंयुक्तं यद्भूतलं तद्विशेषणतारूपः। घटस्पर्शात्मके गुणे रसाभावप्रत्यक्षस्थले चक्षुःसंयुक्तो घटस्तत्समवेतः स्पर्शस्तद्विशेषणता, अर्थात् चक्षुःसंयुक्तसमवेतविशेषणता। घटस्पर्शगतस्पर्शत्वे रसाभावप्रत्यक्षे चक्षुःसंयुक्तो यो घटस्तत्समवेतः स्पर्शस्तत्समवेतं स्पर्शत्वं तद्विशेषणता। भूतलनिष्ठघटाभावे पटाभावप्रत्यक्षार्थं—चक्षुःसंयुक्तं भूतलं तद्विशेषणं घटाभावस्तद्विशेषणतारूपा—इत्यादि।

मीमांसकानां मते त्वभावस्य न प्रत्यक्षविषयता किन्त्वनुपलब्धिप्रमाणजन्यानुपलब्धिकप्रमितिविषयतैवेति चतुर्थप्रकरणान्ते सम्यङ्निरूपितम्। नैयायिकास्तु अनुपलब्धिसहकृतेनेन्द्रियेणैवाभावप्रत्यक्षसम्भवे अनुपलब्ध्यात्मकं प्रमित्यन्तरं तत्करणत्वेनानुपलब्ध्यात्मकं प्रमाणान्तरं च गौरवप्रतिसन्धानेन न स्वीकुर्वन्तीत्यपि विवेचितम्। तन्मत इन्द्रियजन्येऽभावप्रत्यक्षेऽनुपलब्धिः सहकारिकारणम्। यथा घटादिप्रत्यक्षाभावो घटाद्यभावप्रत्यक्षे सहकारिकारणम्। न चाभावस्य प्रत्यक्षे प्रतियोग्युपलम्भाभावस्य कारणत्वे जलपरमाणौ पृथिवीत्वोपलम्भाभावसत्त्वात्तत्र पृथिवीत्वाभावप्रत्यक्षमापद्येतेति वाच्यम् योग्यताविशिष्टस्यैव प्रतियोग्युपलम्भाभावस्य कारणत्वेन जलपरमाणुगतपृथिवीत्वाभावस्य चायोग्यत्वेन तादृशापत्त्यभावात्। तथाहि—यत्र 'यद्यत्र घटः स्यात्तर्ह्युपलभ्येते'ति तर्कावतारस्तत्र घटाभावप्रत्यक्षं भवति। अस्मिंस्तर्के 'यद्यत्र घटः स्यादि'ति प्रथमदलमापादकरूपं प्रतियोगिनो घटस्य सत्ताया आरोपकं भवति। 'तर्ह्युपलभ्येत' इत्यापाद्यस्य घटप्रत्यक्षस्यारोपः क्रियते। तेन चापादकेन प्रतियोगिसत्त्वारोपेण घटाभावरूपापादकाभावस्य सिद्धिः प्रत्यक्षरूपा भवति। तत्र घटोपघटोपलम्भाभावरूपापाद्याभावेन लम्भाभावे यो घटोपलम्भप्रतियोगिकत्वं धर्मः स एव प्रकृते योग्यता। प्रतियोगिसत्ताव्यापकोपलम्भप्रतियोगिकत्वं योग्यतेति निष्कर्षः। जलपरमाणौ च यद्यत्र पृथिवीत्वं स्यात्तर्ह्युपलभ्येतेत्यापाद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यितुमशक्यम् । अतः पृथिवीत्वसत्तारोपजन्यारोपविषयपृथिवीत्वप्रतियोगित्वस्य जलपरमाणुगतपृथिवीत्वाभावेऽभावान्न तत्र तस्य प्रत्यक्षम् ।

आलोकसंयोगावच्छिन्नोद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयोगो यत्र वर्त्तते तत्रैव भूतले 'यद्यत्र घटःस्यात्तर्ह्युपलभ्येते'त्यापादयितुं शक्यत्वेन यत्रालोकसंयोगावच्छिन्नचक्षुःसंयोगो न वर्त्तते तत्र घटात्मकप्रतियोगिसत्ताव्यापकप्रतियोग्युपलम्भप्रतियोगिकत्वरूपयोग्यताया एवाभावेन योग्यताविशिष्टप्रतियोग्युपलम्भाभावात्मककारणाभावादन्धकारे घटाभावस्य न चाक्षुषप्रत्यक्षात्मकं कार्यं भवति । किन्तु घटस्पार्शनप्रत्यक्ष आलोकसंयोगस्याकारणत्वेनोद्भूतस्पर्शावच्छिन्नमहत्त्वावच्छिन्नत्वक्संयोगस्यैव च तत्र कारणत्वेन घटस्याभावकालेऽन्धकारेऽपि 'यद्यत्र गृहे घटः स्यात्तर्हि त्वचा उपलभ्येते'त्यापादयितुं शक्यत्वात् घटसत्ताव्यापकघटस्पार्शनोपलम्भप्रतियोगिकत्वात्मकयोग्यताविशिष्टाभावरूपकारणस्याक्षततया तद्बलाद् घटाभावस्पार्शनप्रत्यक्षं भवत्येव, न तु चाक्षुषप्रत्यक्षम् । एवमेव 'घटे यदि गुरुत्वं स्यात्तर्ह्युपलभ्येत', 'देवदत्ते यदि धर्मः स्यात्तर्ह्युपलभ्येत', मैत्रे यद्यधर्मः स्यात्तर्ह्युपलभ्येत', 'वटे यदि पिशाचः स्यात्तर्ह्युपलभ्येत' इत्यादीनामप्यापादयितुमशक्यत्वेन तत्र गुरुत्वे पिशाचादौ वा 'यद्यमुकःस्यात्तर्ह्युपलभ्येते'त्यस्य सुतरामेवापादयितुमशक्यत्वान्न गुरुत्वधर्माधर्मादीनामभावस्य प्रत्यक्षम् । यदधिकरणकत्वेनाभावप्रत्यक्षं चिकीर्षितं तस्यापि प्रत्यक्षयोग्यतायाः प्रथममेवावश्यकत्वमिति ।

सर्वेषां प्राणिनां न सर्वाणि ज्ञानेन्द्रियाणीति जैनाचार्येण हेमचन्द्रेण विभिन्नप्रणिनां ज्ञानेन्द्रियाणि विषयेन्द्रियनिरूपणावसरे परिगणितानि । तद्यथा—

स्पार्शनरसनेन्द्रिये—कृमि-अपादिका-नूपुरकगण्डूपद-शङ्ख-शुक्तिकाशम्बुका-जलूका-प्रभृतीनां त्रसानाम् ।

स्पार्शनरसनघ्राणानि—पिपीलिका-रोहणिका-उपचिका-कुन्थुतुबरक-त्रपुसबीज-कार्पासास्थिका-शतपदी-अयेनकतृणपत्रकाष्ठहारकादीनाम् ।

स्पार्शनरसनघ्राणचक्षूंषि—भ्रमर-वटर-सारङ्ग-मक्षिका-पुत्तिका-दंश-मशक-वृश्चिक-नन्द्यावर्त-कीटक-पतङ्गादीनाम् ।

श्रोत्रेण सहितानि पञ्च—मत्स्य-उरग-भुजग-पक्षि-चतुष्पदानां तिर्यग् योनिजानां सर्वेषां च नारकमनुष्यदेवानाम् ।

मण्डूकशरीरे तु चक्षुःश्रोत्रयोर्न पृथग् गोलक इत्यवधेयम् ।

अलौकिकसन्निकर्णविमर्शः

सामान्यलक्षणासन्निकर्षः—यथा चक्षुषा संयोगरूपसन्निकर्षद्वारा प्रमाताऽभिमुखे वर्तमानं घटादिकं प्रत्यक्षीकरोति, तथैव सामान्यलक्षणात्मकसन्निकर्षद्वाराऽनभिमुखं भूतादिकालीनमपि घटादिकं प्रत्यक्षीकरोति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र आकृतिगुणादिमत्त्वेन समानानां पदार्थानां धूमघटगवादीनां भावः स्वाभाविको धर्मः सामान्यं जातिः (धूमत्वघटत्वगोत्वादिरूपा) द्रव्यगुणकर्मवृत्तिरिति सर्वमतसाधारण्येन स्वीक्रियते ।

प्राचीनतार्किकमते **'सामान्यं च सा लक्षणा चेति'** इत्यादिरीत्या विगृह्य सामान्यलक्षणारूपः सन्निकर्षो धूमत्वाद्यात्मक एवेति स्वीक्रियते । न च धूमत्वाद्यात्मकसामान्यलक्षणाया नित्यत्वेन सदैव सकलधूमविषयकप्रत्यक्षापत्तिरिति वाच्यम्, चक्षुरादीन्द्रियसंयुक्तधूमादिविशेष्यक 'अयं धूम' इत्याकारकज्ञानोत्पत्त्यनन्तरं तादृशज्ञाननिरूपितप्रकारताविशिष्टसामान्यस्यैव प्रत्यासत्तित्वाभ्युपगमात् केवलधूमत्वाद्यात्मकसामान्यस्य च तथात्वास्वीकारात् । तथा च चक्षुस्संयोगेन धूमविषयकप्रत्यक्षात्मकज्ञाने सति ततो धूमसमवेतधूमत्ववत्तासम्बन्धेन सकलधूमविषयकप्रत्यक्षात्मकज्ञानोत्पादे चक्षुरादीन्द्रियसम्बद्धविशेष्यकचाक्षुष प्रकारतापन्नं धूमत्वादिकं सन्निकर्षः ।

ननु येनेन्द्रियेण तद्व्यक्तिर्गृह्यते, तेनैव तद्गता जातिरपि गृह्यत इति न्यायेन धूमत्वादिरूपसामान्यस्यापीन्द्रियसम्बद्धत्वेनेन्द्रियसम्बद्धसामान्यस्यैव सन्निकर्षत्वसम्भवे व्यर्थमेवेन्द्रियसम्बद्धविशेष्य ज्ञाननिरूपितप्रकारतेति पर्यन्तं निवेशनमिति चेन्न, पुरतो दृश्यमानधूलीपटले 'अयं धूम' इति धूमत्वप्रकारभ्रमात्मकज्ञानानन्तरभाविनः 'धूमाः' इति सकलधूमविषयकालौकिकप्रत्यक्षस्य सर्वानुभवसिद्धस्यानुपपत्तेः । चक्षुःसंयोगस्य धूलीपटले सत्त्वेन तदा धूमत्वेन धूमसमवेतसामान्येन सह चक्षुरिन्द्रियसंयुक्तसमवायात्मकसन्निकर्षाभावात् ।

अथ यत्र 'सुरभि चन्दनम्' इत्यादौ चन्दनांशे लौकिकं चाक्षुषं सौरभांशे च ज्ञानलक्षणसन्निकर्षजन्यालौकिकं चाक्षुषम् तत्र ज्ञानलक्षणात्मकसन्निकर्षद्वारा चक्षुरिन्द्रियसम्बद्धसौरभविशेष्यक— 'सुरभि चन्दनम्' इति ज्ञानप्रकारताविशिष्टसौरभत्वप्रत्यासत्त्या सकलसौरभविशेष्यकचाक्षुषापत्तिः स्यात् । न चेदमिष्टम्, सामान्यप्रत्यासत्त्या बहिरिन्द्रियेण सर्वांशे लौकिकभानस्यानुभवविरुद्धत्वात् । विनश्यदवस्थचक्षुःसंयोगाच्च घटचाक्षुषोत्तरं तादृशचाक्षुषज्ञानात्मकेन्द्रियसम्बन्धविशिष्टनिष्ठलौकिकविशेष्यताशालिपूर्वोक्तचाक्षुषज्ञानप्रकारीभूत—घटत्वात्मकसामान्यलक्षणाप्रत्यासत्त्या सकलघटविषयकचाक्षुषापत्तिः । तदभ्युपगमे च तादृशालौकिकचाक्षुषात्मकज्ञानप्रकारीभूतघटत्वस्यैव प्रत्यासत्तित्वसम्भवेन तदुत्तरम्, पुनस्तथैव चानन्तरभाव्यलौकिकचाक्षुषात्मकज्ञानप्रकारतापन्नघटत्वस्य प्रत्यासत्तित्वसम्भवे सामान्यलक्षणाजन्यचाक्षुषधाराप्रसङ्ग इति चेन्न, बहिरिन्द्रियेण सामान्यलक्षणासन्निकर्षद्वारा प्रत्यक्षे जननीये इन्द्रियसम्बद्धविशेष्यज्ञानप्रकारतापन्नसामान्यात्मकसन्निकर्षघटकसम्बन्धस्य लौकिकस्यैव ग्रहणात् । तथा चोक्तं दीधितौ—**'अत्र च बहिरिन्द्रियस्य लौकिकः सम्बन्धो ज्ञानस्य तत्तादिन्द्रियजन्यत्वं च नियामकम्**[1]**'** इति । एवञ्च न पूर्वोक्तश्चाक्षुषधाराप्रसङ्गः, चक्षुःसंयोगविगमे घटादौ ज्ञानात्मकचक्षुःसन्निकर्षसत्त्वेऽपि चक्षुर्लौकिकसन्निकर्षाभावेन विवक्षितसामान्यात्मकसामान्यप्रत्यासत्त्यभावादुक्तरीत्या चाक्षुषधाराया आपादयितुमशक्यत्वात् ।

---

१ सामान्यलक्षणाग्रंथे पृ० १६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न चैवमपि 'सुरभि चन्दन' मिति प्रत्यक्षोत्तरं सौरभत्वसामान्यप्रत्यासत्त्या पूर्वोक्तो यावत्सौरभविशेष्यकचाक्षुषप्रसङ्गस्तदवस्थ एव, सौरभस्य चक्षुःसंयुक्तसमवायात्मकलौकिकसन्निकर्षवत्तया सौरभत्वस्य चक्षुर्लौकिकसन्निकर्षविशिष्टविशेष्यक 'सुरभि चन्दनम्' इति चाक्षुषप्रकारतापन्नसौरभत्वरूपायाः सामान्यप्रत्यासत्तेरक्षुण्णत्वादिति वाच्यम्, उक्तसामान्यप्रत्यासत्तिशरीरे चक्षुर्लौकिकसन्निकर्षविशिष्टविशेष्यकत्वं विहाय चक्षुर्लौकिकसन्निकर्षप्रयुक्तविशेष्यतानिरूपितत्वस्य चाक्षुषप्रकारतायां निवेशेन दोषाभावात् ।

अथैवं गुरुत्वत्वेन यत्किञ्चिद् गुरुत्वोपस्थित्यनन्तरं सकलगुरुत्वविषयकमानसप्रत्यक्षस्यानुपपत्तिर्गुरुत्वस्यातीन्द्रियतयेन्द्रियेण सह लौकिकसम्बन्धेन सम्बद्धविशेष्यकज्ञानप्रकारीभूतसामान्यस्यासम्भवात् लौकिकविशेष्यताशालिमानसप्रकारताविशिष्टगुरुत्वत्वात्मकसामान्यस्य चाप्रसिद्धचरत्वादिति चेत्, सत्यम्; इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतसामान्यस्य बहिरिन्द्रियजन्यसकलघटादिप्रत्यक्षस्थल एव सन्निकर्षविधया कारणत्वोपगमान्मनःकरणकसकलघटादिविषयकप्रत्यक्षस्थले च केवलज्ञानप्रकारीभूतसामान्यस्यैव सन्निकर्षत्वकारणत्वसम्भवेन स्वीकारात् । तथा च गुरुत्वोपस्थित्यात्मकज्ञानप्रकारीभूतगुरुत्वत्वसन्निकर्षस्यैव तत्र कारणत्वसम्भवेन सकलगुरुत्वविषयकमानसप्रत्यक्षोत्पत्तौ न किञ्चिद् बाधकमिति ।

अनयैव रीत्या शब्दादिना यत्किञ्चित् पिशाचाद्युपस्थितौ मानसस्य सकलपिशाचादिबोधस्याप्युपपत्तिरिति ।

तदुक्तं दीधितिकारैरपि—**'एवं चाणुत्वेन यत्किञ्चिदणूपस्थितावपि सकलाणुगोचरो मानसो बोध इति वदन्ति**[1]' इति ।

अथ यत्किञ्चिद् दण्डप्रकारकपुरुषविशेष्यकचाक्षुषज्ञानानन्तरं दण्डवत्त्वात्मकसन्निकर्षाज्जायमानस्य सर्वदण्डिविषयकप्रत्यक्षस्यानुपपत्तिः, यत्किञ्चिद् दण्डस्यैव चक्षुरिन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारतापन्नत्वेन तस्य दण्डान्तरवत्यभावादिति चेन्न, दण्डवत्त्वावच्छिन्नप्रकारताकालौकिकप्रत्यक्षं प्रति चक्षुरिन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारतायामवच्छेदकस्य दण्डत्वात्मकसामान्यस्यैव स्वाश्रयाश्रयत्वसम्बन्धेन हेतुत्वोपगमेन, तस्य च तादृशसम्बन्धेन दण्डान्तरवत्यपि विद्यमानत्वेन समेषां दण्डवतां प्रत्यक्षोपपत्तौ बाधकाभावात् । तथैव दण्डत्वावच्छिन्नावच्छेदकताकप्रकारताक—दण्डिमानित्याकारकप्रत्यक्षं प्रति चक्षुरिन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारतावच्छेदकतावच्छेदकस्य दण्डत्वात्मकसामान्यस्य स्वाश्रयाश्रयाश्रयत्वसम्बन्धेन हेतुत्वम् । एवं दण्डत्वावच्छिन्नावच्छेदकतावच्छेदकताकप्रकारताक—दण्डिमद्वानित्याकारकप्रत्यक्षं प्रति चक्षुरिन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारतावच्छेदकतावच्छेदकतावच्छेदकस्य दण्डत्वात्मकसामान्यस्य स्वाश्रयाश्रयाश्रयाश्रयत्वसम्बन्धेन हेतुत्वमित्यादिरीत्याऽन्ततो गत्वा सामान्यस्यैव हेतुत्वं व्यवस्थाप्यत इति विवेचनीयमिति ।

---

१ सामान्यलक्षणाग्रंथे पृ० २७ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथैवमपि संयोगेन 'दण्डवत्पुरुषः' इति ज्ञानोत्तरमिन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतदण्डस्य कालिकेन महाकाले जन्ये च घटपटादौ सर्वत्र सत्त्वाद् 'दण्डवान् कालः, दण्डवान् घटः' इत्याद्यलौकिकचाक्षुषापत्तिः कारणीभूतपूर्वोक्तज्ञानीयप्रकारताविशिष्टस्य दण्डस्य कालिकेन महाकाले जन्यमात्रे च सत्त्वादिति चेन्न, इन्द्रियसम्बद्धविशेष्यकज्ञानीययत्सम्बन्धावच्छिन्नप्रकारताविशिष्टं सामान्यं भवति, तत्सम्बन्धेन सामान्यवतां प्रत्यासत्तित्वोपगमे तादृशदोषानवकाशात् । प्रकृते च संयोगेन दण्डवत्पुरुषज्ञानप्रकारीभूते दण्डे संयोगावच्छिन्ना प्रकारतेति संयोगेनैव दण्डवतां पुरुषाणामलौकिकप्रत्यक्षे निरुक्तसंयोगेन दण्डस्य सन्निकर्षत्वम्, न तु कालिकेनेति न पूर्वोक्तदूषणानां प्रसरः । अत्र सर्वत्र कार्यतावच्छेदकसम्बन्धोऽलौकिकमुख्यविशेष्यत्वम्, कारणतावच्छेदकसम्बन्धश्च यथायथं समवायः, स्वाश्रयाश्रयत्वम्, स्वाश्रयाश्रयाश्रयत्वमित्यादिर्भवतीति बोद्धव्यम् ।

नव्यास्तु ज्ञायमानसामान्यस्य प्रत्यासत्तित्वे विनष्टतद्दण्डप्रकारकयत्किञ्चिद्देशविशेष्यकभ्रमात्मकप्रत्यक्षानन्तरं जायमानं तद्दण्डप्रकारेण वास्तवस्य तद्दण्डाश्रयस्यालौकिकप्रत्यक्षं न स्याद्, इन्द्रियसम्बद्धविशेष्यज्ञानप्रकारतापन्नतद्दण्डात्मकसामान्यस्य तदानीमभावात् । अत एव न ज्ञायमानसामान्यं प्रत्यासत्तिः, किन्तु सामान्यं लक्षणमर्थाद् विषयतया निरूपकं यस्याः प्रत्यासत्तेरिति शब्दव्युत्पत्त्या सामान्यज्ञानं प्रत्यासत्तिरिति स्वीकर्तुमुचितम् । तथा च सामान्यस्यातीतानागतत्वेऽपि सामान्यज्ञानस्य सम्भवेन सामान्यज्ञानरूपायाः प्रत्यासत्तेरक्षुण्णतया नातीतादिसामान्यप्रकारेण तदाश्रयस्यालौकिकप्रत्यक्षानुपपत्तिरिति वदन्ति । एतन्मते 'दण्डाः' इत्याकारकालौकिकप्रत्येक्षस्थले दण्डत्वप्रकारकालौकिकप्रत्यक्षत्वं कार्यतावच्छेदकम्, दण्डत्वज्ञानत्वं कारणतावच्छेदकम्, स्वप्रकारीभूतदण्डत्वादिसामान्याश्रयत्वं कार्यतावच्छेदकसम्बन्धः, स्वविषयदण्डत्वादिसामान्याश्रयत्वं च कारणतावच्छेदकसम्बन्धः । एवञ्चात्र समवायन तद्धर्मप्रकारकप्रत्यक्षत्वावच्छिन्नं प्रति समवायेन तद्धर्मविषयकज्ञानत्वेन हेतुत्वमिति रीत्या आत्मनिष्ठप्रत्यासत्त्या कार्यकारणभावः ।

अत्रापि तद्विषयकज्ञानत्वेन हेतुत्वे उच्यमाने समवायेन दण्डत्वप्रकारकज्ञानोत्तरं कालिकेन दण्डत्वाश्रयस्य यावतः प्रत्यक्षापत्तिः स्यात्, अतस्तत्सम्बन्धेन तत्प्रकारकतदाश्रयप्रत्यक्षं प्रति तत्सम्बन्धावच्छिन्नतन्निष्ठविषयताकज्ञानस्य हेतुत्वमिति वक्तव्यम् । न चैवं निर्विकल्पकस्य कारणत्वानुपपत्तिस्तदीयविषयत्वस्य सम्बन्धानवच्छिन्नत्वादिति वाच्यम्; तत्संग्रहार्थं तत्सम्बन्धावच्छिन्नत्वस्य स्थाने तदितरससम्बन्धानवच्छिन्नत्वस्य निवेशेन दोषाभावात् ।

वस्तुतस्तु पूर्वोक्तरीत्या आत्मनिष्ठप्रत्यासत्त्या कार्यकारणभावो नोचितः, कारणतावच्छेदकगर्भे तत्तत्सामान्याश्रयस्य प्रवेशने गौरवात् । किन्तु स्वप्रकारीभूतदण्डत्वादिसामान्याश्रयनिष्ठविशेष्यतासम्बन्धेन प्रत्यक्षं प्रति स्वविषयीभूतदण्डत्वादिसामान्याश्रयनिष्ठविशेष्यतासम्बन्धेन ज्ञानं कारणमिति रीत्या विषयनिष्ठप्रत्यासत्त्यैव कार्यकारणभावः कल्पनीयः ।

अथ सामान्यज्ञानस्यैव सन्निकर्षत्वाभ्युपगमे घटादिना सह चक्षुसंयोगं विनापि यदा स्मरणाद्यात्मकं घटज्ञानं जायते, तदा यावद्घटविषयकालौकिकप्रत्यक्षोत्पादापत्तिः स्यादिति चेन्न, तत्तदिन्द्रियेण तत्तद्धर्माश्रयस्य सामान्यलक्षणासन्निकर्षद्वाराऽलौकिकप्रत्यक्षात्मके ज्ञाने जननीये सामान्यस्य यत्किञ्चिद्धर्मिणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सामान्यप्रकारकचक्षुरिन्द्रियजन्यलौकिकप्रत्यक्षज्ञानस्य सामग्र्या अप्यपेक्षणीयत्वेन तादृशदोषाभावात् । तदिदमुक्तं दीधितिकारैः—**अपेक्षणीयं च तदिन्द्रियकरणकतद्धर्मवत्त्वबोधसामग्र्यन्तरम्**[१] इति ।

नन्वेवं तत्प्रकारकप्रत्यक्षं प्रति निर्विकल्पकादिसाधारणतद्विषयकज्ञानत्वेन हेतुत्वं व्यवस्थाप्य पुनश्चातिप्रसङ्गवारणाय कारणसामग्र्यां तदिन्द्रियजन्यत्वं निवेश्यते । तदपेक्षया प्राचीनमतानुसारेणेन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतेत्यादिरीत्या कार्यकारणभावस्थापन एव लाघवमिति चेन्न, प्राचीनमतेऽपि कारणसामग्रीनिवेशं विनाऽनिस्तारात् । तथाहि—यदा विद्युत्सम्पातकालावच्छेदेन चक्षुर्घटसन्निकर्षस्तदनन्तरं निर्विकल्पात्मकं घटघटत्वयोश्चाक्षुषं, ततश्च घटत्वप्रकारकचाक्षुषं विद्युत्संयोगनाशश्च, तदा तादृशसंयोगनाशानन्तरं न ह्यलौकिकं लौकिकं वा चाक्षुषमनुभवसिद्धम् । किन्त्विन्द्रियसम्बद्धविशेष्यकज्ञानीयप्रकारतापन्नसामान्यमात्रस्य कारणत्वाभिधाने विद्युत्संयोगनाशेऽपीन्द्रियसंयोगादेस्तत्र सत्त्वेन तदानीं घटत्वादिना निखिलघटप्रत्यक्षापत्तिः स्यात् । तत्स्वीकारे तु तत्कालेऽपि चक्षुःसन्निकर्षसत्त्वात् तत्सम्बद्धविशेष्यकालौकिकात्मकज्ञानप्रकारतापन्नघटत्वस्य च सत्त्वात् पुनरपि प्रत्यक्षोत्पादप्रसङ्गः । तथा च चाक्षुषधारापत्तिः। सामग्र्यन्तरस्य सहकारिकारणत्वाभिधाने तु न तादृशापत्तिः, आलोकसंयोगादिघटितसामग्र्या उत्तरकाले विरहात् । एवञ्चावश्यक्लृप्तसामग्र्यन्तरापेक्षाया हेतुत्वस्वीकारेणैवोपपत्तौ कार्यकारणभावे तत्तदिन्द्रियजन्यत्वनिवेशनं प्राचीनानां व्यर्थमेवेत्याकलनीयम् । तथा चोपरिष्टादुक्तं दीधितिकारैः—'**अत एवान्धतमसे सौदामिनीसम्पातजनितेऽपि द्रव्यप्रत्यक्षे चरमं न चाक्षुषो निखिलद्रव्यसाक्षात्कारसन्तानः**'[२] इति ।

ज्ञानलक्षणसन्निकर्षनिरूपणम्

'सुरभि चन्दनम्' इत्यादौ सौरभत्वादिप्रकारकचन्दनविशेष्यकचाक्षुषे चक्षुरयोग्यस्य सौरभादेरपि भानं यत्र भ्रमाद् भवति, तत्र न लौकिकसन्निकर्षस्य कथमपि सम्भवः, नापि सामान्यलक्षणसन्निकर्षेण तद्भानं सम्भवति, तदर्थमपेक्षितस्य सौरभत्वत्वादिज्ञानस्याभावात् । अत एव तत्र ज्ञानलक्षणसन्निकर्षात् तद्भानमित्यभ्युपेयते ।

यत्र च शुक्तिकया चक्षुःसन्निकर्षानन्तरं तस्याः शुक्तिकात्वाग्रहणपूर्वकं 'इदं रजतम्' इति ज्ञानं कस्यचित् पुंसो जायते, तत्र रजतत्वेन सह चक्षुषो लौकिकसन्निकर्षो न वक्तुं शक्यते । नापि सामान्यलक्षणा, तस्याः सामान्याश्रयस्यैव प्रत्यक्षोपधानस्वाभाव्याद्; इदन्त्वेन भासमानायाः शुक्तेस्तदनाश्रयतया तया शुक्तौ 'इदं रजतम्' इति प्रत्यक्षजननासम्भवात् । तत्रापि रजतत्वप्रकारकस्मरणात्मकज्ञानलक्षणाख्यसन्निकर्षादेव रजतत्वेन शुक्तेः प्रत्यक्षं भवतीत्यभ्युपेयते ।

तत्स्वरूपञ्चेत्थम्—यत्रैकदा कश्चित् पुरुषः चन्दनं घ्रात्वा सुरभि चन्दनमित्यवधृत्य पुनः कालान्तरे दूरतश्चन्दनमजिघ्रन्नपि दृष्ट्वैव तत् 'सुरभि चन्दनम्' इति चक्षुषैवाध्यवस्यति, तत्र

१ सामान्यलक्षणाग्रन्थे पृ० ६० ।

२ सामान्यलक्षणाग्रन्थे पृ० ६१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'सुरभि चन्दनमि'त्याकारकज्ञाने सौरभं चन्दनं, चन्दनत्वं च भासन्ते । तादृशस्थले चक्षुःसंयोगेन चन्दनज्ञानम्, चक्षुस्संयुक्तसमवायेन चन्दनत्वज्ञानं च लौकिकप्रत्यक्षात्मकमेव, तयोर्लौकिकसन्निकर्षवत्त्वात् । किन्तु घ्राणसन्निकर्षं विनापि जायमानं सौरभज्ञानं न केनचिल्लौकिकसन्निकर्षेण, अपि तु पूर्वानुभवोद्भूतोद्बुद्धसंस्कारोद्भावितेन चक्षुःसंयुक्तमनःसंयुक्तात्मसमवेतस्मरणात्मकज्ञानरूपसन्निकर्षेणोत्पद्यत इति तदलौकिकप्रत्यक्षात्मकमेव ।

न च सौरभांशे स्मरणमुपगन्तव्यमिति वाच्यम्; स्मृतित्वप्रत्यक्षत्वयोः साङ्कर्यापत्तेः, अतो ज्ञानलक्षणसन्निकर्षमहिम्ना सौरभमवगाहमानं 'सुरभि चन्दनम्' इत्येकं विशिष्टप्रत्यक्षमुत्पद्यत इत्येव स्वीकार्यम् ।

सामान्यलक्षणज्ञानलक्षणयोर्भेदस्य स्पष्टीकरणम्

सामान्यलक्षणा हि सामान्याश्रयाणां धर्मिणां ज्ञानं जनयति । तस्याश्च स्वप्रकारीभूतसामान्यवत्त्वसम्बन्धेन प्रत्यक्षं प्रति स्वविषयसामान्यवत्त्वसम्बन्धेन हेतुत्वम् । ज्ञानलक्षणा तु यस्य सौरभादेः स्मरणाद्यात्मकं ज्ञानं प्राग् जातं तस्यैव सौरभाद्यात्मकधर्मस्य ज्ञानं जनयति, न तु तदाश्रयस्य चन्दनादेरपीति । एवञ्च प्रकारतासम्बन्धेन प्रत्यक्षं प्रति विषयतासम्बन्धेन ज्ञानलक्षणसन्निकर्षस्य हेतुत्वं पर्यवस्यति । तथा च नव्यतार्किकमत उभयोर्ज्ञानरूपत्वेऽपि फलवैचित्र्यात् प्रत्यासत्तितावच्छेदकसम्बन्धभेदाच्च भेद इति सिद्धम् । तदुक्तं भाषापरिच्छेदे—

'आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते ।
तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते ॥
विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ।[१]' इति ।

अलौकिकसन्निकर्षानभ्युपगमवादिमतम्

दीधितकारप्रभृतिनव्यनैयायिकानाम्, मीमांसकानां वेदान्तिनां च मते सामान्यलक्षणा नाम ज्ञानलक्षणा च नाम नास्ति काचित् प्रत्यासत्तिः । न च तदनभ्युपगमे महानसीयधूमेन सहैवेन्द्रियस्य सन्निकर्षात् तत्रैव व्याप्तिग्रहसम्भवे पर्वतीयधूमादनुमित्यनुपपत्तिः, तदभ्युपगमे तु धूमत्वादेरेव प्रत्यासत्तित्वात् तया च प्रत्यासत्त्या पर्वतीयधूमस्यापि प्रत्यासन्नत्वेन तत्रापि व्याप्तिग्रहसम्भवे न काप्यनुपपत्तिरिति वाच्यम्; सकलधूमगतवह्निव्याप्यत्वस्यैकत्वेन महानसीयधूमे गृहीतस्य तस्यैव पर्वतीयधूमेऽप्यक्षतत्वेन तदवगत्यर्थं सामान्यलक्षणाया अकिञ्चित्करत्वात् ।

ननु यो यत्र पूर्वं प्रत्यक्षतया भातस्तस्यैव तत्र संस्कारवशादलौकिकप्रत्यक्षे भानम्, यत्र च यस्य पूर्वं न कदापि प्रत्यक्षतया भानं तस्य तत्र धीरनुमित्याद्यात्मिकैव, न तु प्रत्यक्षात्मिकेति प्राचां मते, उपनयसन्निकर्षास्वीकर्तृमते, हेतुनिष्ठं साध्यसामानाधिकरण्यमेव व्याप्तिः, न तु साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकमिति पक्षे च महानसीय एव धूमे गृहीतस्मृतव्याप्तेः

१ भाषापरिच्छेदे कारिके ६४-६५ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पर्वतीयधूमे प्रत्यक्षासम्भव इति चेन्न, व्याप्तिस्मृतिप्रकारेण पक्षधर्मताज्ञानस्यानुमितिहेतुत्वोपगमेन महानसीयस्यैव धूमस्य धूमत्वेन व्याप्तिस्मृतिविषयत्वेऽपि सामान्यलक्षणां विनैव तादृशस्मृतिप्रकारी-भूतधूमत्वप्रकारेण पर्वतीयधूममवगाहमानस्य पर्वतादौ धर्मिणि वह्निव्याप्यधूमवत्त्वावगाहिनः परामर्शस्योदये बाधकाभावात् ।

अथ महानसीयप्रत्यक्षधूमे वह्निव्याप्यत्वनिर्णयानन्तरं धूमत्वात्मकसामान्यलक्षणसन्निकर्षेण कालान्तरीणदेशान्तरीणसकलधूमानामलौकिकप्रत्यक्षं जायते । ततस्तेषु धूमेषु मध्ये व्याप्यतया गृहीता ये महानसीयादिधूमास्तद्भिन्नेषु धूमेषु वह्निव्यभिचारसंशयो भवति । किन्तु सामान्यलक्षणानभ्युपगमे तस्यानु-पपत्तिरुपस्थितेषु महानसीयादिषु वह्निव्याप्यत्वस्य निश्चितत्वादनुपस्थितानां चाप्रसिद्धचैव संशयधर्मित्वा-नुपपत्तेरिति चेन्न; धूमत्वेन यत्र धूमे धूमत्वसामानाधिकरण्येन वह्निव्याप्तिनिश्चयस्तत्रैव धूमे धूमत्वावच्छेदेन वह्निव्याप्ति धूमत्वसामानाधिकरण्येन वह्निव्यभिचारं च गृह्णतः संशयस्योत्पत्तेर-प्रत्यूहत्वाद् 'घटत्वेनेतरभेदनिश्चयेऽपि पृथिवीत्वादिना तत्र संशयसिषाधयिषे भवत एव' इत्यादिनैवमाशय-कार्थस्य मणिकारैः स्पष्टीकरणात् ।

न च प्राचीनमते यत्र यस्य निश्चयस्तत्र न केनापि प्रकारेण तस्य संशयः, समानविशेष्य-कत्वेनैव तयोर्विरोधोपगमादिति वाच्यम्; समानविषयकसंशयप्रतिबन्धकतायामतिरिक्तसम्भावनाया उत्तेजक-त्वेन 'धूमो वह्निव्याप्यः' इति निश्चयेऽपि 'धूमत्वं वह्निव्याप्यत्वेन निश्चिततत्तद्धूमभिन्नवृत्तिर्न वे'ति संशयकाले तादृशसंशयस्य (धूमत्वेन धूमो वह्निव्यभिचारी न वेति संशयस्य) अवश्यमभ्युपगन्तव्यत्वात् प्रामाण्यसंशयकाले विषयसंशयवत् । स्वीकर्त्तव्यमवश्यं चैतत् प्राचीनैरपि । अन्यथा तन्मते 'रूपत्वं पार्थिवादित्रिविधरूपभिन्नवृत्तिर्न वे'ति संशयकाले वायौ पार्थिवादिरूपविशेषाभावनिश्चयेऽपि जायमानस्य वायू रूपवान्न वेति संशयस्यानुपपत्तिः स्यात् । पार्थिवादिरूपाणि वायुवृत्तित्वाभाववन्तीति निश्चयेऽपि 'रूपत्वं पार्थिवादित्रिविधरूपभिन्नवृत्ति न वे'ति संशयकाले जायमानस्य 'रूपं वायुवृत्ति न वे'ति संशयस्यानुपपत्तिश्च ।

न चैतादृशोत्तेजकस्य सदैव सम्भवे निश्चयस्य प्रतिबन्धकत्वमेव लोकसिद्धं भज्येतेति वाच्यम्; रूपत्वावच्छेदेन पार्थिवादित्रिविधरूपान्यत्वाभावनिश्चयकाले संशयस्य प्रतिबध्यत्वेऽपि तादृशनिश्चयस्य कादाचित्कत्वेन तदभावदशायां संशयस्याप्युपपत्तौ बाधकाभावात् ।

ननु पाकत्वेन यत्किञ्चित्पाकस्य; सुखत्वेन यत्किञ्चित्सुखस्य चोपस्थित्यनन्तरं सामान्य-लक्षणया भाविभूतसकलपाकानां तादृशसुखानां चोपस्थितावेव भाविपाकाद्यर्थं चिकीर्षाप्रवृत्त्यादेर्भावि-सुखार्थमिच्छायाश्च सम्भवः । सामान्यलक्षणप्रत्यासत्त्यनभ्युपगमे भूतवर्तमानकालिकसिद्धपाकानामुपस्थिति-सम्भवेऽपि तेषां सिद्धत्वेन तद्विषयकचिकीर्षायास्तथैव भूतवर्तमानकालिकसुखे चेच्छायाः कथमप्यसम्भवेन भविष्यत्कालीनानिष्पन्नपाकतथाविधसुखयोर्ज्ञानस्यैव कथमप्यसम्भवेन तदर्थं प्रवृत्तेरिच्छायाश्च न कथम-प्युपपत्तिरिति चेन्न; चिकीर्षेच्छादौ समानप्रकारकत्वमात्रस्यैव नियामकत्वेन निष्पन्नपाकादिगोचरसुख-त्वादिप्रकारकज्ञानादेवाज्ञातसुखादाविच्छायाः सुतरां सम्भवात् ।

न चैवं सामानप्रकारकत्वस्यैव नियामकत्वे रजतत्वेन प्रकारेण रजतेऽनुभूयमाने घटादौ रजतत्वप्रकारकेच्छाप्रसङ्ग इति वाच्यम्; प्रकाराश्रयत्वस्यापि नियामकत्वोपगमेन तस्या वारणीयत्वात् । न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चैवमपि प्रकाराश्रयत्वस्य नियामकत्वोपगमे रजतभ्रमाच्छुक्तावच्छानुदयप्रसङ्गस्तत्र प्रकाराश्रयत्वस्याभावादिति वाच्यम्, इष्टत्वात्। शुक्तौ रजतभ्रमस्थले रजत एवेच्छेत्युपगमात्। तद्रजतं तु हट्टस्थमनिर्वचनीयं वा भवतु तत्तन्मतेष्वित्यन्यदेतत्।

अथाभावज्ञाने प्रतियोगिज्ञागस्य जनकतायाः **'प्रतियोगिविशेषताभावज्ञानं च विशिष्टवैष्टिचबोधमर्यादां नातिशेत इति दर्शनात्**[१]' इत्यादिना व्युत्पत्तिवादादावुक्तत्वेन यावत्तेजोऽभावरूपस्य तमसः प्रत्यक्षानुपपत्तिः, सामान्यलक्षणां विना प्रतियोगिकुक्षिप्रविष्टसकलप्रतियोग्युपस्थितेरसम्भवादिति चेन्न, अभावज्ञाने प्रतियोगितावच्छेदकप्रकारकज्ञानस्यैव कारणतया यावत्प्रतियोगिज्ञानस्याकारणत्वेन प्रतियोगिकुक्षिनिक्षिप्तसकलतेजोज्ञानस्यानपेक्षिततया सकलप्रतियोगिज्ञानजनकत्वेनाभिमतस्य सामान्यलक्षणासन्निकर्षस्यानावश्यकत्वात्।

अथैवमपि गोत्वाभावज्ञाने गोत्वत्वप्रकारकज्ञानस्यापेक्षितत्वेन गोत्वत्वस्य च गवेतरावृत्तित्वे सति सकलगोवृत्तित्वरूपत्वेन यावद्गोघटितत्वात् तज्ज्ञानस्य च सामान्यप्रत्यासत्तिमन्तरेणासम्भवाद् गोत्वाभावज्ञानानुपपत्तिरिति चेन्न, यत्किञ्चिद्गोव्यक्तिमात्रद्वारेणापि गोत्वत्वग्रहसम्भवेनोक्तानुपपत्त्यभावात्। तथाहि—यथा 'घटो नास्ति' इत्यादिज्ञाने घटसामान्याभावस्य सकलघटप्रतियोगिकस्य भानेऽप्यभावविशेषणतया कस्यचिदेव घटस्य भानम्, न तु सर्वस्य, तथैव 'गोत्वं नास्ति' इत्यादिज्ञाने यावद्गोव्यक्तिघटितगोत्वत्वावच्छिन्नप्रतियोगिताकगोत्वाभावस्य भानेऽपि प्रतियोगितावच्छेदककुक्षौ केनचिदेकेन गवा आधेयतासम्बन्धेन विशिष्टस्य गोत्वस्य भानमुपेयम्, न तु तत्र सकलगोभानमभ्युपेयम्, अतो न सामान्यलक्षणाया अभावे गोत्वाभावग्रहानुपपत्तिः। उक्तं चेदं न्यायभाष्यकारैरपि भङ्ग्यन्तरेण—

'अजां ग्रामं नय, सर्पिराहर, ब्राह्मणं भोजयेति सामान्यशब्दाः सन्तोऽर्थावयवेषु प्रयुज्यन्ते, सामर्थ्याद् यत्रार्थक्रियादेशना सम्भवति तत्र प्रवर्त्तन्ते नार्थसामान्ये, क्रियादेशनाऽसम्भवात्[२]' इति।

अस्तु वा गोत्वाभावप्रतियोगितावच्छेदककुक्षौ सकलगोवृत्तित्वप्रवेशः, तथापि तस्य गोवृत्तिभेदप्रतियोगितानवच्छेदकत्वरूपत्वेन तावतापि न सकलगोभानस्यापेक्षा, न वा तदर्थं सामान्यलक्षणासन्निकर्षस्यावश्यकत्वमिति।

न च प्रागभावभानार्थं साऽवश्यमभ्युपगन्तव्येति। तथाहि—प्रागभावे वर्तमानस्यातीतस्य च प्रतियोगितया बाधेनानागतस्यैव तत्र तत्प्रत्यक्षे भानमुपेयम्, तदर्थं चानागतभासकस्य ज्ञानलक्षणसन्निकर्षस्य सम्पादनार्थं सामान्यलक्षणाप्रत्यासत्तिर्नूनं स्वीकार्येति वाच्यम्, वर्तमानघटादेरेव तत्र विशेषणतया भानाभ्युपगमात्। न चैवं प्रागभावप्रत्ययस्य भ्रमत्वापत्तिरिति शङ्क्यम्, प्रागभावे घटत्वावच्छिन्नाभावासत्त्वेन घटत्वावच्छिन्नाभाववति घटत्वावच्छिन्नप्रकारकत्वलक्षणस्य भ्रमत्वस्यासम्भवात्। अतो न प्रागभावभानार्थं कथञ्चिदपि सामान्यलक्षणाया आवश्यकत्वमिति।

अथ तथाप्यनुमितेः पूर्वं साध्यप्रसिद्धेरावश्यकत्वात्, तस्याश्च सामान्यलक्षणाभ्युपगमं विनाऽसम्भवात् तदभ्युपगम आवश्यकः। न चानुमानान्तरात् साध्यप्रसिद्धिस्सेत्स्यतीति वाच्यम्; तस्मिन्नप्यनुमाने साध्यप्रसिद्ध्यर्थमनुमानान्तरस्याप्याश्रयणीयत्वेन पुनस्तद्रीत्यैवानुमानान्तरेष्वनुधावनेऽनवस्था स्यादिति चेन्न, साध्यतावच्छेदकप्रकारकज्ञानादेव साध्यविशेषणकपक्षविशेष्यकानुमितिसम्भवात्।

---

१ व्युत्पत्तिवादे प्रथमखण्डे (मूलपुस्तके पृ० ५)।
२ न्यायभाष्यम्। १।२।१२।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न चापूर्वव्यक्तिसाध्यकस्थले इतरभेदाद्यनुमितौ साध्यतावच्छेदकप्रकारकज्ञानासम्भव इति वाच्यम्, तत्र सामान्यलक्षणयापि साध्यप्रसिद्ध्यसामर्थ्येन तुल्यदोषात् । यथाकथञ्चित् प्रसिद्ध्यन्वेषणे त्वितरभेदानुयोगितावच्छेदकभिन्नधर्मवत्त्वादिप्रकारेण प्रसिद्धेश्शरणीकरणीयत्वेन पुनस्तुल्यत्वात् ।

किञ्च घटत्वेन सन्निकृष्टघटव्यक्तिज्ञानानन्तरं तत्समानाकारकमसन्निकृष्टविषयकं ज्ञानान्तरमुत्पद्यत इति नानुभवसिद्धम्, घटत्वेनेमं घटं साक्षात्करोमि न व्यवहितमिति सर्वेषामेव प्रतीतेः । अन्यथा सकलघटव्यक्तीरहं साक्षात्करोमीत्यनुव्यवसायः स्यात्

ज्ञानलक्षणाप्रतिक्षेपप्रकारः

चन्दने सौरभत्वप्रकारकचाक्षुषभ्रमाय ज्ञानलक्षणासन्निकर्षकल्पनमपि न युक्तम्, चन्दने सौरभत्वभ्रमजनकदोषकाले चन्दनत्वेन सौरभत्वानुमानस्यैव सम्भवेन तादृशभ्रमस्य चानुमितिरूपत्वेन चाक्षुषत्वाभावात्, तदर्थं ज्ञानलक्षणासन्निकर्षस्यानावश्यकत्वात् । तत्र ज्ञानलक्षणया भानस्वीकारे सर्वत्र पर्वतादौ ज्ञानलक्षणयैव वह्न्यादेर्भानसम्भवेनानुमानकथाया विलोपापत्तिः स्यात् । तदुक्तम् **एतेन सुरभिचन्दनमित्यादिविशिष्टज्ञानाय कल्पिता ज्ञानलक्षणा प्रत्यासत्तिरपि निरस्ता'** इति । **'वह्न्यादेः प्रत्यक्षत्वापत्तावनुमानाद्युच्छेदापत्तेः**[1]' इति च ।

न च बहिरिन्द्रियस्य स्वायोग्यमुख्यविशेष्यकज्ञानाजनकत्वेन 'परमाणू रूपवान्' इत्यादिज्ञानस्यालौकिकचाक्षुषत्वाद्यसम्भवेन नानुमितेर्विलोपापत्तिरिति वाच्यम्, तत्रापि मानसभानसम्भवेन विलोपापत्त्युद्धारस्य कर्तुमशक्यत्वादिति ।

अलौकिकसन्निकर्षव्यवस्थापनम्

तदेतत्प्रतिक्षेपो न विचारारूढः, ज्ञानान्तरोपनीतभाने 'सुरभि चन्दनम्' इत्यादावनुमिनोमीत्यनुव्यवसायस्य कुत्राप्यदर्शनादनुभवविरोधाद्, विजातीयव्यवहारान्यथानुपपत्त्या विजातीयज्ञानसिद्धेः ।

उपनीतभानस्यासाधारणकारणान्तरनिरपेक्षमनोजन्यत्वेनानुमितौ ह्यसाधारणकारणतया परामर्शादेरपेक्षादर्शनान्न 'सुरभि चन्दनम्' इत्यादिज्ञानानामनुमितित्वं सम्भावयितुमपि शक्यमिति विद्वद्वरैर्विवेचनीमिति ।

किञ्चाप्रसिद्धसाध्यके व्यतिरेकिणि ज्ञानान्तरोपनयासम्भवेन मानसभिन्नलिङ्गपरामर्शासाधारणकारणकानुमितिज्ञानसिद्धौ, अन्यत्रापि लिङ्गपरामर्शघटितसामग्रीसमवधानेऽनुमितिर्निष्प्रत्यूहैवेति न तदुच्छेदशङ्कापीति ।

---

१. अद्वैतसिद्धौ प्रथमपरिच्छेदे प्रत्यक्षबाधोद्धारे पृ० ३४२ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुमितिसामग्रीविमर्शः

अनुमितौ व्याप्तिस्मरणं पक्षधर्मताज्ञानं च कारणमिति सर्वेषामप्यनुमानप्रामाण्यवादिनामविवादास्पदम् ।

तत्र मीमांसकानां मते महानसादौ वह्निसहचरितधूमदर्शनेन 'धूमो वह्निव्याप्य' इति व्याप्तेः प्रत्यक्षात्मकानुभवानन्तरं कालान्तरे पर्वते धूमदर्शनात्मकं पक्षधर्मताज्ञानम् (१), ततो यत्र धूमस्तत्र वह्निरिति व्याप्तिस्मरणम् (२), तदनन्तरं च अस्माद् ज्ञानद्वयादेवानुमित्युत्पत्तिरिति ।

नैयायिकमते च पूर्ववन्महानसादौ वह्निसहचरितधूमदर्शनेन 'धूमो वह्निव्याप्य' इति व्याप्तेः प्रत्यक्षात्मकानुभवानन्तरं कालान्तरे पर्वते धूमदर्शनात्मकं पक्षधर्मताज्ञानम् (१), ततो यत्र धूमस्तत्र वह्निरिति व्याप्तिस्मरणम् (२), एतज्ज्ञानद्वयाच्च 'वह्निव्याप्यधूमवान् पर्वत' इति परामर्शात्मकं ज्ञानं जायते (३) । अत्र वह्निव्याप्तिविशिष्टधूमवैशिष्टच पर्वते भासते । अतोऽस्य व्याप्तिविशिष्टवैशिष्टयावगाहिज्ञानत्वम् । एतदनन्तरं च पर्वतो वह्निमानित्यनुमितिः ।

मीमांसकानां त्वयमाशयः—ज्ञानद्वयस्य विशिष्टपरामर्शतः पूर्वमुत्पन्नतया व्याप्तिपक्षधर्मताज्ञानयोः सम्पन्नत्वेन कारणान्तरानपेक्षणात् परामर्शकल्पनमनुचितम्, परामर्शोपस्थितिकृतगौरवादनुमितावधिककारणकल्पनागौरवाच्च । अत एव 'वह्निव्याप्यो धूम' इतिस्मरणात्मकज्ञाने व्याप्यतावच्छेदकं यद् धूमत्वं, तदवच्छिन्नप्रकारतानिरूपकपक्षनिष्ठविशेष्यताकस्य 'धूमवान् पर्वत' इत्याकारकपक्षधर्मताज्ञानस्यावश्यक्लृप्तत्वेन व्याप्यतावच्छेदकप्रकारकज्ञानस्यैव हेतुत्वमङ्गीकर्तुमुचितमिति ।

परं नायं पक्षो विचारसहः—यतो हि व्याप्तिस्मरणानन्तरं यत्किञ्चिद्रूपेण धूमाद्यवगाहिनो धूमादिविशिष्टपर्वतज्ञानाद्वह्निर्नानुमीयत इत्यत्र सर्ववादिसम्प्रतिपत्तौ तत्र किं धूमत्वादिप्रकारकत्वव्यतिरेकात्कार्यव्यतिरेक उत वा वह्निव्याप्यत्वप्रकारकत्वव्यतिरेकादिति चिन्तायां द्वितीयपक्षस्यैवौचित्यं प्रतिभाति प्रथमपक्षस्यातिगौरवकरत्वात् । तथाहि—प्रत्येकधूमत्वादिप्रकारकत्वव्यतिरेकस्य प्रयोजकत्वेऽननुगमाद्, व्याप्यतावच्छेदकत्वेनताननुगतीकृत्य व्याप्यतावच्छेदकप्रकारकत्वव्यतिरेकस्यैव तद्व्यतिरेकप्रयोजकत्वोपगमे व्याप्यत्वप्रकारकत्वापेक्षया गौरवमेवेति ।

श्रीविश्वनाथभट्टाचार्या अपि—यस्य संशयव्यतिरेकनिश्चयौ यादृशकार्यप्रतिबन्धकौ तस्य निश्चयस्तादृशकार्यं प्रति हेतुरिति सामान्यव्याप्तेः प्रसिद्धचरत्वेन पक्षधर्मस्य व्याप्यत्वसन्देहे सत्यप्यनुमित्यनुत्पत्तिदर्शनादवश्यं पक्षधर्मस्य व्याप्तिप्रकारकनिश्चयः कारणमनुमितिं प्रतीति वक्तव्यम् । अत एव सिद्धमेव विशिष्टपरामर्शस्य कारणत्वमिति मनसि निधाय विस्तरेण तस्य कारणत्वं व्यवस्थापयामासुः । ऊचुश्चोपसंहारे—

'इत्थं च यत्र ज्ञानद्वयं तत्रापि विशिष्टज्ञानं कल्पनीयम् फलमुखगौरवस्यादोषत्वात् ।[१]'

इति ।

---

१ न्यायसिद्धान्तमुक्तावली । ६८ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किञ्च 'पर्वतो वह्निव्याप्यवानि'ति ज्ञानानन्तरमपि वह्न्यनुमितिरुत्पद्यत इति सर्वानुभवसिद्धम् । न हि तत्र व्याप्यतावच्छेदकः प्रकारतया भासते । तस्मादवश्यमेव पक्षधर्मस्य व्याप्तिज्ञानं शरणीकरणीयम् ।

ननु केवलव्यतिरेक्यनुमानवादिना कथं तृतीयलिङ्गपरामर्शः सर्वत्रानुमितिकारणत्वेनोपपादनीयः पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्यादौ इतरभेदव्याप्यत्वस्य गन्धवत्त्वे पूर्वमगृहीतत्वादिति चेत् । तत्र व्यतिरेकद्वयसहचारेणान्वयव्याप्तिरेव गृह्यत इत्याचार्यैः समाहितत्वात् । **नैयायिकैकदेशिनस्तु** ज्ञानद्वयानन्तरमेव विशिष्टज्ञानमुत्पद्यत इति न ब्रूमः । किन्तु व्याप्तिरूपविशेषणज्ञानसम्भवाद् द्वितीयज्ञानावसर एव वह्निव्याप्यधूमवानयमित्यादिज्ञानसम्भव इत्याहुः ।

परार्थानुमानसामग्री (न्यायस्तदवयवाश्च)

अनुमानस्य स्वार्थपरार्थभेदेन द्वैविध्यं, यत्र स्वयमेव हेतुं प्रतीत्य व्याप्त्यादिस्मृत्या साध्यमनुमीयते तत्स्वार्थानुमानम्, यत्रैकः प्रतिपन्नमर्थं परमनुमानेन बुबोधयिषति, बुबोधयिषया न्यायवाक्यञ्च प्रयुङ्क्ते तत्परार्थानुमानमिति चतुर्थप्रकरणे सम्यङ्निरूपितम् । अधुना आवश्यकत्वेन परार्थानुमानप्रयोजकीभूतन्यायवाक्यस्य तदवयवानाञ्चातिसंक्षेपेण स्वरूपप्रदर्शनं विधीयते ।

तत्र 'अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशब्दज्ञानजनकवाक्यं न्यायः[1]' इति चिन्तामणिकाराः । तथा च पक्षे व्याप्तिप्रकारेण हेतुज्ञानप्रयोजकशाब्दज्ञानजनकवाक्यं न्याय इति पर्यवस्यति । तादृशवाक्यं तु फलत उचितानुपूर्वीकप्रतिज्ञादिसमुदाय एव । तदुक्तं दीधितिकारैः—

'उचितानुपूर्वीकं प्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वमिति[2]' ।

तादृशपरामर्शप्रयोजकशाब्दज्ञानजनकीभूतं यच्छाब्दज्ञानं (पर्वतो वह्निमानित्यादिरूपं) तज्जनकवाक्यमवयवः प्रतिज्ञाद्यन्यतमरूपः ।

तानि च वाक्यानि पञ्चैवेति नैयायिकाः । तदुक्तं महर्षिभिः—'प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवा[3]' इति ।

प्रतिज्ञा—प्रतिज्ञालक्षणनिर्वचनावसरे महर्षयः 'साध्यनिर्देशः प्रतिज्ञा[4]' इत्यसूत्रयन् । तथा च प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नवैशिष्ट्यबोधको न्यायावयवः प्रतिज्ञेति फलितोऽर्थः । किन्तु मणिकाराः सौत्रे प्रतिज्ञालक्षणे साध्यपदस्य साध्यवाचकमात्रपरत्वं गृहीत्वाऽदूदुषन् । दीधितिकाराः पुनस्तस्य साध्यविशिष्टधर्मिबोधकत्वं पुरस्कृत्याङ्गीचक्रुरुक्तलक्षणमित्यवयवग्रन्थे निरूपितं वरीवर्ति विशदम् ।

मणिकारसम्मतं प्रतिज्ञालक्षणन्तु—'उद्देश्यानुमितिहेतुलिङ्गपरामर्शप्रयोजकवाक्यार्थज्ञानजनकत्वे सति उद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं वाक्यं प्रतिज्ञे[5]'ति ।

---

१ अवयवचिन्तामणौ—मूल पु० पृ० १४६० ।
२ अवयवदीधितौ—मूल पु० पृ० १४६०
३ न्यायसूत्रम् ।। १।१।३२ ।
४ न्यायसूत्रम् । १।१।३३ ।
५ अवयवचिन्तामणौ—मूल पु० पृ० १४८४ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्थात् प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकन्यायावयवत्वे सति तादृशपक्षसाध्यकानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं वाक्यं प्रतिज्ञेति ।

हेतुः—हेतुलक्षणं तु 'उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः' 'तथा वैधर्म्यात्[१]' इति सूत्राभ्यां परमाचार्यैः प्रोक्तम् ।

उदाह्रियतेऽस्मिन् साध्यसाधनयोः प्रयोज्यप्रयोजकभाव इति व्युत्पत्त्या दृष्टान्त उदाहरणम् । तेन साधर्म्यात्=सामान्यात् साध्यस्य विधेयविशिष्टपक्षस्य साधनम् अर्थात् साधनतावचनम् हेतुवचनम् साध्यपदस्य धर्मविशिष्टधर्मिपरत्वस्याग्रिमसूत्रभाष्य उक्तत्वात् ।

भाष्यं तु 'उदाहरणेन सामान्यात् साध्यधर्मस्य साधनं प्रज्ञापनं हेतुः[२]' इति ।

दृष्टान्तगतयादृशधर्मेण साधर्म्यं वैधर्म्यं वा गृहीत्वा पक्षस्य विधेयवत्तापर्यवसानं स हेतुरिति हि प्राचीनाचार्याणां सम्मतं हेतुसामान्यलक्षणं प्रतिभाति ।

अत्रेदमवधेयम्—साध्यसाधनं हेतुरिति हि हेतुसामान्यलक्षणम् । 'उदाहरणसाधर्म्यादि'त्यादिलक्षणं त्वन्वयव्यतिरेकिहेतोः, 'तथा वैधर्म्यादि'ति लक्षणं तु केवलव्यतिरेकिहेतोः । केवलान्वयिनश्च हेतोरभावान्न तल्लक्षणकरणस्यावश्यकतेति न तल्लक्षणं परमाचार्यो बभाष इति । मणिकारास्तु 'हेतुत्वञ्चानुमितिकरणीभूतलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकसाध्याविषयकशाब्दधीजनकहेतुविभक्तिमच्छब्दत्वमि[३]'ति हेतुलक्षणं प्रतिपादयाञ्चक्रुः । तथा च प्रकृतपक्षसाध्यहेतुकन्यायावयवत्वे सति प्रकृतसाध्याविषकत्वविशिष्टप्रकृतसाध्यान्वयबोधनक्षमार्थोपस्थितिजनकविभक्तिमच्छब्दत्वं हेतुत्वमिति दीधित्याद्यनुसारी पन्थाः ।

नन्वेवं यत्र साध्यं हेतुतावच्छेदकीभूतं तत्र हेतुत्वं प्रमेयं प्रमेयादित्यादिस्थलीयहेतावेतल्लक्षणस्यातिव्याप्तिरिति चेन्न । साध्यविषयत्वस्य प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविषयताबहिर्भाविन विवक्षणे तादृशदोषाभावादिति संक्षेपः ।

अन्यानि तु मणिकाराद्युक्तलक्षणानीह विस्तरभयादप्रकृतत्वाच्च नोपन्यस्तानीति ।

उदाहरणम्—हेतौ साध्यनिरूपितव्याप्तिप्रदर्शनार्थं प्रयुज्यमानस्योदाहरणस्य दृष्टान्तापरपर्यायस्य सामान्यलक्षणं तु 'लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः[४]' इति सूत्र उक्तम् । विशेषलक्षणे च महर्षिः 'साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम्' 'तद्विपर्ययाद्वा विपरीतम्[५]' इति सूत्राभ्यां निरदीधरत् ।

एवञ्चोदाहरणमपि हेतुवद्द्विविधम्—साधर्म्योदाहरणं, वैधर्म्योदाहरणञ्च ।

---

१ न्यायसूत्रे । १।१।३४—३५ ।
२ न्यायभाष्यम् । १।१।३४ ।
३ अवयवचिन्तामणौ मूलग्रन्थे पृ० १५३५ ।
४ न्यायसूत्रम् ।। १।१।२५ ।
५ न्यायसूत्रे ।। १।१।३६-३७ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र साधर्म्योदाहरणस्य लक्षणं साध्यसाधर्म्यादित्यादि। अस्मिल्लक्षणे साध्यपदेनानुमितिविधेयविशिष्टधर्मी सूत्रकृदभिप्रेतः। तदुक्तं भाष्ये 'साध्यं च द्विविधं धर्मिविशिष्टो वा धर्मः शब्दस्यानित्यत्वं, धर्मविशिष्टो वा धर्मी अनित्यः शब्द इति। इहोत्तरं तद्ग्रहणेन गृह्यत इति। कस्मात्? पृथग् धर्मवचनात्[1]।' इति।

एवञ्च साधर्म्यपदोत्तरपञ्चम्याः प्रयोजकत्वार्थकत्वात् हेतुमत्त्वप्रयुक्तसाध्यवत्तानुभावकोऽवयवः साधर्म्यदृष्टान्तः साध्यसाधनयोरन्वयव्याप्तिप्रदर्शकोदाहरणमिति पर्यवसितम्।

तथैव च तद्विपर्ययात् तद्वैधर्म्यादर्थात् साध्याभावादतद्धर्मभावी अर्थात् साधनरहितो यो दृष्टान्तः स वैधर्म्यदृष्टान्त इति पर्यवस्यति।

मणिकारा अपि—'अनुमितिहेतुलिङ्गपरामर्शवाक्यज्ञानजनकव्याप्यत्वाभिमतवन्निष्ठनियतत्वाभिमतसम्बन्धबोधजनकशब्दत्वमुदाहरणत्व[2]' मितिग्रन्थेन सामान्यलक्षणमभिधाय तल्लक्षणे साध्यसाधनसम्बन्धबोधकत्वं साध्यसाधनाभावसम्बन्धबोधकत्वञ्च विशेषलक्षणद्वयमिति ब्रुवन्तो विभागमिममङ्गीचक्रुः। तथैव दीधितिकारा अपि—'इतरान्वितस्वार्थबोधकन्यायावयवत्वमुदाहरणत्व[3]' मिति सामान्यलक्षणं पुरस्कृत्य 'अन्वयव्याप्तिबोधकतत्त्वं व्यतिरेकव्याप्तिबोधकतत्त्वं च विशेषलक्षणद्वयमि'त्यादिना विभागं प्रतिपादयामासुः।

भाट्टास्तु—अन्वयदृष्टान्तेनैव व्याप्तिनिश्चये सति व्यतिरेकदृष्टान्तो न प्रयोक्तव्यः। यदि कदाचित्परोऽन्वयदृष्टान्तेऽपरितोषं प्रकटयति तदैव व्यतिरेकदृष्टान्तः समाश्रयणीयो भवतीति स्वीकुर्वन्ति।

प्राभाकरास्तु—अन्वयदृष्टान्तेनैव सर्वोपपत्तौ व्यर्थमेव व्यतिरेकदृष्टान्तसमादरणम्। तदुक्तं प्रकरणपञ्चिकायां—

'तस्मात् सम्यक्साधर्म्यदृष्टान्तप्रयोगेणैव सम्बन्धनियमावगतेरनर्थकं वैधर्म्यदृष्टान्तोपादानम्[4]।'

न च दृष्टान्तयोर्युगपदुपादानाभावेऽपि वैकल्पिकोपादानमुभयोर्भवत्विति वाच्यम्; साधर्म्यदृष्टान्तस्य साध्यव्याप्त्यवगतौ ऋजुमार्गत्वेन, वैधर्म्यदृष्टान्तस्य च वक्रमार्गत्वेनोपायभावस्यातुल्यत्वात्, ऋजुवक्रयोर्विकल्पासम्भवात् 'ऋजुमार्गेण सिद्ध्यन्तं को नु वक्रेण साधये'दित्यभियुक्तवचनादिति वदन्ति।

तदयुक्तम्—पक्षमात्रवृत्तिहेतुस्थले पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्यादिन्यायप्रयोगे साधर्म्यदृष्टान्तस्य कथमप्यसम्भवेन यन्न पृथिवीतरभेदवन्न तद् गन्धवद् यथा अवादिकमित्याकारकवैधर्म्यदृष्टान्तस्यावश्यं शरणीकरणीयत्वात्।

इदं पुनरिहावधेयम्—दार्शनिकेषु प्रायशो यो यो धूमवान् स स वह्निमानित्यादिरीत्या यत्तदुभयोरपि वीप्सादरप्रसिद्धिः। किन्तु चिन्तामणिकारा यत्पदे वीप्सामनुमन्यमाना अपि न तत्पदे तां स्वीकुर्वन्ति। उक्तं च—'वीप्सा च यत्पदे न तत्पदेऽपि, विरुद्धरूपोपस्थितयोरपि तत्पदेन परामर्शात् तस्य बुद्धिस्थवाचकत्वादिति न व्युत्पत्तिविरोधः यथा यद्यत्पापं प्रतिजहीत्यत्र[5]' इति।

---

१ न्यायभाष्यम्। १।१।३६।

२ अवयवचिन्तामणौ मूल पु० पृ० १५७१।

३ अवयवदीधितौ मूल पु० पृ० १५७०।

४ प्रकरणपञ्चिकायां पृ० २२४।

५ अवयवचिन्तामणौ मूल पु० पृ० १५७२।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदान्तदेशिकास्तु पुनस्तत्पदस्थलीयन्यायं बुद्धिस्थीकृत्य न यत्पदेऽपि वीप्सामङ्गीचक्रुः । उक्तञ्च—'अत्र च यदित्थं तत्तथेति साधारणप्रयोगादेव सर्वोपसंहारः सिद्धयति यथा गौर्न पदा स्प्रष्टव्येयादावतो यद्यदिति वीप्सानपेक्षा । कस्यचित्तु सा स्पष्टार्था[१] ।' इति ।

एवञ्चैतेषां मते मणौ 'वीप्सा च यत्पदे न तु तत्पद' इत्युपपादनं मन्दबुद्धयनुग्रहार्थमेवेति ध्येयम् ।

अनुमतं चैतत्प्रतिभाति श्रीगदाधरभट्टाचार्याणां तैरवयवप्रकरणान्ते 'द्विरुक्तिनियमोऽपि कदाचिद्यत्पद एव न तु तत्पदेऽपीत्यर्थः[२]' इति वाक्ये तत्पदवीप्सानिषेधनियमकथने यत्पदवीप्सायां स्पष्टरूपेण कादाचित्कत्वसूचनात् ।

उपनयः—व्याप्तिविशिष्टे पक्षधर्मत्वप्रदर्शनायाद्रियमाणस्योपनयस्य सूत्रकारप्रोक्तं लक्षणन्तु—'उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनय[३]' इति । अनेन सूत्रेण 'उदाहरणमात्मलाभार्थमपेक्षते इत्युदाहरणापेक्षः, उपसंह्रियतेऽनेन हेतुः पक्षधर्मतयेति पक्षधर्मोपसंहार उपनय' इति व्युत्पत्त्योपनयसामान्यलक्षणं लभ्यते । तस्य द्वैविध्यमप्यनेनैव सूत्रेणोदाहरणद्वैविध्यादुपवर्णितं भवति । एवञ्च साधर्म्योदाहरणापेक्षस्तथेत्याकारक उपनय एकविधः । यथा यो यो धूमवान् स स वह्निमानि'त्युदाहरणानन्तरं 'तथा चाय' मित्यनेनोक्तः साधर्म्योपनयः । वैधर्म्योदाहरणापेक्षो न तथेत्याकारको द्वितीयविध उपनयः । यथा 'यो न वह्निमान् न स धूमवान्' इत्याकारकोदाहरणप्रयोगानन्तरं न तथेत्याकारको नायं न धूमवानिति रूपेण प्रयुक्त उपनयः । अयमेव हि वैधर्म्योपनय इति व्यपदिश्यते ।

मणिकारा अपि—'अनुमितिकारणीभूततृतीयलिङ्गपरामर्शजनकावयवत्वमि[४]'ति रीत्योपनयं लक्षयन्ति; 'साध्यव्याप्यविशिष्टपक्षबोधकावयवत्वं साध्याभावव्यापकाभावप्रतियोगिमत्पक्षबोधकावयवत्वञ्च विशेषलक्षणद्वयमि'तिग्रन्थसन्दर्भेण विभजन्ते च ।

दीधितिकारास्तु—'इतरोपस्थापितार्थविशेषणकस्वार्थबोधकन्यायावयवत्वं स्वार्थविशेष्यकेतरार्थान्वयबोधजनकन्यायावयवत्वं वोपनयत्वमि[५]'ति प्रतिपादयन्ति । न च हेतुवचनेनैव पक्षधर्मत्वस्य गतार्थत्वादुपनयस्य पृथगभिधानमनर्थकमिति वाच्यम्, दृष्टान्ते दर्शितशक्तेरेव हेतोस्साध्यानुमापने समर्थत्वेन, हेतुवचनस्य तु केवलमनुमापकस्वरूपोपस्थापकत्व एवोपक्षीणत्वेनोपनयस्यावश्यकत्वात् । तदुक्तं मणिकारैः—'न च हेतुवचनादेव तदवगमः, तस्य को हेतुरित्याकाङ्क्षायां प्रवृत्तत्वेन हेतुस्वरूपोपस्थापकस्यातत्परत्वात्[६]' इति ।

---

१ न्यायपरिशुद्धावनुमानाध्यायद्वितीयाह्निके पृ० १५६ ।
२ अवयवगादाधर्यां मूल पु० पृ० १५७८ ।
३ न्यायसूत्रम् । १।१।३६ ।
४ अवयवचिन्तामणौ पृ० १५७२ ।
५ अवयवदीधितौ मूल पु० पृ० १५७० ।
६ अवयवचिन्तामणौ मूल पु० पृ० १५७३ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निगमनम्—अन्तिमोऽवयवो निगमनाख्यः । तल्लक्षणन्तु 'हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम्[१]' इति सूत्रकारप्रोक्तम् । पूर्वोक्ता अवयवा एकत्र साध्यरूपेऽर्थे निगम्यन्ते-समर्थ्यन्ते-नियोज्यन्तेऽनेनेति निगमनमिति हि निगमनपदस्यानुरूपा व्युत्पत्तिः । तथा च भाष्यम्—

'सर्वेषामेकार्थसमवाये सामर्थ्यप्रदर्शनं निगमनम्[२]' इति ।

हेतुदृष्टान्तोपनयानां साधर्म्यवैधर्म्यभेदेन प्रत्येकं द्विविधत्वेऽपीदञ्चैकविधमेव । तदुक्तं भाष्ये—'द्विविधस्य पुनर्हेतोर्द्विविधस्य चोदाहरणस्योपसंहारद्वैते च समानम्[३]' इति ।

चिन्तामणिकृन्मते — 'अनुमितिहेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानकारणव्याप्तिपक्षधर्मताधीप्रयुक्त-साध्यधीजनकं वाक्यम्[४]' निगमनम् ।

शिरोमणिप्रोक्तं लक्षणन्तु—'अवयवार्थविशेष्यकस्वार्थबोधजनकन्यायावयवत्वं निगमनत्वमि[५]'ति ।

विशिष्टाद्वैतिनस्तु अस्यापि द्वैविध्यं वर्णयन्ति । उक्तञ्च वेदान्तदेशिकाचार्यैः 'तत्रापि तुल्यन्यायतया द्वैविध्यमनुसन्धेयम् । यथा तस्मादसावग्निमानिति अयं तथा निरग्निर्न भवती[६]'ति च ।

अवयवसंख्याविषये मतभेदाः

अत्र नैयायिका ऋते प्रतिज्ञां हेतुर्निराश्रयो भवेदिति प्रतिज्ञावचनमवश्यं प्राथम्येन प्रयोजनीयम् । तदनन्तरं परेण हेतुजिज्ञासायां हेतुवचनं व्याहरणीयम् । श्रुते च हेतौ क्वास्य व्याप्तिरवधृतेति प्रदर्शनार्थमुदाहरणस्याभिधानम् । तदनन्तरं च ज्ञातशक्तिरेषो गमकः पक्षेऽस्ति न वेति स्वरूपासिद्धि-शङ्कामपनेतुमुपनयवाक्यमभिधेयम् । ततः परं च सर्वावयवानेकत्र साध्यरूपेऽर्थे समर्थयितुं अबाधि-तत्वासत्प्रतिपक्षितत्वे दर्शयितुं च निगमनवाक्यप्रयोगः ।

मीमांसकास्तु—अवयवत्रयमभ्युपगच्छन्ति प्रकारद्वयेन । उक्तञ्च—

केचित्पञ्चतयं प्राहुर्द्वयमन्ये वयं त्रयम् ।
उदाहरणपर्यन्तं यद्वोदाहरणादिकम्[७] ॥ इति

'पञ्चावयवता तार्किकोक्ता न मता । प्रतिज्ञाहेतुदृष्टान्तानन्तरं "धूमवांश्चायं" इत्युपनयः "तस्मादग्निमानि"ति निगमनं चेति द्वयं व्यर्थं, धूमवत्त्वादित्युक्ते धूमवांश्चायमिति पुनरुक्तिः, तस्मादग्निमानिति च पुनरुक्तिः[८]' इति च ।

प्रदर्शितं च तैः—वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम् ।
वेदाध्ययनवाच्यत्वादधुनाध्ययनं यथा[९] ॥

इत्यादिना प्रतिज्ञाद्यवयवत्रयम् ।

---

१ न्यायसूत्रम् । १।१।३९ ।
२ न्यायभाष्यम् । १।१।१ ।
३ न्यायभाष्यम् । १।१।३९ ।
४ अवयवचिन्तामणौ मूल पृ० पृ० १५७३ ।
५ अवयवदीधितौ मूल पु० पृ० १५७० ।
६ न्यायपरिशुद्धावनुमानाध्यायद्वितीयाह्निके पृ० १५९ ।
७ प्रकरणपञ्चिकायां २२१ पृष्ठे पादटिप्पण्याम् ।
८ नयविवेके पृ० १३९ ।
९ श्लोकवार्त्तिकस्थवाक्याधिकरणे श्लोकः । ३६६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ यत्कर्म तत्फलवद् दृष्टम्; होमोऽपि कर्म, तेनापि फलवता भवितव्यम्[१]'—इत्यादिना चोदाहरणाद्यवयवत्रयम्।

एतेषां मते न नैयायिकानामिव प्रतिज्ञया सह हेतुदृष्टान्तयोः पौर्वापर्ये क्रम आद्रियते। उक्तं च—'दृष्टान्तहेतुवचनयोश्च प्रयोगे क्रमनियमो नादरणीयः।' इति 'दृष्टान्तपुरस्सरे तु प्रयोगे प्रतिज्ञामुपादाय यो-यो धूमवान्, स सोऽग्निमान् महानसवदिति चाभिधाय, धूमवांश्चायमिति हेतुवचनं वक्तव्यम्[२]' इति च।

एवञ्चैतेषां मते हेतूपनययोरन्यतरमेव, प्रतिज्ञानिगमनयोश्चान्यतरमेव प्रयोक्तव्यमिति हि व्यवस्था प्रतिभाति।

न चेयं युक्ता—दृष्टान्ते दर्शितशक्तेरेव हेतोः साध्यानुमापनक्षमत्वस्योक्तत्वात्, विपरीतप्रसङ्गनिषेधानन्तरमेव साध्यसिद्धेश्च।

उक्तकारिकायां केचिद् द्वयमित्यनेन सौगतमतं निर्दिष्टम्। तच्च निबन्धनीयविषयानन्तर्गतत्वादुपेक्ष्यते।

विशिष्टाद्वैतिनस्तु—अवयवसंख्यानिर्बन्धं नाभ्युपगच्छन्ति। उक्तञ्च—'वयं त्वनियमं ब्रूमः[३]' इति। तथाप्येते मीमांसकवदवयवत्रयवादिनः प्रतिभान्ति। अतस्तन्मतेऽपि उदाहरणान्तत्रयं वा तदाद्यत्रयं वा वक्तव्यमिति। तथा चोक्तम्—

'यद्यप्युदाहरणोपनयाभ्यामेव व्याप्तिपक्षधर्मतयोः सिद्धत्वात्तावदेव तत्त्वतो वक्तुमुचितम् तथापि विवक्षितस्फोटचाय प्रतिज्ञाहेतूदाहरणानि उदाहरणोपनयनिगमनानि वा वाच्यानि।[४]' इति।

अत एव स्वरूपासिद्धेर्बाधसत्प्रतिपक्षयोश्च शङ्कापरिहारायोपनयनिगमनयोः कथनमिति न सम्यक्। तथाहि—अनेनावयवद्वयेनासिद्ध्यादिपरिहारः क्रियते, ज्ञाप्यते वा। न तावदाद्यः—तथा स्वीकारे पिशाचनिवर्त्तकमन्त्रवदन्त्यावयवद्वयेऽसिद्ध्यादिनिवर्त्तिकायाः शक्तेरभ्युपगन्तव्यत्वापत्तेः। न द्वितीयः, अन्त्यावयवद्वयज्ञाप्यस्य स्वरूपासिद्ध्यभावादेस्तत्समानविषयकाभ्यां प्रतिज्ञाहेतुभ्यामेव ज्ञापनसम्भवात्तावतापि द्वयोर्वैयर्थ्यापत्तेस्तादवस्थ्यात्। उक्तं च—'ये तु प्रतिज्ञादित्रयानन्तरं हेतोरसिद्ध्यन्यथासिद्धिपरिहाराय उपनयः। निगमने हेत्वंशः सिद्धसाधनतापरिहाराय साध्यांशस्तु बाधपरिहारायेति वर्णयन्ति तैर्नूनं तत्तद्दोषपरिहाराय मन्त्रपाठोऽयमिष्टः, प्रतिज्ञाहेतुभ्यामेव तदर्थाभिधानसिद्धेः। अन्यथा नायमसिद्धो नापि बाधित इति व्यक्तमेव वक्तव्यत्वात्[५]।' इति।

---

१ शाबरभाष्यस्थेन्द्रियकामाधिकरणे।

२ प्रकरणपञ्चिका पृ० २२३।

३ न्यायपरिशुद्धावनुमानाध्यायद्वितीयाह्निके पृ० १५६।

४ तत्रैव पृ० १६०।

५ तत्रैव पृ० १६१।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

केचित्तु—प्रतिज्ञादिपञ्चभिस्सह जिज्ञासा, संशयः, प्रयोजनं, शक्यप्राप्तिः, संशयव्युदासश्चेति पञ्चावयवानादाय दशावयववाक्यान् परार्थानुमानस्थल उरीकुर्वन्ति । तत्र जिज्ञासा नामाप्रतीयमानेऽर्थे प्रतीतिप्रयोजनस्य प्रवर्त्तिकेच्छा । संशयस्त्वर्थक्रियासाधनेऽर्थे विमर्शरूपः । प्रयोजनं तत्त्वनिश्चयरूपः । वादिप्रयुक्तप्रमाणादीनि तदभिमतार्थं साधयितुं समर्थानीति सम्भावना शक्यप्राप्तिः । संशयव्युदासस्तु प्रतिपक्षोपालम्भरूपः ।

तदिदमयुक्तम्—संशयादीनां प्रवृत्तिहेतुत्वेऽप्यशब्दस्वभावत्वेन वाक्यावयवत्वासम्भवात् । तथाहि—जिज्ञासाया इच्छात्मकत्वेन प्रमातुरान्तरधर्मत्वान्न वाक्यावयवत्वसम्भवः । संशयस्य तु ज्ञानरूपत्वेन सुतरां न वाक्यावयवत्वसम्भावनेति । तत्त्वनिश्चयरूपस्य प्रयोजनस्यापि साधनवाक्यफलभूतत्वेन सुतरां न तदवयवत्वम् । शक्यप्राप्तेः सम्भावनारूपत्वेन सम्भावनायाश्चोत्कटैकतरकोटिकसंशयानतिरिक्तत्वेन सुतरां न वाक्यावयवत्वम् । संशयव्युदासस्य वचनात्मकत्वेऽपि न साधनवाक्यावयवत्वं किन्तु वाक्यान्तरत्वमिति न तस्यापि न्यायावयवरूपत्वमिति । इदमेव सर्वमभिप्रेत्योक्तं मणिकारैः—'संशयप्रयोजनादयस्त्ववयवलक्षणाभावादेव नावयवाः किन्तु न्यायाङ्गतयोपयुज्यन्त इति नाधिक्यम्[1] ।' इति ।

शाब्दज्ञाने सहकारिकारणनिरूपणम्

शाब्दसामान्यं प्रति वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितिद्वारा पदज्ञानं करणमिति हि सर्वेषां शब्दप्रामाण्यवादिनां मतम् । किन्तु, पर्वतो भुक्तं वह्निमान् यज्ञदत्तेन', 'वह्निना सिञ्चति', 'घटः कर्मत्वमानयनं कृति'रित्यादौ वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितिद्वारा पदज्ञानस्य सत्त्वेऽपि शाब्दबोधानुदयात् कार्यकारणभावेऽन्वयव्यभिचारः । अत एवासत्तियोग्यताकाङ्क्षातात्पर्यज्ञानानि सहकारिकारणानि कल्प्यन्ते, शाब्दबोधे तेषामप्यन्वयव्यतिरेकदर्शनेन हेतुत्वकल्पनात् । तदुक्तं—

'आसत्तियोग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते । कारणम्[2]' इति ।

आसत्तिः—तत्र प्राचां मते आसत्तिर्नामाव्यवधानेन पदोच्चारणप्रयुक्तसन्निधिः । अर्थाद् ययोः पदयोः परस्परसापेक्षतयान्वयबोधश्चिकीर्षितस्तयोरव्यवधानमासत्तिः । उक्तं च प्राचीनमताभिप्रायेण—

'सन्निधानं तु पदस्यासत्तिरुच्यते[3] ।' इति ।

सा पदनिष्ठा । भ्रमप्रमासाधारणं तज्ज्ञानं शाब्दबोधहेतुः, पर्वतो भुक्तं वह्निमान् देवदत्तेनेत्यादावपि पर्वतपदवह्निमत्पदयोरव्यवधानभ्रमानन्तरं शाब्दबोधस्य सर्वानुभवसिद्धत्वात् । इयञ्च अव्यहितपूर्वत्वाव्यवहितोत्तरत्वभेदाद् द्विधा । यथा 'पर्वतो वह्निमान्' इत्यत्र स्वन्तपर्वतपदनिष्ठा स्वन्तवह्निमत्पदाव्यवहितपूर्वत्वरूपैका स्वन्तवह्निमत्पदनिष्ठा स्वन्तपर्वतपदाव्यवहितोत्तरत्वरूपाऽपरा ।

---

१ अवयवचिन्तामणौ मूल पु० पृ० १५७४ ।

२ भाषापरिच्छेदे कारिका ८२-८३ ।

३ तत्रैव कारिका ८३ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नव्यतार्किकैकदेशिनस्तु—पदयोर्व्यवधानदशायामपि शाब्दबोधोदयस्य बहुशोऽनुभवसिद्धत्वेन प्राचीनोक्तासत्तिज्ञानं न शाब्दबोधहेतुः किन्तु पदद्वयोपस्थित्योरव्यवधानात्मिका आसत्तिरेव तथा। एवञ्च 'यत्पदार्थेन सह यत्पदार्थस्यान्वयः शाब्दबोधविषयतयाभिमतः तादृशपदद्वयजन्योपस्थितिद्वया-व्यवधानमेवासत्ति'रिति वदन्ति।

एतन्मते च नासत्तिज्ञानस्य कारणत्वम् आसत्तेः स्वयमेव ज्ञानरूपत्वेन स्वरूपसत्त्या एव हेतुत्वात्।

नव्यास्तु—प्राचीनमतसिद्धासत्तिज्ञानस्य न कारणत्वमनपेक्षितत्वात् एकदेशिभिरुक्तायाः पदयो-रुपस्थितिद्वयाऽव्यवधानात्मिकाया आसत्तेः स्वरूपसत्या अपि न तयात्वं कल्पनागौरवात्, किन्तु पदज्ञानजन्यपदार्थोपस्थितेः क्लृप्तकारणत्वसम्भवात् पदज्ञानजन्याव्यवहितपदार्थस्मरणस्यैवासत्तित्वमिति स्वीकुर्वन्ति। तथा च पदनिष्ठवृत्तिज्ञानजन्यपदार्थोपस्थितीनां परस्परमव्यवधानमेवासत्तिः। तच्च न कारणं, किन्तु तादृशोपस्थितिनिष्ठकारणतावच्छेदकमिति तन्मताभिसन्धिः।

एतन्मतद्वयेऽपि आसत्तिभ्रमाज्जायमानशाब्दबोधे भ्रमत्वनियमो नाभ्युपेयते। न चैवं प्रयोजका-भावाच्छाब्दबोधभ्रमानुपपत्तिरिति वाच्यम्; योग्यताभ्रमस्यैव तत्प्रयोजकत्वोपगमात्। अत एव आसत्तिज्ञानस्य शाब्दबोधकारणत्वपक्षीया इयमुक्तिः सङ्गच्छते—' "नीलो घटो द्रव्यं पट" इत्यादावा-सत्तिभ्रमाच्छाब्दबोधः, आसत्तिभ्रमाच्छाब्दभ्रमाभावेऽपि न क्षतिः[1]' इति। तथा च नीलपदघट-पदाभ्यामासत्तिभ्रमादपि घटपदार्थनिष्ठनीलपदार्थवत्त्वात्मकयोग्यताज्ञाने प्रमात्वस्याक्षतत्वेन न शाब्दबोध-प्रमात्वक्षतिरिति। न चैतादृशासत्तेः श्लोकघटकपदेषु प्रायशोऽभावेनाभ्रान्तस्य शाब्दबोधानुपपत्तिरिति वाच्यम्; श्लोकस्थले योजनावाक्यादेवाभिमतशाब्दबोधस्वीकारादिति।

ननु ज्ञानानां तृतीयक्षणे नश्वरतया पञ्चषडादिविशेषणविशिष्टविशेष्यस्थले चरमविशेषण-विषयकोपस्थितेर्विशेष्यविषयकोपस्थित्या सहाव्यवधानसम्भवेऽपि प्रथमादिविशेषणविषयकोपस्थित्या सह विशेष्यविषयकोपस्थितेर्व्यवहितत्वात्तावद्विशेषणविशिष्टविशेष्यस्य शाब्दबोधे भानानुपपत्तिरिति, चेन्न। यथैकस्मिन्नेव काले घटचक्षुःसंयोग-पटचक्षुःसंयोगाभ्यामेकं 'घटपटावि'ति समूहालम्बनात्मकं प्रत्यक्षं जायते, तथैव क्रमोत्पन्नतत्तत्पदविषयकसंस्काराणां युगपदुद्बोधे सति तत्तद्विषयकस्मृतीनां युगपज्जननसम्भवात् तत एव च तावद्विशेषणविशिष्टविशेष्यविषयकबोधनिर्वाहात्। न चैवमप्युद्बोधकाभावान्नानासंस्कारैरेककालावच्छेदेन कथमेकस्मरणस्योत्पत्तिसम्भव इति वाच्यम्, वाक्य-घटकपदानां श्रावणप्रत्यक्षजन्यैः संस्कारैः सह समवायघटितसामानाधिकरण्येनात्मनि जायमानं यदन्तिमपदश्रावणप्रत्यक्षं तदेव स्वसंस्कारमादधत् पूर्वसंस्कारांश्चोद्बोधयत् समस्तसमुदायविषयकमेकं स्मरणं जनयतीत्यादिरीत्याऽन्तिमपदानुभवस्यैवोद्बोधकत्वोपपत्तेः। एवं च चरमवर्णश्रावणस्य पूर्वपूर्ववर्ण-श्रावणानुभवजसंस्काराणामुद्बोधकत्वमास्थेयम्। तथा च नाशुतरविनाशिनीनां पदजन्यपदार्थोपस्थितीनां मेलनासम्भवप्रयुक्तो दोषः, सर्वत्र शाब्दबोधे पदज्ञानजन्यपदार्थोपस्थितेः समूहालम्बनात्मिकाया एव हेतुत्वादिति।

योग्यता—वह्निना सिञ्चतीत्यादावासत्त्याकाङ्क्षादीनां सत्त्वेऽपि शाब्दबोधादर्शनेन योग्यता-ज्ञानस्यापि कारणत्वं कल्प्यते।

---

१ न्यायसिद्धान्तमुक्तावली।८३।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राचां मते योग्यता हि प्रकृतवाक्यघटकैकपदार्थानुयोगिकतादृशापरपदार्थप्रतियोगिकप्रयोक्तृतात्पर्यविषयसंसर्गरूपा, अर्थनिष्ठा । यथा घटमानयेत्यादौ घटकर्मत्वयोराधाराधेयभावसंसर्गः । उक्तञ्च कारिकावल्याम्—

'पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता[1] ।' इति

वह्निना सिञ्चतीत्यादिशब्दश्रवणानन्तरं सेचने वह्निकरणकत्वरूपयोग्यताया अभावात् तत्र तज्ज्ञानासम्भवेन न भवति वह्निकरणकसेचनानुकूलकृतिविषयकः शाब्दबोधः ।

किन्तु मीमांसकाः—पदार्थान्वयबोधरूपस्य शाब्दबोधस्य प्रमात्वं, तथैव च पदज्ञानस्यागृहीतग्राहित्वरूपं प्रमाणत्वं पूर्वमनधिगतसंसर्गाधिगन्तृत्वेनैवोपपद्यते । एवं च पदार्थान्वयात्मकयोग्यताज्ञानस्य शाब्दबोधात्प्राक् सर्वत्र सत्त्वे योग्यताज्ञानाधिगतस्य संसर्गस्य पूर्वं ज्ञातत्वेन शाब्दबोधे प्रमात्वस्य पदज्ञानेऽनधिगतार्थगन्तृत्वरूपप्रमाणत्वस्य चानुपपत्तिः स्यात् । तथा च न योग्यताज्ञानस्य कारणत्वमिति वदन्ति ।

तन्न सम्यक्—योग्यताज्ञानस्य तन्निश्चयत्वेन कारणत्वानुक्तेः । संशयसाधारणस्य च कारणत्वे योग्यताज्ञानस्य वाक्यार्थात्मकत्वाभावात् । अधिगतपदस्य च निश्चितार्थत्वेनान्वयबोधस्यानधिगताधिगन्तृरूपप्रमाणजन्यत्वोपपत्त्या तन्मतेऽपि प्रमात्वानुपपत्त्यभावात् । प्रमात्वस्य तद्वति तत्प्रकारकज्ञानत्वरूपत्वेन, प्रमाणत्वस्य च प्रमाऽसाधारणकरणत्वरूपत्वेन तार्किकैरभ्युपगमाच्च ।

मणिकारास्तु—योग्यताज्ञानं न शाब्दबोधसामान्ये कारणम्, तादृशकारणताग्राहकप्रमाणाभावात् । वह्निना सिञ्चतीत्यत्र शाब्दबोधापत्तिस्तु अयोग्यतानिश्चयाभावस्य शाब्दबोधहेतुत्वस्वीकारेण वारणीया, अयोग्यतानिश्चयस्य प्रतिबन्धकत्वाभ्युपगमात् । एवञ्च सेके वह्निकरणकत्वाभावप्रकारकनिश्चयस्यायोग्यतानिश्चयात्मकस्य प्रतिबन्धकस्य सत्त्वेन न शाब्दबोधापत्तिरित्याहुः । न च योग्यताज्ञानस्य कारणत्वानुपगमे यत्र न बाधनिश्चयो न वा योग्यताज्ञानं तत्र बाधनिश्चयाभावमात्रेण शाब्दबोधापत्तिवारणाय योग्यताज्ञानस्य कारणत्वं, योग्यताज्ञानव्यतिरेकस्य च शाब्दबोधव्यतिरेकप्रयोजकत्वमवश्यं स्वीकरणीयमिति वाच्यम्; तत्र शाब्दबोधस्वीकारेऽपि क्षत्यभावात् अयोग्यताज्ञानाभावात्मकस्य प्रतिबन्धकाभावस्य तत्राप्यक्षतत्वात् । तद्वत्ताबुद्धिं प्रति तदभाववत्तानिश्चयात्मकबाधनिश्चयाभावस्यैव कारणतायाः क्लृप्तत्वेन, तस्यैतादृशस्थले स्वीकारे बाधकाभावात्, योग्यताज्ञानस्यातिरिक्तकारणत्वकल्पने गौरवात्, योग्यताज्ञानविलम्बेन शाब्दबोधविलम्बस्यासिद्धत्वाच्च ।

तदपि न सम्यक्—मणिकारस्य मतमिदं पर्यालोच्यमानं नादरास्पदं प्रतीयते यतो हि बाधनिश्चयस्य विशिष्टबुद्धिसामान्यं प्रति प्रतिबन्धकत्वे बाधनिश्चयदशायां प्रत्यक्षेच्छासत्त्वे विशिष्टप्रत्यक्षोदयस्यापलापापत्तेः । अतः प्रत्यक्षेच्छाविरहविशिष्टबाधनिश्चयस्य विशिष्टप्रत्यक्षं प्रत्येव प्रतिबन्धकत्वमास्थेयम् । तथा चोक्तबाधनिश्चयप्रतिबध्यतावच्छेदकस्य शाब्दबोधासाधारणतया शाब्दबुद्धौ बाधनिश्चयस्य पृथक्प्रतिबन्धकत्वकल्पनायेक्षया तत्र योग्यताज्ञानस्य कारणत्वकल्पनायामेव लाघवम् । न चैवं कल्पनायां बाधनिश्चयदशायामनुमित्यापत्तिपरिहाराय विशिष्टानुमितौ बाधनिश्चयस्य प्रतिबन्धकत्वं पृथगास्थेयम्; तथा च विशिष्टविषयकशाब्दबुद्धौ योग्यताज्ञानस्य कारणत्वं विशिष्टविषयकानुमितौ बाधनिश्चयस्य प्रतिबन्धकत्व-

१ भाषापरिच्छेदे कारिका ।८३।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिति कल्पनाद्वयापेक्षया प्रत्यक्षान्यविशिष्टबुद्धिसामान्यं प्रति बाधनिश्चयस्य प्रतिबन्धकत्वकल्पन एव लाघवेन शाब्दबोधे योग्यताज्ञानस्य कारणत्वं निर्युक्तिकमेवेति वाच्यम्; प्रत्यक्षान्यत्वविशिष्टबुद्धित्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण गुरुधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताद्वयस्य कल्पनापेक्षया एकस्या उक्तकारणताया, एकस्या एव प्रतिबन्धकतायाश्च कल्पनाया एवोचितत्वात् ।

तस्माद् योग्यताज्ञानस्य कारणतापक्ष एव युक्तः प्रतिभाति ।

आकांक्षा—पटः कर्मत्वमानयनं कृतिरित्यादावासत्तियोग्यतादीनां सत्त्वेऽपि ततः शाब्दबोधजननादर्शनादाकाङ्क्षाया अपि शाब्दज्ञाने कारणत्वमावश्यकम् । सा च यत्पदस्य यत्पदव्यतिरेकप्रयुक्तमन्वयबोधाजनकत्वं तत्पदसमभिव्याहृततत्पदत्वरूपा पदनिष्ठा । यथा धातुपदमाख्यातपदव्यतिरेके, आख्यातपदं च धातुपदव्यतिरेके; क्रियापदं कारकपदव्यतिरेके, कारकपदमपि क्रियापदव्यतिरेके; प्रातिपदिकं विभक्तिव्यतिरेके, विभक्तिपदमपि प्रातिपदिकव्यतिरेके नान्वयबोधकं भवतीत्यतस्तयोः परस्परमाकाङ्क्षा । उक्तं च—'यत्पदेन विना यस्याननुभावकता भवेत् । आकाङ्क्षे[1]'ति ।

तथा च पटः कर्म्मत्वमित्यादौ पटपदोत्तरं द्वितीयादिसमभिव्याहारस्य धातूत्तरमाख्यातसमभिव्याहारस्य चाभावेनाकाङ्क्षाविरहान्न आधेयतासम्बन्धेन घटप्रकारककर्म्मताविशेष्यकः, अनुकूलत्वसम्बन्धेन चानयनप्रकारककृतिविशेष्यकः शाब्दबोधः । 'राज्ञः पुरुष' इत्यादौ पुरुषपदव्यतिरेकप्रयुक्तं षष्ठ्यन्तराजपदस्यान्वयबोधासामर्थ्यमित्यतस्तत्र षष्ठ्यन्तराजपदसमभिव्याहृतसुबन्तपुरुषपदत्वमाकाङ्क्षा । अत्र केचिन्मणिकारोक्तयोग्यतास्थलीयन्यायमनुसरन्तः आकाङ्क्षाज्ञानविलम्बेन शाब्दबोधविलम्बमसहमानाः अनाकाङ्क्षत्वज्ञानस्य प्रतिबन्धकत्वमुपगम्य तदभावस्य कारणत्वमुरीकुर्वन्ति । किन्तु—

नैतद्युक्तम्—अनाकाङ्क्षत्वज्ञानस्य शाब्दबोधग्राह्याभावानवगाहितया शाब्दबोधं प्रति प्रतिबन्धकत्वासम्भवात् ।

अत्रेदमवधेयम्—अव्यवहितपूर्वत्वाव्यवहितोत्तरत्वान्यतरसम्बन्धेन तत्पदवत्त्वमिति ह्यनुगतमाकाङ्क्षालक्षणम् । तत्राव्यवधानांशस्यासत्त्यैव लाभसम्भवात् 'पटं नय', 'नय पट'मित्यादिप्रकारद्वयेनापि शाब्दबोधदर्शनादुत्तरत्वादेरकिञ्चित्करत्वात् क्रियाकारकपदयोराकाङ्क्षाया आसत्त्यैव चरितार्थत्वेन न तयोराकाङ्क्षा पृथगुपगन्तव्या किन्तु पटप्रकारककर्मत्वविशेष्यकं पटनिष्ठं कर्मत्वमित्यादिशाब्दबोधं प्रत्येवाकाङ्क्षाज्ञानस्य कारणत्वमिति स्वीकरणीयम् । **एतेन यत् प्राभाकरैः**-'क्रिया हि कारकाविनाभाविनीति तां प्रतीत्य कारकं जिज्ञासते, एवं कारकमपि बुद्ध्वा क्रियामिति[2]'-इत्यादिना नैयायिकमतमुत्थाप्य 'तदयुक्तमिति मन्यामहे । जिज्ञासाविरामानुपपत्तेः । तथाहि—यदा तावत्कारकजिज्ञासा, तदीयजनक-तद्गुण-तत्क्रिया-तत्कारकान्तरादिजिज्ञासाप्यापद्यते । अथ प्रयोजनाभावात् कारकातिरिक्तमन्यन्न जिज्ञास्यते, तर्हि क्रियामात्रावगमेऽपि यत्र कारकज्ञानेन प्रयोजनं नास्ति तत्र जिज्ञासा न स्यात्'-इत्यादिरीत्या दूषितम्, **तन्न समीचीनमिति** सिद्धयति; क्रियाकारकयोराकाङ्क्षाया आसत्त्यैव चरितार्थत्वस्योक्तत्वात्, कारकजिज्ञासायां! तदीयजनक-तद्गुण-तत्क्रिया-तत्कारकान्तरादिजिज्ञासानिरूपितव्याप्तेरननुभवात् ।

---

१ भाषापरिच्छेदे कारिका ८४ ।

२ प्रकरणपञ्चिका पृ० ३८५ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न च दध्ना जुहोतीतिवाक्यप्रयोगानन्तरं 'किं दधि कथं च निष्पद्यत ?' इत्यादिप्रश्नोत्थान-सम्भवे वाक्यार्थबोधानुपपत्तितादवस्थ्यमिति वाच्यम्; ज्ञातपदपदार्थकसंकेतकान् पुंसः प्रत्येव वाक्य-प्रयोगस्य स्वाभाविकतया ज्ञातदधिपदार्थं प्रति दध्ना जुहोतीति वाक्यप्रयोगे उक्तप्रकारायाः दधिविषयकजिज्ञासाया अनुदयेन जिज्ञासाविरामस्य सुतरामेव सम्भवात् । कारकजिज्ञासानन्तरं दण्डज्ञाने सति तदीयजनकविषये जिज्ञासायाः प्रायशोऽदृष्टचरत्वादन्यथा दध्ना जुहोतीत्यादिवाक्यश्रवणा-नन्तरं जिज्ञासाया अनिवर्तनेऽनुष्ठानादिव्याहत्यापत्तेः । 'क्रियामात्रावगमे यत्र कारकज्ञानेन प्रयोजनं नास्ती'त्यादिरीत्या केवलवचनमात्रेणार्थासिद्धेः, क्रियायां सत्यां कारकसत्त्वावश्यम्भावात् । नैयायिको-क्तस्य 'यत्पदेन विना यस्याननुभावकता भवे'दित्याद्याकाङ्क्षालक्षणस्य जिज्ञासाऽघटितत्वाच्च । युक्तञ्चैतत्, चैत्रो जलमानयतीत्यादिवाक्यश्रवणानन्तरं पदार्थोपस्थितियोग्यताज्ञानादियावत्कारणसत्त्वे क्रियाकारकजिज्ञासां विनापि शाब्दबोधस्यानुभविकत्वात् । कारकज्ञानानन्तरं तज्जनके जिज्ञासासम्भवेऽपि तज्जनकं विना कारकस्याननुभावकत्वाभावाच्च ।

प्राभाकरसम्मतमाकाङ्क्षालक्षणन्तु प्रतिपत्तुर्जिज्ञासा आकांङ्क्षेति ।

उक्तञ्च शालिकनाथैः —

'अन्वितस्याभिधानार्थमुक्तार्थघटनाय वा ।
प्रतियोगिनि जिज्ञासा या साऽऽकाङ्क्षेति गीयते ॥[1]' इति ।

एतद्वचनेन तस्या अभिधानापर्यवसानाद् अभिहितार्थापर्यवसानाद् द्वैविध्यम् प्रतीयते । तत्राभिधानापर्यवसानाद् यथा द्वारमित्यादिशब्दश्रवणानन्तरम् । अभिहितार्थापर्यवसानाद् यथा 'विश्वजिता यजेते'त्यादिवाक्यश्रवणानन्तरं कार्यस्य नियोज्यविशेषमन्तरेणापर्यवसानादकर्तृकानुष्ठानस्या-प्रसिद्धचरत्वादनधिकारिणश्च कर्तृत्वानुपपत्तेरनियोज्यस्य चाधिकृतत्वाभावादधिकारिण आकाङ्क्षेति ।

तात्पर्यज्ञानम्—नानार्थकहरिसैन्धवादिपदप्रयोगे न सर्वतदर्थविषयकशाब्दबोधो युगपज्जायते किन्तु कदाचिदेकार्थविषयकः कदाचिच्चान्यार्थविषयक इति हि वस्तुस्थितिः । अस्या उपपत्तये तात्पर्यनिश्चयस्य कारणत्वमवसीयते । तथा च यदा यदर्थं उक्तपदानां तात्पर्यनिश्चयस्तदा तदर्थविषयकः शाब्दबोधस्तत उत्पद्यते । तात्पर्यञ्च तत्प्रतीतीच्छयोच्चरितत्वरूपं शब्दनिष्ठम् । तदुक्तं—'वक्तुरिच्छा तु तात्पर्यम् परिकीर्तितम्[2]' इति ।

अत्रौपनिषदाः—'तत्प्रतीतीच्छयोच्चरितत्वं न तात्पर्यम्, अर्थज्ञानशून्येन पुरुषेणोच्चरिताद्वेदादर्थ-प्रत्ययाभावप्रसङ्गात् ।[3]' इत्यादिनोक्तलक्षणे दोषमाविष्कुर्वन्तः तत्प्रतीतिजननयोग्यत्वं तात्पर्यमित्युरी-

१ प्रकरणपञ्चिका पृ० ३८८ ।
२ भाषापरिच्छेदे का० ।८४ ।
३ वेदान्तपरिभाषायां पृ० २५२ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुर्वन्ति । पुनश्च सैन्धवमानयेत्यादिवाक्यस्य लवणानयनप्रतीतीच्छयोच्चारणदशायामप्यश्वविषयकबोधजनने स्वरूपयोग्यताया अक्षतत्वेनाश्वस्य शाब्दबोधविषयत्वपरिहाराय तदन्यप्रतीतीच्छयाऽनुच्चरितत्वमपि विशेषणं लक्षणे प्रक्षिपन्ति ।

इदञ्च लौकिकवाक्यस्थले प्रकरणसन्निहितविशेषणसंयोगविभागचेष्टादिना निर्णीयते । यथा सैन्धवमानयेत्यादौ भोजनप्रकरणनिर्णये सैन्धवपदस्य लवणतात्पर्यनिश्चये लवणान्वयबोधः, गमनप्रकरणनिर्णये तुरगादिपरत्वनिश्चये तुरगान्वयबोधः । हरिपदस्य नानार्थकत्वेऽपि 'सकेसरो गर्जनघोषकारी मृगाधिराजो हरिरेत्यधस्तादि'त्यादौ सकेसरत्वादिविशेषणत्रयं हरिपदस्य सिंहे तात्पर्यं ग्राहयति । पटमानयेतिश्रवणे दूरस्थपटे तात्पर्यग्रहः । पटमपसारयेति श्रवणे च निकटस्थपटे तात्पर्यग्रहः । हस्तप्रसारणानन्तरं मह्यं देहीतिश्रवणे सति मह्यंपदस्य मद्धस्ते तात्पर्यग्रहः—इत्यादि । अथैवं प्रकरणादीनां तात्पर्यग्राहकत्वापेक्षया शाब्दबोधं प्रति साक्षात् कारणत्वसम्भवे व्यर्थमेव तात्पर्यज्ञानस्य कारणत्वकल्पनेनेति चेन्न । तात्पर्यग्राहकाणां प्रातिस्विकरूपेण व्यभिचारित्वेन तेष्वनुगतैकधर्माभावेनानुगतैककारणताया वक्तुमशक्यत्वात् ।

वैदिकवाक्यस्थले च पूर्वोत्तरमीमांसापरिशोधितन्यायेन; किं वा

'उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।

अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये[1] ।'—इतिवचनसिद्धोपक्रमादिना लिङ्गेन निर्णीयते । तद्यथा—श्रुतीनामद्वितीये ब्रह्मण्येव तात्पर्यं न वेति संशय औपनिषदा एभिरेवाद्वितीये ब्रह्मणि तात्पर्यं व्यवस्थापयन्ति । तथाहि—छान्दोग्योपनिषदि 'सदेव सौम्येदमग्र आसीत्[2]' इत्युपक्रमः । 'ऐतदात्म्यमिदं सर्वं तत्सत्यम्[3], इत्युपक्रान्तस्य सद्रूपस्य ब्रह्मण एवोपसंहारः । 'स आत्मा तत्त्वम[4]सी'ति वाक्यस्य नववारकथनमभ्यासः । 'अन्न वाव किल सत् सौम्य न निभालयस[5]' इतिरूपादिहीनस्य ब्रह्मणः प्रमाणान्तरासिद्धत्वरूपापूर्वतोक्तिः । 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य[6]' इतिवाक्ये ब्रह्मज्ञानफलं सत्सम्पत्तिरूपमोक्षः । 'येनाश्रुतं श्रुतं भव'तीत्याद्यर्थवादः । 'यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्[8]' इति दृष्टान्तेन कार्यमात्रस्य विकारित्वान्मिथ्यात्व एकविज्ञानेन सर्वविज्ञानकथनरूपोपपत्तिश्चे'ति । एतेषु त्रिविधमर्थनिष्ठं, त्रिविधं च शब्दनिष्ठम् । उक्तञ्च श्रीमधुसूदनसरस्वतीपादैः—

---

१ सर्वदर्शनसंग्रहे पूर्णप्रज्ञदर्शनप्रकरणे १५८ पृष्ठे बृहत्संहितावचनत्वेनोद्धृतःश्लोकः ।

२ छान्दोग्यपनिषद् ।६।२।१ ।

३ छान्दोग्योपनिषद् ।६।८।८।

४ छान्दोग्योपनिषद् ६।८।७, ६।८।८।,६।९।४, ६।११।३, ६।१२।३, ६।१३।३, ६।१४।३, ६।१५।६, ६।१६।३

५ छान्दोग्योपनिषद् ६।१३।२ ।

६ छान्दोग्योपनिषद् ६।१४।२ ।

७ छान्दोग्योपनिषद् ६।१।३ ।

८ छान्दोग्योपनिषद् ६।१।४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'तत्र त्रिविधं तात्पर्यलिङ्गं प्रामाण्यशरीरघटकमर्थनिष्ठमज्ञातत्वमबाधितत्वं प्रयोजनवत्त्वं च । त्रिविधं तु शब्दनिष्ठमतिप्रसङ्गवारकमुपक्रमोपसंहारयोरैकरूप्यमभ्यास अर्थवादश्चे[१]ति ।

वृत्तिविमर्शः

शाब्दबोधे पदार्थोपस्थितिद्वारा पदज्ञानं करणमिति पूर्वमावेदितम् । तत्र पदविशेषज्ञाने सति नियमेन पदार्थविशेषस्य स्मरणं भवतीत्यत एव पदपदार्थयोः कश्चित्सम्बन्धः स्मरणनियामकः स्वीकरणीयः । स च सम्बन्धो वृत्तिरित्युच्यते । एवञ्च तयोर्वृत्तिरूपसम्बन्धसत्त्वादेकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति नियमेन हस्तिज्ञानस्य हस्तिपकस्मारकत्ववत् पदरूपैकसम्बन्धिज्ञाने जाते पदार्थरूपापरसम्बन्धिनः स्मरणं स्वाभाविकमेव । सम्बन्धोऽयं द्विविधस्तार्किकमते । तदुक्तम्—

'संकेतो लक्षणा चार्थे पदवृत्तिः[२] ।' इति

तत्रापि संकेतो द्विविधः—आधुनिको नित्यश्च । तत्र आद्यः परिभाषेति भाण्यते, यथा 'अ-ए-ओ' प्रभृतिवर्णेषु 'गुण'पदस्य, 'आ—ऐ—औ' वर्णेषु च वृद्धिपदस्य । अपरस्त्वीश्वरसंकेतः । सैव शक्तिः । यथा पृथुबुध्नोदराद्याकारविशिष्टार्थविशेषेषु घटादिपदानाम् । आद्येन बोधकं पदं पारिभाषिकं, शक्त्या च बोधकं पदं वाचकमिति व्यवह्रियते ।

नव्यमते तु संकेतस्यैव शक्तित्वमुच्यते न हि तत्र नित्यत्वमप्यङ्गम् । न चेदं पदमिममर्थं बोधयत्वितीच्छाया एव शक्तित्वे तात्पर्यस्यापि वृत्तित्वापातात् तस्य च लक्षणास्थलेऽपि सम्भवेन लक्षणायाः पृथग्वृत्तित्वानुपपत्तिरिति वाच्यम्, पदार्थोपस्थितिद्वारकशाब्दबोधौपयिकसम्बन्धस्यैव वृत्तित्वात् तात्पर्यज्ञानस्य च साक्षादेव शाब्दबोधौपयिकत्वेन तत्त्वासम्भवात् ।

मीमांसकमते—तत्तत्पदेषु तत्तदर्थबोधानुकूला शक्तिरतिरिक्तपदार्थः । तदुक्तम्—'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः[३] ।' इति । तस्य च स्वभावविशेषान्न वह्निनिष्ठदाहानुकूलशक्तिवदज्ञातत्वेनैव कार्यकारित्वमपि तु ज्ञाततयैव शाब्दबोधरूपकार्योपधायकत्वम् । तन्मते पदानां नित्यत्वेन तेषामतीतत्वस्य दुर्वचतया नातीतपदेभ्यः (पदे शक्त्यभ्युपगमे) शाब्दबोधानुपपत्तिप्रसङ्गः । न च तन्मते वर्णानां नित्यत्वेऽपि आनुपूर्वीविशेषविशिष्टानां पदानां न नित्यत्वम्; एवं चातीतादिपदाच्छाब्दबोधानुपपत्तिर-परिहार्यैवेति वाच्यम्; तथापि पदज्ञाने शक्त्युपगमेन दोषाभावात् ।

---

१ अद्वैतसिद्धिः पृ० ४२५ ।

२ शक्तिवादगादाधरी पृ० १ ।

३ मीमांसासूत्रम् ।१।१।५ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदेतन्मतं तार्किकाणामसम्मतम्—लाक्षणिकपदेषु लक्ष्यार्थविषयकशाब्दबोधजनकत्वस्य सर्वानुभवसिद्धत्वेन लाक्षणिकेषु लक्ष्यार्थविषयकबोधानुकूलशक्तिस्वीकारावश्यकतया तदाश्रयेण वाचकत्वनिर्वचने लाक्षणिकपदेषु लक्ष्यार्थवाचकत्वापत्तेः। लाक्षणिकपदानां लक्ष्यार्थोपस्थितिमात्रं प्रति जनकत्वं स्वीकृत्य तादृशार्थविषयकशाब्दबोधं प्रत्यन्यथासिद्धत्वकल्पनेन तद्दोषवारणे शक्तस्यापि शक्योपस्थितिमात्रं प्रति जनकत्वं पुरस्कृत्य तादृशार्थविषयकशाब्दबोधं प्रत्यन्यथासिद्धत्वापत्त्या शक्तपदेष्वपि वाचकत्वभङ्गप्रसङ्गात् । यथोक्तं गादाधरे शक्तिवादे—

'पदार्थोपस्थित्याऽन्यथासिद्धत्वे शक्तस्यापि तथात्वापातात्[१]' इति । आलोचितमिदं मतं तत्रैव महतोक्रमेण ।

ईश्वरेच्छायाः सर्वविषयकत्वेन 'गङ्गापदं तीरं बोधयतु' इत्याकारकताया अपि तस्याः स्वीकारे, तस्या एव च शक्तित्वेन नैयायिकमतेऽपि तुल्यरीत्या गंगादिपदे तीरादिपदशक्तत्वापत्तिरिति मनसि निधायोपरिष्टाद् भट्टाचार्यैस्तस्या द्वैविध्यं प्रकटीकृतम् । तथाहि—शक्तपदे विशिष्टवैशिष्ट्यावगाहिनी ईश्वरेच्छा 'घटपदं घटत्वावच्छिन्नं बोधयत्वि'त्याकारिका । तदितरपदे (लाक्षणिकपदे) च विशकलितरूपेणेश्वरेच्छा 'बोधो गङ्गापदजन्यो भवतु, तीरं बोधविषयतावद्भवत्वि'त्याकारिका । एवञ्च नेश्वरेच्छायाः सर्वविषयकत्वहानिर्न वा गंगादिपदानां तीरादिरूपलक्ष्यार्थवाचकत्वापत्तिः, तत्तदर्थविषयकबोधजनकतात्वावच्छिन्नप्रकारतानिरूपितेश्वरेच्छीयविशेष्यत्वस्य तत्तदर्थवाचकत्वरूपत्वाभ्युपगमात् ।

शाब्दिका अपि—वाच्यवाचकभावात्मकं पदार्थान्तरं शक्तिरिति स्वीकुर्वन्ति । तथा चोक्तम्—

'तस्मात्पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावापरपर्याया[२]' इति ।

अयमत्र विशेषः—नैयायिकमतेऽपभ्रंशशब्दश्रवणे सति व्युत्पन्नानां तत्समानार्थकसाधुशब्दस्मरणानन्तरमेव शाब्दबोधोऽव्युत्पन्नानाञ्च तेषु शब्देषु शक्तिभ्रमात् । किन्तु शाब्दिकमतेऽपभ्रंशेष्वपि शक्तिरुपेयते । उक्तञ्च—

'सा च शक्तिः साधुष्विवापभ्रंशेष्वपि[३]' इति ।

अयञ्चात्रापरो विशेषः—तार्किकैस्त्वाधुनिके नाम्नि शक्तिरुपेयते । अत एवाधुनिकदेवदत्तादिपदानां शक्तत्वमभिप्रेत्याव्याप्तिः शक्तिवाद उपन्यस्ता—'सादिदेवदत्तादिपदेऽव्याप्तेश्च[४]' इत्यादिग्रन्थेन ।

---

१ शक्तिवादसामान्यकाण्डे पृ० २३ ।
२ लघुमञ्जूषा पृ० २३ ।
३ लघुमञ्जूषा पृ० ५४ ।
४ शक्तिवादसामान्यकाण्डे पृ० १० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न चैवं शाब्दिकमते, पिण्डविशेषेषु देवदत्तादिपदनिरूपितलक्ष्यत्वस्यैव तत्र स्वीकारात् । तदुक्तम्—

'एवञ्चाधुनिकसङ्केतस्थले द्वादशेऽह्नि क्रियमाणनामस्थले च लक्षणा[1]' इति ।

लक्षणानिरूपणम्

क्वचित्पदं लक्षणात्मकसम्बन्धेन सम्बद्धं सदर्थमुपस्थापयति । यादृशानुपूर्वीमत्पदं यादृशार्थनिरूपितशक्तिशून्यत्वे सति तदर्थसम्बन्धिनिरूपितशक्तिमत्, तादृशार्थविषयकबोधे तादृशानुपूर्वीमत्पदं लक्षणासम्बन्धेन बोधकमित्युच्यते । तदनुसारेण मुख्यार्थनिरूपितशक्तिराहित्ये सति मुख्यार्थसम्बद्धार्थशक्तत्वमिति लक्षणालक्षणं फलितम् । तदुक्तं—

'लक्षणा शक्यसम्बन्धः[2]' इति ।

तत्र प्राचीनमतेऽन्वयानुपपत्तितात्पर्यानुपपत्त्योरुभयोरपि लक्षणाबीजत्वम् । नव्यमते च तात्पर्यानुपपत्तेरेव तत्त्वं स्वीक्रियते 'विषं भुंक्ष्व', 'काकेभ्यो दधि रक्ष्यता'मित्यादावन्वयसम्भवेऽपि लक्षणाश्रयणदर्शनात् । उक्तञ्च—

'यद्यन्वयानुपपत्तिर्लक्षणाबीजं स्यात्तदा यष्टीः प्रवेशयेत्यत्र लक्षणा न स्यात्, यष्टिषु प्रवेशान्वयस्यानुपपत्तेरभावात् ।[3]' इति ।

मीमांसकमते लक्षणा यथासम्भवं पदवृत्तिर्वाक्यवृत्तिर्वा भवति शक्तिज्ञाप्यात्मकशक्यसम्बन्धस्यैव लक्षणात्वेन पदार्थवद् वाक्यार्थस्यापि शक्तिज्ञाप्यत्वरूपशक्यत्वसम्भवेन शक्यसम्बन्धरूपाया लक्षणाया वाक्यार्थेऽपि स्वीकारे बाधकाभावादिति ।

किन्तु नैतन्नैयायिकानामनुमतं वाक्यशक्तेरप्रसिद्ध्या शक्यसम्बन्धरूपाया लक्षणाया वाक्यार्थे कथमप्यसम्भवात् ।

इदन्त्वत्रावधेयम्—पद एव लक्षणाभ्युपगमे 'वायुर्वै क्षेपिष्ठा देवता' इत्यादिवाक्यानां प्रशंसार्थकानां प्राशस्त्ये, निन्दार्थवाक्यानाञ्च 'सोऽरोदी' दित्यादीनां निन्दायां वा लक्षणानुपपत्तिः । एकस्यैव पदस्य प्राशस्त्यादिलक्षकत्वोपगमेऽन्यपदवैयर्थ्यं विनिगमनाविरहश्च स्यात् ।

स्वज्ञाप्यसम्बन्धो लक्षणेति लक्षणालक्षणे स्वीक्रियमाणे वाक्यार्थस्याशक्यतापक्षेऽपि तस्य लक्षकत्वं सम्भवतीति विद्वद्वरैः समालोचनीयमिति ।

लक्षणाभेदाः

अत्र प्रथमं वेदान्तिमतेन, तदनन्तरञ्च तार्किकादिमतानुसारेण भेद उपस्थापयिष्यते पर्यालोचनसौकर्यात् ।

---

१ लघुमञ्जूषा पृ० २५ ।

२ भाषापरिच्छेदे कारिका ।८२ ।

३ तत्रैव न्यायसिद्धान्तमुक्तावली ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र प्रथमं लक्षणा द्विविधा—लक्षितलक्षणा, केवललक्षणा च। शक्यपरम्परासम्बन्धो लक्षितलक्षणा—यथा द्विरेफो रौतीत्यादौ द्विरेफपदस्य रेफद्वये शक्तिः। तस्य च सम्बन्धो भ्रमरपदे। तस्यापि च सम्बन्धिनि षट्पदे लक्षणा। शक्यसाक्षात्सम्बन्धः केवललक्षणा। यथा 'गङ्गायां घोष' इत्यादौ प्रवाहात्मकशक्यस्य साक्षात्सम्बन्धिनि तीरे 'गङ्गा' पदस्य लक्षणा।

केवललक्षणा त्रिविधा—जहती, अजहती, जहत्यजहतीभेदात्। तत्र शक्यार्थमनन्तर्भाव्यार्थान्तरप्रतीतौ जहती—यथा 'विषं भुंक्ष्वे'त्यत्र विषभोजनकृतिरूपशक्यार्थमनन्तर्भाव्य शत्रुगृहभोजननिवृत्तौ लक्षणा। शक्यार्थमन्तर्भाव्यार्थान्तरप्रतीतावजहती—यथा शोणो धावति, मञ्चाः क्रोशन्तीत्यादौ रक्तवर्णादिरूपार्थमन्तर्भाव्याश्वादिरूपार्थप्रतीतौ। शक्यैकदेशपरित्यागेनापरांशे वर्तमाना जहत्यजहती। यथा सोऽयं देवदत्तः, तत्त्वमसीत्यादौ। अत्र विशेषणांशपरित्यागेन विशेष्यांशमात्रग्रहणम्।

परिभाषाकृतस्तु—'यत्र हि विशिष्टवाचकः शब्द एकदेशं विहायैकदेशे वर्तते तत्र जहदजहल्लक्षणा, यथा "सोऽयं देवदत्त" इत्यादौ[1]' इत्यादि ग्रन्थेन सोऽयं देवदत्त इत्यादौ 'सः' 'अयमि'ति पदवाच्ययोस्तत्कालविशिष्टदेवदत्तैतत्कालविशिष्टदेवदत्तयोरैक्यानुपपत्त्या पदद्वयस्य जहदजहल्लक्षणया शुद्धदेवदत्तात्मकविशेष्यमात्रपरत्वं, एवमेव तत्त्वमसीत्यादौ तत्त्वंपदवाच्ययोः सर्वज्ञत्वादिविशिष्टचेतनाल्पज्ञत्वादिविशिष्टचेतनयोरैक्यासम्भवाज्जहदजहल्लक्षणया पदद्वयस्य शुद्धचेतनात्मकविशेष्यमात्रपरत्वं च प्रदर्श्य, 'यत्र पदार्थैकदेशस्य विशेषणतयोपस्थितिस्तत्रैव स्वातन्त्र्येणोपस्थितये लक्षणाभ्युपगमः यथा "घटो नित्य" इत्यत्र घटपदाद् घटत्वस्य शक्त्या स्वातन्त्र्येणानुपस्थित्या तादृशोपस्थित्यर्थं घटपदस्य घटत्वे लक्षणा[2]' इत्यन्तेन ग्रन्थेन 'सोऽयं देवदत्तः' 'तत्त्वमसी'त्यादौ शक्त्युपस्थितयोर्विशिष्टयोरैक्यानुपपत्तावपि शक्त्यैवोपस्थितयोर्विशेष्ययोरभेदान्वयसम्भवे तत्र न लक्षणा, किन्तु पूर्वाचार्याणां तादृशस्थलेषु लक्षणोक्तिरभ्युपगमवादेनेतीममाशयमङ्गीचक्रुः।

सम्मतमेवैतत्प्रतीयते मणिकाराणामपि, तैः शब्दखण्डमणौ—जहदजहल्लक्षणा हि शक्यैकदेशशक्तिरेव, यथा बलवदनिष्टाजनकत्वविशिष्टेष्टसाधनत्वज्ञानशक्तविधिप्रत्यये 'श्येनेनाभिचरन् यजेते'त्यादौ केवलेष्टसाधनत्वबोधोपधायिका शक्तिरेव न तु लक्षणा—इत्यादिरीत्या शक्त्यैव बोधाभ्युपगमस्य प्रदर्शनात्।

एवञ्च विशेषणतया शक्यस्याविशेषणतया शाब्दबोधे भानं न शक्त्या किन्तु लक्षणयैव, गौर्नित्या पशुरपशुरित्यादिप्रयोगप्रामाण्यप्रसङ्गभयात्; परन्तु विशेष्यतया शक्यस्य शक्त्यैव शाब्दबोधे भानाभ्युपगमे न किञ्चिद्बाधकमित्यनुभव एभिर्निर्भरो विहित इति प्रतीयते।

किन्तु न सम्मतमेतत्प्रतीयते श्रीगदाधरभट्टाचार्याणाम्, सामान्यधर्मावच्छिन्नवाचकशब्देभ्यो विशेषधर्मावच्छिन्नविषयकबोधजनने, विशेषधर्मावच्छिन्नवाचकशब्देभ्यश्च सामान्यधर्मावच्छिन्नविषयकबोध-

---

१ वेदान्तपरिभाषायां पृ० २३५।

२ तत्रैव पृ० २३७।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जननेऽवश्यमेव लक्षणाश्रयणीयत्वस्य शक्तिवादस्थविशेषकाण्डे धेनुपदविवेचनावसरे व्यवस्थापितत्वात्। तदुक्तम्—'एवं यत्र दुःखासम्भिन्नसुखत्वधानकर्म्मगोत्वादिविशिष्टवाचकं स्वर्गधेन्वादिपदं केवलसुखत्व-गोत्वाद्यवच्छिन्नतात्पर्येण प्रयुज्यते तत्र लक्षणैव[1]।'

एवञ्चैभिः शक्त्या प्रवृत्तिनिमित्तैकदेशं परित्यज्य न बोध इत्यनुभवे निर्भरो विहितः। तथा च विशिष्टवाचकपदाच्छक्त्या विशेष्यमात्रविषयकबोधवारणाय शुद्धतद्धर्मप्रकारकबोधे तदन्यरूपावच्छिन्न-त्वानवच्छिन्नबोधविषयत्वीयप्रकारतात्वेन प्रकारताघटितसम्बन्धावगाहिशक्तिज्ञानस्य कारणत्वम्। तथा च शुद्धदेवदत्तत्वप्रकारकबोधे तत्कालवैशिष्ट्यादिरूपावच्छिन्नत्वानवच्छिन्नबोधविषयत्वीयप्रकारतात्वेन, शुद्ध-चेतनत्वप्रकारकबोधे च सर्वज्ञत्वादिरूपावच्छिन्नत्वानवच्छिन्नबोधविषयत्वीयप्रकारतात्वेन प्रकारताघटित-सम्बन्धावगाहिशक्तिज्ञानस्यापेक्षितत्वेन प्रकृते च तदभावान्न शक्त्या बोधसम्भवः। एवञ्चैतेषां मते जहदजहल्लक्षणयैवोपर्युक्तस्थले बोधनिर्वाह इति विवेचनीयमिति।

एवञ्चायं निष्कर्षः—जहदजहल्लक्षणा हि तत्रैवोपादीयते यत्र विशिष्टवाचकपदाद्विशेष्यमात्र-विषयको बोधश्चिकीर्षितः। स तु बोधो यन्मते शक्यतावच्छेदकं विहायापि शक्त्योपपादयितुं शक्यते तन्मते न लक्षणाश्रयणम्, अनावश्यकत्वात्। यन्मते च नोपपादयितुं शक्यते तत्र लक्षणा तृतीयप्रकारिका जहदजहद्रूपाऽभ्युपेयत इति।

अत एव तार्किकमते लक्षणाया द्वैविध्यमेव प्रायशः प्रसिद्धम्, लक्षितलक्षणाया अपि जहत्स्वार्था-यामन्तर्भावोपगमात्। तदुक्तं दिनकरभट्टैः—

'लक्षणा द्विविधा—जहत्स्वार्थाऽजहत्स्वार्था[2]'चे'त्यादि।

इदं पुनरिहावधेयम्—'सोऽयं देवदत्तः' 'तत्त्वमसी'त्यादौ शक्यैकदेशेऽपि शक्तिमुपगम्य शक्त्यैव बोधोपपत्तौ तादृशस्थलयोर्जहदजहल्लक्षणोदाहरणत्वासम्भवे 'जहदजहल्लक्षणोदाहरणं तु काकेभ्यो दधि रक्ष्यतामित्याद्येव[3]।' इति ग्रन्थेन 'काकेभ्य' इत्यादेस्तदुदाहरणत्वसमर्थनं परिभाषाकाराणां चिन्त्यम्, तत्राजहत्स्वार्थलक्षणाया एव सर्वमतेष्वभ्युपगमात्।

प्रकारान्तरेण शुद्धा गौणीत्यादिभेदेनालङ्कारिका लक्षणां विभजन्ते। तत्सर्वमतिविस्तरभयान्नात्र विमृश्यते। केवलं तदभिमतो व्यञ्जनाख्यस्तृतीयप्रकारकः पदपदार्थयोः सम्बन्धः संक्षेपेणोपस्थाप्यते पर्यालोच्यते च।

व्यञ्जना

यत्र 'गतोऽस्तमर्क' इत्यादिवाक्यप्रयोगानन्तरं 'दूरं मा गम्यताम्', सन्ध्योपास्यताम्, पण्यान्युप-संह्रियन्तामित्यादिरूपेण बहुश्रोतॄणाम् बहुविधार्थप्रत्ययो भवति, तत्र च न शक्तिः, न वा लक्षणा, किन्तु शब्दस्यैवान्वयव्यतिरेकाभ्यामपरा व्यञ्जनाख्या वृत्तिराश्रयणीया। तल्लक्षणं तु—

'वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः।
प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषाम्।
योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा[4]।।' इति।

---

१ शक्तिवादविशेषकाण्डे पृ० ६१।
२ मुक्तावल्यां दिनकरीटीका का० ८२।
३ वेदान्तपरिभाषायां पृ० २४०।
४ काव्यप्रकाशे।३।२१-२२।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र प्रतिभा नाम नवनवोन्मेषशालिनी बुद्धिः, प्रकृते च वासनाविशेषरूपा । वक्त्रादीनां वैशिष्टयं नाम वैलक्षण्यम् ।

एवञ्च वक्त्रादिवैलक्षण्यहेतुका या वासनाविशेषवतामन्यार्थबुद्धिस्तद्धेतुव्यापारो व्यञ्जना।

अयं तु व्यञ्जनाजन्यबोधो न मुख्यार्थबाधग्रहमपेक्षते, नापि मुख्यार्थसम्बद्धविषय एव जायतेऽपि तु मुख्यार्थासम्बद्धेऽप्रसिद्धे चाऽप्यर्थं उत्पत्तुमर्हतीति विशेषः ।

व्यञ्जना त्रिधा—शक्तिमूला, लक्षणामूला, व्यञ्जनामूला चेति ।

तदेतन्न समीचीनम्— सकृदुच्चरितः शब्दः सकृदेवार्थं गमयतीति नियमबलेन शक्त्यादिनोपस्थित-पदार्थस्य बोधानन्तरमन्यविषयकशाब्दबोधस्यैवाप्रसिद्धेस्तदुपपत्त्यर्थं स्वीकृताया व्यञ्जनाया दूरपराहतत्वात् । निस्तात्पर्यकत्वनिश्चयदशायां शाब्दबोधापत्तिवारणाय तत्तदर्थविषयकशाब्दज्ञानं प्रति तत्तदर्थविषयक-निस्तात्पर्यकत्वनिश्चयस्य प्रतिबन्धकताया अवश्यं वाच्यतया, तात्पर्यनिश्चयादिसहकारेण शक्त्यादिनो-पस्थितार्थविषयकबोधानन्तरमन्यविषयकबोधस्योत्पत्त्यसम्भवात् । अन्यार्थविषयकबोधस्यानुभविकत्वे ज्ञानलक्षणया तत्तदर्थविषयकस्मृतिसहकारेण मानसबोधोत्पत्तौ सर्वसामञ्जस्यात् । तदुक्तं—

'तत्तदर्थानां यथाकथञ्चिदुपनयवशेन मनसैव विशिष्टधीसम्भवात्[१]' इति ।

किञ्च शब्दो नियतसम्बन्धेनैव व्यञ्जयिष्यति, अन्यथा अतिप्रसङ्गात् । एवञ्च तादृशसम्बन्धेनैव-वक्त्रभिप्रायविशेषानुमानसम्भवे वृत्त्यन्तरकल्पनस्यान्याय्यत्वात् (स्वार्थानुमाने व्यभिचारादीनां प्रसरण-भयाभावात्) ।

तस्मात् सुष्ठूक्तं—

'संकेतो लक्षणा चार्थे पदवृत्तिरिति[२] ।'

१ शब्दशक्तिप्रकाशिका पृ० १५३ ।

२ शक्तिवादारम्भे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षष्ठपरिच्छेदः

ज्ञानप्रामाण्यस्वतस्त्वपरतस्त्वविवेचनम्

(Validity of knowledge viewed subjectively or objectively)

ज्ञानस्य प्रामाण्यमुत्पत्तौ स्वतः परतो वेति विषये प्रथमं विचार्यते ।

प्रामाण्यस्योत्पत्तौ परतस्त्ववादिमतम्

परतः प्रामाण्यवादिनो ज्ञानजनकसामग्रीसत्त्वे गुणदोषाभावयोः सत्त्वे च ज्ञाने प्रामाण्योत्पत्तिर्भवत्यन्यथा नेत्यभ्युपगच्छन्ति ।

तेषामयमाशयः—प्रमात्वस्य ज्ञानसाधारणकारणप्रयोज्यत्वेऽप्रमितेरपि प्रमात्वापत्तिः स्यात्, तत्रापि ज्ञानकारणस्याक्षतत्वात् । न च ज्ञानहेतोः सत्त्वेऽपि दोषाद् विशेषहेतुसमवधानादप्रमितित्वोपपत्तिरिति वाच्यम्, तथा सति प्रमात्वे दोषाभावप्रयुक्तत्वप्राप्तौ स्वतः प्रामाण्यभङ्गप्रसङ्गः स्यात् । न च दोषाभावस्यान्यथासिद्धत्वेन न कारणत्वम्, अतो न स्वतः प्रामाण्यभङ्गप्रसङ्ग इति वाच्यम्; तथा सति भ्रमस्थलेऽपि दोषस्यान्यथासिद्धत्वप्राप्तौ कारणसामग्रीत एव तदुत्पत्तेः स्वीकारापत्त्याऽप्रमात्वस्वतस्त्वप्रवेशापत्तिः स्यात् । इदमेवाभिप्रेत्योक्तं श्रीजयन्तभट्टैः—

सम्यग्रूपस्य कार्यस्य गुणवत्कारकव्यतिरेकेणानिष्पत्तेः, द्विविधं कार्यं भवति—सम्यगसम्यग् वा । तत्र गुणवता कारणेन सम्यक् कार्यमुत्पाद्यते, दोषवता त्वसम्यगिति ।

निर्दोषं निर्गुणं वापि न समस्त्येव कारणम् ।
अत एव तृतीयस्य न कार्यस्यास्ति सम्भवः[1] ॥ इति ।

स्वतःप्रायाण्यवादिनस्तु—ज्ञाने प्रामाण्यं ज्ञानार्थमपेक्षितसामग्रीतरसामग्र्या निरपेक्षमुत्पद्यत उत्सर्गापवादन्यायादिति स्वीकुर्वन्ति । तन्न्यायस्योदाहरणमित्थम्—

एकदा द्वौ सहोदरौ कस्यचिद्विवादस्य निर्णयार्थं न्यायाधीशसकाशमुपगतौ । तत्र दिवसविशेषं पुरस्कृत्यैकेनोक्तम्—अस्माद् दिवसात् पूर्वमावां विभक्तावास्व । अपरेण चोक्तम्—एतद् दिवसात् पूर्वमावयोर्विभागो नासीत् । तदा न्यायाधीशप्रवरस्तं प्रत्येव 'स्ववचने प्रामाण्यं ब्रूहि' इत्यादिशति, येनोक्तम्—'आवाम् विभक्तावास्व', न तु द्वितीयं प्रति । यदि प्रथमः प्रबलप्रमाणमुपन्यसितुं शक्नोति, तदैव तस्य पक्षो युक्ततरत्वेनावसीयते अन्यथा द्वितीय एव पक्षो युक्त इत्युद्घुष्यते

---

१ न्यायमञ्जरीप्रमाणप्रकरणस्थतृतीयाह्निके पृ० १५७ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकस्मात् पितुर्जायमानत्वेनाविभागस्य स्वयमेव सिद्धत्वाद् विभागस्य च विचारभेदादिकलहादिप्रयुक्तत्वेन पश्चान्निष्पाद्यमानत्वेन स्वयं सिद्धत्वासम्भवात् ।

अयमेव हि न्यायः स्वतःप्रामाण्यवादिभिः प्रामाण्योत्पत्तौ स्वीक्रियते । तथा च ज्ञानसामग्रीसत्त्वे ज्ञाने स्वाभाविकरूपेणैव प्रमात्वमुत्पद्यते । अप्रमात्वं तु दोषादिसमवधाने सत्येव भवतीति ।

एवञ्च प्रामाण्यस्योत्पत्तौ स्वतस्त्वं ज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तहेत्वजन्यत्वरूपम् । प्रामाण्ये ज्ञानसामग्रीजन्यत्वस्य परतःप्रामाण्यवादिभिरप्यभ्युपगमादतिव्याप्तिरर्थान्तरं वा स्यात्, अतस्तदतिरिक्तेत्यादिकथनम् । न चेश्वरज्ञानेऽव्याप्तिस्तत्र विशेषणाभावादिति वाच्यम्; ज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तसामग्रीजन्यत्वाभावस्यैवोत्पत्तौ स्वतस्त्वलक्षणत्वेन सत्यन्तस्य च प्रतियोगिविशेषणतयेश्वरज्ञानेऽनुपपत्त्यभावाद् विशिष्टाभावस्य तत्राक्षतत्वात् । अप्रमासु तु ज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तदोषादिरूपसामग्रीजन्यत्वमस्तीति न तत्रातिव्याप्तिः । न च प्रमात्वस्य ज्ञानसामग्रीमात्रप्रयोज्यत्वे ज्ञानत्ववदप्रमावृत्तित्वमपि स्यादिति वाच्यम्; दोषासहकृतज्ञानसामग्र्या एव प्रयोजकत्वाभ्युपगमेन दोषसत्त्वे प्रयोजकाभावादेव प्रयोज्याप्रसक्तेः । तदसत्त्वेऽप्रमावृत्तित्वाप्रसक्तेः । न च दोषस्याप्रमाहेतुत्त्वे तदभावस्य प्रमां प्रति हेतुत्वं स्यादेवेति वाच्यम्; अन्वयव्यतिरेकमात्रात् कार्यकारणभावानध्यवसायादनन्यथासिद्धेरपि कार्यकारणभावेऽपेक्षणीयत्वात् । तथाहि—कारणत्वं त्वनन्यथासिद्धान्वयव्यतिरेकाभ्यामवसीयते ; अत्र (दोषाभावे) त्वन्वयव्यतिरेकौ विरोध्यप्रमाप्रतिबन्धकत्वेनोपक्षीणाविति न कारणत्वसाधकौ । तथा चोक्तं भट्टपादैः—

> तस्माद् गुणेभ्यो दोषाणामभावस्तदभावतः ।
> अप्रामाण्यद्वयासत्त्वं तेनोत्सर्गोऽनपोदितः[१] ॥

ननु यथा संस्कारस्य स्वजनकानुभवनाशकत्वेऽपि न स्मृतिं प्रति हेतुत्वहानिस्तथैव दोषाभावस्य विरोधिप्रतिबन्धकत्वेऽपि न प्रमात्वोत्पत्तिं प्रति हेतुत्वहानिरिति चेत्, न; संस्कारस्यानुभवनाशकत्वेऽपि, स्मृतेः कारणान्तरानुपलम्भात् तद्धेतुताऽपि संस्कारस्यागतिकगत्या कल्प्यते । अत्र तु तस्य नावश्यकत्वं ज्ञानसामान्यसामग्र्या एव तत्प्रयोजिकाया विद्यमानत्वेन प्रमां प्रति कारणानुपलम्भस्याप्रसक्तेः ।

न च सामग्र्यैक्ये ज्ञानप्रमालक्षणकार्यभेदानुपपत्तिर्बाधिकेति वाच्यम्; एकस्मादप्यग्निसंयोगात् पार्थिवपरमाणौ रूपरसगन्धस्पर्शदाहादीनां बहूनामेकदैवोत्पत्तिवद् व्यवस्थोपपत्तेः ।

प्रामाण्यज्ञप्तौ स्वतस्त्वादिनिरूपणम्

अत्र वादिनः प्राधान्येन त्रिधा विभक्ताः । यथा कस्यचिदपराधित्वेनानुमतस्य न्यायालये गमनानन्तरम् 'मया नापराधः कृतः' इति तस्य सविलापं वचनं श्रुत्वा करुणार्द्राः कथयन्ति—'नूनमेष निरपराधी' इति । अपरे संरक्षका गृहीतारो राजकीयपुरुषास्तु 'अयं दुष्ट एव' इति ।

---

१ श्लोकवार्त्तिके—२।६५।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यायाधीशस्तु ऋते प्रमाणं न दुष्ट इत्येव कथयति, न वा निरपराधीति । तथैवात्रापि यत्किञ्चिज्ज्ञानोत्पत्त्यनन्तरं केचित्तु तस्मिन् प्रमात्वमेवाभ्युपगच्छन्ति । अन्ये त्वप्रमात्वमेव । अपरे तु गुणसत्त्वे प्रमात्वं दोषसत्त्वेऽप्रमात्वमिति । तत्र प्रथमपक्षस्तु मीमांसकानां वेदान्तिनां च, द्वितीयस्तु बौद्धानाम्, तृतीयस्तु नैयायिकवैशेषिकयोरिति ।

तत्र प्रामाण्यज्ञप्तौ स्वतस्त्ववादिमते ज्ञाने प्रामाण्यनिश्चयानन्तरमेव तत इच्छाप्रवृत्त्योः सम्भवाज् ज्ञानोत्तरं तयोरुपपत्त्यर्थं ज्ञानग्राहकसामग्रीत एवोत्सर्गापवादन्यायात् तद्गतप्रामाण्यं गृह्यते । सा सामग्री तत्तन्मते भिन्नभिन्नैवेत्यन्यदेतत् । तथाहि—प्राभाकरमते सर्वदैव 'घटमहं जानामि' इति प्रत्ययस्वीकारात् 'अयं घटः' इत्याकारकस्य केवलघटावगाहिप्रत्ययस्य चास्वीकाराद् व्यवसायात्मकज्ञानस्यैव तज्ज्ञानावगाहित्वमात्मावगाहित्वं चापि स्वीक्रियते । एवञ्च फलतो ज्ञानस्य विषयावगाहित्वं स्वावगाहित्वमात्मावगाहित्वञ्च सिद्धम् । तथा च ज्ञानोत्पादक-सामग्र्येव ज्ञानग्राहिकापि । तयैव च ज्ञानगतप्रमाण्यं ज्ञाप्यते ।

अर्थाज् ज्ञाने स्वस्य, स्वविषयस्य, प्रमातुः, स्वगतप्रामाण्यस्य च ग्राहकत्वं विद्यते ।

भट्टानां त्वयमाशयः—ज्ञानक्रिया सकर्मिका । अतस्तया तादृशक्रियाकर्तृभिन्नसमवेतयत्किञ्चित्फल-वत्तया भाव्यम् । यथा पाककर्तरि दृश्यमानाया अपि पाकक्रियाया विक्लेदरूपं फलं पच्यमानवस्तुनि तण्डुलादौ दृश्यते । आद्यस्तु कर्ताऽपरस्तु कर्मेति । तथैवात्मनि जन्मलाभानन्तरं ज्ञानं कर्मरूपवस्तुना सह आत्मनः सम्बन्धविशेषमुत्पादयति, तदा तद्वस्तु परिणामविशेषाक्रान्तं भवति । एवञ्चानुभवो न केवलमात्मपरिणामः, अपि तु वस्तुपरिणामोऽपि । तथा चानया प्रणाल्या वस्तु प्रकाशविशेषविशिष्टं सम्पद्यते । अयमेव प्रकाशः प्राकट्यं ज्ञातता वोच्यते । अनयैव ज्ञाततयाऽनुमीयते यद्—ज्ञानं मदात्मन्युत्पन्नमिति । प्रयोगश्चेत्थम्—अहं घटज्ञानवान् घटज्ञाततावत्त्वात् । एवञ्च भट्टमते ज्ञानग्राहिका सामग्री ज्ञाततालिङ्गकानुमानमेव । तेनैव च ज्ञानगतप्रामाण्यं ज्ञाप्यते ।

मुरारिमिश्रमते तु न्यायमतवद् 'अयं घटः' इति ज्ञानानन्तरं 'घटमहं जानामि' इत्या-कारकोऽनुव्यवसायः प्रत्यक्षात्मको भवति । अतस्तन्मते ज्ञानेन मनःसन्निकर्षादिरूपैव ज्ञानग्राहिका सामग्री । तयैव च ज्ञानगतं प्रामाण्यमपि ज्ञाप्यते ।

अथ ज्ञानग्राहकादेव प्रामाण्यग्रहणस्वीकारे मिथ्यासर्पादिज्ञाने प्रमात्वावगमप्रसक्तिरिति चेत्, न; प्रसक्तस्यापि प्रामाण्यावगमस्य कारणदोषावगमबाधबोधाभ्यामपसारितत्वात् । न चैवं कारणदोष-ज्ञानबाधकज्ञानाभ्यां चेत् प्रसक्तस्यापि प्रामाण्यग्रहस्यापनयः, तर्हि तयोरभावज्ञानं प्रामाण्यज्ञानहेतुरिति स्वीकारापत्तिः, तथा च परतः प्रामाण्याभ्युपगमप्रसक्तिरिति वाच्यम्; अप्रामाण्यज्ञाने कारणदोषज्ञान-बाधकज्ञानवत् प्रामाण्यावगमे तयोरभावज्ञानं कारणमित्यनभ्युपगमात्, दोषज्ञानबाधकज्ञानयोरनुदयमात्रेण प्रामाण्यस्फुरणस्वीकारात् । तथा चोक्तम्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदा स्वतः प्रमाणत्वं तदाऽन्यो नैव मृग्यते ।
निवर्तते हि मिथ्यात्वं दोषाज्ञानादयत्नतः[1] ॥ इति ।

न च दोषज्ञानानुदयमादाय परतस्त्वापत्तिरिति वाच्यम्, विरोधिबुद्ध्युदयप्रतिबन्धकतयैव कृतार्थत्वात्; अन्यथा दोषाभावावगमस्यापि प्रामाण्यहेतुत्वस्वीकारेऽनवस्था स्यात् । येन हि दोषाभावज्ञानेनाद्यस्य प्रामाण्यमवगम्यते तत्प्रामाण्यार्थमपि दोषाभावज्ञानान्तरस्य गवेषणीयत्वात् ।

ज्ञानगताप्रमात्वं तु मतत्रयेऽपि परतो ग्राह्यम् । एवञ्च तन्न केवलं ज्ञानग्राहकसामग्रीमात्रेण गृह्यते, अपि तु ज्ञानाधीनप्रवृत्तौ वैफल्यज्ञानाद्यन्यकारणमपेक्ष्य गृह्यते ।

अथ यथा प्रमाणभूतज्ञानविषयकप्रथमज्ञाने तद्गतप्रामाण्यं स्वतो गृह्यते, तथैवाप्रमाणभूतज्ञान-विषयकप्रथमज्ञानेऽपि तद्गताप्रामाण्यग्रहणसम्भवेऽप्रामाण्यस्य परतो ग्राह्यत्वकथनमयुक्तमिति चेन्न, अप्रामाण्यस्य स्वतो ग्राह्यत्वाभ्युपगमे ज्ञानानन्तरभाविप्रवृत्तिनिवृत्तिविरोधिज्ञानप्रतिबन्धानां लोक उपलभ्यमानानां व्याघातापत्तेः । तथाहि—ज्ञानानन्तरं विषयीभूतार्थानुकूल्ये सति ज्ञातुस्तद् ग्रहणार्थं प्रवृत्तिः, प्रातिकूल्ये च सति ततो निवृत्तिरिति हि लोके सिद्धम् । किन्त्वर्थं विषयीकुर्वति ज्ञानेऽप्रामाण्यं गृह्यते चेत्, तदा प्रवृत्त्याद्यनुपपत्तिः स्यात्, अगृहीताप्रामाण्यकस्यैव ज्ञानस्य प्रवर्त्तकत्वनियमात् । दृश्यते ह्यप्रमाणभूतादपि शुक्तिरजतादिज्ञानात् प्रवृत्त्यादिकं बाधग्रहात्पूर्वम् । न च तादृशप्रवृत्त्यादिकम-प्रामाण्यस्य स्वतो ग्राह्यत्वे कथमपि सम्भवति, तथा सति ज्ञानोत्पत्त्यनन्तरमेव तस्मिन्नप्रामाण्यस्यापि गृहीतत्वेन तस्य प्रवृत्त्याधायकाप्रामाण्यज्ञानानास्कन्दितत्वासिद्धेः ।

एतेन प्रामाण्यस्य परतो ग्राह्यत्वे बाधकान्तरमपि सूचितं भवति । तथा सति यस्मात् परतः प्रामाण्य-ग्रहणं सम्पत्स्यमानमिष्टं तत्सन्निधानविलम्बेन प्रवृत्तिविलम्बापत्तिः स्यात् ।

प्रामाण्यज्ञप्तौ परतस्त्ववादिमतम्

प्रमाणपटवो नैयायिकास्तत्सयूथ्या वैशेषिकाश्च प्रामाण्यस्य ज्ञानगताप्रामाण्याग्राहकसामग्रीमात्र-ग्राह्यत्वस्वीकारे तद्विषये सन्देहो न स्यात्, तस्य ज्ञानत्ववदेव निर्णीतत्वादिति विवेचयन्ति । अथ यथा परतः प्रामाण्यज्ञप्तिमभ्युपगच्छतां मते सर्वं ज्ञानं धर्मिण्यभ्रान्तमित्यभ्युपगमेन धर्मिमात्रज्ञानस्य स्वत एव प्रमाणत्वेऽपि, अनुव्यवसायज्ञानप्रमाण्यस्य च तत्तज्ज्ञानस्फुरणसमय एव स्फुरितत्वेऽपि तत्र बौद्धानाम् **'अप्रमाणम् एवे'**ति विपर्यासो, यथा वा तदभ्युपगतस्वाभाविकप्रमाणभावायामनुमितौ चार्वाकस्य विपर्यासः, तथैव स्वतःप्रामाण्याभ्युपगमेऽपि पश्चात् संशयोपपत्तिरिति चेत्, न, वैषम्यात् । तत्र त येन धर्मिज्ञानेऽनुव्यवसाये च प्रामाण्यमभ्युपगतं तेनाप्रामाण्यं नोच्यते । बौद्धेन च सर्वत्र वाप्रामाण्यमभ्युपगम्यत इति धर्मिज्ञानेऽपि स्वीकरोतु । अनुमितावपि स्वाभाविकप्रामाण्यव्यवस्थापनम्, अपरेषां नैयायिकानां विपर्यासस्तु अन्यस्यैव चार्वाकस्य । अत एवोपदर्शितस्थले येन यस्मिन् प्रामाण्यमभ्युपगतं तस्यैव न तत्र विपर्यासः ।

---

१ श्लोकवार्त्तिके—२।५२ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकृते यदि जातमात्रज्ञानेऽभ्युपगतं प्रामाण्यं स्वतस्त्ववादिभिः; तदा तेषां त्वनुपपत्तिरेव संशयस्येति। तस्मात् प्रामाण्यं परत एवाभ्युपगन्तव्यम्। अन्यथा दूरे जलज्ञाने सत्यनन्तरक्षणेऽनुभूयमानस्तत्संशयो न स्यात्। अत एव प्रयोगः—अनभ्यासदशापन्नज्ञानप्रामाण्यं परतः प्रतीयते, तत्र सांशयिकत्वाद-प्रामाण्यवदिति।

इदं त्विहावधेयम्—एतन्मते तद्विषयकव्यवहारार्थं तद्विषयकज्ञानमात्रमपेक्षितम्, न तु तादृशज्ञान-धर्मिकप्रामाण्याप्रामाण्यनिश्चययोरन्यतरस्यापेक्षा। तथा चोक्तम्—

'अर्थसन्देहादपि प्रेक्षावतां प्रवृत्तेः'।[1] इति।

अत एव प्रामाण्याप्रामाण्ययोर्द्वयोरपि परतो ग्राह्यत्वाभ्युपगमेऽपि न प्रवृत्त्यादिव्याघातः। प्रामाण्याप्रामाण्ययोर्ज्ञानं त्वन्यकारणसापेक्षम्। तच्च कारणं प्रमाणस्थले सफलप्रवृत्तिजनकत्वहेतुकानुमानम-प्रमास्थले च विफलप्रवृत्तिजनकत्वहेतुकानुमानम्। तथा चोक्तं न्यायाभाष्ये 'समीहा प्रवृत्तिरित्युच्यते। सामर्थ्यं पुनरस्याः फलेनाभिसम्बन्धः[2]' इति। अत्र च मते ज्ञानग्राहिका सामग्री अनुव्यवसायात्मिका 'घटमहं जानामि' इत्याकारिका। तथा च ज्ञानग्राहकप्रामाण्यग्राहकसामग्र्योः स्पष्टमेव भेदाभ्युपगमादुभयोः परतस्त्वम्।

इदं पुनरत्र पर्यालोचनीयम्—भट्टाभिमतज्ञातता ज्ञानविषयतातो नातिरिच्यते। ज्ञानविषयता तु विषयरूपैव। अतो ज्ञाततायां न किञ्चिन्मानमस्ति। एवञ्च तल्लिङ्गकानुमानेन प्रामाण्यग्रहणकथैव सुदूरपराहता।

अपि च ज्ञानजन्यज्ञातताधारस्यैव ज्ञानविषयत्वस्वीकारेऽतीतानागतपदार्थानां ज्ञानविषयत्वानु-पपत्तिः, अविद्यमाने विषयरूपे धर्मिणि ज्ञातताऽऽरूपधर्मस्य जन्मासम्भवात्।

किञ्च, ज्ञातताधारस्यैव ज्ञानविषयत्वाभ्युपगमेऽनवस्थापत्तिर्विषयाज्ञातत्वं वा स्यात्। तथाहि— ज्ञाततायां ज्ञातताऽस्ति न वा? अस्ति चेत् सैवान्या वा? न तावत् प्रथमकल्पे प्रथमः, स्वस्मिन्नेवाधारा-धेयभावासम्भवात्। नापि प्रथमे द्वितीयः, आधेयभूताया ज्ञाततायाः सिद्ध्यर्थं ज्ञाततान्तरानुसरणेऽन-वस्थापत्तेः। नापि द्वितीयपक्षो युक्तः, ज्ञाततां विना स्वस्या अप्रामाणिकत्वप्रसक्तौ विषयस्याज्ञातत्वापातात्। एवञ्च ज्ञाततायाः स्वयमप्रामाणिकत्वे तल्लिङ्गकानुमित्या प्रामाण्यग्रहणं नितान्तमप्रामाणिकम्।

तुष्यतु दुर्जनन्यायेन कथञ्चिज्ज्ञाततया ज्ञानग्राहकत्वस्वीकारेऽपि न तया प्रामाण्यग्रहणसम्भवः, प्रमाणभूतेष्वप्रमाणभूतेषु च सर्वेष्वपि ज्ञानेषु तद्ग्राहकत्वेन ज्ञाततास्वीकारेण प्रामाण्यस्य च प्रमाणभूत-ज्ञानजन्यज्ञातताऽत एव स्वीकर्त्तुमुचितत्वेन व्यभिचारात्।

---

१ न्यायवार्त्तिकतात्पर्यटीका—१।१।१ सूत्रे। पृ० २८।

२ न्यायभाष्ये—१।१।१, मूलपुस्तके पृ० २।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उभयोः स्वतोग्राह्यत्ववादिसाङ्ख्यमतम्

साङ्ख्यनये तु प्रामाण्याप्रामाण्ययोर्द्वयोरपि स्वतो ग्राह्यत्वमिति 'केचिदाहुर्द्वयं स्वतः'[1] इति भट्टवाक्यादितोऽवगम्यते । अस्मिन् नये तयोः परतो ग्राह्यत्वे तद्ग्रहणार्थमतिरिक्तकारणकल्पने गौरवम्, स्वतोग्राह्यत्वाभ्युपगमे तु ज्ञानग्राहकैरेव तयोर्ग्रहणसम्भवे तदर्थमन्यकारणाकल्पनरूपं लाघवमिति चिन्त्यते । न च प्रामाण्यस्य स्वतो ग्राह्यत्वस्वीकारे यथाकथञ्चिद् बाधकासत्त्वेऽपि, अप्रामाण्यस्य तत्स्वीकारे ज्ञानोदयसमकालमेव तस्मिञ्ज्ञानेऽप्रामाण्योदयेनोक्तरीत्या प्रवृत्त्यादिभङ्गापत्तिरिति वाच्यम्; ज्ञानग्राहकसामग्रीत एव प्रामाण्याप्रामाण्ययोर्ग्रहणे तत्स्वतस्त्वतात्पर्यात्, ज्ञानोत्पादकज्ञानग्राहकसामग्र्योर्भिन्नत्वेनोत्पादकसामग्रीकाले ग्राहकसामग्रीसमवधानस्यानैयत्यात्, ज्ञानग्राहकसामग्रीसमवधानात् पूर्वं प्रवृत्त्याद्युत्पत्तौ बाधकाभावात् ।

इदं तु न विचारसहम्, ज्ञानग्राहकसामग्रीसमवधानात् पूर्वमेव प्रवृत्त्यभ्युपगमे प्राभाकरमतस्य, प्रामाण्यनिश्चायकसामग्रीसमवधानात्तदभ्युपगमे च नैयायिकमतस्यानुप्रवेशापत्तेः ।

किञ्च, ज्ञानग्राहकसामग्रीसमवधानानन्तरं तत्र प्रामाण्यं स्वीकर्तव्यमप्रामाण्यं वेत्यत्र विनिगमनाविरहः, उभयोरप्यौत्सर्गिकत्वाभ्युपगमात् । न च कारणदोषात् क्वचिदप्रामाण्यं कारणगुणाच्च क्वचित् प्रामाण्यं सेत्स्यतीति वाच्यम्; नैयायिकमतानुप्रवेशापत्तेस्तावताप्यनुद्धारात् । यदि चैकस्मिन्नेव ज्ञाने प्रामाण्यमप्रामाण्यञ्चेत्युभयमपि स्वाभाविकमभ्युपगम्यते, तथा च न नैयायिकमताविशेषापत्तिरित्युच्यते, तदा व्याघात एव, एकस्यैव ज्ञानस्यैकस्मिन् विषये (स्वविषये) स्वत एव प्रामाण्याप्रामाण्ययोः प्रेक्षावतैकदैवाकथनादिति ।

इदं पुनरिहावधेयम्—स्वतःप्रामाण्यवादानुसारेणापि प्रामाण्योत्पत्तौ गुणवतामिन्द्रियाणां भवतु कारणत्वम्, किन्तु गुणानां स्वरूपेण नापेक्षा, अपि तु दोषनिराकरणोपयिकतयैव । दोषाणां प्रामाण्योत्पत्तिविघातकत्वाद्; गुणैरुत्सारितानां च तद्विघातकत्वासम्भवात् । अत एवासत्स्वपि वक्तृगुणेषु वेदे दोषाभावमात्रादेव प्रामाण्यं सिद्ध्यति। तेन तेषामपौरुषेयत्वोपगमेऽपि न काचिद् हानिः । इदमेवाभिप्रेत्याहुर्भट्टपादाः—

तस्माद् बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता ।
अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यते[2] ॥ इति ।

अत्रार्थान्यथात्वज्ञानञ्च द्विविधं भट्टाभिप्रेतम्—नैतदेवमित्याकारकं पूर्वविगतरूपोपमर्देन जायमानं प्रथमम्, तत्त्वप्रकाशनात्मकं च द्वितीयम् । हेतवो ज्ञानानामिन्द्रियादयस्तेषु वातादिसमुत्था दोषास्तिमिरादयः । तज्ज्ञानेनोत्सर्गतः प्राप्नुवन्ती प्रमाणताऽपोद्यत इत्यत्रत्यवार्त्तिकाभिप्रायः ।

---

१ भट्टवार्तिके सू० २, श्लोकः ३४ ।
२ श्लोकवार्त्तिके—२।५३ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्मात् स्थिते चैवमौत्सर्गिकप्रामाण्ये, यत्र तस्यापवादः क्वचिद् भवति तत्राप्रामाण्यम् । अप्रामाण्ये चावश्यम्भाव्यपवादः । द्विविधो हि भवति तदपवादः—बाधकप्रत्ययः कारणदोषज्ञानञ्च । यथाहुरभियुक्ताः—'**यस्य च दुष्टं करणं यत्र च मिथ्येति बाधकः प्रत्ययः, स एवासमीचीनः प्रत्ययो नान्यः**' इति । तत्र बाधकज्ञानं पूर्वज्ञानोपमर्दद्वारेणैव तस्मिन् विषये जायते । कारणदोषज्ञानं तु भिन्नविषयमपि कार्यैक्याद् बाधकतां प्रतिपद्यते । यथा च 'अपः प्रणयेदिति' दर्शपूर्णमासाङ्गत्वात् क्रत्वर्थचमसो 'गोदोहनेन पशुकामस्य प्रणयेद्' इति काम्यमानपशुनिर्देशात् पुरुषार्थं गोदोहनञ्चेति रीत्या क्रत्वर्थपुरुषार्थतया भिन्नविषयत्वेऽपि चमसगोदोहनयोरप्प्रणयनाख्यं कार्यमेकमिति गोदोहनेन निर्वृत्ते तस्मिन् चमसो निवर्तते । एवमिह कारणदोषज्ञानं दोषविषयमपि दोषाणामयथार्थज्ञानजननस्वभावत्वात् तज्जन्यस्य याथार्थ्यं बाधते । यथाहुः—

दुष्टकारणबोधे तु सिद्धेऽपि विषयान्तरे ।
अर्थात्तुल्यार्थतां प्राप्य बाधो गोदोहनादिवत्[१]।। इति ।

---

१ मीमांसाश्लोकवार्त्तिकम् २।५८ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सप्तमपरिच्छेदः

ज्ञानस्य मोक्षकारणत्वविमर्शः

(Knowledge as means of salvation)

'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय[१]' 'ज्ञानादेव तु कैवल्यम्[२]' इत्यादिश्रुतिषु ज्ञानस्यैव मोक्षकारणत्वमवसीयते। 'विद्यां चाविद्यां च[३]' इत्यादिश्रुतौ च कर्मसहकृतस्य तस्य तन्निश्चीयते। एतदवलोक्य मीमांसकभट्टभास्करादयो ज्ञानकर्मणोस्तुल्यकक्षतयैव समुच्चयं, श्रीभाष्यकारप्रभृतिवैष्णवाचार्यास्तु कर्माङ्गज्ञानवादं व्यवस्थापयन्ति। मतद्वयेऽपि ज्ञानं चोपासनं चेत्यनर्थान्तरम्। नैयायिकवैशेषिकौ, सांख्ययोगौ, औपनिषदाश्च कर्मणां चित्तशुद्धिमात्रेणोपक्षयाज्जन्मान्तरीयेणापि तत्सम्भवः, इह च तदनिवार्यत्वाभावान्न कर्म ज्ञानाङ्गम्, न वोपासनाङ्गम्, किन्तु ज्ञानमेव मोक्षसाधनम्।

अत्र समुच्चयवादिनामयमाशयः—तीर्थविशेषस्नानयज्ञयमनियमादिकर्मणां निःश्रेयससाधनत्वं शब्दबलादवगम्यते। उक्तञ्च—

'अपाम सोमममृता अभूम[४]', अक्षय्यं वै चातुर्मास्ययाजिनस्सुकृतं भवति[५]' इति।

तत्र निःश्रेयसे जनयितव्ये कर्मणस्तत्त्वज्ञानव्यापारकत्वं न तावच्छब्दाल्लभ्यते, तत्र तस्यौदासीन्यात्। न च कर्मणामाशुतरविनाशित्वेन व्यापारः कश्चिदवश्यं स्वीकर्त्तव्यः, तत्र दृष्टेन तत्त्वज्ञानेनैवोपपत्तावदृष्टकल्पनाया अयुक्तत्वात् तत्त्वज्ञानकल्पनमेव युक्तमिति वाच्यम्; तत्त्वज्ञानस्यापि व्यवहितत्वेन तदर्थमपि कर्मकारणतानिर्वाहायापूर्वरूपव्यापारवत्त्वस्यावश्यं कल्पनीयत्वात्। तथा च निःश्रेयसे जनयितव्येऽपूर्वमेवास्तां कर्मव्यापारः; आवश्यकत्वात्। उत्पन्नेऽपि तत्त्वज्ञाने निःश्रेयसोत्पत्तये नित्यकर्मयमनियमादिकमवश्यमनुष्ठेयम् तदानीमपि मोक्षार्थिनो नित्यकर्मसन्ध्यादौ यमनियमादौ चाधिकारानपायात्। न च तत्त्वज्ञानोत्पत्तौ सत्यां निःश्रेयसोत्पत्तिसिद्धौ कर्मानुष्ठानानवकाश इति वाच्यम्;

---

१ श्वेताश्वतरोपनिषद्। ३।८।

२ सर्ववेदान्तसिद्धान्तसारसंग्रहे 'ज्ञानादेव तु कैवल्यमिति श्रुत्या निगद्यते' इत्यादिना १७० तमे श्लोके श्रुतित्वेनास्य वचनस्योद्धरणदर्शनादियं श्रुतिरिति निश्चीयते।

३ ईशावास्योपनिषद्, मं० ११।

४ ऋग्वेदे मण्ड० २, सू० ८, मं० ४८।

५ आपस्त० श्रौतसूत्रे अष्टमे प्रश्ने प्रथमपटले खं० १, सू० १, पृ० ३१६।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'क्रियावानेष ब्रह्मविदां वरिष्ठः[१]' 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः[२]' इत्यादौ ज्ञानिनामपि कर्मश्रवणात् । न चैवं कर्मण एव मोक्षसाधनत्वे सिद्धे किं ज्ञानकर्मसमुच्चयेनेति वाच्यम् ;

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायां रताः[३] ॥

इत्यादिश्रुतौ 'ये कर्मण्येवासक्ता भवन्ति ते अन्धं तमः प्रविशन्ति, अर्थात् संसारान्नातिवर्त्तन्ते' इत्यर्थिकायां केवलकर्मणामाश्रयणेन, केवलज्ञानमात्राश्रयणेन वा न मोक्ष इति प्रतिपादनादविद्यापदस्य कर्मपरत्वात्, यथाश्रुतमिथ्याज्ञानार्थकत्वे 'विद्यां चाविद्यां' चेत्याद्यग्रिमश्रुतेरसङ्गत्यापत्तेः । अत एव हि श्रुतिषु समुच्चयः श्रूयते—

विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते[४] ।। इति ।

न च नित्यकर्मणस्संन्यास उचितः, तदकरणेन प्रत्यवायस्यातिवहुतरत्वात् ।

ननु 'तमेव विदित्वातिमृत्युमेति[५]' इत्यादिपूर्वोदाहृतश्रुत्या कर्मरूपस्य पथः साक्षान्निषेधात् तद्विरोधापत्तिरिति चेन्न, तस्याः 'तं विदित्वैव मृत्युमत्येति अन्यः केवलकर्मरूपः पन्था अयनाय न विद्यत' इत्यर्थपरत्वात् । अथैवमपि कर्मसमुच्चयो नोपपद्यते, काम्यनिषिद्धयोस्तु (मुमुक्षुणा) पूर्वमेव त्यक्तत्वेन ताभ्यां सह समुच्चयासम्भवात् । पूर्वाश्रमीयनित्यकर्माभावेऽप्युत्तरोत्तराश्रमविहितनित्यकर्मरतानां तत्त्वज्ञानसमुत्पत्तावतिमुक्तिश्रवणेन नित्यकर्मणामेकैकशो ज्ञानव्यभिचारित्वावगमात्, सर्वेषां नित्यकर्मणां साकल्यासम्भवेन सकलनित्यकर्मभिः सह ज्ञानसमुच्चयस्यासम्भवादिति चेन्न; तत्तदाश्रमोचितनित्यकर्मभिर्निःश्रेयसहेतुतया प्रतिपादितैर्यमादिभिश्च सह समुच्चयसम्भवात् । 'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः[६]' इति श्रीमद्भगवद्गीतावचनादिति । इदं सर्वमभिप्रेत्योक्तम्—

ननु निश्रेयसं ज्ञानाद् बन्धहेतोर्न कर्मणः ।
नैकस्मादपि तत् किन्तु ज्ञानकर्मसमुच्चयात् ।।
नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम् ।
ज्ञानं च विमलीकुर्वन्नभ्यासेन च पाचयेत् ।।
वैराग्यात् पक्वविज्ञानः कैवल्यं लभते नरः ।
न च ज्ञानविधानेन कर्मसम्बन्धवारणम् ।।[७] इति ।

---

१ शतदूषणीग्रंथे ६४ पृष्ठ उद्धृतम् ।
२ श्रीमद्भगवद्गीता ३।२० ।
३ ईशावास्योपनिषद् , मं० ९ ।
४ ईशावास्योपनिषद्, मं० ११ ।
५ श्वेताश्वतरोपनिषद् ६।१५, ३।८ ।
६ श्रीमद्भगवद्गीता १८।४५ ।
७ प्रकरणपञ्चिकायाम् ३५२ पृष्ठे वृहट्टीकावचनत्वेनोद्धृतानि वचनानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किन्तु नायं पक्षः समीचीनः प्रतिभाति—शब्दबलात्तत्तत्कर्मविशेषस्यापवर्गकारणत्वावगमेऽपि न कर्मणस्तत्त्वज्ञाननिरपेक्षस्य मिथ्याज्ञानोन्मूलनव्यतिरेकेणापवर्गकारणत्वं सम्भवति, संसाराविच्छेदात्, तदुन्मूलनस्य तत्त्वज्ञानसाध्यत्वेन लोकत एवावधारणात्, कर्मसहस्रेणापि शुक्तितत्त्वज्ञाननिरपेक्षेण रजतभ्रमनिवृत्तेरदर्शनात्, 'नान्यः पन्था विद्यतेऽयनाय[१]', 'न कर्मणा न प्रजया धनेन[२]', ज्ञानादेव तु कैवल्यम्[३], इत्यादिश्रुतौ ज्ञानमात्रस्यैवापवर्गकारणत्वश्रवणाच्च । तथा च तत्त्वज्ञानस्यैव मोक्षकारणत्वमिति वेदितव्यम् । समुच्चयश्रुत्या 'विद्यां चाविद्यां च' इत्यादिकया कर्मण्यपवर्गकारणतामात्रं साक्षात्परम्परासाधारणं बोध्यते । तस्याश्च द्वारद्वारिभावेऽप्युपपन्नत्वेन न तया समुच्चये साक्षात् कारणत्वसिद्धिरिति ।

न च श्रुतेर्द्वारद्वारिभावापन्नसमुच्चयपरत्वे 'ततो भूय इव ते तमः[४]' इत्यादिना तत्त्वज्ञानिनो नित्याऽकरणे प्रत्यवायाभिधानं विरुद्ध्येतेति वाच्यम्, परोक्षविद्यावतः श्रुत्या प्रत्यवायाभिधानात्, तस्य चाकरणे तदौचित्यात् । न चैवं सति योगिनः कर्मानुष्ठानानुपपत्तिः, इष्टापत्तौ चान्तःकरणशुद्ध्यर्थं करणीयकर्मबोधकस्य 'योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये[५]' इति श्रीमद्भगवद्गीतावचनस्य विरोधः प्रसज्ज्येतेति वाच्यम्; रागापगमेनाकरणप्रत्यवायासम्भवे दोषाभावात्[६] । न च लोकसङ्ग्रहायानुष्ठानमस्त्विवति वाच्यम्; लोकानां कर्मानुष्ठानस्य योगीष्टासाधनत्वेन तावताप्यनिस्तारात् । न च परमकारुणिकत्वेन तदुपपत्तिरिति साम्प्रतम्, तावतापीष्टसाधनताज्ञानाभावे स्वतन्त्रप्रवृत्त्यनुपपत्तेः, निर्ममत्वेन लोकहिताहितयोरौदासीन्याच्च । न चौदासीन्येऽपि 'जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन्[७]' इति विधिबलादेव प्रवृत्त्युपपत्तिरिति वाच्यम्; अस्य वचनस्य परोक्षविद्यावद्विषयत्वेनाप्युपपत्तिसम्भवात् । 'कर्मक्लेशप्रदादृष्टप्रतिक्षेपाय केवलं तत्त्वविज्ञानसम्पन्ना योगिनः कर्म कुर्वन्ति' इत्यर्थस्वीकारे सर्वविधसङ्गत्युपपत्तेः ।

अथ ज्ञानकर्मणोर्द्वारद्वारिभावकथनेऽपि तत्त्वज्ञानस्य कर्मव्यापारत्वमित्युक्तं भवति । तदयुक्तम्, 'न कर्मणा न प्रजया धनेन[८]', 'नान्यः पन्था विद्यते', 'नास्त्यकृतः कृतेन[९]', 'कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते । तस्मात् कर्म न कुर्वन्ति यतयः पारदृश्वनः[१०] ।।' इत्यादिश्रुतिस्मृतिशतेन निषेधान्मोक्षस्य कर्मजन्यत्वाभावात् । 'तपसा कल्मषं हन्ति[११]', अविद्यया मृत्युं तीर्त्वा तं पश्यति निष्कलं ध्यायमानः[१२]', 'कषायपङ्क्तिः कर्माणि' इत्यादिभिस्तत्त्वज्ञानोत्पत्तिप्रतिबन्धकदुरितनिवृत्त्यैव कर्मणामन्यथासिद्धेः स्फुटरूपेण प्रदर्शनात् । न च 'विविदिषन्ति यज्ञेन[१३]', 'सर्वं कर्माखिलं पार्थ

---

१. श्वेताश्वत० ।३।८।
२. महानारायणोपनिषद् ।८।१४।; तैत्तिरी० ।४।१२।३ ।
३. सर्ववेदान्तसिद्धान्तसारसंग्रहे १७० श्लोके श्रुतिवचनत्वेनोद्धृतः ।
४. ईशावा० मं० ६ ।
५. श्रीमद्भगवद्गीता ।५।११ ।
६. 'नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन' इति श्रीमद्भगवद्गीतावचनादिति ।
७. श्रीमद्भगवद्गीता ।३।२६ ।
८. तैत्तिरीयोपनिषद् ।४।१२।३। महानारायणोप० ।८।१४ ।
९. मुण्डकोप० ।१।२।१२ ।
१०. श्रीमद्भगवद्गीतायाः ।३।१। श्लोकशाङ्करभाष्ये शुकानुशासनत्वेनोदाहृतश्लोकः ।
११. मनुस्मृतिः ।१२।१०४ ।
१२. मैत्रायण्युप० ।७।६ ।
१३. बृहदारण्यकोप० ।४।४।२२ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञाने परिसमाप्यते[१]' इत्यादिभिः कर्मजन्यतापि प्रतीयत इति वाच्यम्; कर्मजन्यताबा अपूर्वद्वारैव स्थापनीयत्वेनात्र तदसम्भवात्, प्रतिबन्धकदुरितानुच्छेदेऽपूर्वसहस्रस्याप्यकिञ्चित्करत्वात् । तमुच्छिद्य जनने तु प्रमाणावधृतकारणत्वाभावेन प्रतिबन्धकाभावविधयैवान्यथासिद्धिप्रसङ्गात् । न चैवं सति यागादेरप्यपूर्वेणैवान्यथासिद्धिप्रसङ्ग इति वाच्यम्; तत्रापूर्वस्य यागकारणताग्रहोत्तरकल्प्यत्वेनोपजीव्यापरिपन्थित्वात्, अत्र च प्रतिबन्धकाभावे कार्यमात्रकारणतायाः प्रागेवावधृतत्वेन महद्वैषम्यात् । किञ्च, कर्मकारणताग्रहमनुपजीव्यैव सार्वलौकिकानुभवबलेन तत्त्वज्ञाने मिथ्याज्ञाननिवर्त्तकत्वस्य सिद्धत्वेन 'तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुः[२]', 'तमेव विदित्वातिमृत्युमेति', 'तरति शोकमात्मविद्[३]', 'ब्रह्मविदाप्नोति परम्[४]', ब्रह्म वेद ब्रह्मैव भवति[५]' इत्यादिश्रुतिशतेन प्रमाणितत्वाच्च कर्मणामन्यथासिद्धत्वमेव । एवञ्च न तत्त्वज्ञाने द्वारतासम्भवः । एवमेव हि मीमांसका अध्ययनविधेरर्थाववोधपर्यन्तत्वमेवाभ्युपगच्छन्ति, तद्द्वारा क्रत्वनुष्ठानं प्रति स्वर्गादिफलं प्रति च कारणत्वास्वीकारात् । न च तत्त्वज्ञानस्य कर्माजन्यत्वे तेनैव (तत्त्वज्ञानेनैव) व्यवधानात् कर्मणो निःश्रेयसहेतुत्वानुपपत्तौ 'तपो विद्या च विप्रस्य निःश्रेयसकरं परम्[६]' इत्यादिस्मृतिव्याकोप इति वाच्यम्; तदर्थस्य तत्त्वज्ञानोत्पत्तिप्रतिबन्धकदुरितनिवर्त्तकत्वरूपस्य 'तपसा कल्मषं हन्ति' इत्याद्युत्तरार्द्धेन स्फुटं विवृतत्वादिति चेत्, सत्यम्; कर्मणां निःश्रेयसानुकूलत्वमात्रं हि श्रुतेरर्थः । अनुकूलत्वमत्र निःश्रेयसप्रागभावव्याप्यप्रागभावप्रतियोगित्वमात्रम् । न त्वनन्यथासिद्धेरपि तत्र प्रवेशः, 'न कर्मणा न प्रजया धनेन', 'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते[७]', इत्यादिबहुतरश्रुतिभिरन्यथासिद्धेः, स्फुटमुत्कीर्त्तनात् । तावतैव च (अनुकूलत्वबोधकतयैव च) श्रुतेः कर्मप्रवृत्तिपरतानिर्वाहात् । अत एव कर्मस्वपवर्गकारणताबोधकश्रुतिस्मृतिजातस्यैव निःश्रेयसप्रागभावव्याप्यप्रागभावप्रतियोगित्वरूपानुकूलत्वमात्रपरत्वेमेवेत्यवधारणीयमिति ।

यत्तु—'नियतं कुरु कर्म त्वम्[८]', 'मामनुस्मर युध्य च[९]' 'कर्मण्येवाधिकारस्ते[१०]' इत्यादिश्रीमद्भगवद्गीतावचनाज्ज्ञानेन मोक्षे जननीयेऽग्निहोत्रादिश्रौतस्मार्तकर्मणां समुच्चयोऽवगम्यते । न च समुच्चयाभ्युपगमे 'एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु[११]' इति ज्ञानकर्मनिष्ठयोः पृथक्कृत्योपदेशानुपपत्तिरिति वाच्यम्; द्वयोरपि बुद्धयोरेकपुरुषविषयत्वोक्त्या कदा कस्या अनुष्ठानमिति विवेकानवधारणेन ज्ञानकर्मसमुच्चयवादेऽपि तादृशप्रश्नस्योपपत्तौ बाधकाभावात्; 'धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते[१२]' इत्यादिना क्वचित् कर्मप्राधान्यस्यावगतौ 'श्रेयान् द्रव्यमयाद् यज्ञाज्ज्ञानयज्ञः परन्तप[१३]', सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि[१४]' इत्यादिना क्वचिच्च ज्ञान-

---

१ श्रीमद्भगवद्गीता ।४।३३ ।
२ मुण्डकोप० ।२।२।५ ।
३ छान्दोग्योपनिषत् ।७।१।३ ।
४ तैत्तिरीयोपनिषत् ।२।१ ।
५ मुण्डकोपनिषत् ।३।२।९ ।
६ मनुस्मृतिः ।१२।१०४ ।
७ छान्दोग्योपनिषत् ।८।१।६ ।
८ श्रीमद्भगवद्गीता ।३।८ ।
९ श्रीमद्भगवद्गीता ।८।७ ।
१० श्रीमद्भगवद्गीता ।२।४७ ।
११ श्रीमद्भगवद्गीता ।२।३९ ।
१२ श्रीमद्भगवद्गीता ।२।३१ ।
१३ श्रीमद्भगवद्गीता ।४।३३ ।
१४ श्रीमद्भगवद्गीता ।४।३६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राधान्यस्यावगतौ प्रकारभेदमाश्रित्य समाधानसम्भवात् । 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज[१]' इत्यत्रापि 'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु[२]' इत्यादिवचनैकवाक्यतया कर्मापरित्यागेनैव ज्ञानविधिः प्रतीयते । एवञ्च ज्ञानकर्मसमुच्चय एव श्रीमद्भगवद्गीतायास्तात्पर्यमवबुद्ध्यत इति मतम्, तदापातरमणीयम्; अविद्वांसमर्जुनं व्याजीकृत्य कर्मयोगस्योपदिष्टत्वात्, विदुषि तद-सम्भवात् ;

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ।।
नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन[३] ।

इत्यविदुषः पृथक्कृत्य विदुषः कर्मनिषेधात् ।

लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्[४] ।।

इति स्पष्टरूपेण पृथग्वचनाच्च, अन्यथा 'द्विविधा' इत्यत्र 'विधा'-पदार्थानुपपत्तिः स्यात् ।

ज्यायसी चेत् कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव[५] ।।

इत्यर्जुनप्रश्नस्यापि ज्ञानकर्मसमुच्चयपक्षेऽनुपपद्यमानत्वाच्च । ज्ञानैकसाधनतावाद एव 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज' इति सर्वकर्मत्यागोपदेश उपपद्यते । 'मन्मना भव' इत्यादिवचनन्तु बाह्यकर्मत्यागं ज्ञापयज्ज्ञानस्य कर्मसमुच्चयं वारयति । न ह्यर्जुनमेकं प्रत्येव श्रीमद्भगवद्गीतोपदेशः 'ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप[६]' इति सर्वान् प्रत्येव तं व्याजीकृत्य गीतोपदेशस्य प्रवृत्तत्वेन नोभयोरेकपुरुषाश्रयतानियमो व्यवस्थापयितुं शक्यः, येन कर्मयोगज्ञानयोगयोः प्रकारभेदमात्रमुपदिष्टं स्यात् । अत एव—'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।' 'बहिःसूत्रं त्यजेद् विद्वान् योगमुत्तममाश्रितः[७]', इत्यादिवचनस्यापि संगतिः, ज्ञानकर्मसमुच्चयवादे कर्माङ्गयज्ञोपवीतत्यागादि-विधेरनुपपत्तेः ।

ननु

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः[८] ।।

इति मनुवचनात् कर्मणामावश्यकत्वमिति वाच्यम्; एतद्वचनस्याविरक्तविषयत्वात्; अन्यथा 'तस्याश्रम-विकल्पमेके ब्रुवते' यमिच्छेत्तमावसेदि[९]'ति समाप्तब्रह्मचर्याश्रमस्य विकल्पप्रतिपादकगौतमस्मृतिविरोधः

---

१ श्रीमद्भगवद्गीता ।१८।६६ ।
२ श्रीमद्भगवद्गीता ।१८।६५ ।
३ श्रीमद्भगवद्गीता ।३।१७-१८ ।
४ श्रीमद्भगवद्गीता ।३।३ ।
५ श्रीमद्भगवत्गीता ।०।१ ।
६ श्रीमद्भगवद्गीता ।१८।४१ ।
७ जीवन्मुक्तिविवेके १५३ पृ० उद्धृतः ।
८ मनुस्मृतिः ।६।३७ ।
९ गौतमधर्मसूत्रे प्र० १, अध्या० ३, सू० १, पृ० २१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद् वा[१]' इति श्रुत्युपरोधश्च स्यात् । किञ्च,

बहिःसूत्रं त्यजेद् विद्वान् योगमुत्तममाश्रितः[२] ।
शिखा ज्ञानमयी यस्य उपवीतञ्च तन्मयम् ।
स शिखीत्युच्यते विद्वान् नेतरे केशधारिण-[३] ।।

इति शिखायज्ञोपवीतत्यागपुरस्सरसर्वकर्मसंन्यासस्य ज्ञानसाधनत्वेन विधानादपि न तयोः साक्षात्समुच्चयः । तस्माज्ज्ञानकर्मणोः फलेऽसमुच्चयाद् हेतुहेतुमद्भावेन क्रमात् समुच्चय आश्रयितव्यः 'तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति[४]' इतीष्यमाणफलभूतज्ञाने वेदानुवचनादीनां विनियोग-प्रतिपादनात् । अत एव सुष्ठूक्तं श्रीजयन्तभट्टैः—

'ननु नित्यकर्माननुष्ठाने प्रत्यवेयादिति तद्द्वारकबन्धपरिहारोपायत्वात् कर्मापि मोक्षाङ्गं स्यात्, न; संन्यासविधानस्य प्रत्यक्षोपदेशादित्युक्तत्वात्[५]' इति 'अध्यात्मविदश्च ज्ञानकाण्डौपयिकमेव क्रियाकाण्डमन्यत्, साक्षात्तु कर्मसाध्येऽपवर्गे स्वर्गवदपायित्वप्रसङ्गात् कृतकस्य (भावरूपस्य) सर्वस्यानित्यत्वात् तत्त्वज्ञानमेव मोक्षोपाय इत्युक्तम्[६]' इति च ।

एतन्मतानुसारेणैव हि ब्रह्मचारिणामसङ्कीर्णरूपेण द्विधा विभाग उपपद्यते । अन्यथा सर्वेषामपि कृते कर्मणो नान्तरीयकत्वे विभागोऽयं नोपपद्येत । उक्तञ्च भट्टैरेव—'अत एव द्विविधो ब्रह्मचारी भवत्युपकुर्वाणो नैष्ठिकश्च । तत्रोपकुर्वाणो यो ब्रह्मचर्यमनुभूय गृहस्थाश्रममनुभवति, स चापरिपक्व-कषायोऽनुपशान्तगार्हस्थ्यरागः । तमेव प्रतीदमुच्यते—

अनधीत्य द्विजो वेदाननुत्पाद्य च सन्ततिम् ।
अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः ।।' इति ।

'यस्तु परिपक्वकषायः स नैष्ठिक एव ब्रह्मचारी भवति, न गृहस्थाश्रमं प्रतिपद्यते, गृहस्थोऽपि परिपक्वकषायो वानप्रस्थाश्रममुल्लङ्घ्य यतित्वेऽधिक्रियते । यथोक्तम्—'गृहाद्वा वनाद्वा प्रव्रजेदिति[७]' इति च ।

ननु
अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारावती ज्ञेयाः सप्तैता मोक्षदायिकाः[८] ।।

'काश्यां मरणान्मुक्तिः' इत्यादिवचनेन काशीमरणादिकर्मणां तत्त्वज्ञाननैरपेक्ष्येण मुक्तिहेतुत्वम् । एवञ्च मोक्षस्य तत्त्वज्ञानैकसाध्यत्वभङ्गापत्तिरिति चेन्न; वाराणसीप्रायणादेस्तत्त्वज्ञानफलकतायाः

---

१ जाबालोपनिषत् । ४ ।
२ जीवन्मुक्तौ १५३ पृष्ठे ।
३ जीवन्मुक्तौ १५३ पृष्ठे । गौतमधर्मसूत्रेऽपि । १।३।२१ । सूत्रे, २५ पृ० आनुपूर्वीभेदेन ।
४ बृहदारण्यकोपनिषद् । ४।४।१२ ।
५ न्यायमञ्जरीप्रमेयप्रकरणे पृ० ६१ ।
६ न्यायमञ्जरीप्रमेयप्रकरणे पृ० ६१ ।
७ न्यायमञ्जरीप्रमेयप्रकरणे पृ० ८५ ।
८ गरुडपुराणे । २।४६।११४ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आगमादेव प्रतिपादितत्वेन दोषाभावात् । 'काश्यां तु ब्रह्मनालेऽस्मिन् मतो मत्तारमाप्नुयात्[१]' इत्युपनिषद्वाक्ये ब्रह्मनालमृतस्य तारकोपदेशोपलब्धिश्रवणात् । एतदेवाभिप्रेत्य 'अथ काशीमरणादीनां तत्त्वज्ञानोत्पादकत्वे किं मानम्' इत्युपक्रम्य 'मैवम् , तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्रुत्या तत्त्वज्ञानं विना न मुक्तिरिति प्रतिपादनात् काशीमरणादिस्थलेऽपि तत्त्वज्ञानमावश्यकमेव । एवं तत्त्वज्ञानविशिष्टमुक्तित्वापेक्षया लाघवात् किञ्चिदविशेषितस्य मुक्तित्वस्य जन्यतावच्छेदकत्वे सिद्धे तादृशकारणत्वोपपादिकायाः काशीमरणादिजन्यतत्त्वज्ञानस्य कल्पनायास्तन्नियामककारणत्वकल्पनायाश्च फलमुखगौरवसम्पादकत्वेनादोषत्वमित्यपि युक्तमुत्पश्यामः[२]' इत्यादिसिद्धान्तं श्रीहरिरामतर्कवागीशा व्यवस्थापयामासुः । न चैतावता काशीमरणस्य कर्मण अविशेषत्वापत्तिर्मोक्षं प्रति प्रयोजकमात्रत्वादिति वाच्यम्, काशीमरणस्य तत्त्वज्ञानं प्रति साक्षात्कारणत्वेन कर्मणश्चान्तःकरणशुद्ध्युपासनाचित्तैकाग्र्यादिभिस्साधनैः सुदूरपराहतत्वेन तथात्वाभावेन वैशिष्ट्यात्; काशीमरणनिष्ठतत्त्वज्ञानफलकत्वस्य तत्त्वज्ञैराप्तपुरुषैः,

'यत्र कुत्रापि वा काश्यां मरणे स महेश्वरः ।
जन्तोर्दक्षिणकर्णे तु मत्तारं समुपादिशेत्[३] ॥'

इत्यादिभिर्वचनैश्च प्रमाणितत्वात् ।

न केवलं काशीमरणादिस्थल एवेयं व्यवस्था अपितु योगाभ्यासादिना मुक्तिबोधकवाक्यस्थलेऽपि । अत एव योगशास्त्रे चित्तवृत्तिनिरोधानन्तरं गुणानां प्रतिप्रसवरूपकैवल्यस्य सम्पत्तौ तत्त्वज्ञानस्य मुक्तिं प्रति व्यभिचारो मा भूदिति मनसि निधाय 'योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः[४]' इति सूत्रेण योगाङ्गानुष्ठानमोक्षयोर्मध्ये ज्ञानदीप्तिर्व्यवस्थापिता । एतदेवाभिप्रेत्य तर्कवागीशैरुक्तम्—

'तत्त्वज्ञानन्तु कस्यचिद् योगाभ्यासवशात्, कस्यचित् काशीमरणात् , कस्यचिद् भगवन्नामग्रहणपूर्वकमरणादितो जायते । न चैषां परस्परव्यभिचारेण कारणत्वमसम्भवीति वाच्यम्, अन्यथा कारणवैशिष्ट्यं कार्यतावच्छेदककोटौ निवेश्य व्यभिचारवारणसम्भवात्[५]' इति ।

निरस्यन्तश्च महता संरम्भेण ज्ञानकर्मसमुच्चयवादं ते व्यवस्थापयामासुर्ज्ञानैकसाधनतावादं ग्रन्थान्ते—

'यत्तु स्वाश्रमविहितसन्ध्यावन्दनादिसहकृतमेव तत्त्वज्ञानं निःश्रेयसहेतुः । तथा च स्मृतिः—

उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः ।
तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतम् ॥ इति ।

ज्ञानं प्रधानं न च कर्महीनं कर्म प्रधानञ्च न बुद्धिहीनम् ।
तस्मात्तयोरेव भवेत् प्रसिद्धिर्न ह्येकपक्षो विहगः प्रयाति ॥ इति ।

---

१ मुक्तिकोपनिषद् । १।१६ ।
२ मुक्तिवादे पृ० ८८-८९ ।
३ मुक्तिकोपनिषद् । १।२०-२१ ।
४ योगसूत्रम् । २।२८ ।
५ मुक्तिवादे पृ० ८१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदसत् , तादृशकर्मणां तत्त्वज्ञानप्रतिबन्धकदुरितनिवर्त्तकतया प्रागपेक्षितत्वेनापातत उपकारकतयैव उभाभ्यामित्युपपत्तेस्तेषां मुक्तिकारणत्वे मानाभावादिति[१]' इति ।

औपनिषदास्तु 'अलेपकं सर्वगतं यदद्वयं तदेव चाहम्[२]', 'अहमेव इदं सर्वम्[३]' इत्याकारक-निष्ठात्मके ज्ञानयोगे कर्तृत्वज्ञानशून्यतायाः, कर्मयोगे तु तद्वत्ताया अवश्यं वक्तव्यत्वेन तयोः समुच्चयो व्याहतः । एवं सत्येव 'ज्यायसी चेत् कर्मणस्ते[४]' इत्यादिरीत्या अर्जुनप्रश्नस्याप्युपपत्तिः । न हि कथमपि ज्ञानकर्मणोः समसमुच्चयः सम्भवति, कर्मणो यथाकथञ्चित् पुरुषसंस्कारद्वारा सन्निपत्योपकारकत्वेनोपयो-गाज्ज्ञानवत्साक्षान्मोक्षसाधनत्वाभावात् । तदुक्तं पूज्यपादश्रीशङ्कराचार्यैः—

'तस्माद् गीताशास्त्रे ईषन्मात्रेणापि श्रौतेन स्मार्तेन वा कर्मणा आत्मज्ञानस्य समुच्चयो न केनचिद् दर्शयितुं शक्यः[५]' इति ।

अन्यत्रापि तैः प्रतिक्षिप्तो ज्ञानकर्मसमुच्चयवादः—

'यत्तु कैश्चिज्जल्प्यते—नित्यानि नैमित्तिकानि कर्माण्यनुष्ठीयन्ते प्रत्यवायानुत्पत्तये, काम्यानि प्रतिषिद्धानि च परिह्रियन्ते स्वर्गनरकानवाप्तये, साम्प्रतदेहोपभोग्यानि च कर्माण्युपभोगेनैव क्षप्यन्त इत्यतो देहपातादूर्ध्वं देहान्तरप्रतिसन्धानकारणाभावात् स्वरूपावस्थानलक्षणं कैवल्यं विनापि ब्रह्मात्मतयैवंवृत्तस्य सेत्स्यतीति । तदसत्, प्रमाणाभावात् । न ह्येतच्छास्त्रेण केनचित् प्रतिपादितं मोक्षार्थीत्थं समाच-रेदिति । स्वमनीषया त्वेतत्तर्कितम् यस्मात् कर्मनिमित्तस्संसारः, तस्मान्निमित्ताभावान्न भविष्यतीति । न चतत् तर्कयितुमपि शक्यते, निमित्ताभावस्य दुर्ज्ञानत्वात्[६]' इति ।

पुनरन्यत्रापि—'ससाधनं कर्म संन्यस्य शरीरयात्रामात्रचेष्टो यतिर्ज्ञाननिष्ठो मुच्यते[७]' इति ।

ननु तत्त्वज्ञानेनैव मोक्षसम्भवे कर्मणां तत्रोपयोगाभावात् पूर्वकृतकर्मणां वैयर्थ्यं प्राप्तम् । न चैतद्युक्तम् 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' इति वचनादिति चेन्न; तत्त्वज्ञानाददत्तफलान्येव कर्माणि प्रायश्चित्तादिव विनश्यन्तीत्यभ्युपगमात्, अनन्यथासिद्धशब्दैस्तन्नाशस्य शास्त्रेषु स्पष्टमुक्तत्वात् । तथा च श्रुतिः—

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे[८] ॥ इति ।

स्मृतिरपि—

ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन[९] । इति ।

---

१ मुक्तिवादे पृ० ६१-६१ ।
२ मुक्तिकोपनिषद् । २।७३ ।
३ उत्तरगीता । १।४० ।
४ श्रीमद्भगवद्गीता । ३।१ ।
५ श्रीमद्भगवद्गीताशाङ्करभाष्यम् । २।११। श्लोकावतरणे
६ ब्रह्मसूत्रशाङ्करभाष्यम् । ४।३।१४ ।
७ श्रीमद्भगवद्गीताशङ्करभाष्यम् ।४।२१ ।
८ मुण्डकोपनिषद् ।२।२।८ ।
९ श्रीमद्भगवद्गीता ।४।३७ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'नाभुक्तं क्षीयते कर्म्म' इत्यत्र च प्रायश्चित्तादिस्मृतितः संकोचस्यावश्यकत्वेन कर्म्मपदस्य शब्दबोधितनाशकानाश्यकर्म्मपरत्वमेव लाघवात्। न तु प्रातिस्विकरूपेण तत्तत्प्रायश्चित्तनाश्यान्यकर्म-परत्वम्, गौरवात्; पापपुण्यक्षयहेतूनां बहुतरत्वात्।

ननु कर्मणो ज्ञाननाश्यत्वं भोगद्वारापि सम्भवतीत्यबाधे सम्भवति बाधकल्पना नोचितेति चेत्, न; कर्मणो भोगनाश्यत्वे ज्ञानस्य तत्राकिञ्चित्करतापातात्। न हि भोगस्तत्त्वज्ञानव्यापारः कुत्राप्य-श्रवणात्। कर्म्मणो भोगेनैव नाशसम्भवे तत्त्वज्ञानप्रयुक्ततन्नाशबोधकपूर्वोदाहृतश्रुतिस्मृतीनां वैयर्थ्यापाताच्च।

अधुना तु तत्तन्मते मोक्षसाधनीभूतस्यात्मज्ञानस्य स्वरूपम्, मोक्षरूपफलपर्यन्तं तदावर्तनविधिश्च विमृश्यते।

मीमांसकमतम्—एतन्मतानुसारेणात्मज्ञानमुपनिषत्सु द्विविधं श्रूयते—क्रत्वर्थं पुरुषार्थं चेति। तत्र प्रथमं देहाद्विवेकज्ञानरूपम् 'अविनाशी वाऽरेऽयमात्मा[१]' इत्यादिश्रुत्युपदिष्टम्। तच्च कर्मानुष्ठा-नोपयुक्तम 'ज्योतिष्टोमेन स्वर्गकामो यजेत[२]' इत्यादिविधिवाक्यप्रतिपाद्यकर्मणि प्रवर्त्तकत्वादन्यथा देहातिरिक्तात्मज्ञानं विना प्रवृत्तेरेवासिद्धेः। तथा चोक्तम्—

आत्मा ज्ञातव्य इत्येतन्मोक्षार्थं न च चोदितम्।
कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्य लक्ष्यते[३]॥ इति।

द्वितीयं तु प्राणायामादीतिकर्त्तव्यताविशेषसंयुक्तोपासनात्मकेभ्यः 'आत्मेत्येवोपासीत' इत्यादि-वाक्येभ्यः प्रतिपादितम्; तादृशज्ञानस्य कर्मणि पुरुषे च दृष्टप्रयोजनाभावाददृष्टापेक्षायामङ्गत्वबोधक-श्रुत्याद्यभावेन क्रत्वर्थत्वासम्भवे निःश्रेयसफलकतया पुरुषार्थत्व एव पर्यवसानम्। इदमेवाभिप्रेत्योक्तं श्रीसोमेश्वरभट्टैः—

'अत एवात्मा ज्ञातव्य इत्येतन्मोक्षार्थम्, न च चोदितमित्यत्र तच्छब्दप्रयोगेण संसारिरूपात्म-ज्ञानस्यैव कर्मप्रवृत्तिहेतुतोक्ता। असंसारिरूपात्मज्ञानस्य तु कर्मप्रवृत्त्यर्थत्वायोगात् पुरुषार्थतैव युक्तेत्याशयः[४]' इति।

इदन्त्विहावधेयम्—प्रारब्धकर्मणो भोगेन क्षयसम्भवे काम्यप्रतिषिद्धयोर्वर्जनादेवानुत्पत्त्या धर्माधर्मयोरनुत्पादसिद्धौ नित्यनैमित्तिकयोरनुष्ठानेन च प्रत्यवायाभावोपपत्तावात्मज्ञानस्य तत्रापि द्वितीयप्रकारकस्य कुत्रोपयोगो मीमांसकमत इति विचारणीयम्। न ह्यत्र नैयायिकादिमतवदात्मयाथा-त्म्यज्ञानेन मिथ्याज्ञानापायस्ततो दोषापाय इत्यादिरीत्योपपत्तिसम्भवः, तथा सति प्रसिद्धस्य तन्मत-

---

१ बृहदारण्यकोपनिषद् ।४।५।१४।
२ सांख्यतत्त्वकौमुद्यां द्वितीयकारिकाव्याख्याने ४ पृष्ठ उद्धृतः।
३ श्लोकवार्त्तिकम्, सं० आ० परि० श्लोकः १०३।
४ न्यायसुधा, पृ० ३२६।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धज्ञानकर्मसमुच्चयनिष्ठमोक्षसाधनत्वस्य भङ्गापत्तेः, एतन्मोक्षानुष्ठानप्रकारस्य मीमांसकैरनङ्गीकाराच्च। तथा चैतन्मतानुसारेण मोक्षानुष्ठान आत्मज्ञानस्य वैयर्थ्यमेव प्रतिभाति । तत्रोच्यते—काम्यकर्म्मणां प्रतिषिद्धकर्म्मणां च वर्जनमेव न सम्भवति ऋत आत्मज्ञानात्, काम्यविषयेषु रागस्यासङ्गात्मज्ञानेनैव परिह्लियमाणत्वात्, प्रतिषिद्धविषयेषु रागस्य च कर्म्मप्रवृत्तिहेतुतोपयुक्तसंसारिरूपात्मज्ञानेन प्रथमप्रकारेणापाकरणीयत्वाच्च ।

आत्मज्ञानञ्चैतन्मत उपासनमेव । एवञ्चैतन्मत आत्मानमुपासीतेत्यादिविधौ कीदृशमात्मानमुपासीतेति जिज्ञासायाम्—'य आत्मापहतपाप्मा विजरो विमृत्युः विशोकः विजिघत्सः, अपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्य[1]' इत्यादिवाक्यानि शुद्धात्मस्वरूपं निर्दिशन्ति ।

अत एवासङ्गकूटस्थात्मविषयकविवेचनावसरे भट्टैरुक्तम्—

इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या ।
दृढत्वमेतद्विषयस्तु बोधः प्रयाति वेदान्तनिषेवणेन[2] ॥ इति ।

तथा चैभिर्मोक्षकारणीभूतस्य द्वितीयप्रकारकात्मज्ञानस्य पुरुषार्थरूपस्य सिद्धौ वेदान्तदर्शन एव निर्भरो विहितः। अन्यत्रापि च मीमांसकप्रवरैः स्पष्टरूपेण वेदान्तशास्त्रानुसारेणैवात्मविचारः कर्त्तव्य इत्युपदिष्टम। तथा चोक्तम्—

निषिद्धकाम्यकर्मभ्यः सम्यग्व्यावृत्तचेतसः ।
नित्यनैमित्तिकप्रायश्चित्तप्रध्वस्तदुष्कृतेः ॥
सुखदुःखानुभूतिभ्यां क्षीणप्रारब्धकर्मणः ।
युक्तस्य ब्रह्मचर्याद्यैरङ्गैः शमदमादिभिः ॥
कुर्वाणस्यात्ममीमांसां वेदान्तोक्तेन वर्त्मना ।
मुक्तिः सम्पद्यते सद्यो नित्यानन्दप्रकाशिनी[3] ॥ इति ।

न्यायशास्त्रानुसारेण तद्विमर्शः

न्यायमते तु प्रमाणप्रमेयादीनां षोडशपदार्थानामुद्देशलक्षणपरीक्षासु प्रवर्तनं प्रथमं सोपानम् । तदुक्तं प्रथमसूत्रे—

'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः[4]' इति। ताभिश्च परीक्षाभिरात्मशरीरादीनां द्वादशविधप्रमेयाणां स्वरूपं निष्कृष्यते । तानि च प्रमेयाणि—'आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्[5]' इति सूत्रोक्तानि। तेन चात्मद्वय (जीवात्मपरमात्मरूपात्मद्वय) साक्षात्कार इतरप्रमेयेभ्यो भिन्नत्वेन स्वात्मसाक्षात्कारश्च श्रवणमनननिदिध्यासनैर्दृढीभूत उत्पद्यते। कीदृशञ्चात्मज्ञानमिति विषये

१ छान्दोग्योपनिषद् ।८।७।१ ।

२ पञ्चमसूत्रस्थात्मवादान्ते तर्कपादीयभट्टकारिका पृ० ७२७-७२८ ।

३ मानमेयोदये द्रव्यप्रकरणे पृ० २११ । ४ न्यायसूत्रम् ।१।१।१ ।

५ न्यायसूत्रम् ।१।१।९ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जयन्तभट्टैरुक्तम्—'भिन्नास्तावदात्मान इति गृह्यतामात्मज्ञानमेव च निःश्रेसाङ्गम्[१]' इति ।

साक्षात्कारे च निर्वृत्ते सवासनमिथ्याज्ञाननिवृत्तिः । तन्निवृत्तौ च तत्कार्याणां रागद्वेषमोहानां निवृत्तिः । ततस्तत्कार्ययोर्धर्माधर्मयोरुन्मूलनम् । ततश्च पूर्वोपार्जितकर्मणां कायव्यूहपूर्वकभोगेन क्षयात् शरीरान्तरानारम्भः । तदनन्तरं बाधनालक्षणादेकविंशतिदुःखादत्यन्तविमोक्षोऽपवर्गः । एकविंशतिदुःखानि च शरीरम्; षडिन्द्रियाणि, षड् विषयाः, षड् बुद्धयः, सुखम् , दुःखं चेति । सुखमपि दुःखानुषक्तत्वाद् दुःख मेव । तदुक्तमुद्योतकरैः—'सुखमुपभोक्तुकामेन दुःखमपि भोक्तव्यमेव, दुःखं वा जिहासता सुखमपि हातव्यमेव, सविषान्नवत्[२] ।' इति ।

न चात्र श्रोत्रमनसोर्नित्यतया कथं तन्निवृत्तिरुचितेति वाच्यम् , स्वरूपनाशसहकारिनाशान्यतरलक्षणाया निवृत्तेर्विवक्षितत्वात् , श्रोत्रमनोभिन्नानां स्वरूपनाशलक्षणाया निवृत्तेः, श्रोत्रमनसोश्च धर्माधर्मरूपसहकारिनाशरूपाया निवृत्तेः स्वीकारात् । उपर्युक्तः मोक्षप्रकारो भाष्ये स्पष्टीकृतः—

'यदा तु तत्त्वज्ञानान्मिथ्याज्ञानमपैति, तदा मिथ्याज्ञानापाये दोषा अपयन्ति, दोषापाये प्रवृत्तिरपैति, प्रवृत्त्यपाये जन्मापैति, जन्मापाये दुःखमपैति, दुःखापाये चात्यन्तिकोऽपवर्गो निश्रेयसमिति[३]' इति ।

अथाधुनैतच्छास्त्रानुसारेणापवर्गपर्यन्तं **तत्त्वज्ञानाभ्यासविधिरुपवर्ण्यते** । तत्र हेयरूपसंसारस्य कारणं कर्माणि दोषाश्च । अपवर्गस्य कारणञ्च हेयादिपदार्थानां हेयत्वादिरूपेण दृढसाक्षात्कारपूर्वको दृढात्मसाक्षात्कारः । स च श्रवणमननानन्तरं निदिध्यासनरूपाभ्यासे परिपक्वे जाते, तदुत्तरं समाध्यभ्यासे च सम्पन्ने सति जायते । उक्तञ्च भाष्ये—'एवं चतसृभिर्विधाभिः प्रमेयं विभक्तमासेवमानस्य अभ्यस्यतो भावयतः सम्यग्दर्शनम् , यथाभूतावबोधस्तत्त्वज्ञानमुत्पद्यत[४]' इति ।

सूत्रेऽपि—'समाधिविशेषाभ्यासात्[५]' इति ।

समाधिस्तु 'तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः[६]', 'प्रच्छर्दनविधारणाभ्यां वा प्राणस्य[७]' इत्यादि-योगशास्त्रप्रोक्तेन निरोधकप्रयत्नेन गन्धादिविषयेभ्यो निरुद्धस्य मनसो यस्तत्त्वजिज्ञासाप्रयुक्त आत्मसंयोगस्तद्रूपः; 'तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः[८]' इति सूत्रे मात्रपदेनातिरिक्तसर्व-विषयाणां व्यावर्त्तनसूचनात् ।

ननु इच्छाया अभावेऽपि मेघादिगर्जने सति शब्दादिबुद्धिर्यथा भवत्येव, तथैव गन्धादिविषयस्यापि प्राबल्यात् समाधौ सत्यपि विषयज्ञानं भविष्यत्येव । एवञ्च समाधिबलेनेन्द्रियार्थविषयकं ज्ञानं नोत्पद्यत—इति दुराशामात्रमेव, तथा च दृढसाक्षात्कारात्मकतत्त्वज्ञानानुपपत्तिः, क्षुत्पिपासादिभिर्योगिनोऽपि बाध्यमानत्वेन बाह्यविषयेषु प्रवृत्तेश्च जागरूकतायां सुतरां तदनुपपत्तिश्चेति चेन्न; पूर्वजन्मन्यनुष्ठितसमाधेः संस्कारबलात् पूर्वकृतसुकृतबलाच्चास्मिञ्जन्मनि समाध्युत्पत्तौ तत्त्वसाक्षात्कारे

---

१ न्यायमञ्जर्यां द्वितीयाह्निके पृ० ६२ ।
२ न्यायवार्तिकम् १।१।२ ।
३ न्यायभाष्यम् । १।१।२ ।
४ न्यायभाष्यम् । ४।२।१ ।
५ न्यायसूत्रम् । ४।२।३८ ।
६ योगसूत्रम् । १।३२ ।
७ योगसूत्रम् । १।३४ ।
८ योगसूत्रम् । ३।३ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बाधकाभावात् । 'तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम्[१]', 'पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः[२]' इति भगवतैवोक्तत्वाद् वामदेवादीनां च पूर्वजन्मन्यनुष्ठितसमाधिवलेनैवास्मिञ्जन्मनि तत्त्व-साक्षात्कारोत्पत्तिदर्शनात् । तदुक्तम् 'पूर्वकृतफलानुबन्धात् तदुत्पत्तिः[३]' इति । किञ्च समाधिप्रति-बन्धकपरिहारार्थमेवारण्ये गुहायां नदीतीरादिनिर्जनप्रदेश एव वा समाध्यनुष्ठानविधेर्योगशास्त्रेणोपदेशः क्रियते । उक्तञ्च महर्षिभिः'अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः[४]' । भगवतापि—'योगी युञ्जीत सततमात्मानं रहसि स्थितः[५]' इति । साक्षात्कारे च दृढे जाते पश्चात् पूर्वोक्तप्रतिवन्धका अपि न समाधिं निरोद्धुं शक्नुवन्ति । यथा हि मनसोऽन्यत्र संलग्नतादशायामिन्द्रियसंयुक्तस्यापि विषयस्य ग्रहणं न भवति, तथा मनसि समाधिसंलग्नेऽप्यर्थप्राबल्यस्याकिञ्चित्करत्वेन न समाध्यनुत्पत्तिः, न वा तत्त्वसाक्षात्कारानुपपत्तिरिति । तदुक्तम्—'नैनां प्राप्य विमुह्यति[६], इति 'सम्यगालोचनात् सत्याद् वासना प्रविलीयते[७]' इति च ।

सम्यगालोचनाद्वासनाविलयं शब्दान्तरेण भणति न्यायभाष्यम्—'वर्जनं त्वस्याभेदेनावयवसंज्ञा केशलोममांसशोणितास्थिस्नायुशिराकफपित्तोच्चारादिसंज्ञा । तामशुभसंज्ञेत्याचक्षते । तामस्य भावयतः कामरागः प्रहीयते[८]' इति ।

अन्यत्रापि यथार्थदर्शनस्य रागप्रहाणकत्वमुक्तम्—

अत्रापि चान्यत्र च विद्यमानपदार्थसम्मर्शनमेव कार्यम् ।
यथाप्रकारार्थगुणाभिमर्शनं सन्दर्शयत्येव तदीयदोषम्[९] ॥ इति ।
असङ्गव्यवहारत्वाद् भवभावनवर्जनात् ।
शरीरनाशदर्शित्वाद् वासना न प्रवर्तते[१०] ॥' इति ।

मुक्तावस्थायां च धर्माधर्मयोरभावेन शरीरेन्द्रियाणामभावात् सुतरामेव सर्वदुःखविमोक्षरूपोऽप-वर्ग इति सर्वं सुसमञ्जसम् ।

समाधेरभ्यासस्तु योगशास्त्ररीत्या भवतीति नैयायिकप्रभृतयः सर्वेऽप्यास्तिका आमनन्ति । उक्तञ्च न्यायसूत्रे—'तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः[११] ।' इति । तत्र सर्वैरपि 'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः[१२]' इति लक्षणलक्षिता यमाः पालनीयाः, सर्वेषामपि वर्णाश्रमिणामेतेष्वनधिकारसूचकश्रुतिस्मृत्याद्यभावात् । 'शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः[१३]' इति सूत्रोक्ता नियमास्तु प्रतिवर्णाश्रमं भिन्नाः 'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः[१४]' इति

---

१ श्रीमद्भगवद्गीता । ६।४३ ।
२ श्रीमद्भगवद्गीता । ६।४४ ।
३ न्यायसूत्रम् । ४।२।४१ ।
४ न्यायसूत्रम् । ४।२।४२ ।
५ श्रीमद्भगवद्गीता । ६।१० ।
६ श्रीमद्भगवद्गीता । २।७२ ।
७ मुक्तिकोपनिषद् । २।१७ ।
८ न्यायभाष्यम् । ४।२।३ ।
९ सर्ववेदान्तसिद्धान्तसारसंग्रहे श्लोकः २६ तमः ।
१० मुक्तिकोपनिषद् । २।२८ ।
११ न्यायसूत्रम् । ४।२।४६ ।
१२ योगसूत्रम् । २।३० ।
१३ योगसूत्रम् । २।३२ ।
१४ श्रीमद्भगवद्गीता । १८।४५ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भगवद्वाक्येन तथैव सूचनात् तत्र च कर्मपदस्य शौचसन्तोषतपःप्रभृतितत्तद्वर्णाश्रमविहितनियमस्योपलक्षकत्वात् । एतदेवाभिप्रेत्य न्यायभाष्येऽप्युक्तम्—

'यमः समानमाश्रमिणां धर्मसाधनम्, नियमस्तु विशिष्टम्[1]' इति । अन्यान्यपि योगाङ्गानि समाध्यभ्यासार्थमुपादेयानीति सूचनार्थं यमनियमाभ्यामिति पदात्[2] पृथग्योगाच्चेत्यादेरुपादानम् । तथा चावशिष्टानि आसनप्राणायामप्रत्याहारधारणाध्यानान्यपि समाध्यर्थमनुष्ठेयानि । तत्रासनानि करचरणादिसंस्थानसंयोगविशेषरूपाणि सिद्धस्वस्तिकशीर्षपद्मादीनि, कानिचिद्

आसनेन रुजं हन्ति प्राणायामेन पातकम् ।
धारणाभिश्च दहेद् दोषान् ध्यानेनानीश्वरान् गुणान्[3] ॥

इति वचनाद् रुजोहननद्वारा, कानिचिच्च साक्षादेव चित्तैकाग्र्यसाधनानीति ध्येयम् । श्वासप्रश्वासयोर्गतिविच्छेदरूपः प्राणायामः साक्षादेव चित्तैकाग्र्यसाधनम्, समाधिप्रतिबन्धकदुरितप्रतिबन्धी च[4] । तदुक्तम्—

द्वे बीजे चित्तवृक्षस्य प्राणस्पन्दनवासने ।
एकस्मिंश्च तयोः क्षीणे क्षिप्रं द्वे अपि नश्यतः[5] ॥ इति ।
अध्यात्मविद्याधिगमः साधुसङ्गतिरेव च ।
वासनासम्परित्यागः प्राणस्पन्दनिरोधनम् ॥
एतास्ता युक्तयः पुष्टाः सन्ति चित्तजये किल ।[6] इति ।

प्राणायामे च सिद्धे बाह्यविषयेभ्यो निरोधरूपः प्रत्याहारः सिध्यति । तदुक्तम्—

'स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः[7]' इति । ततः क्रमेण 'देशबन्धश्चित्तस्य धारणा[8]', 'तत्र प्रत्ययैकतानता ध्यानम्[9]', तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः[10]' इत्यादिलक्षणलक्षिता धारणाध्यानसमाधयः सिध्यन्ति । ततश्च तत्त्वसाक्षात्कार इति ।

इदन्त्विहावधेयम्—निदिध्यासनात् पूर्वं श्रवणकाल एव श्रीगुरुचरणसकाशेऽध्ययनकालावच्छेदेन गृहीतपदार्थानां युक्तीनां च पौनःपुन्येन चिन्तनं सतीर्थ्यैर्मोक्षार्थिभिर्विशिष्टैश्च कृततत्त्वसाक्षात्कारैः सार्धं संवादो ज्ञानपरिपाकार्थमावश्यकस्तेनैव वर्तमानसंशयानाम्, मननकाले च सम्भावितसंशयानामुच्छित्तिर्भवति । अन्यथैकाक्यवस्थायां कस्यचित् संशयस्य स्फुरणे स्वयं तद्वारणार्थमधिकः कालः

---

१ न्यायभाष्यम्।४।२।४६। सूत्रे।
२ ।४।२।४६। सूत्रस्थात् 'यमनियमाभ्याम्' इति पदादिति बोद्धव्यम्।
३ योगचूडामण्युपनिषद्।१०९।
४ योगसूत्रे।२।४९। तम उक्तः।
५ मुक्तिकोपनिषद्।२।२८।
६ मुक्तिकोपनिषद्।२।४४-४५।
७ योगसूत्रम्।२।५४।
८ योगसूत्रम्।३।१।
९ योगसूत्रम्।३।२।
१० योगसूत्रम्।३।३।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिश्रमश्चापेक्षितः स्यान्निदिध्यासनादीनाञ्च तेन विलम्बापत्तिः। तदुक्तं सूत्रद्वयेन—'ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः[१]।' 'तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोऽर्थिभिरनुसूयुभिरभ्युपेयात्[२]' इति च।

वैशेषिकशास्त्रानुसारेण मोक्षार्थं ज्ञानानुष्ठानप्रकारः

पूर्ववद् वैशेषिकशास्त्रानुसारेणापि यदा जीवो निष्कामः सन् तत्त्वज्ञानसाधनं योगात्मकं यमनियमादिरूपमात्मकर्म सम्यगनुतिष्ठति, तदाऽस्य साधनपरिपाके जाते आचार्योपसङ्गमनानन्तरं द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्यवैधर्म्याभ्यां विवेचनेन जातं यत्तत्त्वज्ञानं तत्पूर्वकादात्मतत्त्वसाक्षात्कारादीश्वरोपासनासहितात् कैवल्यं भवतीत्यभ्युपेयते। तदुक्तम्—

धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्[३]।' इति, 'आत्मकर्मसु मोक्षो व्याख्यातः[४]' इति च।

अत्रापि शास्त्र आत्मकर्मरूपो योगो वैराग्याभ्यासाभ्यामात्ममात्रनिष्ठे मनसि कर्मानुगुणप्रयत्नाभावात् कर्मानारम्भरूपः, फलतश्च जीवस्य दुःखहेतूनां प्रमाणादिवृत्तीनामभावरूपः। उक्तं च—

'तदनारम्भ आत्मस्थे मनसि, शरीरस्य दुःखाभावः संयोगः[५]' इति। तदेतत् सर्वमभिप्रेत्योक्तं श्रीप्रशस्तपादाचार्यैरपि—

'ज्ञानपूर्वकात्तु कृतादसंकल्पितफलाद् विशुद्धे कुले जातस्य दुःखविगमोपायजिज्ञासोराचार्यमुपसंगम्योत्पन्नषट्पदार्थतत्त्वज्ञानस्याज्ञाननिवृत्तौ विरक्तस्य रागद्वेषाद्यभावात् तज्जयोर्धर्माधर्मयोरनुत्पत्तौ पूर्वसञ्चितयोश्चोपभोगान्निरोधे सन्तोषसुखं शरीरपरिच्छेदं चोत्पाद्य रागादिनिवृत्तौ निवृत्तिलक्षणः केवलो धर्मः परमार्थदर्शनजं सुखं जनयित्वा निवर्तते। तदा निरोधान्निर्वीजस्यात्मनः शरीरादिनिवृत्तिः। पुनः शरीराद्यनुत्पत्तौ दग्धेन्धनानलवदुपशमो मोक्ष[६]' इति।

सांख्यशास्त्रानुसारेण तदनुष्ठानप्रकारः

एतन्मतानुसारेग प्रकृतिपुरुषयोरविवेककृतः संयोग एव बन्धः, प्रकृतिपुरुषान्यतासाक्षात्कारादविवेकोच्छेदे मोक्ष इत्यादिविषयाः 'सत्त्वपुरुषान्यताप्रत्ययः साक्षात्कारो दुःखापघातको हेतुः[७]; 'प्रधानेन संभिन्नः पुरुषस्तद्गतं दुःखत्रयं स्वात्मन्यभिमन्यमानः कैवल्यं प्रार्थयते, तच्च सत्त्वपुरुषान्यताख्यातिनिबन्धनम्[८]' इत्यादिविषयाः सांख्यतत्त्वकौमुद्यादिग्रन्थेषु सम्यङ्निरूपिताः।

---

१ न्यायसूत्रम्। ४।२।४७।
२ न्यायसूत्रम्। ४।२।४८।
३ वैशेषिकसूत्रम्। १।१।४।
४ वैशेषिकसूत्रम्। ६।२।१।
५ वैशेषिकसूत्रम्। ५।२।१६।
६ प्रशस्तपादभाष्यम् ४२ तमे संसारापवर्गप्रकरणे। (२१४, २१३, २५६ वैशेषिकसूत्रार्थप्रतिपादकमिदम्)।
७ सांख्यतत्त्वकौमुदी २१ कारिकायाम्, पृ० २४४।
८ सांख्यतत्त्वकौमुदी २ कारिकायाम्, पृ० ६१।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

येभ्यो विवेचनीयः पुरुषस्ते पदार्था अपि कारिकायां स्पष्टमभिलक्ष्यन्ते—

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः[1] ।। इति ।

ज्ञानस्य मोक्षकारणत्वं तु—

रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः ।
सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण[2] ।।

इति कारिकाव्याख्याने 'एकरूपेण' 'तत्त्वज्ञानेन विवेकख्यात्या विमोचयति' इति तत्त्वकौमुद्यामुक्तम् ।

कीदृशञ्च तत्त्वज्ञानमिति तूपरिष्टात् कारिकायामुक्तम्—

एवं तत्त्वाभ्यासान्नास्मि, न मे, नाऽहमित्यपरिशेषम् ।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्[3] ।। इति ।

एवञ्च न्यायशास्त्रवदत्रापीतरभिन्नत्वेनात्मज्ञानं मोक्षकारणम् । तत्र त्वसत्कार्यवादावलम्बनेन बन्धावस्थायां तात्त्विको बन्ध आत्मनि च कर्तृत्वादिकं स्वीक्रियते । अत्र तु सत्कार्यवादाभ्युपगमात् पुरुषस्य बन्धमोक्षौ न वास्तवौ, तयोर्बुद्धिधर्मत्वात् 'वाङ्मात्रं न तु तत्त्वं चित्तस्थितेः[4]' इति सूत्रे, 'बन्धादीनां सर्वेषां चित्त एवावस्थानात् तत् पुरुषे वाङ्मात्रं सर्वम्' इति तद्भाष्ये च तथैव प्रतिपादनात् ।

आत्मज्ञानस्य स्वरूपं सम्यग्रूपेण स्पष्टीकृतं गौडपादभाष्ये 'एवमुक्तेन क्रमेण पञ्चविंशति-तत्त्वालोचनाभ्यासादियं प्रकृतिः, अयं पुरुषः, एतानि पञ्चतन्मात्रेन्द्रियमहाभूतानीति पुरुषस्य ज्ञानमुत्पद्यते । नास्मि ना अहमेव भवामि, न मे मम शरीरं तत्, यतोऽहमन्यः शरीरमन्य[5]दित्यादिना ।

योगशास्त्रानुसारेण तद्विमर्शः

योगशास्त्रेऽपि सांख्यशास्त्र इव सत्त्वपुरुषान्यताज्ञानमेव मोक्षकारणं मतम् । तथा चोक्तम्—

'विवेकख्यातिरविप्लवा हानोपाय[6]' इति,

'सत्त्वपुरुषान्यताप्रत्ययो विवेकख्यातिः[7]' इति च ।

तच्च ज्ञानं साक्षात्कारात्मकं संशयविपर्ययभिन्नम्, उपर्युक्तसूत्रे 'अविप्लवा'पदेन तस्य मिथ्या-ज्ञानसंशयाद्यनात्मकत्वसूचनात् । तथा चोक्तम्—

---

१ सांख्यकारिका ।३ ।
२ सांख्यकारिका ।६३ ।
३ सांख्यकारिका ।६४ ।
४ सांख्यप्रवचनसूत्रम् ।१।५८ ।
५ गौडपादभाष्यम् ६४ कारिकायाम् ।
६ योगसूत्रम् । २।२६ ।
७ योगसूत्रव्यासभाष्यम् ।२।२६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'श्रुतमयेन ज्ञानेन विवेकं गृहीत्वा युक्तिमयेन च व्यवस्थाप्य दीर्घकालनैरन्तर्यसत्कारासेविताया भावनायाः प्रकर्षपर्यन्तं समधिगता साक्षात्कारवती विवेकख्यातिर्निवर्तितसवासनमिथ्याज्ञाना निर्विप्लवा हानोपाय[१]' इति ।

तादृशं च ज्ञानं प्रणवोपासनापूर्वकमभ्यासवैराग्याभ्यां चित्तवृत्तिनिरोधानन्तरं, निर्विचारवैशारद्येनाध्यात्मप्रसादानन्तरं वा सबीजसमाधिपूर्वकनिर्बीजसमाधौ जातायां गुणानां प्रतिप्रसवस्य सम्पद्यमाने सति; अथवा यमनियमादियोगाङ्गानुष्ठानादशुद्धिक्षये सति सम्पद्यते । सम्पन्ने च तादृशज्ञाने चितिशक्तेः स्वरूपप्रतिष्ठा वा, द्रष्टुः स्वरूपेऽवस्थानं वा कैवल्यात्मकं पर्यवसन्नं भवति ।

नन्वस्मिन् शास्त्रे 'तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः[२]' इति सूत्रतद्भाष्यादौ निर्विकल्पकज्ञानस्य मोक्षहेतुत्वमुक्तम्, तन्न युक्तम्, 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादिश्रुत्यनुरोधादात्मविशेष्यकस्यैव ज्ञानस्य मोक्षहेतुत्वावगमान्निर्विकल्पकज्ञानस्य चात्मविशेष्यकत्वानवगाहनादिति चेत्, सत्यम्; योगशास्त्रेण जायमानस्य निर्विकल्पकज्ञानस्यात्मविशेष्यकज्ञानद्वारेणैव मोक्षकारणत्वं कल्पनीयम्, न तु साक्षात्, तस्य निर्विशेष्यकनिष्प्रकारकत्वेन कस्यापि प्रतिबन्धकत्वप्रतिबध्यत्वाभावाद अविद्यानिवर्त्तकत्वानुपपत्तेः । तथाहि—'अहं गौरः, कर्त्ता, सुखी, दुःखी' इत्यादिज्ञानरूपाया एव ह्यविद्यायाः श्रुतिस्मृत्यादौ संसारानर्थहेतुत्वस्य सिद्धत्वेन, 'नाहं गौर' इत्यादिरूपाया विवेकख्यातेरेव तद्ग्राह्याभावावगाहित्वेन प्रतिबन्धकत्वमुचितम्, अन्यथा शुक्तिनिर्विकल्पकस्यापि 'इदं रजतम्' इति ज्ञानविरोधित्वापत्तेः । एवञ्च सांख्यसम्मतमात्मज्ञानस्यैव मोक्षहेतुत्वमत्रापि पर्यवसन्नमिति प्रतिभाति ।

विशिष्टाद्वैतमतानुसारेण तद्विमर्शः

एतन्मते भक्तिरेव मोक्षसाधनम्, भगवत्कैङ्कर्यमेव परमपुरुषार्थः । भक्तिस्तु महनीयविषये प्रीतिरूपाऽवस्थाभेदात् परमभक्त्यादिरूपत्वमवाप्नोति । कर्मणो ज्ञानस्य वा, तयोः समुच्चयस्य वा नैतन्मते साक्षान्मोक्षसाधनत्वम्; अपि तु भक्तिद्वारेणैव । तदुक्तम्—'मोक्षोपायत्वेनोक्तानां कर्मयोगज्ञानयोगप्रभृतीनां भक्तिद्वारैव साधनत्वम्[३]' इति । श्रीवेदान्तदेशिकैरपि—'भक्तियोगः परमप्राप्त्युपायभूतः । तदशक्तस्य तद्भक्तियोगसिद्ध्यर्थमवलोकनमपेक्षितम् । तस्य च ज्ञानयोगकर्मयोगौ द्वौ पृथगुपायौ । तत्र ज्ञानयोगः स्वात्मावलोकनेऽन्तरङ्गः । तथापि प्रथमं स दुष्करः । तदनधिकारिणस्तुल्यफलः कर्मयोग एव कार्यः । तदधिकारिणोऽपि व्यपदेश्यस्य लोकसङ्ग्रहार्थं कर्मयोग एव कार्यः । अशक्तस्य ज्ञानयोगशक्ति कर्मयोग एवोत्पादयति । तदा कर्मयोगं परित्यज्य ज्ञानयोगमनुतिष्ठतोऽपि न दोषः[४]' इति ।

तत्र भक्तियोगो नाम योगशास्त्रप्रोक्तयमाद्यष्टाङ्गयोगपूर्वकस्तैलधारावदविच्छिन्नस्मृतिसन्तानरूपः । तत्साधनानि श्रीनिवासदासैरुक्तानि—

---

१ व्यासभाष्यतत्त्ववैशारदी । २।२६ । २ योगसूत्रम् । १।५१ ।
३ यतीन्द्रमतदीपिकासप्तमावतारे, पृ० ६१-६२ । ४ न्यायसिद्धाञ्जने, पृ० ३०७ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'स च विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षरूपसाधनसप्तकजन्यः। तत्र विवेको नाम जात्याश्रयनिमित्तादुष्टान्नात् कायशुद्धिः। विमोकः कामानभिष्वङ्गः। अभ्यासः पुनः पुनरालम्बनसंशीलनम्। शक्तितः पञ्चमहायज्ञाद्यनुष्ठानं क्रिया। कल्याणानि सत्यार्जवदयादानाहिंसादीनि। अनवसादो दैन्याभावः। अनुद्धर्षस्तुष्टचभावः। अतिसन्तोषश्च विरोधीत्यर्थः। एवं साधनसप्तकानुगृहीता भक्तिदर्शनसमानाकाराऽन्तिमप्रत्ययावधिका च भवति[1]।' इति।

अत्र जातिदुष्टं कलञ्जगृञ्जनादि। आश्रयदुष्टत्वं पतितादिस्वामिकत्वम्। निमित्तदुष्टमुच्छिष्टादि।

अत्र मते जीवस्य मोक्षावस्थायां शेषात्मकपर्यङ्कारोहणं स्वरूपाविर्भाव ईश्वरवदपहतपाप्मत्वसत्यसङ्कल्पत्वादिगुणवत्ता च भवन्ति।

औपनिषददर्शनानुसारेणान्यरीत्या ज्ञानानुष्ठानप्रकाराणां पर्यालोचनम्

औपनिषदास्तु वैशेषिकसम्मतषट्पदार्थतत्त्वज्ञानं नैयायिकाभिमतषोडशपदार्थतत्त्वज्ञानं वा न मोक्षहेतुः, प्रमाणाभावात्। कणादगौतमादिप्रणीतशास्त्राणां लोकसिद्धयुक्तिशास्त्रत्वेन श्रुत्यैकगम्ये मोक्षपदार्थे तत्साधने वा प्रामाण्याभावात्, 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति[2]' इत्यादिश्रुतिबाधितत्वाच्च।

किञ्च सामान्याकारेण पदार्थतत्त्वज्ञानस्य हेतुत्वाभ्युपगमे सर्वेषामपि प्रमेयत्वादियत्किञ्चिद्रूपेण तत्सत्त्वेन सर्वमुक्तिप्रसङ्गः स्यात्। विशेषाकारेण सर्वविषयकतत्त्वज्ञानस्य ब्रह्मणोऽप्यशक्यत्वेन मुक्त्यभावप्रसङ्गात्। द्रव्यत्वगुणत्वादिना वा ज्ञानस्य कारणत्वाभ्युपगमे सूत्रस्थविभागवचनादेव तल्लाभेन पृथिवीत्वजलत्वादिना तद्व्युत्पादनस्य वैयर्थ्यप्रसङ्गात्।

नन्वेतेषां सर्वेषां पदार्थानां तत्त्वज्ञानं न मोक्षकारणं किन्त्वेतादृशतत्त्वज्ञानेनात्ममात्रविषयकतत्त्वज्ञानोत्पत्त्या तेनैव मोक्षोत्पत्तिसम्भवस्तया च तस्यैव मोक्षकारणत्वसम्भवे न काऽप्यनुपपत्तिरिति चेन्न, 'अहमस्मि' 'जानामि' इत्याकारकात्मज्ञानस्य सर्वजनसिद्धत्वेन तावतापि सर्वमुक्तेर्दुर्वारतापत्तेः। न चास्य परोक्षत्वं भ्रान्तित्वं वा परैरनुमन्यते। न चैतत्तत्त्वज्ञानस्यापरोक्षप्रमात्वेऽपि मिथ्याज्ञानवासनावशीकृतत्वान्न मिथ्याज्ञाननिवर्त्तकत्वमपि तु पदार्थतत्त्वविषयकश्रवणमननाद्युत्तरकालीन श्रवणादिपरिपाकजनितज्ञानान्तरस्यैव तन्निवर्त्तकत्वमिति वाच्यम्; आत्मापरोक्षप्रमात्वेन वासनानिवर्त्तकत्वाभावस्य तत्रापि समानत्वेन मुक्त्यभावप्रसङ्गस्य तावतापि दुर्निवारत्वात्। एतस्मिंस्तत्त्वज्ञाने किञ्चिद्वैजात्यकल्पने प्रमाणाभावात्।

एवमेव सांख्यादिसम्मतप्रकृतिपुरुषविवेकेऽप्यनुपपत्तिस्तत्रापि सामान्याकारेण ज्ञानस्यातिसुलभत्वाद्विशेषाकारेण चाशक्यत्वात्। प्रपञ्चितञ्चैतत् सर्वं श्रीसदानन्दयतिभिः—

---

१ यतीन्द्रमतदीपिका, पृ० ६२-६३।

२ कठोपनिषद्।२।४।११।; बृहदारण्यकोपनिषद्। ४।४।१९।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'किं च प्रकृतिपुरुषविवेकस्य षट्पदार्थषोडशपदार्थविवेकस्य वा मोक्षहेतुत्वे तु न किमपि प्रमाणं पश्यामः। अलौकिकफलसाधनताया आगमैकवेद्यत्वात्[1]' इति।

ज्ञानकर्मसमुच्चयस्य पूर्वं पर्यालोचितत्वेन मीमांसकमतं पूर्वमेव पर्यालोचितप्रायम्।

कर्माङ्गज्ञानस्य भक्तिद्वारा मोक्षसाधनत्वं वदत उपासनैकसाधनतावादस्यापि न विचारसहत्वं प्रतिभाति,

तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय[2]।
यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते[3]॥
'नेदं यदिदमुपासते[4]'।

'य एवं वेदाऽहं ब्रह्मास्मीति स इदं सर्वं भवति, योऽन्यां देवतामुपासतेऽन्योऽसावन्योऽहमस्मीति न स वेद[5]' इत्यादिश्रुतिशतेन बाधितत्वात्।

अपि चोपासनायाः कैवल्यमुक्तिसाधनत्वेऽभ्युपगम्यमाने—

गुरूपदिष्टमार्गेण ध्यायन् मद्गुणमव्ययम्।
मत्सायुज्यं द्विजः सम्यग् भजेद् भ्रमरकीटवत्[6]॥

इत्यादिनोपासनायाः सायुज्यमुक्तिमात्रसाधनत्वकथनं श्रीभगवतो विरुध्यते। न च सायुज्यमुक्तिरेवात्रोदाहृतश्लोके परम (कैवल्य) मुक्तित्वेन विवक्षिता; तथा सति 'इयं कैवल्यमुक्तिस्तु केनोपायेन[7]' इत्यादिनोपरिष्टात् कैवल्यमुक्ति प्रति पृथक्प्रश्नस्य, 'माण्डूक्यमेकमेवालं मुमुक्षूणां विमुक्तये[8]' इत्यादिना ज्ञानैकसाधनत्वपरकमाण्डूक्योपनिषदस्तत्साधकत्वकथनस्य चासङ्गत्यापत्तेः; भगवतैवाग्रे 'श्रवणमनननिदिध्यासनानि नैरन्तर्येण कृत्वा प्रारब्धक्षयाद् देहत्रयभङ्गं प्राप्योपाधिविनिर्मुक्तघटाकाशवत् परिपूर्णता विदेहमुक्तिः। सैव कैवल्यमुक्तिः[9]' इत्यादिना कैवल्यमुक्तितत्साधनवेदान्तश्रवणादिकमुक्त्वा 'अतः सर्वेषां कैवल्यमुक्तिर्ज्ञानमार्गेणोक्ता[10]' इत्यादिना ज्ञाने तत्साधनत्वं स्फुटतया व्यवस्थाप्य 'न सांख्ययोगोपासनादिभिः' इत्यादिना घोषेणोपासनाद्यन्यमार्गेषु तत्साधनत्वनिषेधाच्च।

---

१ अद्वैतब्रह्मसिद्धौ, प्रथममुद्गरप्रहारे, पृ० ३०।
२ श्वेताश्वतरोपनिषद्।३।८।
३ ईशावास्यो०, श्लो०।६।
४ केनोपनिषद्।१।४।
५ बृहदारण्यकोप०।१।४।१०।
६ मुक्तिकोपनिषद्।१।२४।
७ मुक्तिकोपनिषद्।१।२६।
८ मुक्तिकोपनिषद्।१।२६।
९ मुक्तिकोपनिषत् प्रथमाध्यायान्ते, ऋचा ६।
१० मुक्तिकोपनिषत् प्रथमाध्यायान्ते, ऋचा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वीचक्रुश्चैतन्मतस्था आचार्यवृद्धाः श्रीवरदराजाचार्या अपि भक्तेर्दुरितशान्त्यर्थत्वम्—

यथा हरीतकीखादः क्रियते दोषशान्तये ।
तद्वद्दुरितशान्त्यर्थं क्रियतां हरिकीर्तनम्[१] ।

इत्यादिना ।

प्रसिद्धञ्च दुरितशान्तेर्वेदान्तश्रवणाधिकारयोग्यतोपधायकत्वम् 'प्रशान्तचित्ताय शमान्विताय[२]' इत्यादौ, 'नितान्तनिर्मलस्वान्तः[३]' इत्यादौ च । अत एव 'भक्तिर्ज्ञानाय कल्पत' इत्यभियुक्ता अपि प्रवदन्ति ।

तदनुसारेण ज्ञानानुष्ठानविमर्शः

अत्र मते स्ववर्णाश्रमधर्मानुसारेण निष्कामकर्मद्वाराऽन्तःकरणशुद्धौ जातायामात्मतत्त्वज्ञानानुकूलविवेक-वैराग्यादिसाधनचतुष्टयसम्पत्तिर्जायते । यथा चोक्तं श्रीमद्भगवत्पादैः—

स्ववर्णाश्रमधर्मेण तपसा हरितोषणात् ।
साधनं प्रभवेत् पुंसां वैराग्यादिचतुष्टयम्[४] ।। इति ।

सम्पदनन्तरं चाधिकारे जात ईश्वरकृपया श्रोत्रियब्रह्मनिष्ठसद्गुरोः सान्निध्ये च सत्यध्यारोपाप-वादन्यायेन तत्त्वमसीत्यादिवाक्येभ्य आत्मज्ञानमुपदिश्यते । तदुक्तम्—

सर्वेन्द्रियाणां गतिनिग्रहेण भोग्येषु दोषाद्यवमर्शनेन ।
ईशप्रसादाच्च गुरोः प्रसादाच्छान्ति समायात्यचिरेण चित्तम्[५] ।। इति ।

जन्मानेकशतैः सदादरयुजा भक्त्या समाराधितो
भक्तैर्वैदिकलक्षणेन विधिना सन्तुष्ट ईशः स्वयम् ।
साक्षाच्छ्रीगुरुरूपमेत्य कृपया दृग्गोचरः सन् प्रभु-
स्तत्त्वं साधु विबोध्य तारयति तान् संसारदुःखार्णवात्[६] ।। इति च ।

उक्तश्चायमर्थः 'यमेवैष वृणुते तेन लभ्यः[७]' इत्यादिश्रुतावपि । उपदेशप्रकारोऽपि पूर्वोक्त एवोक्तः—

राजसूनोः स्मृतिप्राप्तौ व्याधभावो निवर्तते ।
यथैवमात्मनोऽज्ञस्य तत्त्वमस्यादिवाक्यतः[८] ।। इति

---

१ शतदूषणीग्रन्थे ४ वादे, ५८ पृष्ठ उद्धृतम् ।
२ मुण्डकोपनिषद् ।१।२।१३।
३ 'निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः' इत्यादिना वेदान्तसारे, पृ० ४ ।
४ अपरोक्षानुभूतौ श्लोकः ३ ।
५ सर्ववेदान्तसिद्धान्तसारसंग्रहे श्लोकः १३६ ।
६ सर्ववेदान्तसिद्धान्तसारसंग्रहे श्लोकः २५८ ।
७ कठोपनिषद् ।१।२।२२ ।
८ वार्तिकमिदं सिद्धान्तलेशसंग्रहे १२० पृष्ठ उद्धृतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्मज्ञानस्य स्वरूपन्तु—

सर्वं खल्विदं ब्रह्म[१]', 'नेह नानास्ति किंचन[२]'।
'अणोरणीयानहमेव तद्वन्महानहं विश्वमहं विचित्रम्[३]'।
'अलेपकं सर्वगतं यदद्वयं तदेव चाहम्[४]'।

इत्यादिश्रुत्या; 'वासुदेवः सर्वम्[५]', 'अहमेव इदं सर्वम्[६]' इत्यादिस्मृत्या च प्रोक्तं प्रमातृसहिताशेषजगतो ब्रह्मभावापत्तिरूपम् । तदेवोक्तम्—'परमार्थतत्त्वविषयमेकमेवेदं सर्वं ब्रह्माकर्तृ च[७]' 'ब्रह्मविद्यायाः फलं सर्वभावापत्तिः' 'अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य[८]' अहमाकाशवत्सर्वम्[९] इत्यादिवाक्येषु । अभियुक्तैरपि वेदान्तसिद्धान्तत्वेनायं श्लोको भण्यते—

श्लोकार्द्धेन प्रवक्ष्यामि शृणु वक्ष्यामि सादरम् ।
ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः ॥ इति ।

इदन्त्विहावधेयम्—पूर्वोक्तसर्वभावापत्तिरूपफलपर्यन्तं ब्रह्मविद्योद्देशेन निष्कामभावनया विहितयज्ञाद्यनुष्ठानाद् नित्यानित्यवस्तुविवेकरूपप्रथमसाधनस्य प्रतिबन्धकीभूतश्चित्तदोषोऽपसार्यते । ततः परं नित्यानित्यवस्तुविवेकेनेहामुत्रफलभोगविरागप्रतिबन्धकचित्तदोषोऽपनीयते । तेन च विषयवैतृष्ण्येन शमदमादिसम्पत्तिप्रतिबन्धकचित्तदोषो निवार्यते । पश्चाच्च शमदमादिभिर्मुमुक्षापरिपन्थिविपरीतप्रवृत्तिहेतुभूतश्चित्तदोषः प्रक्षाल्यते । ततोऽद्वितीयब्रह्मात्मैक्यविषयवेदान्तशक्तितात्पर्यनिश्चयफलकेन तात्पर्यनिर्णायकषड्विधलिङ्गोपेतेन श्रवणेनाद्वितीयब्रह्मात्मैक्ये वेदान्तवाक्यानां प्रामाण्यासम्भवरूपचित्तदोषोऽभिहन्यते । एवं प्रमेयसम्भावनाफलकेन मननाख्यतर्केण प्रमातृबुद्ध्युत्प्रेक्षितशुष्कतर्कप्रयुक्तप्रमेयासम्भवरूपश्चित्तदोषः प्रतिहन्यते । ततश्चान्यानुपरक्तब्रह्मात्मैक्यविषयसंस्कारप्रचयेन निदिध्यासनेनानादिप्रवृत्तदेहात्मज्ञानजनितसंस्कारप्रचयरूपश्चित्तदोषोऽपसार्यते । तदनन्तरञ्चाशेषदोषशून्ये स्वभावेनैव स्वच्छे चित्तदर्पणे वेदान्तवाक्येन जनिता अखण्डवाक्यार्थविषया अप्रतिबद्धा वृत्तिः स्वतः प्रामाण्यादेव कृत्स्नमज्ञानतत्कार्यं च निवर्तयति । तदुक्तम्—

पुरुषापराधमलिना धिषणा निरवद्यचक्षुरुदयापि यथा ।
न फलाय भर्त्सुविषया भवति श्रुतिसम्भवापि तु तथात्मनि धीः ॥
पुरुषापराधविगमे तु पुनः प्रतिबन्धकव्युदसनात् सफला ।
मणिमन्त्रयोरपगमे तु यथा सति पावकाद् भवति धूमलता ॥

---

१ छान्दोग्योपनिषद् ।३।१४।१ ।
२ बृहदारण्कोपनिषद् ।४।४।१९ ।
३ कैवल्योपनिषद् ।२।१ ।
४ मुक्तिकोपनिषद् ।२।७३ ।
५ श्रीमद्भगवद्गीता ।७।१९ ।
६ उत्तरगीता ।१।४० ।
७ श्रीमद्भगवद्गीताशाङ्करभाष्यम् ।२।११ । श्लोकस्योपोद्घाते ।
८ ब्रह्मसूत्रशाङ्करभाष्यम् ।१।१।४ ।
९ आत्मबोधे श्लो० ३५ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरुषापराधनिवृत्तिफलः सकलो विचार इति वेदविदः ।
अनपेक्षातमनुपरुध्य गिरः फलवद् भवेत् प्रकरणं तदतः[१] ।। इति ।

तस्मादौपनिषददर्शने विचारेण केवलं दोषापगम एव भवतीति स्वीक्रियते । न च किञ्चित्फलमाधीयते । तदुक्तम्—

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता[२] ।। इति ।

—◉—

दुष्कार्यां खल्विमां मन्ये ज्ञानाम्भोधिविचारणाम् ।
यथासाध्यप्रयासेन बिन्दुमात्रं विचारितम् ।।
प्रतीता ये गुणा अत्र गुरूणामिति बुद्धयताम् ।
दृष्टाश्च बहवो दोषा ममैवेति सुनिश्चितम् ।।
ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।।

१ संक्षेपशारीरके ।१।१४ ।
२ माण्डूक्यकारिका ।२।३२ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सन्दर्भग्रन्थसूची

ग्रन्थनाम	कर्तृनाम	प्रकाशनस्थानम्	प्रकाशनसमयः (ख्रिष्टाब्दः)
अद्वैतब्रह्मसिद्धिः	श्रीसदानन्दयतिः	कलिकाताविश्वविद्यालयः	१९३२
अद्वैतसिद्धिः	श्रीमधुसूदनसरस्वती	निर्णयसागर, बम्बई	१९३७
अद्वैतसिद्धिलघुचन्द्रिका	श्रीब्रह्मानन्दसरस्वती	,,	१९३७
अपरोक्षानुभूतिः	श्रीशंकराचार्यः	अद्वैताश्रम, हिमालयः	१९७७
अमरकोशः	श्रीअमरसिंहः	निर्णयसागर, बम्बई	१९२९
अवयवगादाधरी	श्रीगदाधरभट्टाचार्यः	चौखम्बा, वाराणसी	१९२६
अनुमितिगादाधरी	,,	,,	१९२६
इष्टसिद्धिः	विमुक्तात्मन्	ओरियण्टल इन्स्टीच्यूट, बड़ौदा	१९३३
ईशावास्योपनिषद्	......	प्राच्यभारतीविद्याप्रकाशनम्, काशी	१९६५
कठोपनिषद्	......	,,	१९६५
केनोपनिषद्	......	,,	१९६५
कारिकावली-मुक्तावली-दिनकरी	श्रीदिनकरभट्टः	चौखम्बा, वाराणसी	१९५१
काव्यप्रकाशः	श्री मम्मटाचार्यः	,,	१९२७
केवलान्वयिजागदीशी	श्रीजगदीशतर्कालङ्कारः	मोतीलाल बनारसीदासः, काशी	१९५७
छान्दोग्योपनिषद्	......	प्राच्यभारतीविद्याप्रकाशनम्, काशी	१९६५
जाबालोपनिषद्	......	,,	१९६५
तत्त्वमुक्ताकलापः	श्रीवेंकटनाथः	३९, सन्निधिवीथी, कञ्जीवरम्	१९४०
तत्त्वसारः	श्रीराखालदास न्यायरत्नः	सरस्वतीभवनम्, वाराणसी	१९३०
तैत्तिरीयब्राह्मणम्	......	महाराजा आफ मैसूर प्रकाशन	१९१३
तैत्तिरीयोपनिषद्	......	प्राच्यभारतीविद्याप्रकाशनम्, काशी	१९६५
देवीभागवतमहापुराणम्	श्रीव्यासः	वेंकटेश्वर (स्टीम) प्रेस	सं० १९६०
न्याय-सूत्रम्	श्रीगौतमः	चौखम्बा, वाराणसी	१९४२
न्यायभाष्यम्	श्रीवात्स्यायनः	,,	१९४२
न्यायवार्तिकम्	श्रीउद्योतकरः	,,	१९२५
न्यायवार्तिकतात्पर्यटीका	श्रीवाचस्पतिमिश्रः	,,	१९२५
न्यायमञ्जरी	श्रीजयन्तभट्टः	,,	१९३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रन्थनाम	कर्तृनाम	प्रकाशनस्थानम्	प्रकाशनसमयः
न्यायकुसुमाञ्जलिः	श्रीउदयनाचार्यः	चौखम्बा विद्याभवनम्, वाराणसी	१६१३
न्यायसुधा	श्रीसोमेश्वरभट्टः	चौखम्बा, वाराणसी	१६०१
न्यायपरिशुद्धिः	श्रीवेंकटनाथः	३८, सन्निधिवीथी, कञ्जीवरम्	१६४०
न्यायसिद्धाञ्जनम्	,,	,,	१६४०
पाणिनिसूत्रम्	श्रीपाणिनिः	चौखम्बा, वाराणसी	१६६५
प्रशस्तपादभाष्यम्	श्रीप्रशस्तपादाचार्यः	वा० संस्कृतविश्वविद्यालयः	१६६३
तस्य न्यायकन्दलीटीका	श्रीधरभट्टः	,,	१६६३
प्रकरणपंचिका	श्रीशालिकनाथः	काशी हिन्दू विश्वविद्यालयः	१६६८
प्रामाण्यवाददीधितिः	श्रीरघुनाथशिरोमणिः	शारदा, लाइब्रेरी, वाराणसी	१६५१
प्रत्यक्तत्त्वप्रदीपिका	श्रीचित्सुखाचार्यः	उदासीन संस्कृतविद्यालयः, काशी	१६५६
पंचदशी	श्रीविद्यारण्यमुनिः	निर्णयसागर, वम्बई	१६४६
पंचदशीव्याख्या	श्रीरामकृष्णः	,,	१६४६
ब्रह्मसिद्धिः	श्रीमण्डनमिश्रः	मद्रास गवर्नमेण्ट ओरियण्टल मैन्यू० सिरीज ४	१६३७
ब्रह्मसूत्रम्	श्रीव्यासः	मोतीलाल बनारसीदासः, काशी	१६६४
ब्रह्मसूत्रशांकरभाष्यम्	श्रीशङ्कराचार्यः	,,	१६६४
ब्रह्मसूत्रश्रीभाष्यम्	श्रीरामानुजाचार्यः	मेडिकल हाल, काशी	१८६१
ब्रह्मसूत्रश्रीभाष्यम्-श्रुतप्रकाशिका	श्रीसुदर्शनसूरिः	,,	१८६१
मानमेयोदयः	श्रीनारायणभट्टः	आडयार, मद्रास	१६३३
मीमांमासूत्रम्	श्रीजैमिनिः	आनन्दाश्रमः, पूना	१६२६
मीमांसासूत्र-भाष्यम्	श्रीशवरमुनिः	,,	१६२६
मुण्डकोपनिषद्	......	प्राच्यभारतीविद्याप्रकाशनम्, काशी	१६६५
मनुस्मृतिः	श्रीमनुः	कला प्रेस, इलाहाबाद	१६१५
मुक्तिकोपनिषद्	......	प्राच्यभारतीविद्याप्रकाशनम्, काशी	१६६५
मुक्तिवादः	श्रीहरिरामतर्कवागीशः	संस्कृत कालेज, कलकत्ता	१६५८
महाभारतम्	श्रीव्यासः	स्वाध्यायमण्डल, पारडी	१६६८
यतीन्द्रमतदीपिका	श्रीनिवासदासः	आनन्दाश्रमः, पूना	१६३४
योगसूत्रम्	श्रीपतञ्जलिः	भारतीयविद्याप्रकाशनम्, काशी	१६६३
योगसूत्र-भाष्यम्	श्रीव्यासः	,,	१६६३
तस्य तत्त्ववैशारदीटीका	श्रीवाचस्पतिमिश्रः	,,	१६६३
वृहदारण्यकोपनिषद्	......	प्राच्यभारतीविद्याप्रकाशनम्	१६६५
वेदान्तसारः	श्रीसदानन्दः	नन्दीवेरीमठ, वाराणसी	१६५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रन्थनाम	कर्तृनाम	प्रकाशनस्थानम्	प्रकाशनसमयः
वेदान्तपरिभाषा	श्रीधर्मराजाध्वरीन्द्रः	ज्ञानसत्रप्रकाशनम्, नर्मदापुरम्	१९६०
योगवासिष्ठम्	श्रीबाल्मीकिः	निर्णसागरयन्त्रालयः, बम्बई	१९३७
वैशेषिकसूत्रम्	श्रीकणादः	मिथिलाविद्यापीठम्, दरभङ्गा	१९५७
व्युत्पत्तिवादः	श्रीगदाधरभट्टाचार्यः	तीरभुक्ति एलनगंज, प्रयागः	१९५३
वैयाकरणलघुमंजूषा	श्रीनागेशभट्टः	चौखम्वा, वाराणसी	१९६३
श्लोकवार्तिकम्	श्रीकुमारिलभट्टः	यूनिवर्सिटी मेन्यूस्क्रिप्ट लाइब्रेरी, त्रिवेन्द्रम्	१९४३
शव्दशक्तिप्रकाशिका	श्रीजगदीशतर्कालङ्कारः	चौखम्वा, वाराणसी	१९३४
श्वेताश्वतरोपनिषद्	......	प्राच्यभारतीविद्याप्रकाशनम्, काशी	१९६५
शक्तिवादः	श्रीगदाधरभट्टाचार्यः	वेंकटेश्वर स्टीम प्रेस, बम्बई	१९५७
सिद्धान्तबिन्दुः	श्रीमधूसूदनसरस्वती	न्यूस मुद्रणालयः, बम्बई	१९२९
सिद्धान्तविन्दुसन्दीपनम्	श्रीपुरुषोत्तमसरस्वती	,,	१९२९
सिद्धान्तविन्दुलघुटीका	श्रीनारायणतीर्थः	,,	१९२९
सर्वदर्शनसंग्रहः	श्रीमत्सायणमाधवाचार्यः	भण्डारकरप्राच्यविद्यासंशोधन-मन्दिरम्, पुणे	१९७८
सामान्यनिरुक्तिगादाधरी	श्रीगदाधरभट्टाचार्यः	साधुवेला, वाराणसी	१९५३
सांख्यकारिका	श्रीईश्वरकृष्णः	चौखम्वा, वाराणसी	१९२०
सांख्य तत्त्वकौमुदी	श्रीवाचस्पतिमिश्रः	,,	१९२०
सांख्यसूत्रम्	श्रीकपिलमुनिः	भारतीयविद्याप्रकाशनम्, काशी	१९६६
सांख्यप्रवचनभाष्यम्	श्रीविज्ञानभिक्षुः	,,	१९६६
सामान्यलक्षणा	श्रीजगदीशतर्कालङ्कारः	दक्षिणामूर्तिमठ, वाराणसी	१९५२
श्रीमद्भगवद्गीता	श्रीव्यासः	मोतीलाल बनारसीदासः, काशी	१९६४
श्रीमद्भगवद्गीता शांकर-भाष्यम्	श्रीशंकराचार्यः	,,	१९६४
सिद्धान्तलेशसंग्रहः	श्रीमदप्पय्यदीक्षितः	गोयनका सं०म०विद्यालयः, काशी	१९३७
College Physics	Weber, Manning, White and Weygand	Tata. Mc. Graw-Hill Publishing Co. Ltd. New Delhi.	1980

— ० —

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुद्धिपत्रम् (Errata)

पृ.सं.पं.	अशुद्धम्	शुद्धम्
घ-१३	किरणवल्याख्य	किरणावल्याख्य
ङ-१८	सवषां	सर्वेषां
च-१७	तापेक्षित	तत्रापेक्षित
२-२०	वैदेशिकदर्शने	वैशेषिकदर्शने
२-२०	द्वव्य	द्रव्य
३-१९	स्थदि	स्थादि
४-१२	वस्तनां	वस्तूनां
६-२६	द्रव्यत्यं	द्रव्यत्वं
७-२	गमाददध्ववसाय	गमादध्यवसाय
८-१४	हानोपादाननु	हानोपादानानु
८-१७	द्वृत्तीनाम	तद्वृत्तीनाम
१०-३	विकासशालिहेनुका	विकासशालिहेतुका
११-१५	बह्माभिन्नात्म	ब्रह्माभिन्नात्म
११-२२	सामानाधिकंण्य	सामानाधिकरण्य
१२-११	चेतन्यमेव	चैतन्यमेव
१३-४	येतीमां, शंका	येतीमां शंकां
१३-११	व्याख्याषां	व्याख्यायां
१६-२	द्वयमित्युक्तं	द्वयमित्ययुक्तं
१६-३०	प्रतियोगी/धर्मत्वाद्	प्रतियोगी धर्मत्वाद्
२०-५	जन्यापरोक्षासा	जन्यापरोक्षसा
२०-१८	व्यापत्व	व्याप्यत्व
२०-२३	पेक्षा स्वगत	पेक्षा, स्वगत
२१-२	(...मिति/न्यायात्) सङ्कोच....	(...मितिन्यायात्)। सङ्कोच....
२१-	$P_1/d_2^2=P_1/d_2^2$	$P_1/d_1^2=P_2/d_2^2$
२२-४	किञ्ति्	किञ्चित्
२२-९	ज्ञानस्योत्पत्तः	ज्ञानस्योत्पत्तेः
२९-११	मुपदिष्टं	मुपदिष्टं
३१-१३	फलमित्यमित्य	फलमित्य
३५-१३	रावधास्यते	रा विधास्यते
३९-६	प्रतक्षं	प्रत्यक्षं
४२-२८	ऽग्नुमान	ऽनुमान
४४-६	द्ववतुः	द्वक्तुः
४७-१०	संशयोः	संशयः
४९-१६	तवेदन्न	तदेतन्न
५१-५	मित्या	मिथ्या
५२-८	ङ्करो	ङ्कुरो
५२-१२	ङ्करो	ङ्कुरो
५३-१	म्भावदिति	म्भवादिति
५३-२८	वद्ध	वृद्ध
५४-४	गृहणाति	गृह्णाति
५४-२३	विषयोकियत	विषयीक्रियत
५६-४	भान्तिरिति	भ्रान्तिरिति
५६-१६	चाङ्गलीयक	चाङ्गुलीयक
६२-१२	रज मर्थात्	रजतमर्थात्
६२-२०	ख्यतिर्नाय	ख्यातिर्नाप्य
६४-२७	न्नन्यो या	न्नन्योन्या
७२-६	सन्किर्ष	सन्निकर्ष
७३-२८	ग्राह्यं क	ग्राह्यं क
७४-२७	मदार्था	पदार्था
७७-२२	पदयौः	पदयोः
७८-१५	सत्वं	सत्त्वं
८२-११	क्ष्येत	क्ष्यते
८२-१८	योगज्जा	योगाज्जा
८५-५	सर्व	सर्व[४]
८६-८	युगग	युग
८८-२	वह्लचादे	वह्न्यादे
८९-१	द्वशायां	दशायां
८९-२७	आ मेत्य	आत्मेत्य
९१-८	स्यादर्शन	स्य दर्शन
९२-६	क र्यत्वा	कार्यत्वा
९२-१७	वाकाशादा	वाकाशाभावादा
९२-१८	भावभिन्नो यो	व्याप्यवृत्तिर्यो
९२-१९	तत्प्रतियोगित्व	तदप्रतियोगित्व
९२-१९	भावो भावरूप इति	भावाभावो व्याप्य-वृत्तिरिति
९५-१७	गौरस्तित वान्	गौरस्तितावान्
९६-६	प्यन त्व	प्यन्यत्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृ.सं.पं.	अशुद्धम्	शुद्धम्
१०१-७	तन्नान्ववय	तन्नान्वय
१०१-१४	वगतग य	वगतगवय
१०१-१९	निर्निब धन	निर्निबन्धन
१०५-१९	शाब्दाध्या	शब्दाध्या
१०७-१२	र्भाव न्न	र्भावान्न
१०८-१८	प्रमाणप्रमाणविरोध	प्रमाणविरोध
१०९-११	वस्तुनि	वस्तुनि[३]
१०-१	घटरूप	घटात्मक
११०-२९	त प्रत्यक्ष	तत्प्रत्यक्ष
११६-३	चर्नं	चर्मं
११६-११	भयाद्नुप	भयादनुप
११६-३१	मतम्···कायाः	मतम् भाषापरिच्छेदीय५७ तमकारिकायाः
११७-२	चतुर्थकरणे	चतुर्थप्रकरणे
११७·५	ब्राह्यानां	वाह्यानां
११९-२२	सम्प द ती	सम्पादयती
१२०-२	पूर्वोवतैव	पूर्वोक्तैव
१२०-६	मचादर्श	मादर्श
१२१-११	वैज्ञानिकः	वैज्ञानिकाः
१२५-५	परमाणौ तस्या अपिचा···	परमाणावपि तस्याश्चा···
१२५-५	वायौ तस्या अपिचा	वायावपि तस्याश्चा
१२८-१०	भवत्येव, नतु चाक्षुषप्रत्यक्षम्	भवत्येव
१३०-२	वत्तया सौरभत्वस्य	वत्तया
१३१-१६	प्रत्येक्ष	प्रत्यक्ष
१३१-१८	समवायन	समवायेन
१३९-१५	विषकत्व	विषयकत्व
१३९-२२	ङदाहरणम्	उदाहरणम्
१४१-३	स्प्रष्टव्येयादा	स्प्रष्टव्येत्यादा
१५३-१२	जहत्दजह	जहदजह
१५३-२०	जहदजहलक्षणा	जहदजहल्लक्षणा
१५९-१०	ग्राह्मत्वा	ग्राह्यत्वा
१५९-२५	तन्न त	तन्न तु
१६८-पादटि० ५	मञ्जपी	मञ्जरी
१६९-१	मतो	मृतो
१७०-२६	९१-९१	९०-९१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाल्मीकि विद्यापीठ पुस्तकालयः

प्रत्यावर्तनतिथिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

294.59212 Acc. No. 19214
Class No ... . Book No .. A.T.M
Author आत्मानन्द परमहंस
Title... वैदिक ज्योतिषशास्त्रम्

Due on	Borrower's Name	Returned on

294.59212 19214
ATM

महेन्द्र संस्कृत विश्वविद्यालय
वाल्मीकि विद्यापीठ
पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu